MSS No. 310 Subject Religion

Name of MSS मार्कण्डेय पुराण

Author

Period Folios 165A

Script Sanskrit Source Prithi Pal Singh

Missing Folios 35A-36, 120A-121, 138A-140

A. no. 310

MSS. 310

...तये ॥ १५ ॥ व्यासवाक्यजलौघेन...
...दं सोमहा... ...जः ॥ कथावि...
...वं स्वा...
...थं च
...या...
...हुना...

Samvat 1856

Page 328

श्रेष्ठमर्थशास्त्रमिदं परम्॥ कामशास्त्रमिदं २

॥मा० र्कं० पु०॥

॥१॥

श्रीगणेशायनमः॥ श्रीसरस्वत्यैनमः॥ ॐ॥ प्रपद्ये देवमीशानं शाश्वतं ध्रुवमव्ययं॥ महादेवं महात्मानं विश्वस्य जग
तः पतिं॥ १॥ यद्योगिभिर्भवभयार्त्तिविनाशयोग्यमासादनं दिनमतीवविभक्तिचित्रैः॥ तद्वः पुनातु हरिपादसरो
जयुग्ममाविष्कृतं क्रमविलंघितभूर्भुवस्वः॥ २॥ पायात्सवः सकलकल्मषभेददक्षः क्षीरोदकुक्षिफणिभोग
निविष्टमूर्त्तिः॥ श्वासावधूतसलिलोत्कलिकाकरालः सिंधुः प्रनृत्तमिव यस्य करोति संगात्॥ ३॥ नारायणं
नमस्कृत्य नरं चैव नरोत्तमं॥ देवीं सरस्वतीं चैव ततो जयमुदीरयेत्॥ ४॥ पृथिव्यां नैमिषं श्रेष्ठं यत्र योगेश्वरो ह
रिः॥ स्वयंभूर्देवदेवेशो यत्र सा लिंगधारिणी॥ ५॥ गोमती सरितां श्रेष्ठा यत्र ते मुनयः स्थिताः॥ मार्कंडेयं मुनिश्रे
ष्ठं जैमिनिः प्रत्यपृच्छत॥ तपःस्वाध्यायनिरतं मार्कंडेयं महामुनिं॥ ६॥ व्यासशिष्यो महातेजा जैमिनिः पर्यपृच्छ
त॥ प्रष्टुमिच्छामि ते ब्रह्मन्संदेहान्भारतादिमान्॥ ७॥ व्यासेनोक्तान्मुनिश्रेष्ठ संदेहांस्तान्ब्रवीतु मे॥ श्रुत्वा त[...]मुनि
शार्दूल कृतकृत्यो भवाम्यहं॥ ८॥ श्रवणं ये करिष्यंति तेषां भवेयं कुतः॥ आधिव्याधिविनाशश्च आयुरा[...]व
र्द्धनं॥ ९॥ वर्द्धनं धनपुत्राणां तत्सुराणां प्रचक्ष्व मे॥ पठनाच्छ्रवणाच्चैव महापापैः प्रमुच्यते॥ १०॥ भगवन्[...]या
न् व्यासेनोक्तं महात्मना॥ पूर्णमस्तमलैः शब्दैर्नानाशास्त्रसमुच्चयैः॥ ११॥ जातिशुद्धिसमायुक्तं साधु[...]द्धो[...] ॥राम॥
शोभितं॥ पूर्वपक्षोक्तिसिद्धांतपरिनिष्ठासमन्वितं॥ १२॥ त्रिदशानां यथा विष्णुर्द्विपदां ब्राह्मणो यथा॥ [...]
नां च सर्वेषां यथा चूडामणिर्वरः॥ १३॥ यथायुधानां कुलिशमिंद्रियाणां यथा मनः॥ [...]र्वशास्त्राणां मह[...]
त्तमं॥ अत्र यत्रार्थश्चैव धर्मश्च कामो मोक्षश्च वर्ण्यते॥ परस्परानुबंधाश्च सानु[...]
चाप्य मोक्षशास्त्रतयोत्तमं॥ १४॥ चतुराश्रमधर्माणामाचारस्थितिसा[...]

धर्मोऽर्थकाममोक्षाननुबध्नाति निष्पादयति। अर्थो धर्मकाममोक्षान्[...] कामे[...]
सानुबंधान् यथा॥ धर्मो धर्ममर्थार्थी कामः कामं॥ मोक्षो[...]मोक्ष[...]

कालेर्याकृष्णद्वैपायनप्रणितः

तथा तात कृतं ह्येतद्व्यासेनोदारकर्मणा॥ यया व्याप्तम महाशास्त्रं विरोधैर्नाभिभूयते॥ १८॥ व्यासवाक्यजलौघेन कुत
र्क तरुहारिणा॥ वेदशैलावतीर्णेन नीरजस्का मही कृता॥ १९॥ कलशब्दमहाहंसो महाख्यानवरांबुजः॥ कथावि
स्तीर्णसलिलः कार्ष्णवेदमहार्णवः॥ २०॥ तदिदं भारताख्यानं बह्वर्थं बहुविस्तरं॥ तत्त्वतो ज्ञातुकामोहं भगवंस्त्वा
मुपस्थितः॥ २१॥ कस्मान्मानुषतां प्राप्तो निर्गुणोपि जनार्दनः॥ वासुदेवो जगत्सृष्टिस्थितिसंहारकारणं॥ २२॥ कथं च
पांडुपुत्राणामेका सा द्रुपदात्मजा॥ पंचानां महिषी कृष्णा ह्यत्र नः संशयो महान्॥ २३॥ भेषजं ब्रह्महत्याया बलदेवो
महाबलः॥ तीर्थयात्राप्रसंगेन कस्माच्चक्रे हलायुधः॥ २४॥ कथं च द्रौपदेयास्ते अकृतदारा महारथाः॥ पांडुनाथा म
हात्मानो वधमापुरनाथवत्॥ २५॥ एतत्सर्वं विस्तरतो ममाख्यातुमिहार्हसि॥ भवंतो मंदबुद्धीनामवबोधकराः॥
सदा॥ २६॥ इति तस्य वचः श्रुत्वा मार्कंडेयो महामुनिः॥ दशाष्टदोषरहितं वक्तुं समुपचक्रमे॥ २७॥ दोषनामानि॥॥
शंकितं भीतमुद्घुष्टमव्यक्तमनुनासिकं॥ विस्वरं विरसं चैव विश्लिष्टं विषमाहतं॥ २८॥ काकस्वरं शिरसितं तथा स्था
नविवर्जितं॥ व्याकुलं तालहीनं च पाठदोषाश्चतुर्दश॥ २९॥ संगीतं शिरसः कंपमल्पकंठमनर्थकं॥ मार्कंडेय उ०॥ क्रिया
कालोयमस्माकं संप्राप्तो मुनिसत्तम॥ ३०॥ विस्तरे चापि वक्तव्ये नैष कालः प्रशस्यते॥ ये तु वक्ष्यंति वक्ष्यत्व घनहं जैमिने त
वा॥ ३१॥ यथावन्नष्टसंदेहसमोहास्ते द्विजोत्तम॥ पिंगाक्षश्च विराधश्च सुपुत्रः सुमुखस्तथा॥ ३२॥ द्रोणपुत्राः खगश्रेष्ठा
स्तत्त्वज्ञाः शास्त्रचिंतकाः॥ वेदशास्त्रार्थविज्ञाने येषामव्याहता मतिः॥ विंध्यकंधरमध्यस्थास्तानु पाश्व च पृच्छ च॥ एव
मुक्तस्तु मुनिना मार्कंडेयेन धीमता॥ ३४॥ प्रत्युवाच ऋषिशार्दूलो विस्मयोत्फुल्ललोचनः॥ जैमिनिरुवाच॥ अत्यद्भुत
मिदं ब्रह्मन्वीनां वागिव मानुषी॥ यत्पक्षिणस्ते विज्ञानमापुरत्यंतदुर्लभं॥ ३५॥ तिर्यग्योन्यां यदि भवस्तेषां ज्ञानं कुतो

नष्टः संदेहजन्यसंमोयेषां

॥ मा० पु० ॥ भवतु ॥ कथं चेंद्रेण तनयाः प्रोच्यंते ते पतत्रिणः ॥ ३६ ॥ कश्च द्रोण इति ख्यातो यस्य पुत्रचतुष्टयं ॥ ज्ञानं गुणवतां तेषां धर्मे
ज्ञानां महात्मनां ॥ मार्कंडेय उ० ॥ शृणुष्वावहितो भूत्वा यद्वृत्तं नंदने पुरा ॥ शक्रस्याप्सरसां चैव नारदस्य च संगमे ॥ ३७ ॥
॥ २ ॥ नारदो नंदने पश्यत्सुप्सरोगणमध्यगं ॥ शक्रं सुराधिराजानं तन्मुखासक्तलोचनं ॥ ३८ ॥ स तेनर्षिवरिष्ठेन दृष्टमात्रः श
२ चीपतिः ॥ समुत्तस्थौ स्वकं चास्मै ददावासनमादरात् ॥ ३९ ॥ तं दृष्ट्वा बलवृत्रघ्नमुत्थितं त्रिदशांगनाः ॥ प्रणेमुस्ताश्च देव
वर्षिं विनयावनताः स्थिताः ॥ ४० ॥ ताभिरभ्यर्चितः सोथ उपविष्टे शतक्रतौ ॥ यथार्हं कृतसंभाषः कथाश्चक्रे मनोरमाः ॥
रे६ ४१ ॥ ततः कथांतरे शक्रस्तमुवाच महामुनिं ॥ देह्याज्ञां नृत्यतामासां तव याभिमतेति वै ॥ रंभाथ वा सुकेशी वाप्युर्वश्यथ
तिलोत्तमा ॥ घृताची मेनका वापि यत्र वा भवतो रुचिः ॥ ४२ ॥ एतच्छ्रुत्वा द्विजश्रेष्ठो वाक्यं शक्रस्य नारदः ॥ विचिंत्याप्स
रसः प्राह विनयावनताः स्थिताः ॥ युष्माकमिह सर्वासां रूपोदार्यगुणाधिकां ॥ आत्मानं मन्यते या तु सा नृत्यतु ममा
ग्रतः ॥ ४३ ॥ न रूपेणालमरूपेण सिद्धिर्नो यस्य रूपतः ॥ चार्वधिष्ठानवन्नृत्यं नृत्यमन्यद्विडंबना ॥ मार्कंडेय उवाच ॥ त
द्वाक्यसमकालं च एकैकस्ये नतास्तु ताः ॥ अहं गुणाधिका न त्वं न त्वं चान्याब्रवीदिदं ॥ ४५ ॥ तासां संभ्रममालोक्य
वो भगवान्पाकशासनः ॥ पृच्छ्यतां मुनिरित्याह वक्ता यो वो गुणाधिकां ॥ शक्रच्छंदानुयाताभिः पृष्टस्ताभिः स नारदः ॥ प्रोवा
च यत्तदा वाक्यं जैमिने तन्निबोध मे ॥ ५० ॥ तपस्यंतं नगेंद्रस्थं या वः क्षोभयते बलात् ॥ दुर्वाससं मुनिश्रेष्ठं तां वो म
न्ये गुणाधिकां ॥ ५१ ॥ मार्कंडेय उ० ॥ तस्य तद्वचनं श्रुत्वा सर्वा वेपितकंधराः ॥ अस्माभिः शक्यते नैतत्तदिदं शश्वच्चक्रिरे ॥ राम: ॥
कथाः ॥ ५२ ॥ तत्राप्सरा वपुर्नाम मंकिक्षोभणगर्विता ॥ प्रत्युवाचाथ यास्यामि यत्रासौ संस्थितो मुनिः ॥ ५३ ॥ अद्य तं दे ॥ २ ॥
हयंतारं प्रमुक्तेंद्रियवाजिनं ॥ स्मरशस्त्रगलद्रश्मिं करिष्यामि कुसारथिं ॥ ५४ ॥ ब्रह्मा जनार्दनो वापि यदि वा

२A

लोहितः॥ तमर्थं यद्य करिष्यामि कामबालक्षतातुरंभ॥५५॥ इत्युक्त्वा प्रजगामाथ प्रालेयाद्रिं वपुस्तदा॥ मुनेस्तपःप्रभावेन
अशांतश्चापदाश्रमं॥५६॥ सा पुंस्कोकिलमाधुर्या यत्रास्ते स महामुनिः॥ क्रोशमात्रस्थिता तस्माद्गायत वराप्सरा॥ तद्गी-
तध्वनिमाकर्ण्य मुनिर्विस्मितमानसः॥ जगाम तत्र यत्रास्ते सा बाला रुचिरानना॥५७॥ तां दृष्ट्वा चारुसर्वांगीं मुनिः
संस्तभ्य मानसं॥ क्षोभणायागतां ज्ञात्वा क्रोधामर्षसमन्वितः॥ उवाचेदं ततो वाक्यं महर्षिः सुमहातपाः॥ यस्माद्दुः-
खार्जितस्येह तपसो विघ्नकारणात्॥६०॥ आगतासि मदोन्मत्ते मम दुःखाय खेचरी॥ तस्मात्सुपर्णगोत्रे त्वं मत्क्रोधा-
त्कुलेषु भविता॥६१॥ जन्म प्राप्स्यसि दुःप्रज्ञे यावद्वर्षाणि षोडश॥ निजरूपं परित्यज्य पक्षिणीरूपधारिणी॥६२॥
चतुरस्त्वं च तनयान्प्रजास्यस्य समरो धमे॥ अप्राप्यते षु च प्रीतिं शस्त्रपूता पुनर्दिवि॥६३॥ वासमाप्स्यसि वक्तव्यं
नोत्तरं ते कथंचन॥ इति वचनमसह्यं कोपसंरक्तदृष्टिश्चलकलवलयां तां मानिनीं श्रावयित्वा॥ तरलतरतरं
गां गां परित्यज्य विप्रः प्रथितगुणगुणौघां संप्रयातः स्वगंगां॥६४॥ ॥इति श्रीमार्कंडेयपुराणे मार्कंडेयो-
पाख्याने प्रथमोध्यायः॥१॥ ॥मार्कंडेय उवाच॥ अरिष्टनेमिपुत्रोभूद्गरुडो नाम पक्षिराट्॥ गरुडस्याभवत्पुत्रः
संपातिरिति विश्रुतः॥ तस्याप्यासीत्सुतः शूरः सुपार्श्वो वायुविक्रमः॥ सुपार्श्वतनयः कुंभिः कुंभेः पुत्रस्तुलो-
लुपः॥ तस्यापि तनयावास्तां कंकः कंदर एव च॥ कंकः कैलासशिखरे विद्युद्रूपेति विश्रुतं॥४॥ ददर्शांबुज-
पत्राक्षं राक्षसं धनदानुगं॥ अपानसक्तममलस्रग्वरांबरधारिणं॥५॥ भार्यासहायमासीनं शिलापट्टेमलेसु-
भे॥ तं दृष्टमात्रं कंकेन रक्षः क्रोधसमन्वितं॥ प्रोवाच कस्मादायातो भवनत्रांडजाधम॥ स्त्रीसन्निकर्षेति दुष्टं तं कस्मा-
न्मामुपसर्पसि॥६॥ नैष धर्मः सुबुद्धीनां मिथो निर्व्याजवस्तुषु॥ कंक उवाच॥ साधारणोयं शैलेंद्रो यथा तव तथा मम

 म॥७॥अन्येषां चैव भूतानां ममता भवतोत्र का॥मार्कंडेय उवाच॥श्रुत्वा नूनमित्थं खड्गेन कंकं चिच्छेद राक्षसः॥हरस्ततजवी
मत्संविस्फुरंतमचेतनं॥८॥कंकं विनिहितं श्रुत्वा मंदरः क्रोधमूर्छितः॥विद्युद्रूपवधायाशु मनश्चक्रे उडेश्वरः॥१०॥
 सगत्वा शैलशिखरं कंको यत्र स्थितो हतः॥तस्य संकालनं चक्रे भ्रातुर्ज्येष्ठस्य खेचरः॥क्रोधामर्षविद्धत्ताक्षो नाग्रे
 द्र इव निश्वसन्॥जगामाथ स यत्रास्ते भ्रातृहा राक्षसाधमः॥पक्षवातेन महता चालयन्सर्वभूधरान्॥नगान्पयोद
जालानि विक्षिपन्क्षतजेक्षणः॥क्षणात्क्षपितशत्रुश्च पक्षाभ्यां क्रांतभूधरान्॥१३॥पानासक्तमतिं तत्र तं ददर्शीति
ष्णाचरं॥आताम्रवक्त्रनयनं हेमपर्यंकमाश्रितं॥१४॥स्रग्दाम पूरितशिखं हरिचंदनभूषितं॥केतकीपत्रगर्भामेंद
ते घोरतराननं॥१५॥वामोरुमाश्रितां तस्य ददर्शायतलोचनां॥पत्नीं मदनिकां नाम पुंस्कोकिलकलस्वनां॥१६॥ततो रो
षपरीतात्मा कंदरः कंदरस्थितं॥तमुवाच स दुष्टात्मन्नेहि युध्यस्व वै मया॥१७॥यद्वै ज्येष्ठो मम भ्राता विश्रब्धो घाति
तस्त्वया॥तस्मात्त्वामद्य संसक्तं नयिष्ये यमसादनं॥१८॥विश्रब्धघातिनां लोका ये च स्त्रीबालघातिनां॥यास्यसे निर
यानिरख्यास्तांस्त्वमद्य मया हतः॥१९॥इत्येवं पतगेंद्रेण प्रोक्तः स्त्रीसन्निधौ तदा॥राक्षसः क्रोधसंरब्धः प्रत्यभाषत
पक्षिणं॥२०॥यदि ते निहतो भ्राता पौरुषं तद्विदर्शय॥त्वामप्यद्य हनिष्येहं खड्गेनानेन खेचर॥२१॥तिष्ठ क्षणं न
मे जीवन्पतगाधम यास्यसि॥इत्युक्त्वांजनपुंजाभं विमलं खड्गमाददे॥२२॥ततः पतगराजस्य यक्षाधिपभटस्य च॥बभूव
युद्धमतुलं यथा गरुडशक्रयोः॥२३॥ततः स राक्षसः कोपात्खड्गमाविध्य वेगवान्॥चिक्षेप पतगेंद्राय निर्वाणांगारवर्चसं॥
२४॥पनगेंद्रश्च तं खड्गं किंचिदुत्पत्य भूतलात्॥वक्त्रेणाजग्राह तदा गरुडः पन्नगं यथा॥२५॥वक्त्रपादतलैर्भंक्त्वा चक्रे क्रोध
मयं द्विजः॥तस्मिन्भग्ने ततः खड्गे बाहुयुद्धमवर्तत॥२६॥ततः पतगराजेन वक्षस्याक्रम्य राक्षसः॥अंत्रपादकरैरा

3A

मुनिरसा च वियोजितः ॥२९॥ तस्मिन्विनिहते सा स्त्री खगं शरणमभ्ययात् ॥ किंचित्संजातसंत्रासा प्राह भार्या भवामि
ते ॥३०॥ तामादाय खगश्रेष्ठः स्वकं गृहमगात्पुनः ॥ गत्वा सनिष्कृतिं भ्रातुर्विद्युद्रूपनिपातनात् ॥३१॥ कंदरस्य च सा
वेश्म प्राप्ये च्छायारूपधारिणी ॥ मेनकातनया सुभ्रूः सो ऽपर्णीरूपमाददे ॥३१॥ तस्यां स जनयामास तार्क्षीं नाम सुतां त
दा ॥ मुनिशापाग्निविप्लुष्टां वपुनामाप्सरोवरां ॥ तस्या नाम तदा चक्रे तार्क्षीमिति विहंगमः ॥ मंदपालसुतास्त्वासंश्च
त्वारो मितबुद्धयः ॥३२॥ जरितारिप्रभृतयो द्रोणांता द्विजसत्तमाः ॥ तेषां जघन्यो धर्मात्मा वेदवेदांतपारगः ॥३३॥
उपयेमे स तां तार्क्षीं कंदरानुमते शुभां ॥ कस्यचित्त्वथ कालस्य तार्क्षी गर्भमवाप ह ॥३४॥ सप्तपक्षाहिते गर्भे कुरुक्षेत्रं जगा
म सा ॥ कुरुपांडवयोर्युद्धे वर्त्तमाने सुदारुणे ॥३५॥ भावित्वाच्चैव कार्यस्य रणमध्यं विवेश या ॥ सा पश्यत तदा युद्धं भग
दत्तकिरीटिनोः ॥३६॥ निरंतरं शरैरासीदाकाशं शलभैरिव ॥ पार्थकोदंडनिर्मुक्त आसन्नो ह्यतिवेगवान् ॥३७॥ तस्य भ
ल्लो महावेगस्त्वचं चिच्छेद जाठरीं ॥ भिन्नकोष्ठशशांकाभं भूमावंडचतुष्टयं ॥३८॥ आयुष्यः सावशेषत्वात्तूलराशावि
वापतत् ॥ तस्यात्समकालं तु प्रतीकाद्गजोत्तमात् ॥३९॥ पपात महती घंटा बाणसंछिन्नबंधना ॥ समं समंतात्संप्राप्ता
विभिन्नधरणीतला ॥४०॥ छादयंती खगांडानि स्थितानि पिशितोपरि ॥ हते च तस्मिन्नृपतौ भगदत्ते नरेश्वरे ॥४१॥
बहून्यहान्यभूद्युद्धं कुरुपांडवसेनयोः ॥ वृत्ते युद्धे धर्मपुत्रे गते शांतनवांतिकं ॥४२॥ भीष्मस्य गदतोशेषान्श्रोतुं
धर्मान्महात्मनः ॥ घंटागतानि तिष्ठंति यत्रांडानि द्विजोत्तमं ॥४३॥ आजगाम तमुद्देशं शमीको नाम संयमी ॥ स तत्र श
ब्दमशृणोच्चीचीकूचीति वामतां ॥४४॥ बाल्यादस्फुटवाक्यानां विज्ञानेपि परे सती ॥ अथर्षिः शिष्यसहितो घंटामुत्पा
ट्य विस्मितः ॥४५॥ अमातृपितृपक्षांश्च शिशुकान्स ददर्श ह ॥ तांस्तु तत्र तदा भूमौ शमीको भगवान्मुनिः ॥४६॥ दृष्ट्वा वि स

॥मा०कं०॥

॥७॥

4

स्य याविरः प्रोवाचानुगतान्द्विजान्॥ सम्यगुक्तं द्विजाग्र्याणमुक्त्वेशानसास्वयं॥ पलायनपरं दृष्ट्वा दैत्यसैन्यं सुरार्दितं॥
नगंतव्यं निवर्त्तध्वं कस्माद्व्रजत कातराः॥ ५८॥ उत्सृज्य शौर्ययशसी क्व गता न मरिष्यथ॥ नश्यतो युध्यतो वापि तावन्म्द
वति जीवितं॥ ५९॥ यावद्धाता सृजत्सर्वं न तावन्मनसेप्सितं॥ एके मृयंते स्वगृहे पलायंतोपरे जनाः॥ ६०॥ भुंजतोन्नंत
थैवापः पिबंतो निधनं गताः॥ विलासिनस्तथैवान्ये कामयाना मनामयं॥ ६१॥ अविक्षतांगाः शस्त्रैश्च प्रेतराजवशं गताः॥ अ
न्ये तपस्यनिरता नीताः प्रेतवशानुगैः॥ ६२॥ योगाभ्यासरताश्चान्ये नैव प्रापुरमर्त्यतां॥ शंबराय पुराक्षिप्तं वज्रं कुलिशपाणि
ना॥ ६३॥ हृदये निहतस्तेन तथापि न मृतोसुरः॥ तेनैव खलु वज्रेण तेनैवेंद्रेण दानवाः॥ ६४॥ प्राप्ते काले हता दैत्यास्तत्क्ष
णान्निधनं गताः॥ विदित्वैवं न संत्रासः कर्त्तव्यो विनिवर्त्तत॥ ६५॥ ततो निवृत्तास्ते दैत्यास्त्यक्त्वा मरणजं भयं॥ इति सुक्र
वचः सत्यं कृतमेभिः स्वगात्रजैः॥ ६६॥ ये युद्धेपि न संप्राप्ताः पंचत्वमतिमानुषे॥ क्रीडानां पतनं विप्राः क्व घंटापतनं समं
॥ ६७॥ क्व च मांसवसासारक्तैर्नमेरास्तरणक्रिया॥ केप्येते सर्वथा विप्रा नैते सामान्यपक्षिणः॥ ६८॥ दैवानुकूलता लोके म
हाभाग्यप्रदर्शिनी॥ एवमुक्त्वा सतान्वीक्ष्य पुनर्वचनमब्रवीत्॥ ६९॥ निवर्त्तताश्रमं यात गृहीत्वा पक्षिबालकान्॥
मार्जाराखुभयं यत्र नैषां मुनिवरात्मजाः॥ ७०॥ श्येनतो नकुलाद्वापि स्थाप्यंतां तत्र पक्षिणः॥ द्विजाः किं वाभियत्नेन
धार्यंते कर्मभिः स्वकैः॥ ७१॥ रक्ष्यंते चाखिला जीवास्तथैते पक्षिबालिकाः॥ तथापि यत्नः कर्त्तव्यो नरैः सर्वेषु कर्मसु
॥ ७२॥ कुर्वन्पुरुषकारं तु वाच्यतां याति नो सतां॥ इति मुनिवरनोदितास्ततस्ते मुनितनयाः परिगृह्य पक्षिणस्तान्॥ त
रुविटपसमाश्रितालिसंघं ययुरथ तापससरम्यमाश्रमं स्वं॥ ७३॥ स चापि वन्यं मनसाभिकामितं प्रगृह्य मूलं कुसुमं फ
लं कुशान्॥ चकार चक्रायुधरुद्रवेधसां सुरेंद्रवैवस्वतजातवेदसां॥ ७४॥ अपां पते गोपति वित्तरक्षिणोः समीरणस्या

॥राम॥

॥४॥

पितयाद्दिजोत्तमः ॥ धातुर्विधातुस्त्वयवेष्वैदेविकाःश्रुतिप्रमुक्ताविविधास्तुसत्क्रियाः ॥ ९५ ॥ ॥ इतिश्रीमार्कंडेयपुराणे
जैमिनिसंवादेपक्षिणोत्पत्तिर्द्वितीयोध्यायः ॥ २ ॥ ॥ मार्कंडेयउ० ॥ अहन्यहनिविप्रेंद्रसतेषांमुनिसत्तमः ॥ चकारा
हारंपयसातथाशुश्रूषाचपोषणं ॥ मासमात्रेणजग्मुस्तेभानोःस्यंदनवर्त्मनि ॥ कौतूहलविलोलाक्षैर्दृष्टामुनिकुमारकैः ॥ १ ॥ दृ
ष्टामहीससनगरांसांभोनिधिसरिद्वरां ॥ रथचक्रप्रमाणांतेपुनराश्रममागताः ॥ २ ॥ श्रमक्लांतांतरात्मानोमहात्मानोवि
योनिजाः ॥ ज्ञानंचप्रकटीभूतंतत्रतेषांप्रभावतः ॥ ४ ॥ ऋषेःशिष्यानुकंपार्थंब्रुवतोधर्मनिश्चयं ॥ कृत्वाप्रदक्षिणांस
र्वेचरणावभ्यवादयन् ॥ ५ ॥ ऊचुश्चमरणाद्घोरान्मोक्षितास्त्वयामुने ॥ आवासभक्ष्यपयसांत्वंनोदातापितागुरुः ॥
गर्भस्थानांमृतामातापित्रानैवास्मपालिताः ॥ त्वयानोजीवितंदत्तंशिशवोयेनरक्षिताः ॥ ७ ॥ क्षितावक्षततेजास्त्वंकृमी
णामिवशुष्यतां ॥ गजघंटांसमुत्पाट्यकृतवान्नदुःखेश्चनं ॥ ८ ॥ कथंवर्द्धेयुरवलाःखस्थान्द्रक्ष्याम्यहंकदा ॥ कदाभूमे
र्द्रुमंप्राप्तान्द्रक्ष्येवृक्षांतरंगतान् ॥ ९ ॥ कदामेसहजाकांतिःपांसुनानाशमेष्यति ॥ एवंपक्षानिलोत्थेनमत्समीपवि
हारिणां ॥ १० ॥ इतिचिंतयतातातभवतापरिपालिताः ॥ तेसांप्रतंप्रवृद्धास्मप्रबुद्धाःकरवामकिं ॥ इत्यृषिर्वचनंतेषांश्रु
त्वासंस्कारवत्स्फुटं ॥ शिष्यैःपरिवृतःसर्वैःसहपुत्रेणशृंगिणा ॥ ११ ॥ कौतूहलपरोभूत्वारोमांचपटसंवृतः ॥ उवाचतत्त्व
तोब्रूतप्रवृत्तेःकारणंगिरः ॥ १२ ॥ कस्यशापादियंप्राप्ताभवद्भिर्विक्रियापरा ॥ रूपस्यवचसश्चैवतन्मेवक्तुमिहार्हथ
॥ १३ ॥ पक्षिणऊचुः ॥ निचुलस्वानितिख्यातःप्रागासीन्मुनिसत्तमः ॥ तस्यपुत्रद्वयंजज्ञेसुकृशस्तुंबरस्तथा ॥ १५ ॥ सुकृ
शस्यवयंपुत्राश्चत्वारोमिततेजसः ॥ तस्यर्षेर्विनयाचारभक्तिनम्राःसदैवहि ॥ १६ ॥ तपश्चरणसक्तस्यशाम्यमानेंद्रिय
स्यच ॥ यथाभिमतमस्माभिस्तथातस्योपपादितं ॥ १७ ॥ समित्पुष्पादिकंसर्वंयच्चैवाभ्यवहारिकं ॥ एवंतत्रावसतांत

॥मा०पु०॥
॥५॥
5

स्यास्माकंचकानने॥१८॥आजगाममहावर्ष्माभग्नपक्षोजरान्वितः॥आताम्रनेत्रःश्रान्तात्मापक्षीम्लानात्मासुरेश्वरः॥
१९॥सत्यशौचसमाचारमतीवोदारमानसं॥जिज्ञासुस्तमृषिश्रेष्ठमस्मच्छायभवायच॥२०॥पक्षीउवाच॥द्विजेंद्रमांक्षु-
धाविष्टंपरित्रातुमिहार्हसि॥भक्ष्यार्थिनंमहाभागगतिर्भवममाधुना॥विंध्यस्यशिखरेतिष्ठन्पक्षिराट्प्रेरितेनवै॥२१॥
पातितेस्मिन्महाभागश्वसनेनातिरंहसा॥सोहंमोहसमाविष्टोभूमौसप्ताहमात्मस्मृतिः॥स्थितस्ततोष्टमेनाह्नाचेतनांप्र-
प्तवानिह॥२२॥प्राप्यचेतःक्षुधाविष्टोभवंतंशरणंगतः॥भक्ष्यार्थीविगतानंदोदूयमानेनचेतसा॥२३॥तत्कुरुष्वामलमने
मत्राणायाचलांमतिं॥प्रयच्छभक्ष्यंविप्रर्षेप्राणयात्रासमंमम॥२४॥सएवमुक्तःप्रोवाचतमिंद्रंपक्षिरूपिणं॥प्राणसंधा-
रणार्थेयदास्येभक्ष्यंयथेप्सितं॥२५॥इत्युक्त्वापुनरप्येनमपृच्छत्सद्विजोत्तमः॥आहारःकस्तवार्थायउपकल्प्यभवेन्म-
या॥२६॥सचाहनरमांसेनतृप्तिर्भवतिमेपरा॥२७॥ऋषिरुवाच॥कौमारंतेव्यतिक्रांतमतीतंयौवनंचते॥वयसःपरिणा-
मस्तेवर्ततेनन्नमंडज॥यस्मिन्नराणांसर्वेषामशेषेच्छानिवर्तते॥कस्माद्वृद्धत्वभावेपिहान्नृशंसात्मकोभवान्॥कंमा-
नुषस्यपिशितंकवयस्करमंतव॥२९॥सर्वेषामाद्दुष्टभावानांप्रशमोनोपपद्यते॥अथवाकिममानेनप्रोक्तेनास्तिप्र-
योजनं॥३०॥प्रतिश्रुत्यसदादेयमितिनोभावितंमनः॥इत्युक्त्वातंसविप्रेंद्रस्तथेतिकृतनिश्चयः॥३१॥शीघ्रमस्मान्स-
माहूयगुणतोनुप्रशस्यच॥उवाचक्रुद्धहृदयोमुनिर्वाक्यंसुनिष्ठुरं॥विनयावनतान्सर्वान्भक्तिनम्रान्कृतांजली-
न्॥कृतार्थोमोद्विजश्रेष्ठाऋणैर्मुक्तामयासह॥जातंश्रेष्ठमपत्यंवैयथायंममद्विजोत्तमाः॥गुरुःपूज्योयदिमतोभवतां
नापरःपितुः॥३२॥ततःकुरुतमेवाक्यंनिर्विशंकेनचेतसा॥तद्वाक्यसमकालंचप्रोक्तमस्माभिसाहतैः॥३३॥यद्वस्य
तिभवांस्तद्धिकृतमेवावधार्यतां॥ऋषिरुवाच॥मामेवशरणंप्राप्तोविहंगःक्षुत्पिपासान्वितः॥युष्मन्मांसेनयेनास्यक्षणंत-

॥राम॥
॥५॥

5A

त्विर्भवांस्त्विति॥ तस्मात्सत्यस्वरूपेण तथा शीघ्रं विधीयतां॥३४॥ ततो वयं प्रव्यथिताः प्रकंपोद्भूतसाध्वसाः॥ कथं कष्टमिति प्रो
च्यैनैतत्कुर्मेति चाब्रुवन्॥३५॥ कथं परशरीरस्य हेतोर्देहं स्वकं बुधः॥ विनाशयेत् घातयेद्वा यथा ह्यात्मा तथा सुतः॥३६॥ पितृदे
वमनुष्याणां यान्युक्तानि ऋणानि वै॥ तान्यपाकृते पुत्रो न शरीरप्रदः पुनः॥३७॥ तस्मान्नैतत्करिष्यामो नोचीर्णं यत्सुत
तैनैः॥ जीवन्भद्राण्यवाप्नोति जीवन्पुण्यं करोति च॥३८॥ मृतस्य देहनाशोस्ति धर्मस्यापरमस्तया॥ आत्मानं सर्वतो रक्ष्यमाहु
धर्मविदो जनाः॥३९॥ ऋषिराह ततः श्रुत्वा तदास्माभिरुदाहृतं॥ कोपाद्रक्तविवृत्ताक्षो धिक्शब्दपरुषं वचः॥ प्रोवाच पुनरप्य
स्मान्न निर्दहन्निव लोचनैः॥ प्रतिज्ञाय वचो मह्यं यस्मान्नैतत्कृतं सुताः॥ तस्मान्मच्छापनिर्दग्धास्तिर्यग्योन्यां प्रयास्यथ॥ एव
मुक्त्वा तदास्माकं स तु विहंगमथाब्रवीत्॥ अहं सोष्टमात्मनः कृत्वा शास्त्रतत्वाद्वि देहि कं॥ भक्षयस्व सुचिरं ह्यो मांसं मे द्विजस
त्तम॥ आहारीकृतमेतत्ते मया देहमिहात्मनः॥ एतावदेव विप्रस्य ब्राह्मणत्वं प्रचक्ष्यते॥४०॥ यावत्स्वतगजात्स्वसत्यस्य प
रिपालनं॥ न यज्ञैर्दक्षिणाभिर्वा तत्पुण्यं प्राप्यते महत्॥ कर्मणान्येन वा विप्रैर्यत्सत्यपरिपालनात्॥ इत्येवं वचनं श्रुत्वा
सोंतर्विस्मयनिर्भरः॥ प्रत्युवाच मुनिं शक्रः पक्षिरूपधरस्तदा॥ योगमास्थाय विप्रेंद्र त्यजेदं स्वकलेवरं॥४१॥ जीवन्मांसं न
विप्रेंद्र भक्षयामि कदाचन॥ तस्यैतद्वचनं श्रुत्वा योगयुक्तोभवन्मुनिः॥ तं तस्य निश्चयं ज्ञात्वा शक्रो व्याह स्वदेहभृत्॥
भो भो विप्रेंद्र बुध्यस्व बुद्धे बोध्यगुणात्मक॥ जिज्ञासार्थं मया यं ते अपराधः कृतो नघ॥ तत्क्षमस्वामलमते का चेच्छा क्रि
यतां तव॥ पालनात्सत्यवाक्यस्य प्रीतिर्मे परमा त्वयि॥ अद्य प्रभृति ते ज्ञानमैंद्रं प्रादुर्भविष्यति॥ तपस्यथ तथा धर्मे न ते वि इंद्रप्रसादजं.
घ्नो भविष्यति॥ इत्युक्त्वा तर्हि ते शक्रे पिता कोपसमन्वितः॥४२॥ प्रणम्य शिरसास्माभिरिदमुक्तो महामुनिः॥ बिभ्यतां मरणा
तात त्वमस्माकं महामते॥ संतुमर्हसि दीनानां जीवितप्रियकारिणां॥ त्वगस्थिमांससंघाते पूयशोणितपूरिते॥ कर्त्तव्या न र

तिर्यत्रतत्रास्माकमियंरतिः॥श्रूयतांचमहाभागयथालोकोविमुह्यते॥कामक्रोधादिभिर्दोषैरवशःप्रबलारिभिः॥प्रज्ञा
॥मा०पु०॥ प्राकारसंयुक्तमस्थिस्थूणंपुरंमहत्॥चर्मभित्तिमहारोधंमांसशोणितलेपनं॥नवद्वारंमहायामंसर्वतःस्नायुवेष्टितं॥६०॥
॥६॥ नृपश्चपुरुषस्तत्रचेतनावानवस्थितः॥मंत्रिणौतस्यबुद्धिश्चमनश्चैवविरोधिनौ॥६१॥एतौतौवैविनाशायतावुभावितरे
तरं॥नृपस्यतस्यचत्वारोनाशमिच्छंतिविद्विषः॥६२॥कामःक्रोधस्तथालोभोमोहश्चान्योमहारिपुः॥यदातुसन्नृपस्तानि
6 द्वाराण्यावृत्यतिष्ठति॥६३॥तदास्वस्थबलश्चैवनिरातंकश्चजायते॥जातानुरोगोभवतिशत्रुभिर्नोभिभूयते॥यदातु
सर्वद्वाराणिविवृतानिविमुंचति॥रागोनाममहाशत्रुर्नेत्रादिद्वारमृच्छति॥सर्वव्यापीमहायामःपंचद्वारप्रवेशगः॥तस्या
नुमार्गेविशतितद्वद्घोरंरिपुत्रयं॥प्रविश्यायसवैतत्रद्वारैरिंद्रियसंज्ञिकैः॥रागःसंश्लेषमायातिमनसाचसहेतरैः॥इं
द्रियाणिमनश्चैववशेकृत्वादुरासदः॥द्वाराणिचवशेकृत्वाप्राकारमाश्रयत्यथ॥मनस्तस्याश्रितंदृष्ट्वाबुद्धिर्नश्य
तितत्क्षणात्॥अमात्यरहितस्तत्रपौरवर्गोज्झितस्तथा॥रिपुभिर्लब्धविवरःसन्नृपोनाशमृच्छति॥एवंरागस्तथालोभो
मोहःक्रोधस्तथैवच॥७०॥प्रवर्तंतेदुरात्मानोमनुष्यस्मृतिनाशकाः॥रागात्क्रोधःप्रभवतिक्रोधाल्लोभोभिजायते॥
लोभाद्भवतिसंमोहःसंमोहात्स्मृतिविभ्रमः॥स्मृतिभ्रंशाद्बुद्धिनाशोबुद्धिनाशात्प्रणश्यति॥एवंप्रनष्टबुद्धीनांरागलो
भानुवर्तिनां॥जीवितेचसल्लोभानांप्रसादंकुरुसत्तम॥योयंशापोभगवतादत्तःसनभवेद्यथा॥नतामसींगतिंकष्टांव्र ॥रामः॥
जेयमुनिसत्तम॥७४॥ऋषिरुवाच॥यन्मयोक्तंनतन्मिथ्याभविष्यतिकदाचन॥नमेवागनृतंप्राहयावदद्येतिपुत्र ॥६॥
काः॥देवमत्रपरंमन्येधिक्पौरुषमनर्थकं॥अकार्यंकारितोयेनबलादहमचिंतयन्॥यस्माच्चयुष्माभिरहंप्रणिप
त्यप्रसादितः॥तस्मात्तिर्यक्त्वमापन्नाःपरंज्ञानमवाप्स्यथ॥ज्ञानदर्शितमार्गाश्चनिर्धूतक्लेशकल्मषाः॥मत्प्रसादादसं

दिध्यांपरांसिद्धिमवाप्स्यथ॥ जैमिनेःप्रश्नसंदेहान्‌यदावक्ष्यथपुत्रकाः॥ तदामोक्ष्यथमच्छापादेषवोनुग्रहःकृतः॥
एवंशप्तास्मभगवान्‌पित्रादैववशात्सुराः॥ ततःकालेनमहतायोन्यंतरमुपागताः॥ जाताश्चरणमध्येवैभवतापरि
पालिताः॥ वयमित्थंद्विजश्रेष्ठखगत्वंसमुपागताः॥ ६५॥ नास्त्यसाविहसंसारेयोनदिष्टेनबाध्यते॥ सर्वेषामेवजं
तूनांदेवाधीनंहिचेष्टितं॥ ६६॥ मार्कंडेयउवाच॥ इतितेषांवचःश्रुत्वाशमीकोभगवान्मुनिः॥ प्रत्युवाचमहातेजाः
समीपस्थायिनोद्विजान्‌॥ पूर्वमेवमयाप्रोक्तंभवतांसन्निधाविदं॥ सामान्यपक्षिणोनैतेकेप्येतेद्विजसत्तमाः॥ येयुद्धे
पिनसंप्राप्ताःपंचत्वमतिमानुषे॥ ततःप्रीतमनस्केनतेनुज्ञातामहात्मना॥ जग्मुःशिखरिणांश्रेष्ठंविंध्यंद्रुमलतावृतं॥ या
वदद्यस्थितातस्मिन्नचलेतेतुपक्षिणः॥ तपस्वाध्यायनिरताःसमाधिस्थिरचेतसः॥ इतिमुनिवरलब्धसत्क्रियास्तेमुनि
तनयाविहगत्वमभ्युपेत्याः॥ गिरिवरगहनेनिपुण्यतोमेजितमनसोभिवसंतिविंध्यपृष्ठे॥ ६८॥ ॥ इतिश्रीमार्कंडे
यपुराणेजैमिनिसंवादेपक्षिजन्ममाहात्म्यकथनंतृतीयोध्यायः॥ ३॥ ॥ मार्कंडेयउवाच॥ एवंतेद्रोणतनयाःप
क्षिणोज्ञानिनोभवन्‌॥ वसंतिचाचलेविंध्येतानुपास्वचपृच्छच॥ १॥ इत्यार्षेवचनंश्रुत्वामार्कंडेयस्यजैमिनिः॥ ज
गामविंध्यशिखरंयत्रतेधर्मपक्षिणः॥ तद्वत्यासन्नभूतश्चसुस्रावपठतांध्वनिं॥ श्रुत्वाचविस्मयाश्चिंतयामाससजैमि
निः॥ स्थानसौष्ठवसंपन्नंजितश्वाससमविस्वरं॥ सुविस्पष्टमदोषंचपठ्यंतेद्विजसत्तमैः॥ वियोनिमपिसंप्राप्तानेतान्मुनि
कुमारकान्‌॥ चित्रमेतदहंमन्येनजहातिसरस्वती॥ बंधुवर्गस्तथामित्रंयच्चेष्टमपरंगृहे॥ त्यक्त्वागच्छतितत्सर्वंनजहा
तिसरस्वती॥ ६॥ इतिसंचिंतयन्नेवविवेशगिरिकंदरं॥ प्रविश्यचददर्शासौशिलापृष्ठगतान्द्विजान्‌॥ पठतस्तान्समा
लक्ष्यमुखदोषविवर्जितम्‌॥ ध्वस्तशोकोतिहर्षेणसर्वानेवाभ्यभाषत॥ स्वस्त्यस्तुवोद्विजश्रेष्ठाजैमिनिंमांनिबोधत॥

॥ मा० र्कं० ॥ ॥ ७१ ॥ 7

व्याससिष्यमिह प्राप्तं भवतां दर्शनोत्सुकं ॥ मन्युर्न खलु कर्त्तव्यो यत्त्वत्रातीव मन्युना ॥ प्राप्ताः खगत्वमापन्नाः सर्वे थादिष्टमे
वतत ॥१०॥ स्फीते द्रव्यकुले केचिज्जाताः किल मनस्विनः ॥ द्रव्यनाशे समुत्पन्ने शाबलेन ससांत्विता ॥ दत्वा याचंति पुरुषा
हत्वा वध्यंति चापरं ॥ पातयित्वा च यास्यंते तत एव भवसंक्षयात ॥१२॥ एतद्दृष्टं हि बहुशो विपरीतं तथा मया ॥ भावाभावसमुच्छे
दैरजस्रं व्याकुलं जगत ॥१३॥ इति संचिंत्य मनसा न शोकं कर्तुमर्हथ ॥ ज्ञानस्य फलमेतावच्छोकहर्षैरधृष्यता ॥ ततस्ते जै
मिनिं सर्वे पाद्यार्घ्याभ्यां मपूजयन ॥ अनामयं च पप्रच्छुः प्रतिपक्ष्य महामुनिं ॥ अथोचुः खगमाः सर्वे व्यासशिष्यं तपो
निधिं ॥ सुखोपविष्टं विश्रांतं पक्षानिलहतक्लमं ॥१५॥ धर्मपक्षिण ऊचुः ॥ अद्य नः सफलं जन्म जीवितं च सुजीवितं ॥ यत्पश्येम
सुरैर्वंद्यं तव पादांबुजद्वयं ॥ पितृकोपाग्निरुद्भूतो यो नो देहे प्रवर्त्तते ॥ सोपशांतिं गतो विप्र युष्मद्दर्शनवारिणा ॥ केचित्ते कु
शलं ब्रह्मन्नाश्रमे मृगपक्षिषु ॥ वृक्षेष्वथ लतागुल्मत्वक्सारतृणजातिषु ॥ अथवा नैतदुक्तं हि सम्यगस्माभिरादृतैः ॥ भवता
संगमो येषां तेषामकुशलं कुतः ॥१८॥ प्रसादं च कुरुष्वात्र आगमनकारणं ॥ देवानामिव संसर्गो भवतोऽस्मदयो महा
न् ॥ येनास्मद्भाग्यगुरुणा आनीतो दृष्टिगोचरं ॥ जैमिनिरुवाच ॥ श्रूयतां द्विजशार्दूलाः कारणं येन कंदरां ॥ विंध्यस्येहा
गतो रम्यां रेवावारिकणोक्षितां ॥ संदेहान्भारते शास्त्रे तान्प्रष्टुमिहागतः ॥ मार्कंडेयं महात्मानं पूर्वमस्मि गुरुं कुलोद्वहाः ॥ तमहं प
ष्टवान्प्राप्य संदेहान्भारतं प्रति ॥ स च पृष्टो मया प्राह संति विंध्ये महाचले ॥ द्रोणपुत्रा महात्मानस्ते वक्ष्यंत्यर्थतो तव ॥ तद्वाक्य
नोदितश्चैनमागतोऽहं महागिरिं ॥ तच्छृणुध्वमशेषेण श्रुत्वा व्याख्यातुमर्हथ ॥२१॥ धर्मपक्षिण ऊचुः ॥ विषये सति वक्ष्या हि ॥ श्री रामः ॥ ॥ ७ ॥
मो निर्विशंकाः शृणु प्रतत ॥ कथं तेन वदिष्यामो यदस्मद्बुद्धिगोचरं ॥ चतुर्ष्वपि वेदेषु धर्मशास्त्रेषु चैव हि ॥ समस्तेषु तथा
गेषु चैव हि ॥ समस्तेषु तथांगेषु यच्चान्यद्वेदसंमितं ॥ एतेषु गोचरोऽस्माकं बुद्धेर्ब्राह्मणसत्तम ॥ प्रतिज्ञातुं समारोढुं तथापि

हि२

7A

हितं न शक्यमः ॥ तस्माद्दं त्वां विप्रमुख्यं संदिग्धं यद्धि भारते ॥ तस्यामस्तव धर्मज्ञ न चेन्मोहो भविष्यति ॥ १४ ॥ जैमिनिरुवाच ॥ संदि
ग्धानीह वस्तूनि भारतं प्रति यानि मे ॥ श्रृणुध्वं मम मत्तस्तानि श्रुत्वा व्याख्यातुमर्हथ ॥ कस्मान्मानुषतां प्राप्तो निर्गुणोपि ज
नार्दनः ॥ वासुदेवोखिलाधारः सर्वकारणकारणं ॥ कस्माच्च पांडुपुत्राणामेका सा द्रुपदात्मजा ॥ पंचानां महिषी कृष्णा सु
महानत्र संशयः ॥ १७ ॥ भ्रूणहत्या व्रतं कस्माद्देवो महाबलः ॥ तीर्थयात्राप्रसंगेन कस्माच्चक्रे हलायुधः ॥ १८ ॥ कथं च द्रौप
देयास्ते कृतदारा महारथाः ॥ पांडुनाथा महात्मानो वधमापुरनाथवत् ॥ एतत्सर्वं कथ्यतां मे संदिग्धं भारतं प्रति ॥ कृतार्थो ह
सर्वं येन जगद्व्याप्तं निजमायामयं मुने ॥ २० ॥ धर्मपक्षिण ऊचुः ॥ योसौ चराचरगुरुः परमात्मा जनार्दनः ॥ वासुदेव परं धाम भगवतो ना
सुतमागति ॥ २१ ॥ नमस्कृत्य सुरेशाय विष्णवे प्रभविष्णवे ॥ पुरुषाय पुराणाय शाश्वतायाव्ययाय च ॥ चतुर्व्यूहात्मने तस्मै नि व्यक्ताव्यक्तपुरुष कालात्मने ०
र्गुणाय गुणाय च ॥ वरिष्ठाय गरिष्ठाय वरेण्यायामिताय च ॥ यज्ञांगायाखिलांगाय वेदार्थैरीडिताय च ॥ यस्मादणुतरं ना
स्ति यस्मान्नास्ति बृहत्तरं ॥ येन विश्वमिदं व्याप्तं अजेन जगदादिना ॥ आविर्भावतिरोभावदृष्टादृष्टविलक्षणं ॥ २५ ॥ वदंति
यत्सृष्टमिदं तथैवांते च संहृतं ॥ ब्रह्मणे वादिदेवाय नमस्कृत्य समाधिना ॥ त्रैवस्तामान्युद्गिरन् वक्त्रैर्यैः पुनाति जगत्त्रयं ॥
प्रणिपत्य तथैशानमेकबाणविनिर्जितैः ॥ यस्यासुरगणैर्यज्ञा विलुप्यंते न कर्मिणां ॥ प्रवक्ष्यामो मतं कृत्स्नं व्यासस्याद्भुतकर्म
णः ॥ येन भारतमुद्दिश्य धर्माद्याः प्रकटीकृताः ॥ आपो नारा इति प्रोक्ता मुनिभिस्तत्त्वदर्शिभिः ॥ ३० ॥ अयनं तस्य ताः पू
र्वं तेन नारायणः स्मृतः ॥ स देवो भगवान्सर्वव्यापी नारायणो विभुः ॥ चतुर्धा संस्थितो ब्रह्मन्सगुणो निर्गुणस्तथा ॥ एका
मूर्तिरनिर्देश्या शुक्लां पश्यंति तां बुधाः ॥ मालस्येति च विख्याता मन्याकारे यदा स्थिता ॥ देवानामप्यगम्या सा तेजोरूपानि
रत्यया ॥ पराहिंसां स्वदेहेन वेसा श्वत्वार आहृताः ॥ समुद्रजलमाश्रित्य स्थितो दानवपुंगव ॥ मत्स्यरूपी तदा भूत्वो हत्वा

रां रवं महासुरं॥ ध्यानिना परसतां वेदां स्तैलोकस्य हितानि वै॥ कूर्मरूपं समाधाय तिलवद्यात् तामही॥ समपातारलतस्तस्या
॥मा० पु०॥ महाभारेण पीडिता॥ वैकुंठ नरसिंहांकवराहकपिलाननां॥ चतुर्मूर्तिर्व्यवभगवान्चतुर्व्यूह उदाहृतः॥ ज्योत्स्ना मांडोपरु
॥८॥ द्धांगी निःश्वासा योगिनां परां॥ हृत्स्था चांतिकस्या च विज्ञेया सा गुणातिगा॥ वासुदेवाभिधानासौ निर्ममत्वेन दृश्यते॥ रूपव
र्णादयस्तस्या न भावाः कल्पनामयाः॥ अस्यैव सा सदा शुद्धा सुप्रतिष्ठैकरूपिणी॥ द्वितीया पृथिवीं मूर्द्धा शेषाख्या धा
8 रयत्यधः॥ य॥ संकर्षणेति विज्ञेया बलमुत्तममास्थिता॥ तामसी सा समाख्याता तिर्यक्त्वं समुपाश्रिता॥ तृतीया क
र्म कुरुते प्रजापालनतत्परा॥ सत्वोद्रिक्ता तु सा ज्ञेया धर्मसंस्थानकारिणी॥ चतुर्थी जलमध्यस्था शेते पन्नगतल्प
गा॥ रजस्तस्या गुणाः सर्गं सा करोति सदैव हि॥ य॥ अनिरुद्धेति सा ज्ञेया जगत्सृष्टिकारिणी॥ तृतीया हरेर्मूर्तिः प्र या
जापालनतत्परा॥ य॥ सा तु धर्मव्यवस्थानं करोति नियतं भुवि॥ प्रोद्धतानसुरान्हंति धर्मव्युच्छित्तिकारिणः॥ य॥ ४
पाति देवान्सतश्चान्यान्धर्मरक्षापरायणा॥ यदा यदा हि धर्मस्य ग्लानिर्भवति जैमिने॥ अभ्युत्थानमधर्मस्य तदा
त्मानं सृजत्यसौ॥ भूत्वा पुरा वराहेण योत्रेणापो निरस्य च॥ एकया दंष्ट्रयोन्नवाता नलिनीव वसुंधरा॥ हत्ने नस
टादं ष्ट्राजराजरमंडितं॥ कृत्वा नृसिंहरूपं हि हिरण्यकशिपुर्हतः॥ विप्रचित्तिमुखाश्चान्ये दानवा विनिपातिताः॥
वामनादींस्तथैवान्यान्न संख्या तु मिहास्ति हे॥ अवताराननंतस्येह माथुरः साम्प्रतं त्वयं॥ इति सा सात्विकी मूर्त्तिरवता
रान्करोति वै॥ प्रद्युम्नेति च साख्याता रक्षाकर्मण्यवस्थिता॥ देवत्वे च मनुष्यत्वे तिर्यग्योनौ च संस्थिता॥ गृह्णाति ॥रामः॥
तत्स्वभावं च वासुदेवेच्छया सदा॥ इत्येतत्ते समाख्यातं कृतकृत्योपि सत्प्रभुः॥ मानुष्यत्वं गतो विष्णुः स्मृणुष्वास्यावत्त ॥८॥
रं पुनः॥ ५६॥ ॥ इति श्रीमार्कंडेयपुराणे चतुर्व्यूहावतारो नाम चतुर्थोऽध्यायः॥ ४॥ ॥ धर्मपक्षिण ऊचुः॥ स्वष्टाप्रजा

8A

पतिः पूर्वं तस्यासीत्त्रिशिराः सुतः ॥ अधोमुखस्तपः कुर्वन् हतः शक्रेण शंकया ॥ त्वष्टुः पुत्रे हते ब्रह्मन् पूर्वमिंद्रस्य तेज
सः ॥ ब्रह्महत्याभिभूतस्य पराहानिरजायत ॥ २ ॥ तदा धर्मो विवेशाथ शक्रं तेजोपचारतः ॥ निस्तेजाश्चाभवच्छक्रो धर्मे ते
जसि निर्गते ॥ ततः पुत्रं हतं श्रुत्वा त्वष्टा क्रुद्धः प्रजापतिः ॥ उच्चलुंच्य जटामेकामिदं वचनमब्रवीत् ॥ अद्य पश्यंतु मे वी
र्यं त्रयो लोकाः सदेवताः ॥ स च पश्यतु दुर्बुद्धिर्ब्रह्महा पाकशासनः ॥ स्वकर्माभिरतो येन मत्सुतो विनिपातितः ॥ इत्यु
क्त्वा कोपरक्ताक्षो जटामग्नौ जुहाव तां ॥ ततो वृत्रः समुत्तस्थौ ज्वालामाली महासुरः ॥ महाकायो महादंष्ट्रो भिन्नांजनच
योपमः ॥ इंद्रशत्रुरमेयात्मा त्वष्टुस्तेजोपबृंहितः ॥ अहन्यहनि सो वर्द्ध दिषुपातं महाबलः ॥ वधायमासनो दृष्ट्वा वृत्रंश
क्रो महासुरं ॥ प्रेषयामास सप्तर्षीन् संधिमिच्छन् भयातुरः ॥ सख्यं चक्रुस्ततस्तस्य वृत्रेण समयैस्तदा ॥ ऋषयः प्रीतम
नसः सर्वे लोकहिते रताः ॥ समयस्यांतमुद्दिश्य यदा शक्रेण घातितः ॥ ब्रह्महत्याभिभूतस्य तदा बलमशीर्यत ॥ २४ ॥
तच्छक्रदेहविभ्रष्टं बलं मारुतमाविशत् ॥ सर्वव्यापिनमव्यक्तं बलस्याधिदेवतं ॥ अहल्यां च यदा शक्रो गौतमं रूपमा
स्थितः ॥ धर्षयामास देवेंद्रस्तदा रूपमहीयत ॥ ऋषेः शापादशेषांगे जातयोनिसहस्रकं ॥ अंगप्रत्यंगलावण्यं यदती
व मनोरमं ॥ विहाय दुष्टं देवेंद्रं नासत्यावागतं तु तत् ॥ धर्मेण तेजसा त्यक्तं बलहीनमरूपिणं ॥ ज्ञात्वा सुरेशं दैतेयास्तज्जये
च क्रुरुद्यमं ॥ राज्ञामुद्रिक्तवीर्याणां देवैर्विजिगीषवः ॥ कुलेष्वतिबलादैत्या अजायंत महामुने ॥ कस्यचित्त्वथ कालस्य
धरणी भारपीडिता ॥ जगाम मेरुशिखरं सदा यत्र दिवौकसां ॥ तेषां सा कथयामास भूरिभारावपीडिता ॥ दनुजानलज
दैत्यास्त्वं खेदकारणमालनः ॥ २४ ॥ एते भवद्भिरसुरा निहताः पृथुलौजसः ॥ ते सर्वे मानुषे लोके जाता गेहे शुभं न तां ॥
अक्षौहिण्यो हि बहुलास्तन्द्वारा नीत्वं जाम्यधः ॥ तथा कुरुध्वं त्रिदशा यथा शांतिर्भवेन्मम ॥ पक्षिलउचुः ॥ तेजोभागे

स्ततो देवा अब्रुवंते रुद्रिवीमहीं ॥ प्रजानामुपकारार्थं भूभारहरणाय च ॥ २५ ॥ यदिंद्र देहजं तेजस्तन्मुमोच तदा वृषः ॥
मा०पु० ॥ कुंत्यां जातो महातेजास्ततो राजा युधिष्ठिरः ॥ बलं मुमोच पवनस्ततो भीमो व्यजायत ॥ शक्रवीर्यार्द्धतश्चैव जज्ञे पार्थो
॥१९॥ धनंजयः ॥ उत्पन्नौ यमलौ माद्र्यां शक्ररूपौ महाद्युती ॥ पंचधा भगवानित्थमवतीर्णः शतक्रतुः ॥ तस्योत्पन्ना महाभा
9 गा पत्नी कृष्णा हुताशनात् ॥ शक्रस्यैकस्य सा पत्नी कृष्णा नान्यस्य कस्यचित् ॥ योगीश्वराः शरीराणि कुर्वंति बहुला
न्यपि ॥ पंचानामेकपत्नीत्वमित्येतत्कथितं तव ॥ श्रूयतां बलदेवोपि यथा यातः सरस्वतीं ॥ २९ ॥ ॥ इति श्रीमार्कं
डेयपुराणे पंचद्रौपद्युपाख्यानं नाम पंचमोध्यायः ॥ ५ ॥ ॥ पक्षिण ऊचुः ॥ रामः पार्थे परां प्रीतिं ज्ञात्वा कृष्णस्य लां
गली ॥ चिंतयामास बहुधा किं कृतं सुकृतं भवेत् ॥ १ ॥ कृष्णेन हि विना नाहं यास्ये दुर्योधनं [illegible] जामातरं तथा शि ति
ष्यं घातयिष्ये नरेश्वरं ॥ तस्मान्न पार्थं यास्यामि नापि दुर्योधनं नृपं ॥ ३ ॥ + पांडवान्वा समाश्रित्य कथं दुर्योधनं नृपं २
तीर्थेष्वाप्लावयिष्यामि तावदात्मानमात्मना ॥ कुरूणां पांडवानां च यावदंताय कल्पते ॥ ४ ॥ इत्यामंत्र्य हृषीकेशं
पार्थं दुर्योधनं तथा ॥ जगाम द्वारकां शौरिः स्वसैन्यपरिवारितः ॥ गत्वा द्वारवतीं रामो हृष्टपुष्टजनाकुलां ॥ त्वो
गंतव्येषु तीर्थेषु पपौ पानं हलायुधः ॥ पीतपानो जगामाथ रैवतोद्यानमृद्धिमत् ॥ हस्तेन हीत्वा समदां रेवतीम
प्सरःसमां ॥ स्त्रीकदंबकमध्यस्थो ययावनुपदं स्खलन् ॥ ददर्श च वनं वीरो रमणीयमनुत्तमं ॥ सर्वर्तुफलपु
ष्पाढ्यं शाखामृगगणाकुलं ॥ पुण्यं पद्मवनोपेतं सपल्वलमहावनं ॥ स शृण्वन्प्रीतिजननान्वल्गुन्मदकलान्नृ ॥ ॥राम१॥
शुभान् ॥ श्रोत्ररम्यान्सुमधुरान्शब्दान्खगमुखेरितान् ॥ १० ॥ सर्वर्तुफलरत्नाढ्यान्सर्वर्तुकुसुमोज्वलान् ॥ अप ॥१९॥
श्यन्पादपांस्तत्र विहंगैरनुनादितान् ॥ आम्रानाम्रातकान्भव्यान्नालिकेरान्सतिंदुकान् ॥ आवलीलुकास्तथा जी

9A

रान्दाडिमान्बीजपूरकान्॥पनसाम्रकुलान्मोचान्नीपांश्चातिमनोहरान्॥पारावतांश्च कंकोलान्नालि
नानाम्लवेतसान्॥भल्लातकानामलकांस्तिंदुकांश्च महाफलान्॥इंगुदान्करमर्दांश्च हरीतकविभीतकान्
एतानन्यांश्च सतरून्ददर्श यदुनंदनः॥तथैवाशोकपुंनागकेतकीबकुलांस्तथा॥चंपकान्सप्तपर्णांश्च कर्णिकारान्
समालतीन्॥पारिजातान्कोविदारान्मंदारेंदीवरांस्तथा॥पाटलाः पुष्पिता रम्या देवदारुद्रुमांस्तथा॥शालांस्तालांश्च तमालां
निचुलान्वंजुलान्धवान्॥तमालाक्षोडखर्जूरमधूकान्किंशुकांस्तथा॥चकोरैः शतपत्रैश्च भृंगराजैस्तथा शुकैः
कोकिलैः कलविंकैश्च हारीतैर्जीवजीवकैः॥प्रियपुत्रैश्चातकैश्च तथान्यैर्विविधैर्द्विजैः॥श्रोत्ररम्यं सुमधुरं कूजद्भि
श्चाप्यधिष्ठितं॥सरांसि च सपद्मानि मनोज्ञसलिलानि च॥२५॥कुमुदैः पुंडरीकैश्च तथा कोकनदोत्पलैः॥कह्लारैः
कमलैश्चापि आचितानि समंततः॥कादंबैश्चक्रवाकैश्च तथैव जलकुक्कुटैः॥कारंडवैः प्लवैर्हंसैः कूर्मैर्मद्गुभिरे
वचा॥एतैश्चान्यैश्च कीर्णानि तथान्यैर्जलचारिभिः॥क्रमेणैतद्वनं शौरिः प्रेक्ष्यमाणो मनोरमं॥जगामानुगतः स्त्रीभि
र्लताग्रहमनुत्तमं॥स ददर्श द्विजांस्तत्र वेदवेदांगपारगान्॥कौशिकान्भार्गवांश्चैव भारद्वाजान्सगोत्तमान्॥
विविधेषु च संभ्रतान्वंशेषु द्विजसत्तमान्॥२५॥कथाश्च बलवद्धोत्कानुपविष्टान्महत्सु च॥कृष्णाजिनोत्तरी
येषु कूर्चेषु चर्हशीषु च॥सूतं तेषां च मध्यस्थं कथयानं कथाः शुभाः॥पौराणिकीः सुरर्षीणामाद्यानां चरिताः
श्रयाः॥दृष्ट्वा रामं द्विजाः सर्वे मधुपानारुणेक्षणं॥मत्तोयमिति मन्वानाः समुत्तस्थुस्त्वरान्विताः॥पूजयंतो हलधर
म मृतेतस्य तनंदनं॥प्रमत्तइतिन्वानः सूतो नाचेदुलायुधं॥ततः क्रोधसमाविष्टो हली सूतं महाबलः॥निजघा
नविरत्नासः॥क्षोभिताश्च वदानवः॥अध्यासति पदं ब्राह्मं तस्मिन्सूते निपातिते॥निःक्रांतास्ते द्विजाः सर्वे वना

मा०पु० ॥ कृत्वाजिनांबरान् ॥ अवध्य तं तत्याजात्मानं मन्यमानोहमासुधः ॥ चिंतयामास स सुमहन्मया पापमिदं कृतं ॥ व्यासास नग
गतो ह्येष यस्त्वतो विनिपातितः ॥ तयाहीमे द्विजाः सर्वे मामवेक्ष्य विनिर्गताः ॥ शरीरस्य च मे गंधो लोहस्येवासृग्वावहः
॥१९॥ आत्मानं चावगच्छामि ब्रह्मघ्नमिव कुत्सितं ॥ ३४ ॥ धिगमर्षतया मय्यमतिमानममीरुणं ॥ येरावि वेष्टेनसुमहन्मयापा
पमिदं कृतं ॥ अतोद्य घंकरिष्यामि व्रतं द्वादशवार्षिकं ॥ स्वकर्मख्यापनं कुर्वन् प्रायश्चित्तमनुत्तमं ॥ ३६ ॥ अयचेय
10 समाख्यातो येयात्रा मया पुना ॥ एतामेव प्रयास्यामि प्रतिलोमां सरस्वतीं ॥ अतो जगाम रामोसौ प्रतिलोमां सर
स्वतीं ॥ अतः परं प्रवक्ष्यामि यादवयकयात्रयं ॥ ३७ ॥ इति श्रीमार्कंडेयपुराणे बलदेवतीर्थयात्रानाम षष्ठो
ध्यायः ॥ ६ ॥ ॥ पक्षिण ऊचुः ॥ हरिश्चंद्रेति राजर्षिरासीत्त्रेतायुगे पुरा ॥ धर्मात्मा पृथिवीपालः प्रोल्लसत्कीर्त्तिस
त्तमः ॥ न दुर्भिक्षं न च व्याधिर्नाकालमरणं नृणां ॥ नाधर्मरुचयः पौरास्तस्मिन् शासति पार्थिवे ॥ बभूवुर्न तथोन्म
त्ता धनवीर्यतपोमदैः ॥ नाजायंत स्त्रियश्चैव काश्चिदप्राप्तयौवनाः ॥ स कदाचिन्महाबाहुररण्येनुसरन्मृगं ॥ शुश्रा न
व शब्दमसकृत्त्रायस्वेत्यथ योषितां ॥ स विहाय मृगं राजा मा भैरित्यभ्यभाषत ॥ मयि शासति दुर्मेधाः कोयं न्यायवृत्ति म
मान् ॥ तत क्रंदितानुसारी च स वीरं भवि घातकृत ॥ एतस्मिन्नंतरे रौद्रो विघ्नराट् समचिंतयत ॥ विश्वामित्रोयमतु
लं तप आस्थाय वीर्यवान् ॥ प्रागसिद्धा भवादीनां विद्याः साधयति व्रती ॥ साध्यमानाः क्षमाशौचसत्यसंयमिनामु
ना ॥ एताः भयार्त्ताः क्रंदंति कथं कार्यमिदं मया ॥ च तेजस्वी कौशिकश्रेष्ठो वयमद्य सुदुर्बलाः ॥ क्रोशंत्येतास्तथाभी ॥राम॥
तादुष्पारं प्रतिभाति मे ॥ अथवायं नृपः प्राप्तो मा भैरिति वदन्मुहुः ॥ इममेव प्रविश्याशु साधयिष्ये यदीप्सितं ॥ एवं इति ॥१०॥
संचिंत्य रौद्रेण विघ्नराजेन वै ततः ॥ तेनाविष्टो नृपः कोपादिदं वचनमब्रवीत् ॥ कोयं बध्नाति वस्त्रांते पावकं पाप

कृत्स्नरत्न॥ बलेनतेजसादीप्तमपिपश्यावुपस्थिते॥ कोयमत्कार्मुकाक्षेपविदीपितादिगंतरः॥ घोरैर्विभिन्नसर्वांगोदीर्घनिद्रांप्रवे
क्ष्यति॥ विश्वामित्रस्ततःक्रुद्धःश्रुत्वातन्नृपतेर्वचः॥ क्रुद्धेचर्षिवरेतस्मिन्नेशुर्विद्याःक्षणेनताः॥ सचापिराजातंदृष्ट्वावि
श्वामित्रंतपोनिधिं॥ भीतःप्रावेपतात्यर्थंसहाश्वत्थपर्णवत्॥ सदुरात्मन्नितियदामुनिस्तिष्ठेतिचाब्रवीत्॥ ततःसराजावि
नयात्प्रणिपत्याभ्यभाषत॥ भगवन्नेषमेधर्मोनापराधोममप्रभो॥ नक्रोद्धुमर्हसिमुनेनिजधर्मरतस्यमे॥ दातव्यंरक्षितव्यं
चधर्मज्ञेनमहीक्षिता॥ चापंचोद्यम्ययोद्धव्यंधर्मशास्त्रानुसारतः॥ विश्वामित्रउवाच॥ दातव्यं कस्यकेरक्ष्याःकैर्यो
द्धव्यंचतेनृप॥ क्षिप्रमेतन्ममाचक्ष्वयद्यधर्मभयंतव॥ राजोवाच॥ दातव्यंविप्रमुख्येभ्योयेचान्येकृशवृत्तयः॥ रक्ष्याभी
ताःसदायुद्धंकर्तव्यंपरिपंथिभिः॥ विश्वामित्रउवाच॥ यदिराजाभवान्सम्यग्राजधर्ममवेक्ष्यते॥ निर्वेष्टुकामोविप्रोहंदी
यतामिष्टदक्षिणा॥ पक्षिण्युवाच॥ एतद्राजावचःश्रुत्वाप्रहृष्टेनांतरात्मना॥ पुनर्जातमिवात्मानंमेनेप्राहचकौशिकं॥
उच्यतांभगवन्यत्तेदातव्यमविशंकितं॥ दत्तमित्येवतद्विद्धियद्यपिस्यात्सुदुर्लभं॥ हिरण्यंवासुवर्णंवापुत्रंपत्नींक
लेवरं॥ प्राणान्राज्यंपुरंलक्ष्मींयदभिप्रेतमात्मनः॥ विश्वामित्रउवाच॥ राजन्प्रतिगृहीतोयंयस्तेदत्तःप्रतिग्रहः॥ प्रयच्छ
प्रथमंतावद्दक्षिणांराजसूयकीं॥ राजोवाच॥ ब्रह्मंस्तामपिदास्यामिदक्षिणांभवतोह्यहं॥ व्रियतांद्विजशार्दू
लस्त्वदिष्टःप्रतिग्रहः॥ विश्वामित्रउवाच॥ ससागरांधरामेतांसभूभृद्ग्रामपत्तनां॥ राज्यंचसकलंवीररथाश्वगजसं
कुलं॥ कोष्ठागारंचकोशंचयच्चान्यद्विद्यतेतव॥ विनाभार्यांचपुत्रंचशरीरंचतवानघ॥ धर्मंचसर्वधर्मज्ञयो
यांतमनुगच्छति॥ बहुनात्रकिमुक्तेनसर्वमेतत्प्रदीयतां॥ पक्षिण्युवाच॥ प्रहृष्टेनैवमनसानिर्विकारमुखोनृपः॥
तस्यर्षेर्वचनंश्रुत्वातथेत्याहकृतांजलिः॥ विश्वामित्र॥ सर्वस्वंयदितेदत्तंराज्यमुर्वीबलंधनं॥ प्रभुत्वंकस्यराज

॥मा० पु०॥ र्थे राज्यस्य तापसे मयि ॥ ९२ ॥ हरिश्चंद्र उवाच ॥ यस्मिन्नयिन दत्ता ते काले राज्यवती मही ॥ तस्मिन्नपि भवान्स्वामी किमुतान्य
महीपतिः ॥ विश्वामित्र उ ॥ यदि नाज्ञाप्रतिहता मम राजवरत्वया ॥ यत्र मे विषये स्वाम्यं तस्मान्निःक्रांतुमर्हसि ॥ श्रुत्वा राजा
॥२२॥ ततो वाक्यं वज्रपातोपमं मुनेः ॥ मुहूर्त्तमासीन्निश्चेष्टो नाहमस्मीति चिंतयन् ॥ मुहूर्त्तोत्थाप्य संज्ञां तु ब्रह्मशापभयातु
रः ॥ ज्ञात्वा त्वा यशिष्टं जलं गं सर्वस्यागे करोन्मतिं ॥ श्रोणीसूत्रादि सकलं मुत्स्काम्य षणसंग्रहं ॥ तरुवल्कलमाबध्य सह
भार्यासुतेन च ॥ प्रदक्षिण उ ॥ तयेति कृत्वा चोक्त्वा च राजा गंतुं प्रचक्रमे ॥ क्व यत्स्यामीशैव्यया सार्द्धं बालकेनात्मजेन च ॥
व्रजंतं स ततो ध्यानं तमुनिः प्रत्यभाषत ॥ क्व यास्यसीयदत्वा मे दक्षिणां राजसूयिकीं ॥ ९५ ॥ राजोवाच ॥ भगवन्राज्य
मेतत्ते दत्तं निहतकंटकं ॥ अयशिष्टमिदं ब्रह्मन्नद्य देहत्रयं मम ॥ विश्वामित्र उ ॥ तथापि खलु दातव्या राजन्सा यज्ञद
क्षिणा ॥ विशेषतो ब्राह्मणानां हंत्यदत्तं प्रतिश्रुतं ॥ ९६ ॥ यावच्च घोरा जसूये ब्राह्मणानां भवेन्नृप ॥ तावदेव तु दातव्या
दक्षिणा राजसूयकी ॥ प्रतिश्रुत्य तु दातव्यं योद्धव्यं चाततायिभिः ॥ रक्षितव्यास्तथा सं तत्त्वयैतस्माक्प्रतिश्रुतं ॥ रा
जोवाच ॥ भगवन्सांप्रतं नास्ति दास्य कालक्रमेणते ॥ प्रसादं कुरु विप्रर्षे सद्भाव मनुचिंत्य मे ॥ विश्वामित्र उ ॥ किंप्र
मालो मया कालः प्रतीक्ष्यस्ते नराधिप ॥ शीघ्रमाचक्ष्व मा याग्निरन्यथा त्वांप्रधक्ष्यति ॥ ९७ ॥ राजोवाच ॥ मासेन तव वि
प्रर्षे प्रदास्ये दक्षिणाधनं ॥ सांप्रतं नास्ति मे वित्तमनुज्ञां दातुमर्हसि ॥ विश्वामित्र उ ॥ गच्छ गच्छ नृपश्रेष्ठ स्वधर्ममनुपा
लय ॥ शिवश्चते ध्वा भवतु मासंतु परिपंथिनः ॥ पक्षिण ऊचुः ॥ ततः स राजर्षिवरो विस्मयाविष्टमानसः ॥ अनुज्ञातः स ॥राम॥
गच्छेति जगाम वसुधाधिपः ॥ पश्चात्तमनुचिंताग्गंतुमन्वगच्छत्तं प्रिया ॥ तं समायांतं पश्चे ह निर्यातं ससुतं पुरात् ॥ दृष्ट्वा ॥२२॥
प्रचक्रुशुः पौरा राज्ञश्चैवानुयायिनः ॥ हा नाथ किं जहास्यस्मान्नित्यार्त्ति परिपीडितान् ॥ त्वं धर्मतत्परो राजन्पौरानु

यत्र यासि महाराज सपत्नीपुत्रसंयुतः ४१

IIA

गृह कृत्तया ॥ ४ ॥ सैन्यास्मानपि राजर्षे यदि धर्ममवेक्ष्यसे ॥ मुहूर्तं तिष्ठ राजेंद्र भवतो मुखपंकजं ॥ ५ ॥ पिबामो नेत्रभ्रमरैः
कदा द्रक्ष्यामहे पुनः ॥ यस्य प्रयातस्य पुरो यांति पृष्ठे च पार्थिवाः ॥ ६ ॥ तस्यानुयाति भार्येयं गृहीत्वा बालकं सुतं ॥ यस्य भृ
त्याः प्रयातस्य यांत्यग्रे गजसंस्थिताः ॥ स एष पद्भ्यां राजेंद्रो हरिश्चंद्रोऽद्य गच्छति ॥ हा राजन्सुकुमारं ते सुभ्रु रम्यं समुन्नतं ॥ प
थि पांसुपरिक्लिष्टं मुखं कीदृग्भविष्यति ॥ तिष्ठ तिष्ठ नृपश्रेष्ठ स्वधर्ममनुपालय ॥ आनृशंस्यं परो धर्मः क्षत्रियाणां वि
शेषतः ॥ किं दारैः किं सुतैर्नाथ धनैर्धान्यैरथापि वा ॥ ८ ॥ सर्वमेतत्परित्यज्य छायाभूता वयं तव ॥ हा नाथ हा महाराज हा स्वा
मिन्किं जहासि नः ॥ हा वीर रिपुदर्पघ्न हरिश्चंद्र महीपते ॥ यत्र त्वं तत्र तु वयं तत्सुखं यत्र वै भवान् ॥ नगरं तद्यत्र भवान्स स्व
र्गो यत्र नो नृपः ॥ पक्षिण ऊचुः ॥ इति पौरवचः श्रुत्वा राजा शोकपरिप्लुतः ॥ अतिष्ठत्स तदा मार्गे तेषामेवानुकंपया ॥ विश्वामित्रो
पि तं दृष्ट्वा पौरवाक्याकुलीकृतं ॥ रोषामर्षविवृत्ताक्षः समागम्य वचोऽब्रवीत् ॥ धिक्त्वां दुष्टसमाचारमनृतं जिह्मभाषिणं ॥ म
म राज्यं हि दत्त्वा यः पुनः प्रत्याकृष्टुमर्हसि ॥ १० ॥ इत्युक्तः परुषं तेन गच्छामीति सवेपथुः ॥ ब्रुवन्नेव ययौ शीघ्रमाकर्षन्दयितां क
रे ॥ कर्षतस्तां तदा भार्यां सुकुमारीं श्रमातुरां ॥ दंडकाष्ठेन सहसा ताडयामास कौशिकः ॥ तां तथा ताडितां दृष्ट्वा हरिश्चंद्रो न रि
रेश्वरः ॥ गच्छामीत्याह दुःखार्तो नान्यत्किंचिदुदाहरत् ॥ अथ विश्वे तथा देवाः पंच प्राहुः कृपालवः ॥ तदवस्थं कृतं दृष्ट्वा ह
रिश्चंद्रं नरेश्वरं ॥ विश्वामित्रः सुपापोऽयं कांल्लोकान्समवाप्स्यति ॥ येनायं यज्विनां श्रेष्ठः स्वराज्यादवरोपितः ॥ कस्य वा श्रद्धया
पूतं हुतं सोममिहाध्वरे ॥ पीत्वा मुदं प्रयास्यामो वयं मंत्रपुरःसरं ॥ इति तेषां वचः श्रुत्वा कौशिकोऽतिरुषान्वितः ॥ शशाप ता
न्मनुष्यत्वं सर्वे यूयमवाप्स्यथ ॥ प्रसादितश्च तैः प्राह पुनरेव महामुनिः ॥ मानुषत्वेऽपि भवतां भवित्री नैव संततिः ॥ न दारसं
ग्रहश्चैव भविता न च मत्सरः ॥ कामक्रोधविहीनाश्च भविष्यथ सुराः पुनः ॥ पक्षिण ऊचुः ॥ ततोऽवतेरुरंशैः स्वैर्देवास्ते कुरु

तस्मान्नय महाराज नास्माकं त्यक्तुमर्हसि २

मा०र्कं० वेश्मनी॥द्रौपदीगर्भसंभूताः पंचवै पांडुनंदनाः॥७४॥एतस्मात्कारणात्ते च पांडवेया महारथाः॥न दारसंग्रहं प्राप्ताः शापा
॥१२॥ त्तस्य महामुने॥एतत्ते सर्वमाख्यातं पांडवेय कथाश्रयं॥प्रश्नत्रयं समाख्यातं किमन्यच्छ्रोतुमिच्छसि॥७५॥ ॥इति श्री
मार्कंडेयपुराणे द्रौपदेयोत्पत्तिर्नाम सप्तमोध्यायः॥७॥ जैमिनिरुवाच॥ भवद्भिरिदमाख्यातं यथाप्रश्नमनुक्र
12 मात॥ महत्कौतूहलं मेस्ति हरिश्चंद्रकथां प्रति॥१॥ अहो महात्मना तेन प्राप्तं कष्टं महद्भृशं॥ कच्चित्सुखमनुप्राप्त
ता दृगेव द्विजोत्तमाः॥ पक्षिण ऊचुः॥ विश्वामित्रवचः श्रुत्वा स राजा प्रययौ शनैः॥ शैव्याख्यया चानुगतो भार्यया बालपुत्र
या॥ स गत्वा वसुधापालो दिव्यां वाराणसीं पुरीं॥ नैषा मनुष्यभुक्तेति शूलपाणेः परिग्रहः॥ जगाम पद्भ्यां दुःखार्त्तः सह पत्न्या
नुकूलया॥ पुरीप्रवेशे ददृशे विश्वामित्रमवस्थितं॥ तं दृष्ट्वा समनुप्राप्तं विनयावनतो भवत्॥ प्राह चैवांजलिं कृत्वा हरिश्चं
द्रो महामुनिं॥ इमे प्राणाः सुतश्चायमियं पत्नी मुने मम॥ येन ते कृत्यमत्याशु गृह्यतामनुत्तमं॥ यच्चान्यत्कार्यमस्माभि
स्तदनुज्ञातुमर्हसि॥ विश्वामित्र उ॥ पूर्णः समासो भद्रं ते दीयतां दक्षिणा मम॥ राजसूयनिमित्तं हि स्मर्यते स्ववचो यदि
हरिश्चंद्र उ॥ ब्रह्मन्नद्यैव संपूर्णो मासो म्लानतपोबल॥ तिष्ठत्येतद्दिनार्द्धं यत्तत्प्रतीक्षस्व माचिरं॥ विश्वामित्र उ॥ एवमस्तु
महाभाग आगमिष्याम्यहं पुनः॥१०॥ शापं तव प्रदास्यामि न चेदद्य प्रदास्यसि॥ पक्षिण ऊ॥ इत्युक्त्वा प्रययौ विप्रो राजा
चाचिंतयत्तदा॥ कथमस्मै प्रदास्यामि दक्षिणां न विमुंचामि कां दिशं याम्य किंचन॥ यदि नाशं गमिष्यामि अप्रदाय प्र
विश्रुतां॥ ब्रह्मस्वहा कृमिः पापो भविष्या + णया प्रतिश्रुता॥ कुतो मित्राणि पुष्टानि कुतोर्थः सांप्रतं मम॥ प्रतिग्रहः प्रदुष्टो ॥राम॥
मे तं च याचाम्यहं कथं॥ किंतु प्रा + म्यधमाधमः॥ अथवा प्रेष्यतां यास्ये वरमेवात्मविक्रयः॥ पक्षिण ऊ॥ राजानं व्या ॥१२॥
कुलं दीनं चिंतयानमधोमुखं॥ प्रत्युवाच तदा पत्नी बाष्पगद्गदया गिरा॥ त्यज चिंतां महाराज स्वसत्यमनुपालय॥ स्मशा

नवद्वजेनीयो नरः ॥ सत्यवाह्निःस्कृतः नातःपरतरं धर्मं वदंति पुरुषस्य च ॥ यादृशं पुरुषव्याघ्र स्वसत्यपरिपालनं ॥ अग्नि
होत्रमधीतं च दानाद्याः सकलाः क्रियाः ॥ भजंते तस्य वैफल्यं यस्य वाक्यमकारणं ॥ सत्यमस्तं समुदितं धर्मे शास्त्रेषु धीम
तां ॥ तारणायानृतं तद्वत्स तनाया कृतात्मनां ॥ सहस्राश्वमेधानां हस्य राजसूयं च पार्थिवं ॥ २० ॥ कृतिनाम श्रुतः स्वर्गो
दत्तस्य वचनात्स कृतः राजन्न जातमस्यं मे इत्युक्त्वा प्रहरोदह ॥ वाष्पां सुप्लुतनेत्रां तामुवाचेदं महीपतिः ॥ राजोवाच ॥
विमुंच भद्रे संत्रासमयं तिष्ठति बालकः ॥ उच्यतां वक्तुकामासि यया त्वं गजगामिनि ॥ पत्न्युवाच ॥ राजन्नजातमयसंमे
सतां पुत्रफलाः स्त्रियः ॥ २१ ॥ समां प्रदाय वित्तेन देहं विप्राय दक्षिणां ॥ सदिलरूप ॥ एतद्वाक्यमुपश्रुत्य ययौ मोहं मही
पतिः ॥ २२ ॥ प्रतिलभ्य च संज्ञां स विललापाति दुःखितः ॥ महद्दुःखमिदं भद्रे यत्त्वमेवं ब्रवीषि मां ॥ २३ ॥ किं तव स्मितसंलापा
मम पापस्य विस्मृताः ॥ हा हा कथं त्वया शक्यं वक्तुमेतच्छुचिस्मिते ॥ दुर्वाच्यमेतद्वचनं कर्तुं शक्तोन्यहं कथं ॥ इत्युक्त्वा सा नृप
अरे रे धिग्धिगित्यसकृद्रुदन् ॥ निपपात महीपृष्ठे मूर्छयाभिपरिप्लुतः ॥ शयानं भुवितं दृष्ट्वा हरिश्चंद्रं महीपतिं ॥ उवाचेदं
ग सकरुणं राज्ञी सुदुःखिता ॥ हा महाराज कस्येदमपध्यानादुपागतं ॥ यत्त्वं निपतितो भूमौ रांकवास्तरणोचितः ॥ येन को
दामुग्रशो वित्तं विप्राणामपवर्जितं ॥ २० ॥ सएव पृथिवीनाथो भूमौ स्वपिति मे पतिः ॥ हा कष्टं किं तवानेन कृतं दैवमहीक्षिता ॥ य
दिंद्रोपेंद्रतुल्योयं नीतः पापमिमां दशां ॥ इत्युक्त्वा सापि सुश्रोणी मूर्छिता निपपात ह ॥ भर्तृदुःखमहाभारेणासह्येन निपी
डिता ॥ तौ तथा पतितौ भूमावनाथौ पितरौ शिशुः ॥ २ ॥ दृष्ट्वात्यर्थं क्षुधाविष्टः प्राह वाक्यं सुदुःखितः ॥ तात तात ददस्वान्नं ददस्वां
बांब भोजनं ॥ क्षुन्मे बलवती जाता जिह्वाग्रं मम शुष्यति ॥ वसिष्ठ उ० ॥ एतस्मिन्नंतरे प्राप्तो विश्वामित्रो महातपाः ॥ कारु
कस्त्यद्वक्रुद्धो धनं संमार्गितुं तदा ॥ दृष्ट्वा तु तं हरिश्चंद्रः पपात भुवि मूर्छितः ॥ स वारिणा समभ्युक्ष्य राजानमिदमब्रवीत् ॥

मा० पु०॥ उत्तिष्ठोत्तिष्ठ राजेंद्र तां दद स्वेष्टदक्षिणां ॥ ऋणं धारयतो दुःखमहन्यहनि वर्द्धते ॥ आप्याय्यमानः सत्तदा हिमशीतेन
॥२४॥ वारिणा ॥ अवाप्य चेतनां राजा विश्वामित्रमवेक्ष्य च ॥ पुनर्मोहं समापेदे अथ क्रोधं ययौ मुनिः ॥ समाश्वास्य च राजानं
13 वाक्यमाह द्विजोत्तमः ॥ दीयतां दक्षिणा सा मे यदि धर्ममवेक्ष्यसे ॥ ४५ ॥ सत्येनार्कः प्रतपति सत्ये तिष्ठति मेदिनी ॥
सत्यं चोक्तः परो धर्मः स्वर्गः सत्ये प्रतिष्ठितः ॥ अश्वमेधसहस्रं च सत्यं च तुलया धृतं ॥ अश्वमेधसहस्राद्धि सत्यमे
व विशिष्यते ॥ अथवा किं ममैतेन साम्ना प्रोक्तेन कारणं ॥ अनार्ये पापसंकल्पे क्रूरे चानृतवादिनि ॥ ४७ ॥ त्वयि रा
जेंद्र वदति सद्भावो श्रूयतां मम ॥ अथ मे दक्षिणां राजन्न दास्यसि भवान्यदि ॥ अस्ताचलं प्रयाते र्के शप्स्यामि
त्वां ततो ध्रुवं ॥ इत्युक्त्वा स ययौ विप्रो राजा चासीद्भयातुरः ॥ ४९ ॥ कांदिशीकस्ततो धनी विश्वामित्रेण सः समुनिनार्दितः ॥ भार्या
स्य भर्यः प्राह इदं क्रियतां वचनं मम ॥ मा शापानलनिर्दग्धः पंचत्वमुपयास्यसि ॥ स तथा चोद्यमानस्तु राजा पत्न्या
पुनः पुनः ॥ प्राह भद्रे करोम्येष विक्रयं तव निर्घृणः ॥ नृशंसैरपि यत्कर्तुं न शक्यं तत्करोम्यहं ॥ यदि मे शक्यते
वाणी वक्तुमीदृक् सुदुर्वचः ॥ एवमुक्त्वा ततो भार्यां गत्वा नगरमातुरः ॥ बाष्पापिहितकंठाक्षस्ततो वचनमब्रवी
त् ॥ भो भो नागरिकाः सर्वे शृणुध्वं वचनं मम ॥ ५० ॥ किं मां पृच्छथ कस्त्वं भो नृशंसोहममानुषः ॥ राक्षसो वातिकठिन
ततः पापतरो पि वा ॥ विक्रेतुं दयितां प्राप्तो यो न प्राणांस्त्यजाम्यहं ॥ यदि वः कस्यचित्कार्यं दास्या प्राणेष्टया मम ॥
स ब्रवीतु त्वरायुक्तो यावत्संधारयाम्यहं ॥ ५१ ॥ अथ वृद्धो द्विजः कश्चिदागत्याह नराधिपं ॥ समर्पय स्वमे दा ॥ राम ॥
सीमहं क्रेता धनप्रदः ॥ अस्ति मे वित्तमस्तोकं सुकुमारी च मे प्रिया ॥ गृहकर्म न शक्नोति कर्तुमस्मात्प्रयच्छतां ॥ कर्म ॥ २३ ॥
ण्यता वयोरूपशीलानां नव योषितः ॥ ५३ ॥ अनुरूपमिदं वित्तं गृहाणार्पय मे बलां ॥ एवमुक्तस्य विप्रेण हरिश्चंद्र

13A

स्यभ्रष्टपते ॥ व्यदीर्यतमनोदुःखान्नचैनंकिंचिदब्रवीत् ॥ ततःसविप्रोनृपतेर्वल्कलांतेदृढंधनं ॥ बध्वाकेशेषुयादायराज
पत्नीमकर्षयत् ॥ रुरोदरोहिताश्वोपिदृष्ट्वाकृष्टांतुमातरं ॥ हस्तेनवस्त्रमाकर्षन्नूकाकपक्षधरःशिशुः ॥ राजभार्योवाच ॥
मुंचार्यमुंचतावन्मांयावत्पश्याम्यहंशिशुं ॥ दुर्लभंदर्शनंतातपुनरस्यभविष्यति ॥ पश्यैहिमवत्समामेवंमातरंदास्यतां ति
गतां ॥ ६९ ॥ मामांस्प्राक्षीराजपुत्रअस्पृश्याहंतवाधुना ॥ ततःसबालःसहसादृष्ट्वाकृष्टांतुमातरं ॥ समभ्यधावदंबेतिरुदन्
नास्त्राविलेक्षणः ॥ हस्तेनवस्त्रमाकर्षन्नूकाकपक्षधरस्खलन् ॥ ७० ॥ तमागतंद्विजःक्रोधाद्बालमभ्याहनत्पदा ॥ वदंस्त
थापिसोंबेतिनैवामुंचतमातरं ॥ ७१ ॥ राजपत्न्युवाच ॥ प्रसादंकुरुमेनाथक्रीणीष्वैनंचबालकं ॥ क्रीतापिनाहंभवतोविनै
नंकार्यसाधिका ॥ इत्थंममाल्पभाग्यायाःप्रसादसुमुखोभव ॥ समांयोजयबालेनवत्सेनेवपयस्विनीं ॥ ७२ ॥ ब्राह्मणउ
वाच ॥ गृह्यतांवित्तमेतद्धिदीयतांममबालकः ॥ स्त्रीपुंसोर्धर्मशास्त्रज्ञैःकृतमेवहिवेतनं ॥ शतंसहस्रंलक्षंचकोटिमूल्यं
तथापरे ॥ पक्षिणऊचुः ॥ तथैवतस्यतद्वित्तंबध्वोत्तरपटेततः ॥ प्रगृह्यबालकंमात्रासहैकस्थमबंधयत् ॥ नीयमानौतु
तौदृष्ट्वाभार्यापुत्रौसपार्थिवः ॥ विललापसुदुःखार्त्तोनिःश्वस्योष्णंपुनःपुनः ॥ यांनवायुर्नचादित्योनेंदुर्नचपृथग्जनः ॥
दृष्टवंतःपुरापत्नीसेयंदासीत्वमागता ॥ सूर्यवंशप्रसूतोयंसुकुमारकरांगुलिः ॥ ७७ ॥ संप्राप्तोविक्रयंबालोधिग्मामम्
स्तुस्तुदुर्मतिं ॥ हाप्रियेहाशिशोवत्समममानार्यस्यदुर्नयैः ॥ दैवाधीनांदशांप्राप्तोनमृतोस्मितथापिधिक् ॥ पक्षिणऊचुः ॥ एवं
विलप्यतोराज्ञःसविप्रोंतरधीयत ॥ वृक्षगेहादिभिस्तुंगैस्तावादायत्वरान्वितः ॥ विश्वामित्रस्ततःप्राप्तोनृपंवित्तमयाचत ॥
तस्मैसमर्पयामासहरिश्चंद्रोपितद्धनं ॥ तद्वित्तस्वल्पमालक्ष्यदारविक्रयसंभवं ॥ शोकाभिभूतंराजानंकुपितःकौशिकोब्र
त्र वीत् ॥ क्षत्रबंधोममेमांत्वंसदृशींयज्ञदक्षिणां ॥ ७५ ॥ मन्यसेयदितत्क्षिप्रंपश्यत्वंमेबलंपरं ॥ तपसोत्रस्ततप्तस्यब्राह्मण्यस्या

मदरक्तांतनयनऊर्द्धकेशोंजनप्रभः ५

मलस्यच॥मस्यभावस्यचोग्रस्यशङ्डुस्याध्ययनस्यच॥राजोवाच॥अन्यंदास्यामिभगवन्कालःकश्चित्प्रतीक्ष्यतां॥सांप्र
मा०पु०। तंनास्तिविक्रीतापत्नीपुत्रश्चबालकः॥विश्वामित्रउवाच॥चतुर्भागःस्थितोयोयंदिवसस्यनराधिप॥एषएवप्रतीक्ष्योमेवक्त॥
॥२४॥ व्यंनोत्तरंत्वया॥पक्षिणऊचुः॥तमेवमुक्त्वाराजेंद्रंनिघृणंनिष्ठुरंवचः॥तदादायधनंतूर्णंकुपितःकौशिकोययौ॥विश्वामित्रे
गतेराजाभयशोकाब्धिमध्यगः॥२०॥सर्वाकारंविनिश्चित्यप्रोवाचोच्चैरधोमुखः॥वित्तक्रीतेनयोह्यर्थीमयाप्रेष्येणमानवः॥
14 सब्रवीतुत्वरायुक्तोयावत्तपतिभास्करः॥अथाजगामत्वरितोधर्मश्चांडालरूपधृक्॥२१॥दुर्गंधोविकृतोरूक्षःश्मश्रुलो
दंतुरोघृणी॥कृष्णोलंबोदरस्पिंगाननकरालःपुरुषाक्षरः॥२२॥गृहीतपक्षिपुंजश्चशवमाल्यैरलंकृतः॥कपालहस्तोदीर्घा
स्योभैरवोतिवदन्मुहुः॥श्वगणाभिवृतोघोरोयष्टिहस्तोनिराकृतिः॥चांडालउवाच॥अहमर्थीत्वयाशीघ्रंकथयस्वात्मवेतनं ५
वा स्तोकेनबहुनापियेनवैलभ्यतेभवान्॥पक्षिणऊचुः॥तंतादृशमथालक्ष्यक्रूरदृष्टिंसुनिष्ठुरं॥वदंतमतिदुःशीलंकस्त्व
मित्याहपार्थिवः॥चांडालोवाच॥चांडालोहमितिख्यातोप्रवीरेतिपुरोत्तमे॥विख्यातोवध्यवधकोमृतकंबलहारकः॥रा
जोवाच॥नाहंचंडालदासत्वमिच्छेयंसुविगर्हितं॥वरंशापाग्निनादग्धोनचांडालवशंगतः॥पक्षिणऊचुः॥तस्यैवंवदतःप्रा
प्तोविश्वामित्रस्तपोनिधिः॥कोपामर्षविवृत्ताक्षःप्राहचेदंनराधिपं॥चंडालोयमनल्पंतेदातुंवित्तमुपस्थितः॥२४॥क
स्मान्नदीयतेमह्यमशेषायज्ञदक्षिणा॥हरिश्चंद्रउवाच॥भगवन्सूर्यवंशोत्थमात्मानंवेद्मिकौशिक॥कथंचंडालदासत्वं
गमिष्येवित्तकामुकः॥विश्वामित्रउवाच॥यदिचंडालवित्तंचमात्मविक्रयजंमम॥नप्रदास्यसिकालेनशप्स्यामित्वाम ॥राम॥
संशयं॥पक्षिणऊचुः॥हरिश्चंद्रस्ततोराजाचिंतावस्थितजीवितः॥प्रसीदेतिवदन्पादावृषेर्जग्राहविह्वलः॥दासोस्म्यार्त्तो ॥२४॥
स्मिभीतोस्मित्वद्भक्तश्चविशेषतः॥कुरुप्रसादंविप्रर्षेकष्टश्चांडालसंकरः॥भवेयंवित्तशेषेणसर्वकर्मकरोवशः॥तवै

दासभावंगतोहरिश्चंद्रघात
पूर्वकर्मरवध्यते २

14A

वमुनिशार्दूलयेथ्यचित्तानुवर्त्तकः॥ विश्वामित्रउवाच॥ यदिप्रेष्योममभवांश्चंडालायततोमया॥ दासभावमनुप्राप्तोदत्तोवि
त्तार्बुदेनवै॥ पक्षिणऊचुः॥ एवमुक्तेतदातेनश्वपाकोहृष्टमानसः॥ विश्वामित्रायतद्द्रव्यंदत्वाबध्वानरेश्वरं॥ दंडप्रहार
संभ्रांतमतीवव्याकुलेंद्रियं॥ इष्टबंधुवियोगार्त्तमनयन्निजपक्कणं॥ हरिश्चंद्रस्ततोराजावसंश्चंडालपक्कणे॥ प्रातर्मध्या
ह्नसमयेसायंचैतदगायत॥ बालादीनमुखीदृष्ट्वाबालंदीनमुखंपुरः॥ १॥ मांस्मरत्यसुखाविष्टामोचयिष्यतिनौनृपः॥
उपात्तवित्तोविप्रायदत्वावित्तमतोधिकं॥ १॥ नसामांमृगशावाक्षीवेत्तिपापतरंकृतं॥ राज्यनाशःसुहृत्त्यागोभार्यातन
यविक्रयः॥ प्राप्ताचांडालताचेयमहोदुःखपरंपरा॥ एवंसनिवसन्नित्यंस्मरंश्चदयितांसुतं॥ १॥ भार्याचासमामिष्टां
हृतसर्वस्वआतुरः॥ कस्यचित्त्वथकालस्यमृतचेलापहारकः॥ हरिश्चंद्रोभवद्राजा श्मशानेतद्वशानुगः॥ चंडालेनानु
शिष्टश्चमृतचेलापहारिणा॥ १॥ इदंराज्ञाधमेदेयंषड्भागंतुशवंप्रति॥ त्रयस्तुममभागास्युर्द्वौभागौतववेतनं॥ इति
प्रतिसमादिष्टोजगामशवमंदिरं॥ दिशंतुदक्षिणांयत्रवाराणस्यांस्थितंतदा॥ श्मशानंघोरसन्नादंशिवाशतसमाकुलं॥ श
वमाल्यसमाकीर्णंदुर्गंधंबहुधूमकं॥ पिशाचभूतवेतालडाकिनीयक्षसंकुलं॥ महागृध्रमहाभूतरवकोलाहलायु
तं॥ गृध्रगोमायुसंकीर्णंश्ववृंदपरिवारितं॥ अस्थिसंघातसंकीर्णंमहादुर्गंधिसंकुलं॥ ११॥ नानामृतसुहृन्नादरौद्रको
लाहलायुतं॥ हापुत्रहामित्रबंधोभ्रातर्वत्सप्रियाद्यमे॥ हापतेभागिनेयाद्यहामातुलपितामह॥ मातामहपितः पौत्रबं
गतोस्येहिबांधवं॥ इत्येवंवदतांयत्रध्वनिःसंश्रूयतेमहान्॥ यत्रनेत्रैरनिमिषैःशिवोभटमिवार्चिषं॥ निमीलितेश्चनय
नैर्बद्धंक्षितयतेततः॥ उच्चलन्मांसवसामेदच्छमच्छमितसंकुलं॥ अर्द्धदग्धशवाःश्यामाविकसद्दंतपंक्तयः॥ हंसतीवाग्नि
मध्यस्याःकायस्येयंदशात्विति॥ १२५॥ अग्नेश्चटचटाशब्दोवायसैरस्थिपंक्तिषु॥ बांधवाक्रंदशब्दश्चपुल्कसेषुप्रहर्षितः॥

गायतां भूतवेतालपिशाचगणोरगसंसां ॥ श्रूयते स्तु महान्घोरः कस्यांतद्ध्वनिस्वनः ॥ महामहिमकारीयगोमायु रुद्रामिसंकु
मा० पु० ॥ लं ॥ तद्दस्य भस्मकूटैश्च वृतं सास्थिभिरुन्नतैः ॥ नानोपहाररसगंधीय काकविहंगपकालिकं ॥ अनेकशब्दबहुलं श्मशान नग
॥१५॥ रायते ॥ १९ ॥ सवह्निगर्भैरशिवैः शिवारुतैर्निनादितं भीषणरावगह्वरं ॥ भयं भयस्याप्युपसज्जनेभृशं श्मशानमाक्रंदविरा
वदारुणं ॥ स राजा तत्र संप्राप्तो दुःखितः शोचतो धृतः ॥ हा भृत्या मंत्रिणो विप्राः क्व तद्राज्यं विधेगतं ॥ २० ॥ हा शैव्ये पुत्रमेबाल
15 मां त्यक्त्वा मंदभाग्यकं ॥ विश्वामित्रस्य दोषेण गतास्त्व कुत्रापि संप्रतं ॥ इत्येवं चिंतयंस्तत्र चंडालोक्तं पुनः पुनः ॥ मलिनो रु
क्षसर्वांगः केशवान्गंधवान्ध्वजी ॥ लकुटी कालकल्पश्च धावंश्चापि ततस्ततः ॥ अस्मिन्नुशवइदं मूल्यं प्राप्तं प्राप्स्या
मि चाप्युत ॥ इदं मम इदं राज्ञे मुख्य चंडालके त्विदं ॥ इति धावन्दिशो राजा जीवन्यो न्यं तरं गतः ॥ जीर्णैकपटसुग्रंथिकृ
प्र तकंथा परिग्रहः ॥ चिताभस्मरजोलिप्तमुखबाहुदरांघ्रिकः ॥ २१ ॥ नानामेदोवसामज्जालिप्तपाण्यंगुलिः श्वसन् ॥
नानाशवौदनकृताहाररतिपरायणः ॥ तदीयमाल्यसंश्लेषकृतमस्तकमंडनः ॥ नाहर्न्नो दिनवाशेते हाहेति प्रवदन्मु
हुः ॥ एवं द्वादशमासास्तु नीतावर्षशतोपमाः ॥ स कदाचित्परिश्रांतो बंधुवियोगवान् ॥ निद्राभिभूतो रूक्षांगो
निश्चेष्टः सुप्तएव सः ॥ तत्रापि शयनीये स ददर्शवान्सुतं महत् ॥ श्मशानाभ्यासयोगेन दैवस्य बलवत्तया ॥ अन्यदेहेन
दत्वा तु गुरवे गुरुदक्षिणा ॥ २२ ॥ ततो द्वादशवर्षाणि दुःखदानात्तु निष्कृतिः ॥ आत्मानं स ददर्शाथ पुल्कसीगर्भसंभवं ॥
तत्रस्थश्चाप्यसौ राजा सोऽचिंतयदिदं तदा ॥ इतो निःक्रांतमात्रो हि दानधर्मं करोम्यहं ॥ अनंतरं स जातस्तु तदा पुल्कसबा
लकः ॥ श्मशाने मृतसंस्कारकरणेषु सदोद्यतः ॥ प्राप्ते तु सप्तमे वर्षे श्मशाने मृतो द्विजः ॥ आनीतो बंधुभिर्द्दृष्टस्तेन ॥राम॥
तत्राधनो गुणी ॥ मृत्यार्थिना तु तेनापि परिभूतास्तु ब्राह्मणाः ॥ ऊचुस्ते ब्राह्मणास्तत्र विश्वामित्रस्य चेष्टितं ॥ २३ ॥ ॥१५॥

यथा पुनर्न गच्छेयं गर्भवासं सुदारुणम् ३

[redacted] ५ पूर्वजन्मनि गुरुदक्षिणा न दत्ता अतो गुरुणा शापो द्वादश [redacted] कसी गर्भे वसेस नयः ५

यापिष्टमास्तुभंक्षेवंकुरुत्वंपापकारक॥ हरिश्चंद्रपुराराजाविश्वामित्रेणपुष्कसः॥१४६॥ कृतपुण्यविनाशेनत्रासलास्था
यनाशनात्॥ प्रदानक्षमतेतेषांतैःसराप्तोरुयातदा॥ गच्छत्वंनरकंघोरमधुनैवनराधम॥ इत्युक्तमात्रेवचनेस्वप्नस्थसन
पस्तदा॥ अपश्यद्यमदूतान्वैपाशहस्तान्भयावहान्॥ तैःसंगृहीतमात्मानंनीयमानंतदाबलात्॥ पश्यतिस्मनृपंरवि
न्नोहामातःपितरघमे॥ एवंवादीसनरकेतैलद्रोण्यांनिपातितः॥ क्रकचैःपाट्यमानस्तुक्षुरधाराभिरप्यधः॥ अधश्चेतम
सिदुःखार्त्तःपूयशोणितभोजनः॥ सप्तवर्षमृतात्मानंपुष्कसंवैददर्शहा॥ दिनंदिनंतुनरकेदह्यतेपच्यतेन्यतः॥१४७॥
शोष्यतेनिघृष्यतेयत्रपूर्यतेछिद्यतेन्यतः॥ स्विद्यतेक्षोभ्यतेन्यत्रमार्यतेपाट्यतेन्यतः॥ क्षार्यतेदीप्यतेन्यत्रशीतवाताहतो
न्यतः॥ एकंदिनंवर्षशतंप्रमाणेननरकेभवत्॥ तथावर्षशतंतस्यश्राचितंनरकेमदैः॥ ततोनिपतितोभूमौशोकव्याकुल
लोचनः॥ विष्ठाशीश्वाव्यजायेतमासमात्रेमृतोपिसः॥ अथापश्यत्खरंदेहंहस्तिनंवानरंपशुं॥ छागंबिडालंकंकंचगां
स्त्रियंपक्षिकांकृमिं॥ मत्स्यंकूर्मंचवाराहंश्वाविधंकुक्कुटंशुकं॥ सारिकांस्थावरांश्चैवसर्पयेमन्याश्चदेहिनः॥ दिवसे
दिवसेजन्मप्राणिनःप्राणिनस्तदा॥ अपश्यद्दुःखसंतप्तोदिवंवर्षशतंतथा॥ एवंवर्षशतंपूर्णंगतंतस्यकुयोनिषु॥
अपश्यत्सकदाचित्स्वराज्यंतुस्वकुलोद्भवं॥ तत्रस्थितस्यतस्यापिराज्यंद्यूतेनहारितं॥ भार्याहृताचपुत्रश्चससचैकाकी
वनंगतः॥ तत्रापश्यत्ससिंहंवैव्यादितास्यंभयावहं॥ विभक्षयिषुमायांतंसरभेणसभक्षितः॥ पुनश्चभक्षितःसोपिभा
र्यांशोचितुमुद्यतः॥ हाशैव्येक्वगतास्यद्यमामिहायास्यदुःखितं॥ अपश्यत्सुनरेवापिभार्यांस्वांसहपुत्रकां॥ त्रायस्वत्वंह
रिश्चंद्रकिंद्यूतेनतवप्रभो॥ पुत्रस्तेशोच्यतांप्राप्तोभार्ययाशैव्ययासह॥ सनापश्यत्सुनरपिधावमानःपुनःपुनः॥ अ
यापश्यत्सुनरपिस्वर्गस्थःसनराधिपः॥१५४॥ नीयतेमुक्तकेशीसानिर्घानिवसनाबलात्॥ हाहाबाष्पमुंचंतीत्राय

॥मा० पु०॥ स्वयं सत्कृत्य वना॥ अथ यावद्यमस्य तु नस्तत्र धर्मराजस्य शासनात्॥ अंतरिक्षस्था आगच्छेह नराधिपं॥ विश्वामित्रेण विज्ञ-
॥१६॥ प्तो यमो राजं स्तवार्थतः॥ इत्युक्त्वा स यपाशैस्तु नीयते बलवद्विभुः॥ आख्याते देवेन कथितं विश्वामित्रस्य चेष्टितं॥ तत्रापि
तस्य विकृतिर्नो धर्मोत्याश्रयर्द्धतः॥ एताः सर्वा दशास्तस्य याः स्वप्ने संप्रदर्शिताः॥ सर्वास्तास्तेन संभुक्त्वा यावद्वर्षं तु
16 द्वादशं॥ द्वादशे वर्षे संप्रेतु नीयमानो भटैर्बलात्॥ यमं सोऽपश्यदाकारादुवाच च नराधिपं॥ विश्वामित्रस्य कोपो यं दु- ४
र्निवार्यो महात्मनः॥ पुत्रस्य ते मृत्युमपि प्रदास्यति स कौशिकः॥ गच्छ त्वं मानुषं लोकं दुःखशेषं च संभुंक्ष्व वै॥ एवमुक्तो यमे-
नासौ श्रेयस्तव भविष्यति॥ व्यतीते द्वादशे वर्षे दुःखस्यांतो नराधिप॥ अंतरिक्षाच्च पतितो यमदूतैः प्रणोदितः॥ पतितो य-
मलोकाच्च विबुद्धो भयसंभ्रमात्॥ अहो कष्टमिति ध्यात्वाक्षते क्षारावसेचनं॥ स्वप्ने दुःखं मया दृष्टं यस्यांतो नोपलभ्य-
ते॥ स्वप्ने दृष्टं मया यत्तु किंतु मे द्वादशाः समाः॥ गतेस्मच्छ तत्र स्थांस्तु पुक्कसांस्तु संभ्रमात्॥ नेत्यूचुः केचित्तत्रस्था एवमे- स
वापरे ब्रुवन्॥ श्रुत्वा दुःखी ततो राजा देवान् शरणमीयिवान्॥ स्वस्ति कुर्वंतु मे देवाः शैव्याया बालकस्य च॥ नमो ध-
र्माय महते नमः कृष्णाय वेधसे॥ परावराय शुद्धाय पुराणायाव्ययाय च॥ नमो बृहस्पतये चैव नम इंद्राय ते नमः॥
एवमुक्त्वा स राजा तु युक्तः पुक्कसकर्मणि॥ शवानां मृत्यकरणे पुनर्नष्टस्मृतिर्यथा॥ मलिनो जटिलः कृष्णो लगु-
डी विह्वलोऽनघः॥ नैव पुत्रो न भार्या तु तस्य वै स्मृतिगोचरे॥ नष्टोत्साहो राज्यनाशात्स्म श्मशाने निवसंस्तथा॥ अथाजे-
गाम सस्तं मृतमादाय भामिनी॥ भार्या तस्य नरेंद्रस्य सर्पदष्टं हि बालकं॥ १०॥ हा पुत्र हा वत्स शिशो इत्येवं वदती
मुहुः॥ कृशा विवर्णा मलिना पांसुध्वस्तशिरोरुहा॥ ११॥ राजपत्न्युवाच॥ हा राजन्नद्य बालं त्वं पश्यसीमं महीतले॥ रममाणं पु- ॥राम॥
रा दृष्टं दुष्टाहिना मृतं॥ १२॥ तस्याविलापशब्दं तं आकर्ण्य स नराधिप॥ जगाम त्वरितं तत्र भविता मृतकंबलः ॥१६॥

षंण वत्सं गुल्मोत्सेधश्च तुष्क्राष्टुरुदाहृतः॥ उभयतो दंतपंक्तिद्वयमध्ये दंतच्च तुष्टयं परीतो दंष्ट्रा भवंति॥ ईषत्समुन्नतं दंष्ट्राचतस्रो यस्य सोऽर्थभाक्

16A

तां सरोरुहतीभार्यां नान्यजानाच्च पार्थिवः॥ चिरप्रवाससंतप्तां पुनर्जातामिवाबलां॥ सापि तं चारुकेशांतं पुरा दृष्ट्वा जबालकं॥
नान्यजानन्न्यपसुतं रुरुश्च क्षोभमलं च॥ सा पल्लष्टे पटे बालं दृष्ट्वाशीविषपीडितं॥ नरेंद्रलक्षणोपेतं चिंतामाप नरेश्व
रः॥ उच्चैः तस्यास्यं चंद्रबिंबाभं सुभ्रु रम्यं समुन्नसं॥ नीलाः केशाः कुंचिताश्च समादीर्घास्तरंगिसाः॥ राजीवनेत्रयुगलो विं
बोष्ठपुटसंवृतः॥ वासावत्संगुल्मोत्सेधचतुष्किरुदाहृतः॥ देवांशो भूपतिः सस्याछस्यते हतुनामुना॥ चतुर्दंष्ट्रश्चतुष्कि
क्षुद्रघोर्घास्यो दीर्घबाहुकः॥ चतुर्लेखाकरो मत्स्ययववद्वृद्धकपर्वकः॥ शिरालुपादो गंभीरः स्वल्पकृत्रिवलीधरः॥ अहोक
ष्टं नरेंद्रस्य वंश्या पृथ्य पकुले शिशुः॥ जातो नीतः कृतांतेन कामवश्यां दुरासनां॥ एवं दृष्ट्वा हि मे बालं मातुरुत्संगशायिनं॥
स्मृतिमभ्यागतो बालो रोहिताश्वोज्वलोचनः॥ सो प्येतामेव वत्सोमेव योवस्थामुपागतः॥ नीतो यदि न घोरेण कृतांतेन तं
लनोवशं॥ शैव्योवाच॥ हा वत्स कस्य पापस्य स्मयध्यानादिदं महत्॥ दुःखमापतितं घोरं यस्यांतो नोपलभ्यते॥ हा
नाथ राजन्भवता मामनाथ्यास्य दुःखितां॥ कापि संतिष्ठता स्थाने विश्रब्धेस्थीयते कथं॥ राज्यनाशः सुहृत्त्यागो भार्या
तनयविक्रयः॥ हरिश्चंद्रस्य राजर्षेः किं विधे न कृतं त्वया॥ २७४ इति तस्या वचः श्रुत्वा राजा संस्थानविच्युतां॥ प्रत्य
भिज्ञाय दयितां पुत्रं च निधनं गतं॥ केष्या नाम गृहे मुक्ता मम योषि द्वरा भवेत्॥ बालकश्च मृतः कस्मादिति राजा विचार
यन्॥ कष्टं ममैव पत्नीयं बालकश्चापि मे सुतः॥ ज्ञात्वा रुरोध संतप्तो मूर्छामभिजगाम च॥ सा च तं प्रत्यभिज्ञाय तामवस्था
मुपागतं॥ मूर्छिता निपपातार्त्ता निश्चेष्टा धरणीतले॥ चेतनां प्राप्य राजेंद्रो राजपत्नी च तौ समं॥ विलेपतुः सुसंतप्तौ शो
कभाराव पीडितौ॥ राजोवाच॥ हा वत्स सुकुमारं ते स्वक्षिभ्रू नासिकालकं॥ पश्यतो मे मुखं दीनं हृदयं किं न दीर्यते॥ ता
त तातेति मधुरं ब्रुवाणं स्वयमागतं॥ उपगृह्य कदा वक्ष्ये वत्स वत्सेति सौहृदात्॥ कस्य जानुप्रणीतेन पिंगेन क्षितिरे

॥मा०पु०॥ णुना॥ ममोत्तरीयमुत्संगस्तयांगमल्लमेष्यति॥ अंगप्रत्यंगसंभूतमनोहरयनंदन॥ मयाकुपित्राहावत्सविक्रीतोयेन
वत्सवत्॥ हृत्वाराज्यमशेषंमेसबांधवधनंमहत्॥ दैवाहिनान्नृशंसेनदृष्टोमेतनयस्ततः॥२९९॥ अहंदैवाहिदष्टस्यपुत्रस्या न
॥१७॥ ननपंकजं॥ निरीक्षन्नपिघोरेणविषेणलांघोकृतोमुना॥ एवमुक्त्वातमादायबालकंबाष्पगद्गदः॥ परिष्वज्यचनिश्चेष्टो
मूर्छयाभिपपातह॥ पत्न्युवाच॥ अयंसपुरुषव्याघ्रःस्वरेणैवोपलक्ष्यते॥ विद्वज्जनमनश्चंद्रोहरिश्चंद्रोनसंशयः॥
17 तथास्यनासिकातुंगाअग्रतोधोमुखंगता॥ दंताश्चमुकुलप्रख्याःख्यातकीर्तेर्महात्मनः॥ श्मशानमागतःकस्मादय
सनरेश्वरः॥ अपहायपुत्रशोकंसापश्यत्पतितंपतिं॥२०४॥ प्रहृष्टाविस्मितादीनाभर्तृपुत्राधिपीडिता॥ वीक्षंतीसातदापश्य
त्यभर्तृदंडंजुगुप्सितं॥ श्वपाकार्हमतोमोहंजगामायतलोचना॥ प्राप्यचेतोथशनकैःसगद्गदमभाषत॥ धिक्त्वांदैवातिकरु
णंनिर्मर्यादंजुगुप्सितं॥ येनायममरप्रख्योनीतोराजाश्वपाकतां॥२०५॥ राज्यनाशंसुहृत्त्यागंभार्यातनयविक्रयं॥ प्राप
यित्वापिनोमुक्तश्चंडालोयंकृतोनृपः॥ हाराजन्जातसंतापामित्थंमांधरणीतलात्॥ उत्थाप्यनाद्यपर्यंकंआरोहेतिकिमु
च्यते॥ नाद्यपश्यामितेछत्रंभृंगारमथवापुनः॥ चामरंव्यजनंचापिकोयंविधिविपर्ययः॥ यस्याग्रेव्रजतःपूर्वंराजानोभृ
त्यतांगताः॥ स्वोत्तरीयैःप्रकुर्वंतिनीरजस्कंमहीतलं॥ सोयंकपालसंलग्नेघटीपटनिरंतरे॥ मृतनिर्माल्यसूत्रांतल ४
ग्नकेशेसुदारुणे॥ वसानिस्यंदसंशुष्कमहापुटकमंडिते॥ भस्मांगारार्द्धदग्धास्थिमज्जासंघट्टभीषणे॥ गृध्रगोमायु
नादार्त्तेनष्टक्षुद्रविहंगमे॥ चित्ताधूमायतिरुचानीलीकृतदिगंतरे॥ कुणपास्वादनमुदासंप्रहृष्टमुदाचरे॥ चरत्यमे ॥रामः॥
ध्येराजेंद्रःश्मशानेदुःखपीडितः॥ एवमुक्त्वासमाश्लिष्यकंठंराज्ञोन्यात्मजा॥ कष्टशोकामयाधाराविललापार्त्तया ॥१७॥
गिरा॥ राजन्स्वप्नोनुतथ्यंवायदेतन्मन्यतेभवान्॥ तत्कथ्यतांमहाभागमनोवैमुह्यतेमम॥ यद्येतदेवधर्मज्ञनास्तिध

मैस्सयता॥ तथैव विप्रदेवादिरजने पालनेपि वा॥ नास्ति धर्मः कुतः सत्यं नार्जवं नान्यसंसता॥ यत्र त्वं धर्मपरमः स्वराज्यादवरोपि
तः॥ इति तस्या वचः श्रुत्वा निःश्वस्यालं सगद्गदं॥ कथयामास तन्वंग्याय यथा प्राप्ता स्वपाकता॥ रुदित्वा सापि सुचिरं निःश्वस्यालं सु
दुःखिता॥ स्वपुत्रमरणं भीरु येयावृत्तं न्यवेदयत॥ श्रुत्वा राजा ततो वाक्यं निपपात महीतले॥ स तस्य पुत्रस्य तदा जिह्वया लेलिहन्मु
खं॥ रुरोद राजोवाच॥ प्रिये न रोचये दीर्घकालं क्लेशमुपासितुं॥ नालायत्तश्व तन्वंगि परस्य मे मंदभाग्यता॥ चंडालेनाननुज्ञातः प्र
वेक्ष्ये ज्वलनं यदि॥ चंडालदास्यतां यास्ये पुनरप्यन्यजन्मनि॥ नरके च पतिष्यामि कीटकः कृमिभोजनः॥ वैतरिण्यां महापूय
वसासृक्स्नायुपिच्छिले॥ असिपत्रवने प्राप्य छेदं प्राप्स्यामि दारुणं॥ तापं प्राप्स्यामि वा प्राप्य महारौरवरौरवौ॥ मग्नस्य दुः
खजलधौ वरं प्राणवियोजनं॥ एकोपि बालको ह्यासीद्वंशकरः सुतः॥ रस्य॥ मम दैवांबुवेगेन स्रुतः सोपि बलीयसा॥
कथं प्राणान्विमुंचामि परायत्तोस्मि दुर्गतिः॥ अथवा नार्त्तिं संक्लिष्टो नरः पापमवेक्ष्यसे॥ तिर्यक्त्वे नास्ति तद्दुःखं नासिपत्रेव
नेतया॥ वैतरण्यां कुतस्ताद्दृक् यादृशं पुत्रविप्लवे॥ सोहं सुतशरीरेण दीप्यमाने हुताशने॥ निपतिष्यामि तन्वंगि क्षंतव्यं कु
कृतं मम॥ अनुज्ञाता तु गच्छ त्वं विप्रवेश्म शुचिस्मिते॥ मम वाक्यं च तन्वंगि निबोधादृतमानसा॥ यदि दत्तं यदि हुतं गुरवो य
दितोषिताः॥ परलोके संगमो मे भूयात्पुत्रेण च त्वया॥ इह लोके कुतस्त्वेवं भविष्यति ममेप्सितं॥ त्वया सह मम श्रेयं गमनं पुत्र
मार्गेण॥ यन्मया हसता किंचित् रहस्ये काशुचिस्मिते॥ अश्लीलमुक्ता तत्सर्वं क्षंतव्यं मम याचतः॥ राजपत्नीति गर्वेण ना
वज्ञेयः स ते द्विजः॥ सर्वयत्नेन ते तोष्यः स्वामी दैवतवच्छुभे॥ पत्न्युवाच॥ अहमप्यत्र राजर्षे दीप्यमाने हुताशने॥ दुःखभारास
हा त्वेव सह यास्यामि वै त्वया॥ सह स्वर्गं च नरकं सहे वा वां हि भुंक्ष्व हे॥ श्रुत्वा राजा तदोवाच एवमस्तु पतिव्रते॥ पक्षिण ऊचुः॥ त
त्कृत्वा चितां राजा आरोप्य तनयं स्वकं॥ भार्यया सहितो राजा बद्धांजलिपुटस्तदा॥ चिंतयन् परमात्मानमीशं नारायणं हरिं॥

हृत्कोटरगुहालीनं वासुदेवं सुरेश्वरं ॥ अनादिनिधनं ब्रह्मरूपं संपीतांबरं प्रभुं ॥ तस्य चिंतयमानस्य सर्वे देवाः सवासवाः ॥ धर्मं प्रमु
खतः कृत्वा समाजग्मुस्त्वरान्विताः ॥ आगत्य सर्वे प्रोचुस्ते भो भो राजन् शृणु प्रभो ॥ अयं पितामहः साक्षाद्धर्मश्च भगवान्स्वयं ॥
साध्याः सविश्वे मरुतो लोकपालाः सचारणाः ॥ नागाः सिद्धाः सगंधर्वा रुद्राश्चैव तथाश्विनौ ॥ एते चान्ये च बहवो विश्वामित्रस्तथै
व च ॥ विश्वत्रयेण यो मित्रं कर्त्तुं न शंकितः पुरा ॥ विश्वामित्रः स ते मैत्रीमिष्टं वाहर्तुमिच्छति ॥ धर्म उवाच ॥ मा राजन्साहसं कार्षी
र्धर्मोहं त्वामुपागतः ॥ २४ ॥ तितिक्षादमसत्त्वाद्यैः स्वगुणैः परितोषितः ॥ इंद्र उवाच ॥ हरिश्चंद्र महाभाग प्राप्तः शक्रोस्मि ते तिकं ॥
त्वया सभार्यपुत्रेण जिता लोकाः सनातनाः ॥ आरोह त्रिदिवं राजन्भार्यापुत्रसमन्वितः ॥ सुदुःप्रापं नरैरन्यैर्जितमात्मीय
कर्मभिः ॥ वसिष्ठ उवाच ॥ ततोमृतमयं वर्षममृत्युविनाशनं ॥ इंद्रः प्रासृजदाकाशाच्चितामध्यगतं प्रभुः ॥ पुष्पवर्षं च सु
महद्दुंदुभिस्वनमेव च ॥ ततस्तस्मिन्वर्त्तमाने समाजे देवसंकुले ॥ समुत्तस्थौ मृतः पुत्रो राज्ञस्तस्य महात्मनः ॥ सकुमारतनुः
स्वस्थः प्रसन्नः प्रीतमानसः ॥ ततो राजा हरिश्चंद्रः परिष्वज्य सुतं तदा ॥ सभार्यः स्वश्रिया युक्तो दिव्यमाल्यांबरान्वितः ॥ स्वस्थ
ः संपूर्णहृदयो मुदा परमया युतः ॥ २५ ॥ बभूव तत्क्षणादिंद्रो भूयश्चेनमभाषत ॥ सभार्यस्त्वं सपुत्रश्च स्वर्लोके सद्गतिं परां ॥
समारोह महाभाग निजानां कर्मणां फलं ॥ हरिश्चंद्र उवाच ॥ देवराजाननुज्ञातः स्वामिना श्वपचेन वै ॥ अगत्वा निःकृतिं
तस्य नारोक्ष्येहं सुरालयं ॥ धर्म उवाच ॥ तवैनं भाविनं क्लेशमवगम्यात्ममायया ॥ आत्मा श्वपाकतां नीतो दर्शितं तच्च पक्व
णं ॥ इंद्र उवाच ॥ प्रार्थ्यते यत्परं स्थानं समस्तैर्मनुजैर्भुवि ॥ तदारोह हरिश्चंद्र स्थानं पुण्यकृतां नृणां ॥ हरिश्चंद्र उवाच ॥ देव
राज नमस्तुभ्यं वाक्यं चेदं निबोध मे ॥ प्रसादसुमुखो यद्वै ब्रवीमि प्रश्रयान्वितः ॥ मच्छोकमग्नमनसः कोशले नगरे जनाः ॥ तिष्ठं
ति तान्नपास्यैवं कथं यास्याम्यहं दिवं ॥ ब्रह्महत्या गुरोर्घातो गोवधः स्त्रीवधस्तथा ॥ तुल्यमेभिर्महापापं भक्तत्यागादुदाहृतं ॥

महंतं मत्कर्मस्याज्यमदुष्टस्य जनतः सुरं ॥ नेहनामुत्र पश्यामि तस्माच्छक्र दिवं व्रज ॥ यदि ते सहितास्स्वर्गं मया यांति सुरेश्वर ॥ ततोह
मपि यास्यामि नरकं वापि तैः सह ॥ इंद्र उवाच ॥ बहूनि पुण्यपापानि तेषां भिन्नानि वै पृथक् ॥ २६ ॥ कथं संघातभोज्यं त्वं भूय
स्स्वर्गमभिप्सिसि ॥ हरिश्चंद्र उवाच ॥ शक्र सुकृतेन यो राज्यं प्रभावेन कुटुंबिना ॥ २९ ॥ यजते च महायज्ञैः कर्म पूर्तं करोति
च ॥ तच्च तेषां प्रभावेन मया सर्वमनुष्ठितं ॥ उपकारिणां न संत्यक्ष्ये तानहं स्वर्गलिप्सया ॥ तस्माद्यन्मम देवेश किंचिद
स्ति सुचेष्टितं ॥ दत्तमिष्टमथो जप्तं सामान्यं तैस्तदस्तु नः ॥ बहुकालोपभोज्यं च फलं यन्मम कर्मणः ॥ तदस्तु दिनमप्येकं
तैः समं त्वत्प्रसादतः ॥ पक्षिण ऊचुः ॥ एवं भविष्यतीत्युक्त्वा शक्रस्त्रिभुवनेश्वरः ॥ प्रसन्नचेता धर्मश्च विश्वामित्रश्च
गाधिजः ॥ गत्वा तु नगरं सर्वे चातुर्वर्ण्यसमायुतं ॥ हरिश्चंद्रस्य निकटे प्रोवाच विबुधाधिपः ॥ आगच्छत जनाः
शीघ्रं स्वर्गलोकं सुदुर्लभं ॥ धर्मप्रसादात्संप्राप्तं सर्वैर्युष्माभिरेव तु ॥ विमानकोटिसंबाधं स्वर्गलोकान्महीतलं ॥ ग
त्वायोध्याजनं प्राह दिवमारुह्यतामिति ॥ पक्षिण ऊचुः ॥ तदिंद्रस्य वचः श्रुत्वा प्रीत्या तस्य च भूपतेः ॥ स सुत्रभृत्या
दारास्ते दिवमारूढुं जनाः ॥ पदे पदे विमानानां तु विमानैरगमन्नराः ॥ तदा संभृतहर्षोसौ हरिश्चंद्रश्च पार्थिवः ॥ राज्येभिषिच्य
तनयं हरिश्चंद्रो महामनाः ॥ अयोध्याख्ये पुरे रम्ये रोहिताश्वं प्रियं सुतं ॥ सह देवैश्च मुनिभिरभ्यषिंचन्नराधिपः ॥ राज्यास
हतदा सर्वे हृष्टतुष्टाः सुहृज्जनाः ॥ संप्राप्य स्मृतिमतुलं विमानेन स महीपतिः ॥ आसांचक्रे पुराकारे वप्रप्राकारतोरणे ॥
ततस्तस्य हि मालाकाव्यं श्लोकं मंत्रोशना जगौ ॥ दैत्याचार्यो महाभागः सर्वशास्त्रार्थतत्त्ववित् ॥ शक्र उवाच ॥ अहो तितिक्षा
माहात्म्यमहो दानफलं महत् ॥ यदागतो हरिश्चंद्रः पुरश्चेंद्रत्वमाप्तवान् ॥ पक्षिण ऊचुः ॥ एतत्ते सर्वमाख्यातं हरिश्चंद्रस्य
चेष्टितं ॥ यः शृणोति सुदुःखार्तः स सुखं लभते महत् ॥ स्वर्गार्थी प्राप्नुयात्स्वर्गं सुतार्थी प्राप्नुयात्सुतं ॥ भार्यार्थी प्राप्नुया

भार्यां राज्याच्चीरराज्यमाप्नुयात ॥ अतः परं कथाशेषं श्रूयतां द्विजसत्तम ॥ विपाको राज्यस्य तस्य पृथिवीक्षयकारकः ॥ तद्वि
मा० पु० ॥ पाकनिमित्तं च युद्धमाडीबकं महत ॥ २८ ॥ ॥ इति श्री मार्कंडेयपुराणे हरिश्चंद्रोपाख्यानं नामाष्टमोध्यायः ॥
॥ १८ ॥ ८ ॥ पक्षिण ऊचुः ॥ राज्यच्युते हरिश्चंद्रे गते च त्रिदिवालये ॥ निश्चक्राम महातेजा जलवासात्पुरोहितः ॥ वशिष्ठो द्वादशा
18B ब्दांते गंगावासुषितो मुनिः ॥ स श्रावत समस्तं च विश्वामित्रविचेष्टितं ॥ हरिश्चंद्रस्य नाशं च राज्यस्योदारकर्मणः ॥ चंडा
लसंप्रयोगं च भार्यातनयविक्रयं ॥ स श्रुत्वा तु महाभागः प्रीतिमानवनीपतौ ॥ चकार कोपं तेजस्वी विश्वामित्रमृषिं प्रति ॥
वशिष्ठ उवाच ॥ मम पुत्रशतं तेन विश्वामित्रेण घातितं ॥ तथापि नाभवत्क्रोधस्तादृशो यादृशोद्य मे ॥ श्रुत्वा नराधिपमिमं
स्वराज्याद्व्यरोपितं ॥ महात्मानं महाभागं देवब्राह्मणपूजकं ॥ यस्मात्स सत्यवाक्छांतः शत्रावपि विमत्सरः ॥ अनागा धृतिध
र्मात्मा अप्रमत्तो मदाश्रयः ॥ सपत्नीपुत्रभृत्यस्तु प्रापितोंत्यां दशां यतः ॥ स्वराज्याच्च्यावितस्तेन बहुशश्च खलीकृतः ॥ तस्मा
दुरात्मा ब्रह्मद्विड्यज्विनाममरोपितः ॥ मच्छापोपहतो मूढः स बकत्वमवाप्स्यसि ॥ पक्षिण ऊचुः ॥ श्रुत्वा शापं महातेजा
वशिष्ठं प्रति कौशिकः ॥ त्वमप्याडिर्भवस्वेति प्रतिशापमयच्छत ॥ १० ॥ अन्योन्यशापातौ प्राप्तौ तिर्यक्त्वं परमद्युती ॥ व
सिष्ठश्च महातेजा विश्वामित्रश्च कौशिकः ॥ अन्यजातिसमायोगं गतावप्यमितौजसौ ॥ युयुधातेतिसंरब्धौ महाबलप
राक्रमौ ॥ योजनानां सहस्रे द्वे प्रमाणेनाडिरुच्छ्रितः ॥ पलवत्यधिकं ब्रह्मन्सहस्रत्रितयं बकः ॥ तौ तु पक्षप्रहारैर्घोरैरन्यो
न्यस्योरुविक्रमौ ॥ प्रहरंतौ भयं तीव्रं प्रजानां चक्रतुस्तदा ॥ विधूय पत्राणि बकोरक्तोद्वृत्तेक्षणोहनत ॥ आडिरप्युन ॥ राम ॥
तग्रीवो बकं पद्भ्यामताडयत् ॥ तयोः पक्षानिलायाताः प्रपेतुर्गिरयो भुवि ॥ गिरिप्रपाताभिहता चकंपे च वसुंधरा ॥ ॥ १८ ॥
क्ष्माकंपमानाजलधीनुद्वृत्तांश्चकार ह ॥ ननाम चैकं पार्श्वेन पाताललगमनोत्सुका ॥ केचिद्गिरिनिपातेन केचिद्दंभो

18C

धिवारिणा॥केचिन्महीसंचलनात्स्यपयुःप्राणिनःक्षयं॥इतिसर्वंपरित्रस्तंहाहाभूतमचेतनं॥जगदासीत्सुसंभ्रांतंपर्यस्तक्षि
तिमंडलं॥हावत्सहाकांतमिश्रेक्वयास्येयोस्मिसंस्थितः॥हाप्रियेकांतशैलोयंपतत्याशुपलायते॥इत्थंकुलीकृतेलोकेसंत्रा
सविमुखेतदा॥सुरैःपरिवृतःसर्वैराजगामपितामहः॥२१॥मसुवाचचविश्वेशस्ताउभावतिकोपितौ॥युद्धंवांविरमत्वेतल्लोका
:स्वास्थ्यंव्रजंतुच॥म एवंतावपितौवाक्यंब्रह्मणोव्यक्तजन्मनः॥कोपामर्षविवृत्ताक्षोयुयुधातेनतस्थतुः॥ततःपितामहोदेवस्त
द्दृष्ट्वालोकसंक्षयं॥तयोश्चहितमन्विच्छंस्तिर्यग्भावमपानुदत॥ततस्तौपूर्वदेहस्थौप्राहदेवःप्रजापतिः॥व्युदस्ततामसंभावे
वशिष्ठकुशकयमो॥रपा॥रहिवल्लवशिष्ठत्वंत्वंचकौशिकसत्तम॥तामसंभावमाश्रित्यइदंकयुद्धंचिकिर्षतः॥राजस्यवि
याकोयंहरिश्चंद्रस्यभूपतेः॥युवयोर्विग्रहश्चायंपृथिवीक्षयकारकः॥नचापिकौशिकश्रेष्ठस्तस्यराज्ञोपराध्यति॥स्वर्गप्राप्ति
करोअस्मिन्नुपकारपदेस्थितः॥तपसोविघ्नकर्त्तारौकामक्रोधावशंगतौ॥परित्यजतभद्रंवांब्रह्महिप्रचुरंबलं॥एवं
मुक्तौततस्तेनलज्जितौतावुभावपि॥क्षमयामासतुःप्रीत्यापरिष्वज्यपरस्परं॥३०॥ततःसुरैर्वंद्यमानोब्रह्मालोकंनिजं
ययौ॥वसिष्ठोप्याश्रमस्थानंकौशिकोपिस्वमाश्रमं॥एतदाडीवकंयुद्धंहरिश्चंद्रकथांतथा॥कथयिष्यंतियेमर्त्याः
सम्यक्श्रोष्यंतिचापिये॥तेषांपापापनोदंतुश्रुतेह्येतेकरिष्यतः॥नचैवविघ्नकार्याणिभविष्यंतिकदाचनः॥३३॥
इतिश्रीमार्कंडेयपुराणेआडीबकयुद्धंनवमोध्यायः॥९॥श्री॥ ॥श्री॥जैमिनिरुवाच संशयंद्विजशार्दूलाःप्रब्रू
तममपृच्छतः॥आविर्भावतिरोभावौभूतानांयत्रसंस्थितौ॥कथंसंजायतेजंतुःकथंचैवविवर्द्धते॥कथंचोदरमध्य
स्थस्तिष्ठत्यंगनिपीडितः॥निष्क्रांतिमुदरात्माप्यकथंवावृद्धिमृच्छति॥उत्क्रांतकालेचकथंचिद्भावेनवियुज्यते॥कस्या
मृतस्तथाप्नोतिउभेसुकृतदुष्कृते॥स्त्रीकोष्ठेयत्रजीर्यंतेभुक्तानिसुगुरूण्यपि॥भक्ष्याणितत्रनोजंतुर्जीर्यतेकथमस्य

॥मा० पु०॥ कः॥ कथं भोक्ता स सर्वस्य कर्मणः सुतस्य वै॥ एतन्मे ब्रूत सकलं संदेहोक्तिविवर्जितं॥ यदेतत्परमं गुह्यं यत्र मुह्यंति सूरयः॥ १६॥
पक्षिण ऊचुः॥ प्रश्नभारोयमतुलस्त्वयास्मासु निवेशितः॥ दुर्बोध्यः सर्वभूतानां भावाभावसमाश्रितः॥ तं शृणुष्व महाभाग यथा
॥२९॥ प्राह पितुः पुरा॥ सुतः परमधर्मात्मा सुमतिर्नाम नामतः॥ ब्राह्मणो भार्गवः कश्चित्सुतमाह महामुनिः॥ कृतोपनयनं शांतं सु
मतिं जडरूपिणं॥ स वेदानधीष्व सुमते यथानुक्रममादितः॥ गुरुशुश्रूषणे व्यग्रो भिक्षान्नकृतभोजनः॥ ततो गार्हस्थ्यमा
19 स्थाय इष्ट्वा यज्ञाननुत्तमान्॥ अभीष्टमुत्पादय वा पुत्रमाश्रयेथा वनं ततः॥ त्वं ततो वस निर्द्वंद्वः परिव्राट् निःपरिग्रहः॥ एवमा
प्स्यसि तद्ब्रह्म यत्र गत्वा न शोचसि॥ पक्षिण ऊचुः॥ इत्येवमुक्तो बहुशो जडो नैवाह किंचन॥ पितापि तं सुबहुशः प्राहसीत्या
पुनः पुनः॥ इति पित्रा सुतस्नेहात्प्रलोभिमधुराक्षरं॥ स नोद्यमानो बहुशः प्रहस्येदमथाब्रवीत्॥ पुत्र उवाच॥ तात तेतद्बहु
शोभ्यस्तं यत्त्वयाद्योपदिश्यते॥ तथैवान्यानि शास्त्राणि शिल्पानि विविधानि च॥ जन्मनामयुतं साग्रं मम स्मृतिपथं ग
तं॥ उत्पन्नज्ञानबोधस्य वेदैः किं मे प्रयोजनं॥ निर्वेदाः परितोषाश्च क्षयवृद्ध्युदयेरताः॥ शत्रुमित्रकलत्राणां वियोगाः सं
गमास्तथा॥ मातरो विविधाः दृष्टाः पितरो नानाविधास्तथा॥ अनुभूतानि सौख्यानि दुःखानि च सहस्रशः॥ बांधवाब
हवः प्राप्ताः पितरश्च पृथग्विधाः॥ विण्मूत्रपिच्छले स्त्रीणां तथा कोष्ठे मयोषितं॥ गर्भदुःखान्यनेकानि बाल्ये यौव
ने तथा॥ वृद्धत्वे यान्यथा मानि तानि सर्वाणि संस्मरे॥ २०॥ ब्राह्मणक्षत्रियविशां शूद्राणां चापि योनिषु॥ पुनश्च पशुकोष्टकी
टानां मृगपक्षिणां॥ तथैव राजभृत्यानां राज्ञामाहवशालिनां॥ समुत्पन्नोस्मि गेहे सु यथैव तव वेश्मनि॥ भृत्यत्वं दासतां ॥राम॥
चैव गतोस्मि बहुशो नृणां॥ स्वामित्वमीश्वरत्वं च दरिद्रत्वं तथा गतः॥ हतं मया हतश्चान्यैर्हतं मे घातितस्तथा॥ दत्तं ममा ॥२९॥
न्यैर्भ्योमया दत्तमनेकशः॥ पितृमातृसुहृद्भ्रातृकलत्रादिकृतेन च॥ हृष्टोसकृत्तथा दैन्यमश्रुपूर्णाननो गतः॥ २४॥
रन्ये
७ निर्वेदः संसारवैराग्यं॥ परितोषश्च असंसारस्पृहा॥ रुचि परंपरा॥

19A

एवंसंसारचक्रेस्मिन्भ्रमतातातसंकटे॥ज्ञानमेतन्मयाप्राप्तंमोक्षसंप्राप्तिकारकं॥विज्ञातेयत्रसर्वोयंऋग्यजुःसामसंज्ञि
तः॥क्रियाकलापोविगुणोनसम्यक्प्रतिभातिमे॥तस्मादुत्पन्नबोधस्यवेदैःकिंमेप्रयोजनं॥गुरुविज्ञानतृप्तस्यनिरीहस्य
सदात्मना॥षट्प्रकारकियादुःखसुखतर्षरसक्षयत्॥गुणैश्चवर्जितंब्रह्मतत्प्राप्स्यामिपरंपदं॥रसतर्षभयोद्वेगक्रोधा
नेदजवागुरा॥विज्ञातात्रमनग्रग्राहिसंगपाशशताकुला॥तस्माद्यास्याम्यहंतातत्यक्त्वेमंदुःखसंनिधिं॥श्च॥त्रयी ईद्वारुणी ४
धर्ममधर्माढ्यंकिंपाकफलसंनिभं॥तस्यतद्वचनंश्रुत्वाहर्षविस्मयगद्गदः॥पिताप्राहमहाभागस्वसुतंहृष्टमानसः॥
पितोवाच॥किमेतद्वदसेवत्सकुतस्तेज्ञानसंभवः॥केनतेजडतापूर्वमिदानीचप्रबुद्धता॥किंनुस्मयविकारोयंमुनिदेवकृत
स्तवा॥यत्तेज्ञानतिरोभूतमाविर्भावमुपागतं॥श्रोतुमिच्छाम्यहंसर्वंपरंकौहलंहिमे॥तत्सर्वंब्रूहिमेवत्सयथावृत्तंतमात्मवा
न॥पुत्रउवाच॥शृणुतातयथावृत्तंममेदंसुखदुःखदं॥यश्चाहमासमन्यास्मिन्जन्मन्यस्मात्परेतुयः॥अहमासंपुरावि
प्रोन्यस्तात्मापरमात्मनि॥आत्मविद्याविचारेषुपरिनिष्ठांपरांगतः॥सततंयोगयुक्तस्यसततभ्यासमोततः॥सत्संयोगा स
त्स्वभावात्सद्विचारनिबोधनात्॥तस्मिन्नेवपराप्रीतिमेमासीद्युंजतःसदा॥आचार्यतांचसंप्राप्तःशिष्यसंदेहहृत्त
मः॥ततःकालेनमहताउत्क्रांतिस्त्वमुपागतः॥अज्ञाताविष्टसद्भावोविपन्नश्चप्रमादतः॥उत्क्रांतिकालादारभ्यस्मृ
तिलोपोनमेभवत्॥यावदद्यायुतंचैवजन्मनांस्मृतिमागतं॥पूर्वाभ्यासेनतेनैवसोहंतातजितेंद्रियः॥यतिष्यामित
थाकर्तुंनभविष्ययथापुनः॥ज्ञानदानफलंह्येतद्यज्जातिस्मरणंमम॥नह्येतत्प्राप्यतेतातत्रयीधर्माश्रितैर्नरैः॥सोहंप्र
वोश्रमादेवनिष्ठाधर्ममुपागतः॥एकांतित्वमुपागम्ययतिष्याम्यात्ममोक्षणे॥तद्ब्रूहित्वंमहाभागयत्तेसांशयिकंहृदि॥
एतावतापितेप्रीतिमुत्पाद्यानृण्यमाप्नुयां॥पक्षिणऊचुः॥पिताप्राहततःपुत्रंश्रद्दधानश्चतद्वचः॥ब्रूहियन्मेवताद

॥मा० पु०॥ ष्यं संसारगहनाश्रयं॥पुत्र उवाच॥शृणु तात यथा ह्येतदनुभूतं मयासकृत॥४४॥संसारचक्रमजरं स्थितिर्यस्य न विद्यते॥
॥२०॥ सोहं वदामि ते सर्वं तवैवानुज्ञया पितः॥उत्क्रांतिकालादारभ्य यथा नान्यो वदिष्यति॥उष्मा प्रकुपितः काये तीव्रवायुस
४० मीरितः॥भिनत्ति मर्मस्थानानि दीप्यमानो निरिंधनः॥उदानो नाम पवनस्तथा चोर्ध्वं प्रवर्त्तते॥भुक्तानामंबुभक्ष्याणाम
धोगतिनिरोधकृत॥ततो येनांबुदानानि कृतान्यन्नरसास्तथा॥दत्ताः स तस्यामाह्लादमापदि प्रतिपद्यते॥अन्नानि
येन दत्तानि श्रद्धापूतेन चेतसा॥सोपि तृप्तिमवाप्नोति विना पान्नेन चेतसा॥येनानृतानि प्रोक्तानि प्रीतिभेदः कृतो न
च॥४८॥आस्तिकः श्रद्दधानश्च स सुखं मृत्युमृच्छति॥आगारदाहिनो दाहं स्वधं चान्नन्न दायिनः॥प्राप्नुवंति नराः का
ले तस्मिन्नत्यावुपस्थिते॥देवब्राह्मणपूजायां परतास्त्वानसूयकाः॥शुक्लाः सवदान्याह्रीमंतस्ते नराः सुखमृत्यवः॥ये
न कामान्न संरंभान्न द्वेषाद्धर्ममुत्सृजेत॥यथोक्तकारी सौम्यश्च स सुखं मृत्युमृच्छति॥शीतं जयंती धनदास्तापं चोदकदा
यिनः॥प्राप्नुवंत्येण्यधीविदंनां कष्टां ये चान्येदुष्कारिणः॥मोहाज्ञानप्रदातारः प्राप्नुवंति महत्तमः॥कूटसाक्षी मृषावादी य
श्चासदनुशास्ति वै॥ते मोहमृत्यवः सर्वे तथान्ये वेदनिंदकाः॥बिभीषणाः पूतिगंधाः कूटमुद्गरपाणयः॥आगच्छंति
दुरात्मानो यमस्य पुरुषास्तदा॥प्राप्ते पुरस्ते दृष्टेषु जायते तस्य वेपथुः॥क्रंदत्यविरतं सोथ भ्रातमातृसुतांस्तथा॥सा
स्यवाणी स्फुटा तात एकवर्णा विभाव्यते॥दृष्टिर्विभ्राम्यति त्रासात् श्वासात्सुष्यति चाननं॥६०॥ततः सवेदनादिष्टस्तच्छरी
रं विमुंचति॥वाय्वग्रसारी तद्रूपं देहमन्यत्प्रपद्यते॥तत्कर्मजं यातनार्थं न मातृपितृसंभवं॥तत्प्रमाणवयोवस्थासंस्था ॥राम॥
नैः प्राग्भवं यथा॥६१॥ततो दूतो यमस्याशु पाशैर्बध्नाति दारुणैः॥दंडप्रहारसंभ्रांतं कर्षते दक्षिणां दिशं॥कुशकंटकवल्मी ॥२०॥
कशंकुपाषाणकर्कशे॥तथा प्रदीप्तज्वलने क्वचित्श्वभ्रशतोत्कटे॥प्रदीप्तादित्यतप्ते च दह्यमानस्तदंशुभिः॥कृष्य

मृत्युःप्राणनियोजकः॥ कालः
अंतकः प्रलये संहर्ता यमनियोक्ता

४०A

तेयमदूतैश्च शिवासन्नादभीषणैः॥ कृष्यमाणश्च तैर्घोरैर्भक्ष्यमाणः शिवाशतैः॥ प्रयाति दारुणे मार्गे पापकर्मा यमालयं॥ छ
त्रोपानत्प्रदातारो ये च वेश्मप्रदा नराः॥ ते यांति मनुजा मार्गं तं सुखेन तथान्नदाः॥ विमानैः सोऽश्वैर्याति भूमिदानप्रदा नराः॥
एवं क्लेशाननुभवन्नवशः पापपीडितः॥ नीयते द्वादशाहांते धर्मराजपुरं नरः॥ कलेवरे दह्यमाने महांतं दाहमृच्छति॥ भ
क्ष्यमाणे तथैवाग्नौ छिद्यमाने सुदारुणे॥ क्लिद्यमाने च रुधिरे तज्जंतुर्दुःखमवाप्नुयात्॥ स्वेन कर्मविपाकेन देहांतरगतोऽपि स
न्॥ तत्र यद्बांधवास्तोयं प्रयच्छंति तिलैः सह॥ यच्च पिंडं प्रयच्छंति नीयमानस्तदश्नुते॥ तैलाभ्यंगो बांधवानां अंगसंवाह
नं च यत्॥ ७९॥ तेन चाप्यायते जंतुर्यच्चाश्नंति च बांधवाः॥ भूमौ स्वपद्भिर्नोत्यर्थं क्लेशमाप्नोति बांधवैः॥ दानं ददद्भिश्च तथा
जंतुराप्यायते मृतः॥ नीयमानः स्वकं गेहं द्वादशाहं स पश्यति॥ उपादत्ते तथा दत्तं तोयपिंडादिकं भुवि॥ द्वादशाहात्परं घोरं
मायसंभीषणाकृतिं॥ याम्यं पश्यत्यसौ जंतुः कृष्यमाण इतस्ततः॥ गर्तमात्रौतिरक्ता संभिन्नांजनचयप्रभं॥ मृत्युकालांतका
दीनां मध्ये पश्यति वै यमं॥ दंष्ट्राकरालवदनं भ्रुकुटीदारुणाकृतिं॥ विरूपैर्भीषणैर्वक्त्रैर्वृतं व्याधिशतैः प्रभुं॥ दंडासक्तं महा
बाहुं पाशहस्तं सुभैरवं॥ तन्निर्दिष्टां ततो याति गतिं जंतुः शुभाशुभां॥ रौरवे कूटसाक्षी तु याति यश्चानृतो नरः॥ तस्य स्वरूपं च
वदतो रौरवस्य निशामय॥ योजनानां सहस्रे द्वे रौरवो हि प्रमाणतः॥ ८०॥ जानुमात्रप्रमाणं तु तत्र श्वभ्रं सुदुस्तरं॥ तत्रांगारचयोपे
तं कृतं तद्धरणीसमं॥ जाज्वल्यतातितीव्रेण तापितांगारभूमिना॥ तन्मध्ये पापकर्माणं विमुंचति यमानुगाः॥ स दह्यमानस्ती
व्रेण वह्निना तेन धावति॥ पदे पदे च पादोऽस्य शीर्यते जायते पुनः॥ अहोरात्रेणोद्धरणं पादन्यासेन गच्छति॥ एवं सहस्रं विस्ती
र्णे योजनानां विमुच्यते॥ ८४॥ ततोऽन्यं पापशुद्ध्यर्थं तादृग्निरयमृच्छति॥ क्रमात्समस्तान्निस्तीर्णः पापी तिर्यक्त्वमश्नुते॥ कृ
मीकीटपतंगेषु श्वापदेमशकादिषु॥ गत्वा द्रुमगजाद्येषु गोजाश्वेषु तथैव च॥ ८६॥ अन्यासु चैव पापासु दुःख

हासु च योनिषु॥ मानुष्यं प्राप्य कुब्जो वा कुत्सितो वामनोपि वा॥ चंडालमुक्कसाद्यासु नरो योनिषु जायते॥ अवशिष्टेन पापेन पु
॥मा॰ पु॰॥ ण्येन च समन्वितः॥ ततश्चारोहिणीं योनिं शूद्रवैश्यनृपादिकां॥ विप्रदेवेंद्रतां चापि कदाचिद्वरोहिणीं॥ एवं हि पापकर्माणो
॥२१॥ नरके पुयतं स्यधः॥ यथा पुण्यकृतो यांति तन्मे निगदतः शृणु॥ ते यमेन विनिर्दिष्टा यांति पुण्यां गतिं नराः॥ प्रगीतगंधर्वगणैः
21 प्रनृत्ताप्सरसांकुलैः॥ हारनूपुरमाधुर्यैः शोभितान्युज्ज्वलानि तु॥ प्रयांत्याशु विमानानि दिव्यानि धवलोज्ज्वला॥ १९॥ तस्मा
च्च प्रच्युता राज्ञामन्येषां च महात्मनां॥ जायंते निरुजो गेहे सद्वृत्तपरिपालकाः॥ भोगान्संप्राप्नुवंत्यग्र्यांस्तथा यास्यध्वं
मन्यथा॥ अवरोहिणीं वा संप्राप्य पूर्ववद्यांति मानवाः॥ एतत्ते सर्वमाख्यातं यथा जंतुर्विपद्यते॥ अतः शृणु द्विजश्रेष्ठ
यथा गर्भं प्रपद्यते॥ २५॥ ॥ इति श्रीमार्कंडेयपुराणे पितापुत्रसंवादे नाम दशमोऽध्यायः॥ १०॥ ॥ ॥प॥
पुत्र उवाच॥ निषेके मानवे स्त्रीणां बीजप्रक्षेपरजस्यथ॥ विमुक्तमात्रो नरकात्स्वर्गाद्वापि प्रपद्यते॥ तेनाभिभूतं तत्स्थैर्यं याति
बीजं द्वयं पितः॥ कललं बुद्बुदत्वं च ततः पेशीत्वमेव च॥ पेश्यास्तथा यथा बीजादंकुरादि समुद्भवः॥ अंगानां च तथोत्पत्तिः
बाहूशिरसां पंचानामनुभागशः॥ उपांगान्यंगुलीनेत्रनासास्यश्रवणानि च॥ प्ररोहं यांति चांगेभ्यस्तद्वत्तेभ्यो नखादिकं॥ खमांसं
कूर्परजानुकोशोग वृद्धिमायाति तेनैवोल्वं च कोशकः॥ नालिकेरीफलं यद्वत्सकोशं वृद्धिमृच्छति॥ तद्वत्स्वयात्यसौ वृद्धिं सकोशोऽधोमुखः स्थि
र्भावरणसंकु तः॥ त्वचा रोमाणि जायंते केशाश्चैव ततः परं॥ तले तु जानुपार्श्वाभ्यां करयोन्यस्य वर्द्धते॥ अंगुष्ठौ चोपरि न्यस्य जान्वो
रग्रे तथांगुलीः॥ जानुपृष्ठे तथा नेत्रे जानुमध्ये तु नासिकां॥ स्फिचौ पार्ष्णिद्वयस्थौ च बाहू जंघोपरि स्थितौ॥ एवं वृद्धिं क्रमा ॥राम॥
द्याति जंतुः स्त्रीगर्भसंस्थितः॥ अन्यध्यास्यां वोदरं जंतुर्येयारूपं यथास्थिति॥ काठिन्यमग्निनायाति भुक्तपीतेन जीवति॥ पुण्या ॥२१॥
पुण्याश्रयमयी स्थितिर्जंतोस्तथोदरे॥ २५॥ नाडी राप्यायनी नाम नाभ्यां तस्य निबध्यते॥ स्त्रीणां तथा च शुषिरे सा निबद्धो

21A

पजायते॥ क्रामंति भुक्तपीतानि स्त्रीणां गर्भोदरे तथा॥ तैराप्यायितदेहोसौ जंतुर्वृद्धिमुपैति वै॥ स्मृतिं तत्र प्रयात्यस्य बह्व्यः संसा
रभूमयः॥ ततो निर्वेदमायाति पीड्यमान इतस्ततः॥ पुनर्नैवं करिष्यामि मुक्तमात्र इहोदरात्॥ तथा कर्म करिष्यामि गर्भं नो
स्याम्यहं यथा॥ इति चिंतयति स्मृत्वा जन्मदुःखशतानि वै॥ यानि पूर्वानुभूतानि दैवभूतात्मजानि वै॥ ततः कालक्रमाज्जंतुः
परिवर्त्तत्यधोमुखः॥ नवमे दशमे वापि मासि संजायते ततः॥ निष्क्रम्यमाणो वातेन प्राजापत्येन पीड्यते॥ निष्क्रम्यते च विल
पन् तदा दुःखेन पीडितः॥ निःक्रांतश्चोदरान्मूर्छामसह्यां प्रतिपद्यते॥ प्राप्नोति चेतनां चासौ वायुस्पर्शसुखान्वितः॥ ततस्तं स
वैष्णवी माया समास्कंदति मोहनी॥ तया विमोहितात्मासौ ज्ञानभ्रंशमवाप्नुते॥ नष्टज्ञानो बालभावं ततो जंतुः प्रपद्यते॥
ततः कौमारकावस्थां यौवनं वृद्धतामपि॥ पुनश्च मरणं तद्वत् जन्म प्राप्नोति मानवः॥ पुनः संसारचक्रेस्मिन् भ्राम्यते
घटियंत्रवत्॥ कदाचित्स्वर्गमाप्नोति कदाचिन्निरयं नरः॥ निरयं चैव स्वर्गं च कदाचिद्द्वयमश्नुते॥ कदाचिदत्रैव पुनः
स्वकर्मफलमश्नुते॥ कदाचिद्भुक्तकर्मा च इतः स्वल्पेन गच्छति॥ कदाचिदल्पेश्च ततो जायतेत्र शुभाशुभैः॥ स्वर्लोके नर
के वापि भुक्तप्राग्यैर्द्विजोत्तम॥ नरके तु महद्दुःखमेतच्च स्वर्गगामिनः॥ दृश्यंते तात मोदंतो पात्यमानेस्तु नारकैः॥ स्वर्गे
पि दुःखमतुलं यदारोहणकालतः॥ प्रभृत्यहं पतिष्यामीत्येतन्मनसि वर्त्तते॥ नारकांश्चैव संप्रेक्ष्य महद्दुःखमवाप्यते॥
एतां गतिमहं गंतेत्यहर्निशमनिर्वृतः॥ गर्भवासे महद्दुःखं जायमानस्य योनितः॥ जातस्य बालभावे च वृद्धत्वे दुःखमे
व च॥ रुप॥ कामेर्ष्याक्रोधसंबद्धं यौवनं चातिदुःसहं॥ दुःखप्राया हि वृद्धता च मरणे दुःखमुत्तमं॥ कृष्यमाणस्य याम्यैश्च
पात्यमानस्य किंकरैः॥ पुनश्च गर्भो जन्माथ मरणं नरकं तथा॥ एवं संसारचक्रेस्मिन् जंतवो घटियंत्रवत्॥ भ्राम्यंते प्रा
कृतैर्बंधैर्बद्धा बध्यंति चासकृत॥ ॥ नास्ति तात सुखं किंचित्तत्र दुःखशताकुले॥ तस्मान्मोक्षाय यतता कथं सेव्या त्रयी मया॥ ॥२२

॥मा॰पु॰॥ इति श्रीमार्कंडेयपुराणे पितापुत्रसंवादे आविर्भावतिरोभावः ॥११॥ ॥ पितोवाच ॥ साधु वत्स त्वयाख्यातं संसारगह
नं परं ॥ ज्ञानप्रदानसंभूतं समाश्रित्य महाफलं ॥ तत्र ते नरकाः सर्वे यथा वै रौरवस्तथा ॥ वर्णितास्तान्ममाचक्ष्व विस्तरेण महामते
॥२२॥ ॥ पुत्र उवाच ॥ रौरवस्ते समाख्यातः प्रथमो नरको मया ॥ महारौरवसंज्ञं तु शृणुष्व नरकं पितः ॥ योजनानां सहस्राणि चतुः
22 पंच समंततः ॥ तत्र ताम्रमयी भूमिरधस्तस्या हुताशनः ॥ तत्तापतप्ता सा सर्वा प्रोद्यदिंदुसमप्रभा ॥ विभाव्यते महारौद्रा दर्श
नस्पर्शनादिषु ॥ तस्यां बद्धः कराभ्यां च पद्भ्यां चैव यमानुगैः ॥ मुच्यते पापकृन्मध्ये लुठमानः स गच्छति ॥ काकैर्वकै
र्वृकोलूकैर्वृश्चिकैर्मशकैस्तथा ॥ भक्ष्यमाणस्तथा गृध्रैः सतं मार्गं विकृष्यते ॥ दह्यमानः पितर्मातर्भ्रातस्तातेति व्याकुलः ॥ व ते
दत्यसकृदुद्विग्नो न शांतिमधिगच्छति ॥ एवं तस्मान्नरैर्मोक्षस्त्वतिकष्टेन आप्यते ॥ वर्षायुतायुतैः पापं यैः कृतं दुष्टबुद्धिभिः ॥
तथान्यस्तु तमो नाम सोतिशीतः स्वभावतः ॥ महारौरववद्दीर्घस्तथा च तमसावृतः ॥ शीतार्तास्तत्र धावंति नरास्तमसि दारुणे
परस्परं समासाद्य परिरभ्याश्रयंति च ॥ दंतास्तेषां च भज्यंते शीतार्तिपरिकंपिताः ॥ क्षुत्तृष्णातिबला तात तथा चान्ये ह्युपद्र
वाः ॥ हिमखंडवहो वायुर्भिनत्त्यस्थीनि दारुणः ॥ मज्जासृग्गलितं तस्मादश्नंति च क्षुधान्विताः ॥२४॥ आलेहमाना भ्राम्यं
ते परस्परसमागमे ॥ एवं तत्रापि सुमहान् क्लेशस्तमसि मानवैः ॥ प्राप्यते ब्राह्मणश्रेष्ठ यावद्दुःकृतसंक्षयः ॥ निःकृंतन
इति ख्यातस्ततोन्यो नरकोत्तमः ॥ तस्मिन् कुलालचक्राणि भ्राम्यंत्यविरतं ततः ॥ ते घारोप्य निकृत्यंते कालसूत्रेण मान
वाः ॥ यमानुगांगुलिस्थेन आपाददतलं मस्तकं ॥ न तेषां जीवितभ्रंशो जायते द्विजसत्तम ॥ छिन्नानि तेषां शतशः खंडान्ये ॥राम॥
कं च व्रजंति वै ॥ एवं वर्षसहस्राणि छिद्यंते पापकर्मिणः ॥ तावद्यावदशेषं हि तत्पापं च क्षयं गतं ॥ अप्रतिष्ठं च नरकं शृ ॥२२॥
णुष्व गदतो मम ॥ यत्रस्थैर्नारकैर्दुःखमसह्यमनुभूयते ॥ तान्येव तत्र चक्राणि घटीयंत्राणि चाप्युत ॥ दुःखस्य हेतुभूता

निपापकर्मकृतां नराणां ॥ चक्रेष्वारोपिताः केचिद्भ्राम्यंते तत्र मानवाः ॥ यावद्वर्षसहस्राणि न तेषां स्थितिरंतरा ॥ घटीयंत्रे
षु चैवान्ये बद्धास्तोये घटीयया ॥ भ्राम्यंते मानवा रक्तमुद्गिरंतः पुनः पुनः ॥ ३० ॥ अंत्रैर्मुखविनिःक्रांतैर्नेत्रैरस्रावलंबिभिः ॥
दुःखानि प्राप्नुवंतीह यान्यसह्यानि जंतुभिः ॥ असिपत्रवनं नाम नरकं शृणु चापरं ॥ योजनानां सहस्रं वै ज्वलद्दग्ध्वा
स्तृतावनिः ॥ तप्तास्सूर्यकरैश्चंडैः कस्यां ताग्निसुदारुणेः ॥ प्रपतंति सदा तत्र प्राणिनो नरकौकसः ॥ तन्मध्ये च वनं शीतस्नि
ग्धपत्रं विभाव्यते ॥ पत्राणि पत्रखङ्गानि फलानि द्विजसत्तम ॥ श्वमंति तत्र विहगा विरूपा स्वनभासुराः ॥ श्वानश्च तत्र श
बलाश्चरंत्यामिषभोजिनः ॥ महावक्त्रा महादंष्ट्रा व्याघ्रा इव महानखाः ॥ ततस्तद्वनमालोक्य शिशिरच्छायमग्रतः ॥ ३५ ॥ प्र
यांति प्राणिनस्तत्र तृष्णातपपरिपीडिताः ॥ हा तात हा मातरिति क्रंदंतोतीव दुःखिताः ॥ दह्यमानांघ्रियुगला धरणीस्थेन वह्नि
ना ॥ तेषामागतानां तत्रासिपत्रपाती समीरणः ॥ ३८ ॥ प्रवाति तेन पात्यंते तेषां खङ्गास्तथोपरि ॥ छिन्नाः पतंति ते भूमौ ज्वलत्पा
वकसंचये ॥ ३९ ॥ लेलिह्यमाने चातीव व्याप्ताशेषमहीतले ॥ सारमेयास्ततः शीघ्रं शातयंति शरीरतः ॥ तेषां खंडानि रुदतां
पदं स्यानन भीषणाः ॥ असिपत्रवनं तात मयैतत्परिकीर्तितं ॥ अतः परतरं भीमं तप्तकुंभं निबोध मे ॥ समंततस्तप्तकुंभा
वह्निज्वालासमाकुलाः ॥ ज्वलदग्निचयोत्तप्ततैलायश्चूर्णपूरिताः ॥ तेषु दुष्कृतकर्माणो याम्यैः क्षिप्ता ह्यधोमुखाः ॥ क्वाथ्यंते
विस्फुटद्गात्रगलन्मज्जासमाकुलाः ॥ स्फुटत्कपालनेत्रास्थिछिद्यमाना विभीषणाः ॥ गृध्रैरुत्पाट्य मुच्यंते पुनस्तेष्वेव वेगि
तैः ॥ पुनः सिमिसिमायंते तैले नैक्यं व्रजंति च ॥ द्रवीभूतैः शिरोगात्रैः स्नायुमांसत्वगस्थिभिः ॥ ततो याम्येन रौद्रेण दर्वीवदन
घट्टिताः ॥ रुता वर्त्तैर्महातैले क्वाथ्यंते पापकर्मिणः ॥ एष ते विस्तरेणोक्तस्तप्तकुंभो मया पितः ॥ ५१ ॥ ॥ ५ ॥ ॥ इति श्री
मार्कंडेयपुराणे पितापुत्रसंवादो नाम द्वादशोध्यायः ॥ १२ ॥ ॥ पुत्र उवाच ॥ अहं वैश्यकुले जातो जन्मन्यस्मा

॥मा० पु०॥ ॥२३॥ 23

न्तुसमये॥ समतीते गवां रोधं निपाने कृतवान्पुरा॥ विपाकात्कर्मणस्तस्य नरकं भृशदारुणं॥ संप्राप्तोग्निशिखाघोरमयोमुखख
गाकुलं॥ यंत्रापीडनवक्त्रासृक्प्रवाहोद्भूतकर्दमं॥ विक्रुश्यमाणदुःकर्मिस्तनितातिरवाकुलं॥ पायसमानस्य मे तत्र साग्रं वर्ष
शतं गतं॥ महातापार्त्तितप्तस्य तृष्णादाहार्दितस्य च॥ अथाह्लादकरः सद्यः पवनः सुशीतलः॥ करंभवालुकाकुंभमध्य
स्थो मे समागतः॥ अकस्माद्देव भो तातनरस्थले समागतं॥ तत्सपर्कादशेषाणमगमद्यातनान्नृणां॥ मम चापि यथा स्वर्गे
स्वर्गेणानिर्वृतिः परा॥ किमेतदिति चाह्लादविस्तारस्तिमितेक्षणैः॥ दृष्टमस्माभिरासन्नं नररत्नमनुत्तमं॥ याम्यश्च पुरु
षो घोरो दंडहस्तोऽग्निसप्रभः॥ पुरतो दर्शयन्मार्गमित एहीति वागथ॥ ततस्ते जंतवः सर्वे मत्वा तद्दर्शनात्सुखं॥ ऊचुः प्रां
जलयो भूयं क्षणमत्र स्थिरो भव॥ त्वद्गात्रसंगी पवनो ह्यस्माकं सुखकारकः॥१५॥ ततो सो नरकाभ्यासे उपविष्टः कृपा
न्वितः॥ पुरुषः स तदा दृष्ट्वा यातनायातसंकुलं॥ नरकं प्राह नं याम्यं किंकरं कृपयान्वितः॥ पुरुष उवाच॥ भो याम्य पुरु
षाचक्ष्व किं मया पातकं कृतं॥ येन वै यातना भीमे प्राप्तोस्मि नरकं परं॥ विपश्चिदिति विख्यातो जनकानामहं कुले॥
जातो विदेहविषये सम्यक्मनुजपालकः॥ चातुर्वर्ण्यं स्वधर्मेस्थं कृत्वा संरक्षितं मया॥ धर्मतोधर्मेकस्येनमेतुना
त्र यथा पुरा॥ यज्ञैर्मेयेष्टं बहुभिर्द्धर्मतः पालिता मही॥ नीतस्पृष्टश्चैव संग्रामो नातिथिर्विमुखो गतः॥ पितृदेवर्षिभृत्या
श्च न च पर्येशनामया॥ महातापार्त्तितप्तस्य तृष्णादाहार्दितस्य च॥ सर्वेस्य जीवमृत्तस्य कृतं त्राणं सदा मया॥ कृतास्पृ
हा न च मया परस्त्रीविभवादिषु॥ पर्वकालेषु पितरस्तिथिकालेषु देवताः॥ पुरुषं स्वयमायाति निपानमिव धेनवः॥ ॥राम॥
यतस्ते विमुखा याति निःश्वस्य गृहमेधिनः॥ तस्मादिष्टश्च पूर्तेश्च धर्मौ द्वावपि नश्यतः॥ पितृनिःश्वासविध्वस्तं स
प्तजन्मार्जितं शुभं॥ त्रिजन्मप्रभवं दैवो निःश्वासो हंत्यसंशयं॥ तस्माद्दैवे च पित्र्ये च नित्यमेवादृतो भव॥ सोहं कथमि ॥२३॥

23A

मं प्राप्तो नरकं भृशं दारुणं ॥ २५ ॥ ॥ इति श्रीमार्कंडेयपुराणे पितापुत्रसंवादे त्रयोदशोध्यायः ॥ १३ ॥ ॥ ॥
पुत्र उवाच ॥ इति पृष्टस्तदा तेन स एवं तां नो महात्मनां ॥ उवाच पुरुषो याम्यो घोरोपि प्रश्रितं वचः ॥ किंकर उवाच ॥ महाराज
यथास्य त्वं तथैतन्मात्र संशयः ॥ किंतु स्वल्पं कृतं पापं भवता स्मारयामि तत् ॥ विदर्भीतनया पत्नी पीवरी नाम नामतः ॥
ऋतुमत्स्यां भृतु वंध्यस्त्वया तस्याः कृतः पुरा ॥ १४ ॥ सोभ मायां कैकेय्यामासक्तेन ततो भवान् ॥ ऋतुव्यतिक्रमात्प्राप्तो नरकं
घोरमीदृशं ॥ होमकाले यथा वह्निराज्यपानमवेक्ष्यते ॥ ऋतौ प्रजापतिस्तद्वद्बीजपानमवेक्षते ॥ १५ ॥ यस्तमुत्सृज्य धर्मा
त्मे कामे ह्यासक्तिमान् भवेत् ॥ स तु पैत्रादृणात्पापमवाप्य नरके पतेत् ॥ यस्तावदवतेपायं नान्यत्किंचिन विद्यते ॥
तदेहि गच्छ पुण्यानामुपभोगाय पार्थिव ॥ एतच्छ्रुत्वा तु राजर्षिः कृपया जनकोब्रवीत् ॥ राजोवाच ॥ यास्यामि देवानु
चर यत्र मां त्वं नयिष्यसि ॥ किंचित्पृच्छामि तन्मे त्वं यथावद्वक्तुमर्हसि ॥ वज्रतुंडास्त्वमी काकाः पुंसां नरनहारिणः ॥ पुनः
पुनश्च नेत्राणि तद्ददेयां भवंति च ॥ किं कर्म कृतवंतश्च कथयैतज्जुगुप्सितं ॥ १ ॥ हरंत्येषां तथा जिह्वा जायमानाः पुनः
पुनः ॥ क्रकचेण पाट्यंते कस्मादेते सुदुःखिताः ॥ १७ ॥ करंभवालुकास्वेते पच्यंते तैलगोचराः ॥ अयोमुखैः खगैश्चैव
कृष्यंते किं द्विधा वद ॥ विश्लिष्टदेहबंधाश्च महारावविरावणः ॥ अयश्चंचुनिपातेन सर्वांगक्षतदुःखिताः ॥ किमेतानि
:खनंतोपि त्रुद्यते ह निर्शं नराः ॥ एताश्चान्याश्च दृश्यंते यातनाः पापकारिणां ॥ येन कर्मविपाकेन तन्ममाशेषतो वद ॥
किंकर उवाच ॥ यन्मां पृच्छसि भूपाल पापकर्मफलोदयं ॥ तन्तेहं संप्रवक्ष्यामि संक्षेपेन यथातथा ॥ पुण्यापुण्ये हि पुरु
षः पर्यायेन समश्नुते ॥ भुंजतश्च क्षयं याति पुण्यपापमथापि वा ॥ न तु भोगादृते पुण्यं पापं वा कर्म मानवः ॥ परित्यजत
ति भोगाच्च पुण्यापुण्येन निबोध मे ॥ दुर्भिक्षादेव दुर्भिक्षं क्लेशात्क्लेशं भयाद्भयं ॥ मृतेभ्यः प्रमृता यांति दरिद्राः पापकारि

जिवतो मरणाधिकं दुखं ॥

पापिनोऽत्र पापिनो नासिकाऽपि व्याघ्रादिभयं स्वनाश
रमुष्टिहस्ता गच्छंति। अदृष्टमपि भयं स्विकु
र्वंति। एवं परलोकभयं कुतो न क्रियतइति भावः॥

णाः॥ गतिं नानाविधां यांति जंतवः कर्मबंधनात्॥ उत्सवादुत्सवं यांति स्वर्गात्स्वर्गं सुखात्सुखं॥ श्रद्दधानाश्च दांताश्च धनाढ्याः
॥मा०पु०॥ शुभकारिणः॥ एवं विमानवरमारूढाः स्वर्गं यांति सुपूजिताः॥ व्याघ्रकुंजरदुर्गाणि सर्पचोरभयानि च॥ हस्ताचापेन गच्छं
॥२४॥ ति पापिनः किमतः परं॥ सुगंधमाल्यसद्वस्त्रसापुयाना सनाशनाः॥ स्तूयमाना नासदा यांति पुण्याः स्वन्याउवीक्षयि॥
अनेकशतसाहस्रजन्मसंचयसंचितं॥ पुण्यापुण्यं नृणां तद्वत्सुखदुःखांकुरोद्भवं॥ यथा हि बीजं भूपाल यथाऽसिसम
24 वेक्ष्यते॥ पुण्यापुण्ये तथा काले देहाद्यं कर्मकारकं॥ स्वल्पपापं कृतं पुण्यं देशकालोपपादितं॥ रथ॥ यादर्नास्फुटितं दुः
खकंटकोत्थं प्रयच्छति॥ तस्मात्ततरस्थूलं शंकुकीलकसंभवं॥ दुःखं यच्छति तद्वच्च शिरोरोगादिदुःखदं॥ अपथ्यासा
नशीतोष्णश्रमतापादिकारकं॥ तथान्यायव्यवसंते यापानि फलसंगमे॥ एवं महांति पापानि दीर्घरोगादि विक्रियाः॥
तद्वच्च स्वाग्निदुःखानि बंधनादिफलाय वै॥ अल्पं पुण्यं शुभं गंधं हेलया संप्रयच्छति॥ रूप॥ स्पर्शं वाप्यथवा शब्दं रसं सं
यामयापि वा॥ चिरादुरुतरं तद्वन्महांतमपि कालजं॥ एवं हि सुखदुःखानि पुण्यापुण्योद्भवानि च॥ भुंजानो नेकसं
सारसंभवान्नोहति सृष्टि॥ जातिदेशावरुद्धानि ज्ञानाज्ञानकृतानि च॥ तिष्ठंति तत्र पक्कानि लिंगमात्रे अरामति॥ रूप॥ कं
र्मणा मनसा वाचा न कदाचित्क्वचिन्नरः॥ अकुर्वन्न पापकं कर्म पुण्यं वाप्यवतिष्ठति॥ यद्यत्प्राप्नोति पुरुषः सुखं दुः
खमथापि वा॥ प्रभूतमथवा स्वल्पं विक्रियाकारि चेतसः॥ यावत्तावत्तत्स्य पापं वा पुण्यमेव वा॥ उपभोगाक्षये
याति भुज्यमानमिवाशनं॥ एवमेते महापापं यातनाभिरहर्निशं॥ क्षिपयंति महाघोरं नरकांतरवर्तिनः॥ तथैव राजन्
पुण्यानि स्वर्गलोके मरैः सह॥ गंधर्वसिद्धाप्सरसां गीताद्यैरुपभुंजते॥ देवत्वे च मनुष्यत्वे तिर्यक्त्वे च शुभाशुभं॥ पुण्य ॥राम॥
पापोद्भवं भुंक्ते सुखदुःखोपलक्षणं॥ यत्तु पृच्छसि मां राजन्यातनाः पापकारिणाम्॥ केनकेनेति पापेन तत्ते वक्ष्या ॥२४॥

24A

म्यशेषतः॥दृष्टेन चक्षुषा दृष्टाः परदारा नराधमैः॥मानसेन च दुष्टेन परद्रव्यं च सस्पृहैः॥वज्रतुंडाः खगास्तेषां हरंत्येते विलो
चने॥पुनः पुनश्च संभूतिरक्षणे येषां भवत्यपि॥यावंतो क्षितिमेघास्तु याय मेभिर्नरैभिः कृता॥तावद्वर्षाणि नेत्राणि मेते प्राप्नुयुस
वारितं॥असच्छास्त्रोपदेशास्तु दत्ता ये च विनिर्मिताः॥सम्यक् दृष्टैर्विनाशाय रिपूणामपि मानवैः॥यैः शास्त्रमन्यथा प्रोक्तं यैर
सद्वागुदाहृता॥विद्देवद्विजातीनां गुरुनिंदा च यैः कृता॥हरंति तेषां जिह्वाश्च जायमानाः पुनः पुनः॥तावंतो वत्सरानेव वज्र
तुंडाः सुदारुणाः॥मित्रभेदस्तथा पित्रोः पुत्रस्य स्वजनस्य च॥याज्योपाध्याययोर्मोत्रास्तु तस्य सहचारिणः॥४६॥भार्याप
त्योश्च ये केचिद्भेदं चक्रुर्नराधमाः॥तद्रमे पस्य पाद्यंते करपत्रेण पार्थिव॥४७॥परोपतापकाये च ये चाह्लादनिषेधकाः॥ता
लवृत्तानि लस्थानं चंदनोशीरहारिणः॥प्राणांतिकं दहुस्तापमदुष्टानां च ये धमाः॥करंभवालुकासंस्थास्तद्रमे पायभा
गिनः॥भुंक्तेस्माद्वेतु योऽन्यस्य नरोऽन्येन निमंत्रितः॥दैवे वाप्यथवा पित्र्ये स द्विजः कृष्यते खगैः॥मर्माणि यस्तु साधूनां तुद
न्वाग्भिर्निकृंतति॥तमेव तुदमानास्तु खगास्तिष्ठंत्यवारिताः॥यः करोति तु येऽस्मन्यमन्ये यावाकस्तु दुर्मतिः॥पाद्यते हि द्विधा
जिह्वा तस्य स्यान्निशितैः क्षुरैः॥मातापित्रोर्गुरूणां च येऽवज्ञां चक्रुरुद्धताः॥तद्रमे श्यविण्मूत्रगर्ते मज्जंत्यधोमुखाः॥देवताति
थिन्नस्येषुन्नते घ्यभ्यागते सुच॥अश्नुते च स्तु येऽश्नंति तद्वत्यग्निपक्षिषु॥हृष्टास्कक्ष्य यनिर्यासान्नसूचीवक्रास्तु तेस्मु
ते॥जायंते गिरिवर्ष्माणः पश्येते यादृशा नराः॥एकपंक्त्यां तु ये विप्रमथवेतरवर्णजं॥विषमं भोजयंतीह विड्भुजस्तद्रमे न
रा॥एकसार्थं प्रयाता ये निःस्वमन्नार्थिनं नराः॥अपास्य स्वयमश्नंति तद्रमे श्लेष्मभोजिनः॥गोब्राह्मणाग्नयः स्पृष्टा यैरु
च्छिष्टैर्नरेश्वर॥तेषामेतेऽग्निकुंडेषु प्रज्वलत्स्वाहिताः कराः॥सूर्येंदुतारका दृष्टाः यैरुच्छिष्टैस्तु कामतः॥तेषां याम्यैर्नरैर्नेत्रैन्य
स्तो वह्निः समिध्यते॥गोरग्निजोऽनने विप्रो ज्येष्ठो भ्राता पिता स्वसा॥जामयो गुरवो वृद्धा येः स्पृष्टाश्च पदा नमिः॥वह्नौ ग्रय

छोपोपनेशा
दि ६

असत्यसाक्षी

१ तिलमुद्गौदनः २ देवोद्देशेन कृतान्यनिवेदितानि

॥मा॰पु॰॥ स्तेनिगडैर्लोहैरग्निप्रतापितैः॥ अंगारराशिमध्यस्थास्तिष्ठंत्याजानुदाहिनः॥ पापसंकरसंसर्गात् देवान्नानि च यानि वै॥ मुक्ता
नि यैः संस्पृश्यते षां मंत्राणि पापिनां॥ निपातितानां भ्रष्टेऽहताक्षिनीरीक्ष्यतां॥ संदंशैरपकृष्यंते नरैर्यास्यैर्मुखात ततः॥ गु
॥२५॥ रुवेदद्विजातीनां देवानां च नराधमैः॥ निंदा निशामिता यैश्रवया पानाममिनिंदता॥ तेषामयोमुखान्कीलानग्निवर्णान्पु
25 नः पुनः॥ कर्णेषु प्ररयंत्येते याम्याविलपतामपि॥ यैः प्रपादेवविप्रेको देवालयसभाः प्रभाः॥ भंक्त्वा विध्वंसमानीताः क्रोध
लोभानुवर्तिभिः॥ तेषामेते शितैः शस्त्रैर्मुहुर्विलपतां त्वचः॥ पृथक्कुर्वंति वै याम्याः शरीरादतिदारुणाः॥ गोब्राह्मणार्कमार्गेषु
ये च मेहंति मानवाः॥ तेषामेते निकृष्यंति गुदेनांत्राणि वायसैः॥ दत्त्वा कन्यां य एकस्मै द्वितीयाय प्रयच्छति॥ स त्वेवं नैकधा
छिन्नाः क्षारनद्यां प्रवाह्यते॥ स्वपोषणपरो यस्तु परित्यजति मानवः॥ पुत्रभृत्येकलत्रादिबंधुवर्गमकिंचनं॥ दुर्भिक्षे संभ्रमे
वापि सोप्येवं यमकिंकरैः॥ उत्कृत्य दंतास्तु मुखे स्वमांसान्याश्यते क्षुधा॥ शरणागतं यस्त्यजति लोभाद्युक्तो च जीवनः॥ सोप्ये
वं यंत्रपीडाभिः पीड्यते यमकिंकरैः॥ दुःकृतये प्रयच्छंति पापवर्ज्जी वकृतं नराः॥ ते पिष्यंते शिलापेषैर्येयैते पापकर्मिणः॥ न्या
सापहारिणो बद्धाः सर्वगात्रेषु बंधनैः॥ कृमिवृश्चिककाकोलैर्भुज्यतेहर्निशं नराः॥ क्षुत्तापतृषिता जिह्वाताल्वो वेदनातुराः॥ दि
वामैथुनिनः पापाः परदारभुजश्च ये॥ तथैव कंटकैस्तीक्ष्णैरायसैः पश्यशाल्मलिं॥ आरोपिता वितुन्वंगाः प्रभूतासृक्स्र
वाकुलाः॥ मूषायामपि पश्येतानुध्मायमानान्यमानुगैः॥ पुरुषैः पुरुषव्याघ्र परदारावमर्षिणः॥ उपाध्यायमधः कृ ॥राम॥
त्वा स्तब्धो योध्ययनं नरः॥ स क्लातिशिल्यमथवा सोप्येवं शिरसा शिलां॥ विभ्रन्नरकेशमवाप्नोति यममार्गे प्रपीडितः॥ क्षु ॥२५॥
त्क्षामो हर्निशं भारपीडायोधितमस्तकः॥ मूत्रश्लेष्मपुरीषाणि यैरुत्सृष्टानि वारिणि॥ त इमे श्लेष्मविण्मूत्रदुर्गंधिनरकं
गताः॥ परस्परं स्वमांसानि भक्षयंति क्षुधार्दिताः॥ ये नराः स्पृष्टमांसानि भक्षयंति परस्परं॥ संदंशैः कृष्यते जिह्वा संदंशे नरकं

परोक्षनिर्दंक्ताः१

स्थिताः॥ भुक्तमातिथ्यविधिना पूर्वमेभिः परस्य यां॥ अथ विद्वांश्च ये वेदा वह्नयश्चाहिताग्निभिः॥ तदूमे शैलशृंगाग्रात्पात्यंते थः
पुनः पुनः॥ पुनर्भूपतयो ये च कामलोभवशानुगाः॥ द्रुमे कृमित्वमापन्ना भक्ष्यंते त्र यि यी लके॥ पतितप्रतिग्रहाद्दानाद्याजना
न्नित्यसेवनात्॥ पाषाणमध्ये कीटत्वं नरः सततमश्नुते॥ ध॥ पश्यतो भृत्यवर्गस्य मित्राणामतिथेस्तथा॥ एको मिष्टान्नभुक्
भुंक्ते ज्वलदंगारसंचयं॥ वृकैर्भयंकरैर्नित्यं पृष्ठवंस्याप सुद्यते॥ पृष्ठिमांसं नृशंसेन यतो लोकस्य भक्षितं॥ अंधोथ बधिरो
मूको भ्राम्यते तत्र क्षुधातुरः॥ अकृतज्ञोधमः पुंसामुपकारे प्रवर्त्तते॥ अयं कृतघ्नो मित्राणामपकारी सदुर्मतिः॥ तप्तकुं
भे विलयति ततो यास्यति रोषणं॥ करंभवालुका तस्मात्ततो यंत्रावपीडनं॥ असिपत्रवनं तस्मात्करपत्रेण पाटनं॥ का
लसूत्रे तथा छेदमनेकाश्चैव यातनाः॥ वा ध्यनिःकृतिमेतस्मान्नवेभिकथमेष्यति॥ श्राद्धसंगतिनो विप्राः समुपेत्य पर
स्परं॥ दुष्टाः स्रग्मिश्रितं फेनं सर्वांगेभ्यः पिबंति वै॥ स्वर्णस्तेयी च विप्रघ्नः सुरापो गुरुतल्पगः॥ अधश्चोर्ध्वं च दीप्ताग्नौ दग्
मानाः समंततः॥ तिष्ठंत्यब्दसहस्राणि सुबहूनि ततः परं॥ जायंते मानवाः कुष्ठक्षयरोगादिचिह्निताः॥ मृताः पुनश्च नर
कं पुनर्जातास्तथा दृशं॥ व्याधिमृच्छति कल्पांतपरिमाणं नराधिपं॥ गोघ्नोप्यनंतरं याति नरकं त्रिषु जन्मनि॥ तथोपपातका
नां च सर्वेषामिति निश्चयः॥ नरकाश्च्युता यांति ये यैरिह पातकैः॥ प्रयांति योनिजातानि तानि मे गदतः शृणु॥ २१॥
इति श्रीमार्कंडेयपुराणे पितापुत्रसंवादे चतुर्दशोध्यायः॥ १४॥ ॥ याम्य उवाच॥ पतितात्प्रतिगृह्यार्थं खर
योनिं व्रजेद्द्विजः॥ नरकात्प्रतिमुक्तस्तु कृमिः पतितयाजकः॥ उपाध्यायव्यलीकं तु कृत्वा श्वा भवति द्विजः॥ तज्जायामन
सा वाचा तद्द्रव्यं चाप्यसंशयं॥ गर्दभो जायते जंतुः पित्रोश्चाप्यवमानकृत॥ आक्रुश्य मातापितरौ सारिका संप्रजायते॥
तावेव पीडयित्वा तु कच्छपत्वं प्रपद्यते॥ भर्तृपिंडसमश्नंश्च तद्द्विष्यांश्च निषेवते॥ सोपि मोहसमाविष्टो जायते वानरो मृतः॥

॥मा०पु०॥

॥२६॥

26

मृगविशेषः

न्यासापहर्त्ता नरकाद्विमुक्तो जायते कृमिः॥ असूयकश्च नरकान्मुक्तो भवति रांककः॥ विश्वासहंता नरकान्मीनयोनौ प्र
जायते॥ धान्यं तिलान्यवान्माषान्कुलत्थान्सर्षपान्चणान॥ कलायान्कलमान्मुद्गान्गोधूमानतसीस्तथा॥ सस्या
न्यन्यानि वा हृत्वा मोहाज्जंतुरचेतनः॥ संजायते महावक्त्रो मूषको बभ्रुसन्निभः॥ परदाराभिमर्षाच्च वृको घोरोभिजाय
ते॥ श्वा शृगालो बको गृध्रो व्यालः कंकस्तथा क्रमात॥ भ्रातृजायां तु दुर्बुद्धिर्यो धर्षयति पापकृत॥ पुंस्कोकिलत्व
माप्नोति स चापि नरकाच्च्युतः॥ सखिभार्यां गुरोर्भार्यां राजभार्यां तु पापकृत॥ प्रधर्षयित्वा याया लासूकरो जायते नरः॥
यज्ञदानविवाहानां विघ्नकर्त्ता भवेत्कृमिः॥ पुनर्दाता च कन्यायाः कृमिरेवोपजायते॥ देवतातिथिभ्यस्त्वानामदत्वा
योन्नमश्नुते॥ प्रमुक्तो नरकात्सोपि वायसः संप्रजायते॥ ज्येष्ठं पितृसमं वापि भ्रातरं योवमन्यते॥ नरकात्सोपि विभ्रष्ट
ः क्रौंचयोनौ प्रजायते॥ शूद्रश्च ब्राह्मणीं गत्वा कृमियोनौ प्रजायते॥ तस्यामपत्यमुत्पाद्य काष्ठान्तः कीटको भवेत॥ सूक मद्गु
रः कृमिको मद्गुश्चांडालश्च प्रजायते॥ अकृतज्ञोधमः पुंसां विमुक्तो नरकान्नरः॥ कृतघ्नः कृमिकः कीटः पतंगो वृश्चि
कस्तथा॥ मत्स्यस्तथा लसः कूर्मः पुल्कसो जायते ततः॥ अशस्त्रपुरुषं हत्वा नरः संजायते खरः॥ कृमिः स्त्रीवधकर्त्ता च
बालहंता च जायते॥ भोजनं चोरयित्वा च मक्षिका जायते नरः॥ तत्राप्यस्ति विशेषो वै भोजनस्य शृणुष्व तत्॥ हृत्वा चा
न्नं तु मार्जारो जायते नरकेच्युतः॥ तिलपिण्याकसंमिश्रमन्नं हृत्वा तु मूषकः॥ घृतं हृत्वा तु नकुलः काको मद्गुरजा
मिषं॥ मत्स्यमांसापहृत्काकः श्येनो मेषामिषापहृत॥ चीरीकाकस्त्वपहृते लवणे दधि वा कृमिः॥ चोरयित्वा पयश्चापि बक ॥रामः॥
लाकः संप्रजायते॥ यस्तु चोरयते तैलं तैलपायी स जायते॥ मधु हृत्वा नरो दंशो धूपं हृत्वा पिपीलकः॥ चोरयित्वा हवि ॥२६॥
ष्यान्नं जायते गृहगोधकः॥ आसवं चोरयित्वा तु तित्तिरत्वमुपाश्नुते॥ अयो हृत्वा तु पापात्मा वायसः संप्रजायते॥ हृते

उज्ज्वलकाकः

८ अङसल

२ बहुरोमा मत्स्यकाकः १ काकविशेषः

26A

तुकांस्यहारीतः कपोतोरोप्यभाजने ॥ हत्वातुकांचनंभांडं कृमियोनौप्रजायते ॥ पटोर्णंचौरयित्वातुचक्रवाकत्वमश्नुते ॥ कोश
कारश्चकोशेयेहृतेवस्त्रेभिजायते ॥ दुकूलेशार्ङ्गकःपापोहृतेचैवांशुकेशुकः ॥ अजायदाविकंहत्वावस्त्रक्षौमंचजायते ॥
कार्पासिकेहृतेक्रौंचोवह्निंहत्वाबकःखगः ॥ मयूरोवर्णकान्हत्वाशाकपत्रंचजायते ॥ जीवंजीवकतांयातिरक्तवस्त्रापहृ
न्नरः ॥ छुछुंदरिःशुभान्गंधान्चशेहृत्वाशशोभवेत् ॥ षंढःफलायहरणेकाष्ठहृत्घुणकीटकः ॥ पुष्पापहृतभ्रमरः
स्यात्संगुयानापहृन्नरः ॥ शाकहारीचहारीतस्तोयहर्त्ताचचातकः ॥ भूमिहृन्नरकान्गत्वारौरवादीन्सुदारुणान् ॥ तृणगुल्मल
तावह्नीत्वक्सारतरुतांक्रमात् ॥ प्राप्यक्षीणस्यपापस्तुनरोभवतिवैततः ॥ दृषस्यवृषणौछित्वाषंढत्वंप्राप्नुयान्नरः ॥
परिहृत्यतयामूर्ध्योजन्मनायेकविंशतिः ॥ कृमिःकीटःपतंगोपपक्षीतोयचरेमृगः ॥ गोत्वंप्राप्यचचंडालपुल्कसादि
जुगुप्सितः ॥ पंगुर्धोबधिरःकुष्टीयक्ष्मणाचप्रपीडितः ॥ मुखरोगाक्षिरोगैश्चगुदरोगैश्चबाध्यते ॥ अपस्मारीचभवतीशूद्र
गो त्वंयदिगच्छति ॥ एषएवक्रमोदृष्टोसुवर्णादिहारिणां ॥ विद्यापिहारिणश्चापिधानिःकृपन्दंशिनोगुरोः ॥ जायामन्यस्यपुरु
षपारक्याप्रतिपादयन् ॥ प्राप्नोतिषंढतांमूढोयातनाभ्यःपरिच्युतः ॥ पकरोतिनरोहोममसमिद्धेहुताशने ॥ सोजीर्णघनदुः
खार्त्तोमंदाग्निरभिजायते ॥ परनिंदाकृतघ्नत्वंपरमर्मोपघट्टनं ॥ नैष्ठुर्यंनिर्घृणत्वंचपरदारोपसेवनं ॥ परस्वहरणाशौचं
देवतानांचकुत्सनं ॥ निकृत्यावंचनंनृणांकार्पण्यंचनृणांवधः ॥ यानिचप्रतिषिद्धानितत्प्रवृत्तिंचशंसतां ॥ सरोषताबंधुजने
षुवैरंदरिद्रतानीचजनेपिसंगमः ॥ अनंतकोपःकटुकाचवाणीनरस्यचिह्नंनरकागतस्य ॥ उपलक्षणानिजानीयान्मुक्ता
नांनरकादनु ॥ स्वर्यातास्तेषुसद्भावः परलोकंप्रतिक्रिया ॥ सत्यंभूतहितार्थोक्तिर्वेदप्रामाण्यदर्शनं ॥ गुरुदेवर्षिसिद्धार्च
ग्निपूजनंसाधुसंगमः ॥ सत्क्रियाभ्यसनंमैत्रीमितिबुध्येतपंडितः ॥ अन्यानिचैवसद्धर्मक्रियाभूतानियानिवै ॥ स्वर्ग

च्युतानांस्थितिगानिपुरुषाणाममायिनां॥एतदुद्देशतोराजन्मयैवंतःकथितंमया॥स्वकर्मफलभोक्तृणांपुण्यानांपापिनांतथा॥तदे

॥मा० पु०॥ ह्यन्यत्रगच्छामोदृष्टंसर्वंत्वयाधुना॥त्वयाचदृष्टोनरकस्तदेह्यन्यत्रगम्यतां॥पुत्रउवाच॥ततस्तुमग्रतःकृत्वासराजागंतुमु

॥२७॥ द्यतः॥ततश्चसर्वैरुत्क्रुष्टंयातनास्थायिभिःनरैः॥प्रसादंकुरुभूपेतितिष्ठतावन्मुहूर्त्तकं॥त्वदंगसंगीपवनोह्लादयतेहिनः मनो

परितापंचगात्रेभ्यःपीडाबाधाश्चकृत्स्नशः॥अपहंतिनरव्याघ्रकृपांकुरुमहीपते॥एतच्छ्रुत्वावचस्तेषांतंयाम्यपुरु

57 षंनृपः॥पप्रच्छकथमेतेषामाह्लादोमयितिष्ठति॥किंमयाकर्मतत्पुण्यंमर्त्यलोकेमहत्कृतं॥आह्लाददायिनीव्युष्टिर्येनेयं

तदुदीरय॥पुरुषउवाच॥पितृदेवातिथिप्रेष्यशिष्टेनान्नेनतेतनुः॥पुष्टिमभ्यागतायस्मात्तद्गतंतेमनोयतः॥ततस्त्वद्गात्रसं

सर्गीपवनोह्लाददायकः॥पापकर्मकृतांराजन्यातनानप्रबाधते॥अश्वमेधादयोयज्ञास्त्वयेष्टाविधिवद्यतः॥ततस्त्वद्दर्शना

द्याम्यायंत्रशस्त्राग्निवायसाः॥पीडनछेददाहादिमहादुःखस्यहेतवः॥मृदुत्वमागताराजंस्तेजसोपहतास्तव॥राजोवाच॥न

स्वर्गेब्रह्मलोकेवातत्सुखंप्राप्यतेनरैः॥यदार्त्तजंतुनिर्वाणदानोत्थमितिमेमतिः॥यदिमत्संनिधावेतान्यातनानप्रबाधते॥

ततोभद्रमुखात्राहंस्थास्येस्थाणुरिवाचलः॥पुरुषउवाच॥एहिराजेंद्रगच्छामोनिजपुण्यसमर्जितान्॥भुंक्ष्वभोगांस्त्यजे

तांचयातनांपापकर्मिणां॥राजोवाच॥तस्मान्नतावद्यास्यामियावदेतेसुदुःखिताः॥मत्संनिधानात्सुखिनोभवंतिनरकौक

सः॥धिक्तस्यजीवितंपुंसःशरणार्थिनमातुरं॥योनार्त्तमनुगृह्णातिवैरिपक्षमपिध्रुवं॥यज्ञदानतपांसीहपरत्रचनभूये

तये॥भवंतितस्ययस्यार्त्तेपरित्राणेनमानसं॥नरस्ययस्यकठिनंमनोबालातुरादिषु॥वृद्धेषुचनतंमन्येमानुषंराक्षसोहिसः॥ ॥राम॥

॥एतेषांसन्निकर्षात्तुयदग्निपरितापजं॥तथोग्रगंधजंवापिदुःखंनरकसंभवं॥क्षुत्पिपासोद्भवंदुःखंयच्चमूर्छाप्रदंमहत्॥ ॥२७॥

॥एतेषांत्राणदानात्तुमन्येस्वर्गसुखात्परं॥प्राप्स्यंत्येतेयदिसुखंबहवोदुःखितेमयि॥किंवाप्राप्तंमयानस्यात्तस्मात्त्व

27A

अज्ञमाचिरं ॥ पुत्र उवाच ॥ एषच धर्मश्च शक्रश्च त्वां नेतुं समुपागतौ ॥ अवश्यमस्मात्गंतव्यं तस्मात्पार्थिव गम्यतां ॥ धर्म उवाच ॥
नयामि त्वामहं स्वर्गं त्वया सम्यगुपार्जितं ॥ विमानमेतदारुह्य माविलंबस्व गम्यतां ॥ राजोवाच ॥ नरके मानवा धर्म पीड्यमानाः
सहस्रशः ॥ त्राहीत्यमी हि क्रंदंति मामितो न व्रजाम्यहं ॥ इंद्र उवाच ॥ कर्मणा नरकप्राप्तिरेतेषां पापकर्मिणां ॥ स्वर्गे त्वयानु
गंतव्यो नृप पुण्येन कर्मणा ॥ राजोवाच ॥ यदि जानासि धर्म त्वं त्वं वा देव शतक्रतो ॥ मम यावत्प्रमाणं तु शुभं तद्वक्तुमर्हसि ॥
धर्म उवाच ॥ अब्बिंदवो यथांभोधौ यथा वा दिवि तारकाः ॥ यथा वा वर्षतो धारा गंगायां सिकता यथा ॥ असंख्येया महा
राज यथा योनिषु जंतवः ॥ तथा तवापि पुण्यस्य संख्या नैवोपपद्यते ॥ अनुकंपामिमामद्य नारकेष्विह कुर्वतः ॥ तदेव
शतसाहस्री संख्यामुपगतं तव ॥ तद्गच्छ त्वं नृपश्रेष्ठ तद्भोक्तुममरालयं ॥ एते तु नरके पापं क्षपयंतु स्वकर्मजं ॥ राजोवा
च ॥ कथं स्पृहां करिष्यंति सत्संपर्केषु मानवाः ॥ यदि मत्सन्निधावेषामुत्कर्षो नोपजायते ॥ तस्माद्यत्सुकृतं किंचिन्ममास्ति
त्रिदशाधिप ॥ मुच्यंतां तेन नरकात्पापिनो यातनागताः ॥ इंद्र उवाच ॥ एतदूर्द्धितरं स्थानं त्वया वाप्तं महीपते ॥ एतांश्च नार
कान्पश्य विमुक्तान् पापकर्मिणः ॥ पुत्र उवाच ॥ ततोऽपतत्पुष्पवृष्टिस्तस्योपरि महीपतेः ॥ विमानं चाधिरोप्यैनं स्वर्गमे
वानयद्धरिः ॥ अहं चान्ये तु ये तत्र यातनाभ्यः परिच्युताः ॥ स्वकर्मफलनिर्दिष्टं ततो योन्यंतरं गताः ॥ एवमेते समाख्याता नरका द्विजस
त्तम ॥ येन येन च यायेन यां यां योनिमुपैति वै ॥ एतत्सर्वं समाख्यातं यथा दृष्टं मया पुरा ॥ परानुभावजं ज्ञानमवाप्य कथितं तव ॥ अतः प
रं महाभाग किमन्यत्कथयामि ते ॥ १५ ॥ ॥ ३ ॥ इ[illegible]ते श्रीमार्कंडेयपुराणे पितापुत्रसंवादे नाम पंचदशोऽध्यायः ॥ पि
तोवाच ॥ कथितं मे त्वया वत्स संसारस्य व्यवस्थितं ॥ स्वरूपमतिहेयस्य घटीयंत्रवदव्ययं ॥ तदेवमेतदखिलं मयावगतमीदृ
शं ॥ किं मया वद कर्तव्यमेवमस्मिन् व्यवस्थिते ॥ पुत्र उवाच ॥ यदि मद्वचनं तात श्रद्धधास्यविशंकितः ॥ तत्परित्यज्य गार्हस्थ्यं वान

॥मा०पु०॥
॥२८॥
28

प्रस्थमनामव ॥ तमनुष्ठायं विधिवद्विहायाग्निपरिग्रहं ॥ आत्मन्यात्मानमाधाय निर्द्वंद्वो निःपरिग्रहः ॥ एकांतशीलीवस्यात्मा भव
भिस्फुरतंद्रितः ॥ तत्र योगपरो भूत्वा बाह्यस्पर्शविवर्जितः ॥ ततः प्राप्स्यसितं योगं दुःखसंयोगभेषजं ॥ मुक्तिहेतुमनौपम्यमनाख्ये
यमसंगिनं ॥ यत्संयोगान्न ते भूयो योगो भूतैर्भविष्यति ॥ पितोवाच ॥ वत्स योगं समाचक्ष्व मुक्तिहेतुमतः परं ॥ येन भूतैर्न वत्साहं भू
यो योगमवाप्नुयां ॥ यत्रासक्तिपरस्यात्मा मम संसारबंधनैः ॥ नेति योगमयोगोपि तं योगमधुना वद ॥ संसारादित्यतप्तस्यात्ति
विद्युष्टं देहमानसं ॥ ब्रह्मज्ञानांबुशीतेन सिंच मां वाक्यवारिणा ॥ अविद्याकृष्णसर्पेण दष्टं तद्विषपीडितं ॥ स्ववाक्यामृतपानेन मां गि
जीवय पुनर्मृतं ॥ पुत्रदारगृहक्षेत्रममत्वनिगडार्दितं ॥ मां मोचयेष्टसद्भावैर्विज्ञानोद्घाटनेन त्वरन् ॥ पुत्र उवाच ॥ शृणु तात यथा यो
गो दत्तात्रेयेण धीमता ॥ अलर्काय पुरा प्रोक्तः सम्यक्पृष्टेन विस्तरात् ॥ पितोवाच ॥ दत्तात्रेयसुतः कस्य कथं वा योगमुक्तवान् ॥ का
श्वालर्को महाभागो यो योगं परिपृष्टवान् ॥ पुत्र उवाच ॥ कौशिको ब्राह्मणः कश्चित्प्रतिष्ठानेभवत्पुरा ॥ सोन्यजन्मकृतैः पापैः
कुष्टरोगातुरोभवत् ॥ तं तथा व्याधितं भार्या पतिं देवमिवार्चयत् ॥ पादाभ्यंगांगसंवाहस्नानाच्छादनभोजनैः ॥ श्लेष्ममूत्रपुरीषासृ
क्प्रवाहक्षालनेन च ॥ रहश्चैवोपचारेण प्रियसंभाषणेन च ॥ स तया पूज्यमानोपि तयातीव विनीतया ॥ तीवविनीतया ॥१२॥ अती
तीव्रकोपस्वात्तिर्भर्त्सयति निष्ठुरः ॥ तथापि प्रणता भार्या तममन्यत दैवतं ॥ तं ॥ तथाप्यतिबीभत्सं सर्वश्रेष्ठममन्यत ॥ अचंक्र
मणशीलोपि स कदाचिद्द्विजोत्तमः ॥ प्राह भार्यां नयस्वेति त्वं मां तस्या निवेशनं ॥ यासौ वेश्या मया दृष्टा राजमार्गे गृहे सती ॥ तां मां
प्रापय धर्मज्ञे सैव मे हृदि वर्त्तते ॥ दृष्टा सूर्योदये बाला रात्रिश्चेयमुपागता ॥ दर्शनानंतरं सा मे हृदयान्नापसर्पति ॥ यदि सा चा
रुसर्वांगी पीनश्रोणिपयोधरा ॥ नोपगूहति तन्वंगी तन्मां द्रक्ष्यसि वै मृतं ॥ वामः कामो मनुष्याणां बहुभिः प्रार्थ्यते नु सा ॥ म
मशक्तिश्च गमने संकुलं प्रतिभाति मे ॥ तत्तदा वचनं श्रुत्वा भर्तुः कामातुरस्य सा ॥ तत्सत्नी सत्कुले सन्ना महाभागा पतिव्रता ॥

त्वा

॥राम:॥
॥२८॥

पतिव्रता ॥ साहं परिकरं बध्वा शुल्कमादाय चाधिकं ॥ स्कंधे भर्त्तारमारोप्य जगाम मंदगामिनी ॥ निशि मेघावृते व्योम्नि बलद्विद्यु
द्दर्शिते ॥ राजमार्गे प्रियं भर्त्तुश्चिकीर्षंती द्विजांगना ॥ पथि शूले तदा प्रोतमचोरं चौरशंकया ॥ मांडव्यमतिदुःखार्त्तमंधकारे व्यवस्थितं ॥
पत्नीस्कंधसमारूढश्चालयामास कौशिकः ॥ पादावमर्शनात्क्रुद्धो मांडव्यस्तमुवाच ह ॥ येनाहमेवमत्यर्थं दुःखितश्चालितः पदा ॥
पे दूमं कष्टमनुप्राप्तस पापात्मा नराधमः ॥ सूर्योदये ऽवशः प्राणैर्वियोक्ष्यति न संशयः ॥ भास्करालोकनादेव स विनाशमवाप्स्यति ॥ तस्य भा
र्या ततः श्रुत्वा तं शापमतिदारुणं ॥ प्रोवाच व्यथिता सूर्यो नैवोदयमुपैष्यति ॥ ततः सूर्योदयाभावादभवत्संतता निशा ॥ बहून्यहःप्रमा प
णानि ततो देवा भयं ययुः ॥ निःस्वाध्यायवषट्कारं स्वधास्वाहाविवर्जितं ॥ कथं नु खल्विदं सर्वं न गच्छेत्संक्षयं जगत् ॥ अहोरात्रव्य
वस्थाया विनाशेन त्तुसंक्षयः ॥ तत्संक्षयान्न त्वयने ज्ञायेते दक्षिणोत्तरे ॥ विना चायनविज्ञानं कालः संवत्सरः कुतः ॥ न कालेन विना
चेष्टिर्नेच यज्ञादिकाः क्रियाः ॥ नश्यंति सर्वे भूतानि तमोभूते चराचरे ॥ पतिव्रताया वचनान्नोद्गच्छति दिवाकरः ॥ सूर्योदयं विनानैव
स्नानदानादिकाः क्रियाः ॥ नाग्नेर्विहरणं चैव क्रतुभावश्च लक्ष्यते ॥ नैवाप्यायनमस्माकं विना होमेन जायते ॥ वयमाप्यायिता मर्त्यैर्यज्ञ
भागैर्यथोदितैः ॥ वृष्ट्यादिनानुगृह्णीमो मर्त्यान्सस्यादिसिद्धये ॥ निष्पादितास्वोषधीषु मर्त्या यज्ञैर्यजंति नः ॥ तेषां वयं प्रयच्छामः कामा
नूयज्ञादिपूजिताः ॥ अधो हि वर्षाम वयं मर्त्याश्चोर्द्ध्वप्रवर्षिणः ॥ तोयवर्षेण हि वयं हविर्वर्षेण मानवाः ॥ ४५ ॥ ये ऽस्माकं न प्रयच्छंति नित्यनै
मित्तिकीः क्रियाः ॥ क्रतुभागं दुरात्मानः स्वयं येश्नंति लोलुपाः ॥ विनाशाय च तेषां तोयसूर्याग्निमारुतान् ॥ क्षितिं च संदूषयामः पापा
नामपकारिणां ॥ दुष्टतोयादिदोषेण तेषां दुष्कृतकारिणां ॥ उपसर्गाः प्रवर्त्तंते मरणाय सुदारुणाः ॥ ये चास्मान्प्रीणयित्वा तु भुंजते
शेषमात्मना ॥ तेषां पुण्यांश्च वयं लोकान्वितरामो महात्मनां ॥ तन्नास्ति सर्वमेवैतद्विनोषाभ्युष्टिसंस्थितिं ॥ कथं तु दिनसर्गः स्यादन्यो
न्यमवदन्सुराः ॥ तेषामेवं समेतानां यज्ञविच्छित्तिशंकिनां ॥ देवानां वचनं श्रुत्वा प्राह देवः प्रजापतिः ॥ तेजः परं तेजसैव तपसा च तपस्तथा

प्रशाम्यस्वमरा तस्माच्छृणुध्वं वचनं मम॥ पतिव्रतायामाहात्म्यान्नोदृच्छति दिवाकरः॥ तस्य चानुदयाद्धानिर्मर्त्यानां भवतां तया॥
तस्मात्पतिव्रतामत्रेरनुसूयां तपस्विनीं॥ प्रसादयत वै पत्नीं भानोरुदयकाम्यया॥ पुत्र उवाच॥ तैः सा प्रसादिता गत्वा प्राहेष्टं व्रिय
तामिति॥ अयाचंत दिनं देवा भवत्विति यथा पुरा॥ अनुसूयोवाच॥ पतिव्रताया माहात्म्यं न हीयेत कथंचिदिति॥ सम्मान्य तां ततः सा
ध्वीमहः स्नं शाम्यहं सुराः॥ यथा पुनरहोरात्रसंस्थानमुपजायते॥ यथा च तस्याः स पतिर्नेशं यान्नाशमेष्यति॥ पुत्र उवाच॥ एव
मुक्त्वा सुरांस्तस्या गत्वा सा मंदिरं शुभा॥ उवाच कुशलं पृष्ट्वा धर्मं भर्त्तुस्तथात्मनः॥ कच्चिन्नंदसि कल्याणि स्वभर्त्तुर्मुखदर्शना
त्॥ कच्चिच्चाखिलदेवेभ्यो मन्यसेभ्यधिकं पतिं॥ भर्त्तृशुश्रूषणादेव मया प्राप्तं महाफलं॥ सर्वकामफलावाप्तिः पतिशुश्रूष
यास्त्रियः॥ पंचर्णानि मनुष्येण साध्वि देयानि सर्वशः॥ तथा स्ववर्णधर्मेण कर्त्तव्यो धनसंचयः॥ प्राप्तश्चार्थस्तथा पात्रे विनि
योज्यो विधानतः॥ सत्यार्जवतपोदानदयायुक्तो भवेत्सदा॥ क्रियाश्च शास्त्रनिर्दिष्टा रागद्वेषविवर्ज्जिताः॥ कर्त्तव्या हरहः श्रद्धा
पुरस्कारेण शक्तितः॥ स्वजातिविहितानेवं लोकानाप्नोति मानवः॥ क्लेशेन महता साध्वि प्राजापत्यादिकान्क्रमात्॥ स्त्रियस्त्व
यं समस्तस्य नरैर्दुःखार्जितस्य च॥ पुण्यस्यार्द्धापहारिण्यः पतिशुश्रूषयैव हि॥ नास्ति स्त्रीणां पृथग्यज्ञो न श्राद्धं नाप्युपोष
णं॥ ई०॥ भर्तृशुश्रूषयैवैता लोकानिष्टान्व्रजंति हि॥ तस्मात्साध्वि महाभागे पतिशुश्रूषणं प्रति॥ त्वया मतिः सदा कार्या यतो भ
र्त्ता परा गतिः॥ यद्देवेभ्यो यच्च पित्रादिकेभ्यः कुर्याद्भर्त्ताभ्यर्चनं सत्क्रियातः॥ तस्यार्द्धं वै केवलं नान्यचित्ता नारी भुंक्ते भर्तृशुश्रूष
यैव॥ पुत्र उवाच॥ तस्यास्तद्वचनं श्रुत्वा प्रतिपूज्य तथादरात्॥ प्रत्युवाचात्रिपत्नीं तामनसूयामिदं वचः॥ धन्यास्म्यनुगृहीतास्मि
देवैश्चाप्यवलोकिता॥ यन्मे प्रकृतिकल्याणी श्रद्धां वर्द्धयसे पुनः॥ जानाम्येतन्न नारीणां काचित्पतिसमा गतिः॥ तत्प्रीतिश्चोपा
काराय इह लोके परत्र च॥ पतिप्रसादादिह च प्रेत्य चैव यशस्विनि॥ मारी सुखमवाप्नोति नार्या भर्त्ता हि देवतं॥ सा त्वं ब्रूहि महाभागे
ना

त्

29A

प्राप्ता याममममंदिरं ॥ आर्योयोः किंनु कर्त्तव्यं ममार्यैवापि वा शुभे ॥ अनसूयोवाच ॥ एते देवाः सहेंद्रेण मामुपागम्य दुःखिताः ॥ तदा
क्यायास्तसत्कर्मेदिननक्तनिरूपिणः ॥ याचंते हर्निशासंस्थां यथावदविखंडितां ॥ अहं तदर्थमायाता शृणु चैतद्वचो मम ॥ दिना
भावात्समस्तानामभावो यागकर्मणां ॥ तदभावात्सुराः पुष्टिं नो प्रयांति तपस्विनि ॥ अह्नश्चैव समुच्छेदादुच्छेदः सर्वकर्मणां ॥ त
दुच्छेदादनावृष्ट्या जगदुच्छेदमेष्यति ॥ तत्त्वमिच्छसि चेदेतज्जगदुद्धर्तुमापदः ॥ प्रसीद साध्वि लोकानां पूर्ववद्वर्त्ततां रविः ॥ ब्राह्म
ण्युवाच ॥ मांडव्येन महाभागेन शप्तो भर्त्ता ममेश्वरः ॥ सूर्योदये विनाशं त्वं प्राप्स्यसीत्यतिमन्युना ॥ अनसूयोवाच ॥ यदि ते रोचते भ
द्रे ततस्त्वद्वचनादहं ॥ करोमि पूर्ववद्देहं भर्त्तारं ते नवं पुनः ॥ मया हि सर्वथा स्त्रीणां माहात्म्यं वरवर्णिनि ॥ पतिव्रतानामाराध्यमिति
सन्मानयामि ते ॥ पुत्र उवाच ॥ तथेत्युक्ते तया सूर्यमाजुहाव तपस्विनी ॥ अनसूयार्घमुद्यम्य दशरात्रे तदा निशि ॥ ततो विवस्वान्भगवान् प
फुल्लपद्मारुणाकृतिः ॥ शैलराजमुदयमारुरोहोरुमंडलः ॥ समनंतरमेवास्या भर्त्ता प्राणैर्व्ययुज्यत ॥ पपात च महीपृष्ठे पतंतं
जगृहे च सा ॥ अनसूयोवाच ॥ न विषादस्त्वया भद्रे कर्त्तव्यः पश्य मे बलं ॥ पतिशुश्रूषयावाप्तं तपसा किं चिरेण मे ॥ यथा भर्तृसमं ना
न्यमपश्यं पुरुषं क्वचित् ॥ रूप ॥ रूपतः शीलतो बुद्ध्या वाङ्माधुर्यादिभूषणैः ॥ तेन सत्येन विप्रोयं व्याधिमुक्तः पुनर्युवा ॥ प्राप्नोतु जीवि
तं भार्यासहायः शरदां शतं ॥ यथा भर्तृसमं नान्यमहं पश्यामि दैवतं ॥ तेन सत्येन विप्रोयं पुनर्जीवत्वनामयः ॥ कर्मणा मनसा वाचा
रा भर्त्तुराराधनं प्रति ॥ यथा ममोद्यमो नित्यं तथायं जीवितां द्विजः ॥ पुत्र उवाच ॥ ततो विप्रः समुत्तस्थौ व्याधिमुक्तः पुनर्युवा ॥ स्वभा
भिर्भासयन्वेश्म वृंदारक इवापरः ॥ ततोपतत्पुष्पवृष्टिर्देववाद्यनिस्वनः ॥ लेभिरे च मुदं देवा अनसूयामथाब्रुवन् ॥ देवा ऊचुः ॥
अनसूये महाभागे महत्कार्यं कृतं त्वया ॥ आदित्योदयसन्दाव वरं वरय सुव्रतं ॥ अनसूयोवाच ॥ यदि देवाः प्रसन्ना मे पितामह
पुरोगमाः ॥ वरदा नो वरार्हा च यद्यहं भवतां मता ॥ तद्यांतु मम पुत्रत्वं ब्रह्मविष्णुमहेश्वराः ॥ योगं च प्राप्नुयां भर्तृसहिता क्लेश

द्वि.कं.=४

॥मा० पु०॥ मुक्तये ॥ एवमस्त्विति तां देवा ब्रह्मविष्णुशिवादयः ॥ उक्त्वा जग्मुर्यथान्यायमनुमान्य तपस्विनीं ॥ ततः कालेब तैहतिथे द्वितीयो ब्रह्म
॥३०॥ णः सुतः ॥ स्वभार्यां भगवानत्रिरनुसूयामपश्यत ॥ ऋतुस्नातां सुचार्वङ्गीं लोभनीयतमाकृतिं ॥ स कामी मनसा भेजे स मुनिस्तामनिं
रूपं=४ दितां ॥ तस्याभिध्यायतस्तां तु विकारो योऽभ्यजायत ॥ तमेयो वाहपवनस्तिर्यगूर्ध्वं च वेगवान् ॥ ब्रह्मरूपं सुशुक्लाभं पतमानं समंत
30 ततः ॥ सोम रूपं रजो[illegible] दिशस्तं जगृहुर्दिशां ॥ स सोमो मानसो जज्ञे तस्यामत्रेः प्रजापतेः ॥ पुत्रः समस्तसत्वानामायुराधार
एव च ॥ तुष्टेन विष्णुना जज्ञे दत्तः स्रष्टा महात्मना ॥ स्वशरीरात्समुत्पाद्य सत्वोद्रिक्तो द्विजोत्तमः ॥ दत्तात्रेय इति ख्यातः सोऽनुसू
यास्तनं पयो ॥ विष्णुरेवावतीर्णो सौ द्वितीयोऽत्रेः सुतोऽभवत् ॥ स प्ताहात्स च्युतो मातुरुदरात्कुपितोऽयतः ॥ हैहयेन्द्रमुदावर्त्तम
पराध्यंतमुद्धतं ॥ दृष्ट्वा तं कुपितः सद्यो दग्धुकामः स हैहयं ॥ गर्भवासमपास्यैवं दुःखामर्षसमन्वितः ॥ दुर्वासास्तमसो
द्रिक्तो रुद्रांशः समजायत ॥ इति पुत्रत्रयं तस्यां जज्ञे ब्रह्मेशवैष्णवं ॥ सोमो ब्रह्माभवद्विष्णुर्दत्तात्रेयो व्यजायत ॥ दुर्वासाः शं
करो जज्ञे वरदानाद्दिवौकसां ॥ सोमः स्वरश्मिभिः शीतैर्वीरुधौषधिमान्वान् ॥ आप्याययन्सदा सर्गे वर्त्तते स प्रजापतिः ॥
दत्तात्रेयः प्रजा याति दुष्टदैत्यान्निवर्हणात् ॥ शिष्टानुग्रहकृते सत्त्विज्ञेयश्चांशः सवैष्णवः ॥ निर्दहेत्यवमंतॄंश्च दुर्वासा भगवा
रू नजः ॥ रौद्रं भावं समाश्रित्य दृग्मनोवाग्भिरुद्धतः ॥ सोमत्वं भगवानत्रेः पुत्रश्चक्रे प्रजापतिः ॥ दत्तात्रेयोऽपि विषयान्योग
स्थो बुभुजे हरिः ॥ दुर्वासाः पितरं त्यक्त्वा मातरं चोत्तमं व्रतं ॥ १०५ ॥ उन्मत्ताख्यं समाश्रित्य परिबभ्राम मेदिनीं ॥ मुनिपुत्रवृतो
योगी दत्तात्रेयो प्यसंगितां ॥ अभीप्समानः सरसि निममज्ज चिरं विभुः ॥ तथापि तं महात्मानमतीव प्रियदर्शनं ॥ तत्यजुर्नैव कु ॥रामः॥
मारास्ते सरसस्तीरसंश्रयाः ॥ दिव्यं वर्षशते पूर्णे यदा ते न त्यजन्ति तं ॥ तत्प्रीत्या सरसस्तीरं सर्वे मुनिकुमारकाः ॥ ततो दिव्यां ॥३०॥
वरधरां सुरूपां सुनितंविनीं ॥ नारीमादाय कल्याणीमुत्ततार जलान्मुनिः ॥ स्त्रीसन्निकर्षिणं एते परित्यक्ष्यंति मामिति ॥

४ योगिनो हिजडोन्मत्तपिशाचाद्यव व तैं ते अतएव उन्मत्तव्रतमुक्तौ ४

30A

मुनिपुत्रास्ततोःसंगीस्यास्यामीतिविचिंतयन् ॥ तथापितंमुनिस्तुतान्नत्यजंतियदामुनिं ॥ ततःसहतयानार्यामद्यपानमथापि
वत ॥ सुरापानरतंतेतेसभार्यंतत्यजुस्ततः ॥ गीतवाद्यादिवनिताभोगसंसर्गदूषितं ॥ मन्यमानामहात्मानंतुस्यासवहवि
त्क्रिया ॥ नावापदोषंयोगीशोवारुणींसपिबन्नपि ॥ अंतावसायिविप्रांतंमातरिश्वास्यमानिव ॥ रुरोपित्रस्सपत्नीकस्तपस्ते
पेसयोगवित ॥ योगीश्वरश्चिंत्यमानोयोगिभिर्मुक्तिकांक्षिभिः ॥ कस्यचित्त्वथकालस्यकृतवीर्यात्मजोर्जुनः ॥ कृतवीर्येदि
वंयातेमंत्रिभिःसपुरोहितैः ॥ पौरैश्चाप्यभिषेकार्थंसमाहूतोब्रवीदिदं ॥ नाहंराज्यंकरिष्यामिमंत्रिणोनरकोत्तरं ॥ यदर्थंगृह्य
तेशुल्कंतदनिष्पादयन्वृथा ॥ पण्यानांद्वादशंभागंभूपालायवणिग्जनः ॥ दत्वालंरक्षणेमार्गेरक्षितोयातिदस्युतः ॥ गो
पाश्चघृततक्रादेःषड्भागंचकृषीबलाः ॥ दत्वान्यन्नृभुजोरद्युर्यदिभागमतोधिकं ॥ पण्यादीनामशेषाणांवणिजोगृह्ण
तस्ततः ॥ इष्टापूर्त्तविनाशायतद्राज्ञश्चौरधर्मिणः ॥ यदन्यैःपाल्यतेलोकै[illegible]त्तहैस्यतरंश्रितः ॥ गृह्णतोबलिषड्भागं
नयतेर्नरकोध्रुवं ॥ निरूपितमिदंराज्ञःपूर्वैरक्षणवेतनं ॥ अरक्षंश्चौरतश्चौरंतदेनोन्नृपतेर्भवेत् ॥ तस्माद्यदितपस्तप्त्वाप्रा
स्येयोगित्वमीप्सितं ॥ भुवःपालनसामर्थ्ययुक्तएकोमहीपतिः ॥ पृथिव्यामस्त्रशस्त्रान्योह्यहमेवर्द्धिसंयुतः ॥ ततोभविष्येनासा
नंकरिष्येपापभागिनं ॥ तस्यतंनिश्चयंज्ञात्वामंत्रिमध्येस्थितोब्रवीत् ॥ गर्गोनाममहाबुद्धिर्मुनिश्रेष्ठोवयोतिगः ॥ यद्येवंकर्तुका
मस्त्वंराज्यंसम्यक्प्रशासितुं ॥ ततःशृणुष्वमेवाक्यंकुरुष्वचनृपात्मज ॥ दत्तात्रेयंमहात्मानंसह्यद्रोणीकृताश्रमं ॥ तमाराधय
भूपालपातियोभुवनत्रयं ॥ योगयुक्तंमहात्मानंसर्वत्रसमदर्शिनं ॥ विष्णोरंशंजगद्धातुरवतीर्णंधरातले ॥ यमाराध्यसहस्राक्ष
ःप्राप्तवान्पदमासनं ॥ हृतंदुरात्मभिर्दैत्यैर्जघानचदितेःसुतान् ॥ राजोवाच ॥ कथमाराधितोदेवैर्दत्तात्रेयःप्रतापवान् ॥
कथंचापहृतंदैत्यैरिंद्रत्वंप्रापवासवः ॥ गर्गउवाच ॥ दैत्यानांदेवतानांचयुद्धमासीत्सुदारुणं ॥ १२ ॥ दैत्यानामीश्वरेजंभेदे

न

||मा०पु०||
||३१||
31

वानांचशचीपते।तेषांतुयुध्यमानानांनांदिव्यःसंवत्सरोगतः॥ततोदेवाःपराभूतादैत्याविजयिनोभवन्।विप्रचित्तिमुखैर्देवादान
वैस्तेपराजिताः।पलायनकृतोत्साहा~~द्विषज्जये~~निरुत्साहाद्विषज्जये।बृहस्पतिमुपागम्यदैत्यसैन्यवधेप्सवः॥अमंत्रयंतसहिता
बालखिल्यैःसहर्षिभिः॥बृहस्पतिरुवाच॥दत्तात्रेयमहाभागमत्रेःपुत्रंतपोधनं।विक्लवाश्चरणंभक्त्यातातोषयितुमर्हथ॥सवो
दैत्यविनाशायवरदोदास्यतेवरं।ततोहनिष्यथसुराःसहितान्दैत्यदानवान्॥गर्गउवाच॥इत्युक्तास्तेतदाजग्मुर्दत्तात्रेयाश्रमं
सुराः॥ददृशुश्चमहात्मानंतंलक्ष्म्यासमन्वितं॥उपगीयमानंगंधर्वैःसुरापानरतंमुनिं।तेतस्यगत्वाप्रणतिंचक्रुःसर्वार्थसाध
नं।चक्रुस्तस्योपजह्रुश्चभक्ष्यभोज्यस्रगादिकं।तिष्ठंतमनुतिष्ठंतियांतंयांतिदिवौकसः॥आराधयामासुरधःस्थितास्तिष्ठंतमा
नसे॥४०॥सप्राहदेवान्प्रणतान्दत्तात्रेयःकिमिष्यते।मत्तोभवद्भिर्येनेयंशुश्रूषाक्रियतेमम॥४१॥देवाऊचुः॥दानवैर्मुनिशा
र्दूलजंभाद्यैर्भूर्भुवादिकं।हृतंत्रैलोक्यमाक्रम्यक्रतुभागाश्चकृत्स्नशः॥तद्वधेकुरुबुद्धिंत्वंपरित्राणायनोनघ।त्वत्प्रसादाद
भीप्सामःपुनःप्राप्तुंत्रिविष्टपं॥दत्तात्रेयउवाच॥मद्यासक्तोहमुच्छिष्टोनचैवाहंजितेंद्रियः॥कथमिच्छथमत्तोपिदेवाःशत्रुपराभवं॥
देवाऊचुः॥अनघस्त्वंजगन्नाथनलेपस्तवविद्यते।विद्याक्षालनशुद्धांतर्निविष्टज्ञानदीधितेः॥दत्तात्रेयउवाच॥सत्यमेतत्सुरा
विद्यामममास्तिसमदर्शिनः॥अस्यास्तुयोषितःसंगादहमुच्छिष्टतांगतः॥स्त्रीसंभोगोतिदुःखायसातत्येनोपसेवितः॥एवमुक्ता
स्ततोदेवाःपुनर्वचनमब्रुवन्॥देवाऊचुः॥अनघेयंमुनिश्रेष्ठजगन्मातानदुष्यति।यासाविद्यातवविभोसर्वज्ञस्यस्थिताहृदि॥
यथांशुमालासूर्यस्यद्विजचंडालसंगिनी॥नदुष्यतिजगन्मातायतयेयंवरवर्णिनी॥गर्गउवाच॥एवमुक्तस्ततोदेवैर्दत्तात्रेयोब्र
वीदिदं।प्रहस्यत्रिदशान्सर्वान्यद्येतद्भवतांमतं।तदाहूयासुरान्सर्वान्युद्धायसुरसत्तमाः॥इहानयतमद्दृष्टिगोचरंमाविलं
बत।मद्दृष्टिपातहुतभुक्प्रक्षीणबलतेजसः॥येननाशमशेषास्तेप्रयांतिममदर्शनात्॥गर्गउवाच॥तस्यतद्वचनंश्रुत्वादेवै ||राम:|| ||३१||

31A

दैत्यामहाबलाः॥ आहवायसमाहूताजग्मुर्देवगणान्युधा॥ तेहन्यमानादैतेयैःदेवाःशीघ्रंभयातुराः॥ दत्तात्रेयाश्रमंजग्मुःसमस्ताः
शरणार्थिनः॥ तमेवविविशुर्दैत्याःकालयंतोदिवौकसः॥ ददृशुस्तंमहात्मानंदत्तात्रेयंमदालसं॥ वामपार्श्वेस्थितामिष्टामशेष
जगतांशुभां॥ भार्यांतस्यसुचार्वंगींलक्ष्मीमिंदुनिभाननां॥ नीलोत्पलाननयनांपीतश्रोणिपयोधरां॥ सुदतींमधुराभाषांस
र्वयोषिद्गुणैर्युतं॥ तांतांदृष्ट्वाग्रतोदैत्याःसाभिलाषास्ततोभवन्॥ नशेकुरुद्धतंधैर्यंमनसासोढुमातुराः॥ त्यक्त्वादेवान्स्त्रि
यंतांतुहर्तुंकामाहतौजसः॥ तेनयापिनमुद्यंतस्यासक्तास्ततोब्रुवन्॥ रूपसि॥ स्त्रीरत्नमेतत्त्रैलोक्येसारंनोयदिवैभवेत्॥ कृ
तकृत्यास्ततःसर्वेइतिनोभावितंमनः॥ तस्मात्सर्वेसमुत्क्षिप्यशिविकायांसुरार्दना॥ आरोप्यस्वमधिष्ठानंनयामइति
निश्चिताः॥ गर्गउवाच॥ सानुरागास्ततस्तेतुप्रोच्येत्थंतुपरस्परं॥ तस्यतांयोषितंसाध्वींसमुत्क्षिप्यस्मरातुराः॥ शिविकायांस
मारोप्यसहितादैत्यदानवाः॥ शिरस्याशिविकांकृत्वास्वस्थानाभिमुखंययुः॥ दत्तात्रेयस्ततोदेवान्विहस्येदमथाब्रवीत्॥ दि
ष्ट्यावर्द्धतदैत्यानामेषालक्ष्मीःशिरोगता॥ सप्तस्थानान्यतिक्रांतालयमस्यसमुपैष्यति॥ एषापापीयसांमूर्द्धिसमारूढायश
स्विनी॥ देवाऊचुः॥ कथयस्वजगन्नाथकेषुस्थानेषुवास्थिता॥ पुरुषाणांफलंकिंवाप्रयच्छत्यथनश्यति॥ दत्तात्रेयउवाच॥
न्नृणांपादस्थितालक्ष्मीर्निलयंसंप्रयच्छति॥ सक्थिनीसंस्थितावस्त्ररत्नंनानाविधंवसु॥ कलत्रदागुह्यसंस्थाक्रोडस्था
पत्यदायिनी॥ मनोरथान्पूरयतिपुरुषाणांहृदिस्थिता॥ लक्ष्मीर्लक्ष्मीवतांश्रेष्ठकंठस्थाकंठभूषणं॥ अभीष्टबंधुदारैश्च
तथाश्लेषंप्रवासिभिः॥ मृष्टान्नंवाक्कलावण्यमाज्ञामवितथांतथा॥ मुखसंस्थाकवित्वंचयच्छत्युदधिसंभवा॥ शिरोगता
संत्यजतिततोन्यंयातिसंश्रयं॥ सेयंशिरोगतादैत्यान्परित्यजतिसांप्रतं॥ प्रगृह्यास्त्राणिवध्यंतांतस्मादेतेसुरारयः॥ नभेतव्यं
नशंचैतत्तेमयानिस्तेजसाकृताः॥ परदारावमर्शोयंदग्धपुण्याकृतौजसः॥ तस्मादेतेभिहन्यंतामथचन्द्रिरवशंकितैः॥ गर्गे

॥मा॰पु॰॥ उवाच॥ ततस्तैर्विविधैरस्त्रैर्वध्यमानाः सुरारयः॥ शिरस्स्थलक्ष्म्या चाक्रांता विनेशुरिति नः श्रुतं॥ लक्ष्मीश्चोत्सवसंप्राप्ता दत्तात्रेयं म
हामुनिं॥ स्तूयमानं सुरैः सेंद्रैर्दैत्यनाशान्मुदान्वितैः॥ जय कृष्ण जगन्नाथ दैत्यांतक हरे प्रभो॥ नारायणाच्युतानंत वासुदेवाश्रयाजं
॥३२॥ गृ॥ त्वत्प्रसादात्सुखं लक्ष्मीराज्यं संयज्ञ जनार्दन॥ शार्ङ्गधन्वान् चक्रपाणे भक्तानां निस्वत्सल॥ प्रणिपत्य ततो देवा दत्तात्रेयं मनीषि
णं॥ नाकपृष्ठमनुप्राप्ता यथापूर्वं गतज्वराः॥ तथात्वमपि राजेंद्र यदीच्छसि तथेप्सितं॥ प्राप्तुमैश्वर्यमतुलं तूर्णमाराधयस्व तं॥
32 पूर्वं ॥१५॥ ॥ इति श्रीमार्कंडेयपुराणे दत्तात्रेयचरिते षोडशोध्यायः॥ १६॥ ॥ पुत्र उवाच॥ इत्यार्षं वच
नं श्रुत्वा कार्तवीर्यो नरेश्वरः॥ दत्तात्रेयाश्रमं गत्वा भक्त्या तं समपूजयत॥ पादसंवाहनाद्येन मध्वाद्याहरणेन च॥ स्रक्चंदनादि
गंधांबुफलाद्यानयनेन च॥ तथान्नसाधनैरस्य उच्छिष्टापोहनेन च॥ वातुष्टेनाग्निना तस्य दग्धं राज्ञो सुजहूय॥ परितुष्टोसु
निर्भूयं तमुवाच तथैव सः॥ यथैवोक्ताः पुरा देवा मद्यभोज्यादिकुत्सनं॥ स्त्री चेयं मम पार्श्वस्थेयं तद्भोगाच्च कुत्सितं॥ सदेवाहं
न मामेवं सुपरोद्धुं त्वमर्हसि॥ अशक्तं सुपकाराय शक्तमाराधयस्व भो॥ पुत्र उवाच॥ तेनैवमुक्तो मुनिना स्मृत्वा गर्गवचस्ततः॥
प्रत्युवाच प्रणम्यैनं कार्तवीर्यस्ततोऽर्जुनः॥ देव त्वं दिव्यपुराणो वै स्वमायां समुपाश्रितः॥ अनघस्त्वं तथा चेयं देवी सर्वभवार
णिः॥ प्रत्युक्तः प्रीतिमान् देवस्ततस्तं प्रत्युवाच ह॥ कार्तवीर्यं महावीर्यं वशीकृतमहीतलं॥ वरं वृणीष्व गुह्यं मे त्वया नाम यदीरि
तं॥ तेन तुष्टिः परा जाता त्वय्यद्य मम पार्थिव॥ ये च मां पूजयिष्यंति गंधमाल्यादिभिर्नराः॥ मांसमद्योपहारैश्च मिष्टान्नैश्चास
सम्मतैः॥ लक्ष्म्या समेतं गीतैश्च ब्राह्मणानां तथा चेनैः॥ वाद्यैर्मनोरमैर्वीणावेणुशंखादिभिस्तथा॥ तेषामहं परां तुष्टिं पुत्र ॥राम॥
दारधनादिकां॥ प्रदास्याम्यपवधं तथा हनिष्याम्यवमन्यतां॥ स त्वं वरय भद्रं ते वरं यन्मनसीच्छसि॥ प्रसादं सुमुखस्तेहं गुह्य ॥३२॥
नाम प्रकीर्त्तनात्॥ कार्तवीर्य उवाच॥ यदि देव प्रसन्नस्त्वं तत्प्रयच्छर्द्धिमुत्तमां॥ यया प्रजाः पालयेयं न चाधर्ममवाप्नुयां॥

32A

यरानुस्मरणं ज्ञानमप्रतिद्वंद्वतारणे ॥ सहस्रमिच्छया वास्तु बाहूनां लघिमा गुणं ॥ असंगा गतयः संतु शैलाकाशांबुभूमिषु
पातालेषु च सर्वेषु वधश्चाभ्यधिकान्नरात् ॥ तथोन्मार्गप्रवृत्तस्य संतु सन्मार्गदेशकाः ॥ संतु मेतिथयः श्लाघ्या वित्तदानेन तथा
क्षयं ॥ अनष्टद्रव्यता राष्ट्रे ममानुस्मरणेन च ॥ त्वयि भक्तिश्च देवास्तु नित्यमव्यभिचारिणी ॥ दत्तात्रेय उवाच ॥ य एते कीर्त्तिता
ः सर्वे तान्वरान्समवाप्स्यसि ॥ मत्प्रसादाद्भविता च चक्रवर्त्ती त्वमीश्वरः ॥ पुत्र उवाच ॥ प्रणिपत्य ततस्तस्मै दत्तात्रेयाय सोर्जु
नः ॥ आनाय्य प्रकृतीः सम्यगभिषेकमगृह्णात ॥ आगताश्चापि गंधर्वास्तथैवाप्सरसां गणाः ॥ ऋषयश्च वसिष्ठाद्या मेर्वाद्याः प
र्वतास्तथा ॥ गंगाद्याः सरितः सर्वाः समुद्रा रत्नसंभवाः ॥ प्लक्षाद्याश्च तथा वृक्षा देवाश्च वासवादयः ॥ वासुकिप्रमुखा नागाश्च
भिषेकार्थमागताः ॥ तार्क्ष्याद्याः पक्षिणश्चैव पौरजानपदास्तथा ॥ संभाराः संभृताः सर्वे दत्तात्रेयप्रसादतः ॥ अथ संज्वा
य ल्य तानग्नीन्दैवैर्ब्रह्मादिभिः सह ॥ नारायणेनाभिषिक्तो दत्तात्रेयस्वरूपिणा ॥ समुद्रैश्च नदीभिश्च ऋषिभिश्चाभिषेचितः ॥
आघोषयामास तदा स्थितो राज्ये स हैहयः ॥ दत्तात्रेयात्परामृद्धिमवाप्याति बलान्वितः ॥ अद्य प्रभृति यः शस्त्रं मामृतेन्यो ग्र
हीष्यति ॥ हंतव्यः स मया दस्युः परहिंसारतोपि वा ॥ इत्याज्ञप्तेन तद्राज्ये कश्चिदायुधभृन्नरः ॥ तमृते पुरुषव्याघ्रं बभूवोरु
पराक्रमं ॥ स एव ग्रामपालोभूत्पशुपालः स एव च ॥ क्षेत्रपालः स एवासीद्द्विजातीनां च रक्षिता ॥ तपस्विनां पालयिता सार्थ
पालश्च सोभवत् ॥ दस्युव्यालाग्निशस्त्रारिभयेष्वब्धे निमज्जतां ॥ अन्यासु चैव मग्नानामापत्सु परवीरहा ॥ स एव संस्मृतः स
द्यः समुद्धर्त्ताभवन्नृणां ॥ अनष्टद्रव्यता चासीत्तस्मिन्शासति पार्थिवे ॥ तेनेष्टं बहुभिर्यज्ञैः समाप्तवरदक्षिणैः ॥ तेन चैव तप
स्तप्तं संग्रामे चातिचेष्टितं ॥ तस्यर्द्धिमहिमानं च दृष्ट्वा प्राह गिरा मुनिः ॥ न नूनं कार्त्तवीर्यस्य गतिं यास्यंति पार्थिवाः ॥ यज्ञैर्दा
चाति नैस्तपोभिर्वा संग्रामे चेष्टितैः ॥ दत्तात्रेयाद्दिने यस्मिन्संप्राप्तर्द्धिर्नरेश्वरः ॥ तस्मिंस्तस्मिन्दिने यागं दत्तात्रेयस्य सोकरोत् ॥ तत्ये

वचप्रजाः सर्वास्तस्मिन्नहनि भूपते ॥ तस्यर्द्धिपरमां दृष्ट्वा यागं चक्रुः समाधिना ॥ इत्येतत्तस्य माहात्म्यं दत्तात्रेयस्य धीमतः ॥
 विष्णोश्चराचरगुरोरनंतस्य महात्मनः ॥ प्रादुर्भावाः पुराणेषु कथ्यंते शार्ङ्गधन्विनः ॥ अनंतस्याप्रमेयस्य शंखचक्रगदाभृ-
 तः ॥ एतस्य परमं रूपं यश्चिंतयति मानवः ॥ स सुखी स च संसारात्समुत्तीर्णो चिराद्भवेत् ॥ सदैव वैष्णवानां च भक्त्याहं
सुलभोस्मि भो ॥ पत्रपुष्पफलेनाहं पूजितो मा सदोस्मि वै ॥ इत्येवं यस्य वैवाचस्तं कथं नाश्रयेज्जनः ॥ अधर्मस्य विनाशाय धर्म-
 धारार्थमेव च ॥ अनादिनिधनो देवः करोति स्थितिपालनं ॥ तस्यैतज्जन्मचाख्यातमलर्कं कथयामि ते ॥ यथावयोगः कथि-
तो दत्तात्रेयेण तस्यैव ॥ पितृभक्तस्य राजर्षेरलर्कस्य महात्मनः ॥ ४३ ॥ ॥ इति श्रीमार्कंडेयपुराणे दत्तात्रेयीयं
समाप्तं ॥ १७ ॥ ॥ पुत्र उवाच ॥ प्राग्बभूव महावीर्यः शत्रुजिन्नाम पार्थिवः ॥ तुतोष यस्य यज्ञेषु सोमं पीत्वा पु-
रंदरः ॥ तस्यात्मजो महावीर्यो बभूवारिविमर्द्दनः ॥ बुद्धिविक्रमलावण्यैर्गुरुशक्राश्विभिः समः ॥ स समानवयोबुद्धिसत्व-
विक्रमचेष्टितैः ॥ नृपपुत्रो नृपसुतैर्नित्यमास्ते समावृतः ॥ कदाचित्काव्यसंलापगीतनाटकसंभवैः ॥ तथैवासविनोदेन
शास्त्रार्थविनयेषु च ॥ योग्यासु युद्धनागाश्वस्यंदनाभ्यासतत्परः ॥ रेमे नरेंद्रपुत्रोसौ नरेंद्रतनयैः सह ॥ यथैव हि दिवा तद्वद्रा-
त्रावपि मदायुतः ॥ तेषां तु क्रीडतां तत्र द्विजभूपविशां सुताः ॥ समानवयसः प्रीत्यारंतुमायांत्यनेकशः ॥ कस्यचित्वथ का-
लस्य नागलोकान्महीतलं ॥ कुमारावागतौ नागौ पुत्रावश्वतरस्य तु ॥ ब्रह्मरूपप्रतिच्छन्नौ तरुणौ प्रियदर्शनौ ॥ तौ तैर्नृपसुते- ॥ राम ॥
:सार्द्धं तथैवान्यैर्द्विजात्मजैः ॥ विनोदैर्विविधैस्तत्र तस्थतुः प्रीतिसंयुतौ ॥ सर्वे च ते नृपसुतास्ते च ब्रह्मविशां सुताः ॥ नागराजा-
त्मजौ तौ च स्नानसंवाहनादिकं ॥ वस्त्रगंधान्नसंयुक्तां चक्रु भोगभुजिक्रियां ॥ अहन्यहनि तु प्राप्तौ तौ च नागकुमारकौ ॥ प्रा- ॥ ३३ ॥
जग्मतुर्मुदायुक्तौ प्रीत्यासूनोर्महीपतेः ॥ स च ताभ्यां नृपसुतः परं निर्वाणमाप्तवान् ॥ विनोदैर्विविधैर्हास्यसंलापादिभिरे-

५ वचनश्रोताप्रसीध्यकीर्तिर्गा॥

33A

वच॥ विनाताभ्यांनबुभुजेनसस्नौनपपौमधु॥ नरराम नजग्राहशास्त्राण्यालगुणेसया॥ रसातलेचतौरात्रिंविनातेनमहात्म
ना॥ निःश्वासपरमंनीत्वाजग्मतुस्तौदिनेदिने॥ मर्त्यलोकेपरांप्रीतिर्भवतोःकेनपुत्रको॥ सहेतिपप्रच्छपिताउभौतौनागदार सहेतिपृच्छन्वई
कौ॥ दृष्टयोरत्रपातालेबहूनिदिवसानिमे॥ दिवारजन्यामेवमोपश्यामिप्रियदर्शनौ॥१४॥ जरउवाच॥ इतिपित्रास्वयंपृष्टौ
प्रणिपत्यकृतांजलौ॥ प्रत्यूचतुर्महाभागावुरगाधिपतेःसुतौ॥ पुत्रावूचतुः॥ पुत्रःशत्रुजितस्तातनाम्नाख्यातऋतुध्वजः
रूपवानार्जवोपेतःशूरोमानीप्रियंवदः॥ अनाहृतकथोवाग्मीविद्वान्मैत्रोगुणाकरः॥ मान्यमानयिताधीमान्ह्रीमान्विनय
भूषणः॥ तस्योपचारसंप्रीतिसंभोगापहृतंमनः॥ नागलोकेन्यलोकेवानरतिंविंदतेपितः॥ तद्वियोगेननौतातनिशापा
तालशीतला॥ परितापायतत्संगादाह्लादयरविर्दिवा॥ पित्रोवाच॥ पुत्रःपुण्यवतोधन्यःसयस्यैवंभवद्विधैः॥ परोक्षस्या
पिगुणिभिःक्रियतेगुणकीर्त्तनं॥ संतिशास्त्रविदोशीलाःसंतिमूर्खाःसुशीलिनः॥ शास्त्रशीलेसमेमन्येयस्मिन्धन्यतरंतुतं॥
यस्यमित्रगुणान्मित्राण्यमित्राश्चपराक्रमं॥ कथयंतिसदासत्सुपुत्रवांस्तेनवैपिता॥ तस्योपकारिणःकच्चिद्भवद्भ्यामभिवां
छितं॥ किंचिन्निष्पादितंवत्सौपरितोषायचेतसः॥ सधन्योजीवितंतस्यजन्मसुजन्मनः॥ यस्यार्थिनोनविमुखामित्रार्थेनच तस्य
दुर्बलः॥ मद्गृहेयस्सुवर्णादिरत्नंवाहनमासनं॥ यच्चान्यत्प्रीतयेतस्यतद्देयमशंकया॥ धिक्तस्यजीवितंपुंसोमित्राणा
मुपकारिणां॥ प्रतिरूपमकुर्वन्योजीवामीत्यवगच्छति॥ उपकारंसुहृद्वर्गेयपकारंचशत्रुषु॥ नृमेघोवर्षतिप्राज्ञस्तस्येच्छं
तिसदोन्नतिं॥ पुत्रावूचतुः॥ किंतस्यकृतकृत्यस्यकर्तुंशक्यंचकेनचित्॥ यस्यसर्वार्थिनोगेहेसर्वकामैःसदार्चिताः॥१४॥
यानिरत्नानितद्गेहेपातालेतानिनःकुतः॥ वाहनासनयानानिभूषणान्यंबराणिच॥ विज्ञानंयच्चतत्रास्तितदन्यत्रनविद्य
ते॥ प्राज्ञानामप्यसौतातसर्वसंदेहहृत्तमः॥ एकंतस्यास्तिकर्त्तव्यमसाध्यंतच्चनोमतं॥ हिरण्यगर्भगोविंदशर्वादीनांवराद्दते

प्रा

।।मा० पु०।। ३४ पितोवाच ।। तथापि श्रोतुमिच्छामि तस्य यत्कार्यमुत्तमं ।। असाध्यमथवा साध्यं किं वा साध्यं विपश्चितां ।। देवत्वममरेशत्वं तत्त्वस
त्वं च मानवाः ।। प्रयाति वांछितं चान्यद्दृढं येव्यवसायिनः ।। नाविज्ञातं न चागम्यं प्राप्यं दिवि चेह वा ।। उद्यतानां मनुष्याणां यतचित्तें रामं
।।३४।। द्रियात्मनां ।। योजनानां सहस्राणि गच्छन् याति पिपीलिकः ।। अगच्छन्वैनतेयोपि पदमेकं न गच्छति ।। उद्युक्तानां मनुष्याणां
गम्यागम्यं न विद्यते ।। क्व भूतलं क्व च ध्रौवं स्थानं यत्प्राप्तवान्ध्रुवः ।। उत्तानपादनृपतेः पुत्रः सन्भूमिगोचरः ।। तत्कथ्यतां महाभा
34 गे कार्यं वा नृपेण पुत्रकौ ।। सन्भूपालसुतः साधु येनानृण्यं भजे तवा ।। पुत्रावूचतुः ।। तेनाख्यातमिदं तात पूर्ववृत्तं महात्मना ।।
जि कौमारके यथा तस्य वृत्तं सद्वृत्तशालिनः ।। तस्य शत्रुजितस्तात पूर्वं कश्चिद्द्विजोत्तमः ।। गालवोभ्यागतो धीमान्गृहीत्वातुर
गोत्तमं ।। प्रत्युवाच च राजानं समुपेत्याश्रमे मम ।। कोपि दैत्याधमो राजन्विध्वंसयति पापकृत् ।। तद्रूपं समास्थाय सिंहेभ
वनचारिणां ।। अन्येषां चाल्पकायानामहर्निशमकारणं ।। समाधिध्यानयुक्तस्य मौनव्रतरतस्य च ।। तथा करोति विघ्नांश्च
यथा चलति मे मनः ।। दग्धुं कोपाग्निना सद्यः समर्थोस्तं वयं न तु ।। दुःखार्जितस्य तपसो व्ययमिच्छामि पार्थिव ।। एकदा तु मया
राजन्श्रान्तिनिर्विण्णचेतसा ।। तत्क्लेशितेन निःश्वासो निरीक्ष्यावरमुज्झितः ।। ततो वरतलात्सद्यः पतितोयं तुरंगमः ।। वाक्चाशरी
रिणी प्राह नरनाथ श्रणुष्व तां ।। अश्रांतः सकलं भूमेवलयं तुरगोत्तमः ।। समर्थः क्रांतुमर्केण तवायं प्रतिपादितः ।। पातालांबर
तोयेषु नास्य प्रतिहता गतिः ।। समस्तदिक्षु व्रजतो न संगः पर्वतेषु च ।। यतो भूवलयं सर्वमश्रांतोयं चरिष्यति ।। ५१ ।। अतः कुवल
योनाम्नाख्यातिं लोके प्रयास्यति ।। क्लिश्नात्यहर्निशं पापो यस्त्वां दानवाधमः ।। तमप्येनं समारुह्य द्विजश्रेष्ठ हनिष्यति ।। ।।राम।।
शत्रुजिन्नाम भूपालस्तस्य पुत्रेण तु ध्वजः ।। प्राप्येतदश्वरत्नं च ख्यातिमेतेन यास्यति ।। सोहं त्वामनुसंप्राप्तस्तपसो विघ्नका ।।३४।।
रिणं ।। तं निवारय भूपाल भागमाकंन्नृपतियेतः ।। तदेतदश्वरत्नं ते मया भूप निवेदितं ।। पुत्रमाज्ञापय तथा यथा धर्मो नुलिप्य

34A

ते सतस्य वचनाद्राजा शुभं पुत्रमृतध्वजं ॥ तदश्वरत्नमारोप्य कृतकौतुकमंगलं ॥ अग्रेषयत धर्मात्मा गालवेन समंत
दा स्वमाश्रमपदं सोपि तमादाय ययौ मुनिः ॥ ३१ ॥ ॥ इति श्रीमार्कंडेयपुराणे पितापुत्रसंवादे कुवलयाश्वीये अ
ष्टादशोध्यायः ॥ १५ ॥ ॥ पितोवाच ॥ गालवेन समं गत्वा नृपपुत्रेण तेन यत् ॥ कृतं तत्कथ्यतां पुत्रौ विचि
त्रा युवयोः कथा ॥ पुत्रा ऊचतुः ॥ स गालवाश्रमे रम्ये तिष्ठन्भूपालनंदनः ॥ सर्वविघ्नोपशमनं चकार ब्रह्मवादिनां ॥
वसंतं वीरं कुवलयाश्वं तं गालवाश्रमे ॥ मदावलेपोपहतो नाज्ञान दानवाधमः ॥ ततस्तं गालवं विप्रं संध्योपासनतत्परं ॥ शौक
रं रूपमास्थाय प्रधर्षयितुमागतः ॥ मुनिशिष्यैरथोत्कुष्टं शीघ्रमारुह्य तं हयं ॥ अन्वधावद्वराहं तं नृपपुत्रः शरासनी ॥ आ
जघान च बाणेन चंद्रार्द्धाकारवर्चसा ॥ आकृष्य बलवच्चापं चारुचित्रोपशोभितं ॥ नाराचाभिहतः शीघ्रमासत्राणप
रो मृगः ॥ गिरिपादपसंबाधां सोभ्यक्रामन्महाटवीं ॥ तमन्वधावद्वेगेन तुरंगोसौ मनोजवः ॥ चोदितो राजपुत्रेण पितु
रादेशकारिणा ॥ अतिक्रम्याथ वेगेन योजनानि सहस्रशः ॥ धरिण्यां विवृते गर्त्ते निपपात लघुक्रमः ॥ तस्यानंतरमेवा
श्वः सोप्यश्वी नृपतेः सुतः ॥ निपपात महागर्त्ते तिमिरौघसमावृते ॥ ततो नादृश्यत मृगः स तस्मिन्राजसूनुना ॥ प्रकाशं च
स पातालमथ पश्यत्तत्र चार्चिषां ॥ ततो पश्यत्स सौवर्णप्रासादशतसंकुलं ॥ पुरंदरपुरप्रख्यं पुरं प्राकारशोभितं ॥ तत्प्रविश्य स ना
पश्यत्तत्र कंचिन्नरं पुरे ॥ भ्रमता च ततो दृष्टा तत्र योषित्त्वरान्विता ॥ १४ ॥ सा पृष्टा तेन तन्वंगी प्रस्थिता केतिकस्य वा ॥ नोवाच
किंचित्प्रासादमारुरोह च भामिनी ॥ सोप्यश्वमेकतो बध्वा तामेवानुससार वै ॥ विस्मयोत्फुल्लनयनो निःशंको नृपतेः ॥
सुतः ॥ ततो पश्यत्सुविस्तीर्णे पर्यंके सर्वकांचने ॥ निषण्णां कन्यकामेकां काममुक्तां रतीमिव ॥ विस्पष्टेंदुमुखीं सुभ्रं
पीनश्रोणिपयोधरां ॥ बिंबाफलोष्ठीं तन्वंगीं नीलोत्पलविलोचनां ॥ रक्ततुंगनखां श्यामां मृदुताम्रकरांघ्रिकां ॥ कर

॥मा०पु०॥ भोरुं सुदशनां नीलसूक्ष्मस्थिरालकां॥ तां दृष्ट्वा चारुसर्वांगीमनंगांगलतामिव॥ सोमन्युस्पार्थिवसुतस्तां रसातलदेवतां॥ सा
दृष्ट्वैव च तं बाला नीलकुंचितमूर्द्धजं॥ पीनोरुस्कंधबाहुं सं केंदर्पसदृशं सुभं॥ उत्तस्थौ च महाभागा चित्तक्षोभमवाप्य सा॥
॥३५॥ लज्जाविस्मयदैन्यानां सद्यस्तन्वीवशंगता॥ कोयं देवोनुयक्षोनुगंधर्वोवोरगोपि वा॥ विद्याधरो वा संप्राप्तः कृतपुण्याय
॥३६॥ तिर्नरः॥ एवं विचिंत्य बहुधा निःश्वस्य च महीतले॥ उपविश्य ततो भेजे सा मूर्छां मदिरेक्षणा॥ सोपि कामशराघातमवाप्य
नृपतेः सुतः॥ तां समाश्वासयामास न भेतव्यमिति ब्रुवन्॥ सा च स्त्री या तदा दृष्टा पूर्वं तेन महात्मना॥ तालवृंतं समुपादाय प
35 र्यवीजयदाकुला॥ समाश्वस्ता तदा पृष्टा तेन सा मोहकारणं॥ किंचिल्लज्जान्विता बाला तस्यै सख्यै न्यवेदयत्॥ सा
चास्मै कथयामास नृपपुत्राय विस्तरात्॥ मोहस्य कारणं सर्वं त्वद्दर्शनसमुद्भवं॥ यथा तया समाख्यातं तद्वृत्तांतं च भामिनी॥ स
ख्युवाच॥ विश्वावसुरिति ख्यातो दिवि गंधर्वराट् प्रभो॥ तस्येयमात्मजा सुभ्रूर्नाम्ना ख्याता मदालसा॥ वज्रकेतोः सुतश्चो
ग्रो दानवो रिपुविदारणः॥ पातालकेतुर्विख्यातः पातालांतलसंश्रयः॥ तेनेयमुद्यानगता कृत्वा मायां तमोमयीं॥ अपहृत्य स
मानीता बालेयं दुष्टबुद्धिना॥ आगामिन्यां त्रयोदश्यामुद्वक्ष्यति किलासुरः॥ स तु नार्हति चार्वंगीमस्त्रं वेदश्रुतीमिव॥ अती
ते च दिने बाला मासत्यापादनोद्यता॥ सुरभी प्राह नायं त्वां प्राप्स्यते दानवाधमः॥ मर्त्यलोकमनुप्राप्तं य एनं भेत्स्यते शरैः॥
स ते भर्ता महाभागे नचिरेण भविष्यति॥ अहं चास्याः सखी नाम्ना कुंडलेति मनस्विनी॥३५॥ सुता विंध्यवतः पत्नी वीरपुष्क
रमालिनः॥ हते भर्त्तरि शुंभेन तीर्थातीर्थमनुव्रता॥ चरामि दिव्यया गत्या परलोकार्यमुद्यता॥ पातालकेतुर्दुष्टात्मा वाराहं व ॥राम॥
पुराश्रितः॥ केनापि विद्धो बाणेन मुनीनां त्राणकारणात्॥ तं चाहं त्वरितान्विष्य त्वरिता पुनरागता॥ सत्यमेव स केनापि ताडि ॥३५॥
तो दुष्टमाचरन्॥ इयं च मूर्छामगमद्येन तत्कारणं शृणु॥ त्वयि प्रीतिं बाला दर्शनाद्देवमानद॥ देवपुत्रोमये चारुवाक्या ॥३६॥

मती

36A

दिगुणशालिनी॥भार्याचान्यस्यविहितायेनविद्धःसदानवः॥एतस्मात्कारणान्मोहंमहान्तमियमागता॥यावज्जीवंचतन्व्यंगीदुःखंमे
वोपभोक्ष्यते॥त्वय्यस्याहृदयंरागिमत्तोचान्योभविष्यति॥यावज्जीवमतोदुःखंसुरम्यानान्ययावचः॥अहंत्वस्याःप्रभोप्रीत्यादुःखि
ताऽत्रसमागता॥यतोविशेषोनैवास्तिस्वसखीनिजदेहयोः॥यद्येषामिमतंवीरपतिमाप्नोतिशोभना॥ततस्त्वहंतपःकुर्यांनिर्मैत्रीके
नचेतसा॥त्वंतुकोवाकिमर्थंवासंप्राप्तोत्रमहामते॥देवोदैत्योऽनुगंधर्वःपन्नगःकिंनरोपिवा॥नह्यत्रमानुषगतिर्नैवेदृङ्मानुषंवपुः॥
तत्त्वमाख्याहिकथितंयथैवावितथंमया॥कुवलयाश्वउवाच॥यन्मांपृच्छसिधर्मज्ञेकस्त्वंकिंवासमागतः॥तच्छृणुष्वामलप्रज्ञेक
यथामयादितस्तव॥राज्ञःशत्रुजितःपुत्रःपित्रासंप्रेषितःशुभे॥मुनिरक्षणमुद्दिश्यगालवाश्रममागतः॥कुर्वतोममरक्षांचमुनी
नांधर्मचारिणां॥विघ्नार्थमागतःकोपिशूकरंवपुरास्थितः॥मयासविद्धोबाणेनचंद्रार्द्धाकारवर्चसा॥अपक्रांतोतिवेगेनतम
स्यनुगतोहयी॥सपातस्समहागर्त्तेक्रोडोश्वश्चमामकः॥सोहमश्वसमारूढस्तमस्येकःपरिभ्रमन्॥प्रकाशमासादितवान्दृ
ष्टाचभवतीमया॥पृष्टयानचमेकिंचिद्दत्वस्याद्दत्तमुत्तरं॥त्वांचैवानुप्रविष्टोहमिमंप्रासादमुत्तमं॥इत्येतत्कथितंसत्यं
नदेवोहंनदानवः॥पन्नगोनचगंधर्वःकिंनरोवाशुचिस्मिते॥समस्ताःपूज्यपक्षेवैदेवाद्याममकुंडले॥मानुषोस्मिविशंकाते
नकर्तव्यात्रकर्हिचित्॥पुत्रावूचतुः॥ततःप्रहृष्टासाकन्यासखीवदनमुत्तमं॥लज्जाजडंवीक्ष्यमाणाकिंचिन्नोवाचभामिनी॥
तत्सखीपुनरप्येनंप्रहृष्टाप्रत्युवाचह॥यथावत्कथितेतेनसुरम्यावचनानुगे॥कुंडलोवाच॥वीरसत्यमसंदिग्धंभवताभि
हितंवचः॥नान्यत्रहृदयंह्यस्याहृष्टेस्थैर्यंप्रयास्यति॥यचा॥चंद्रंप्राप्याधिकांकांतिंसमुपैतिरवेःप्रभा॥रतिर्धन्यद्युतीर्वी
र्यैःक्षांतिरस्यतिचोत्तमं॥त्वयैवविद्धोसंदिग्धंसपापोदानवाधमः॥सुरभिःसागवांमाताकथंमिथ्यावदिष्यति॥तत्कन्येयंस
भाग्याचतत्संबंधंसमेत्यवै॥कुरुष्ववीरयत्कार्यंविधिनैवसमाहितः॥पुत्रावूचतुः॥परवानहमित्याहराजपुत्रःसदापितुः॥

॥मा॰पु॰॥
॥३७॥
37

तामुद्वहेकथंबालांतन्नियोगादृतेस्विमां॥ मामावरेदकस्रोसोहदेवकन्येयमुद्वह॥ तथेत्युक्तेनतेनैवसंगम्यद्वाहिकंतदा॥ सा
चतंचिंतयामासतुंबरुंतत्कुलेगुरुं॥ सचापितत्क्षणात्प्राप्तःप्रगृहीतसमित्कुशः॥ मदालसायाःसंप्रीत्याकुंडलागौरवेणच॥ प्र
ज्वाल्यपावकंहुत्वामंत्रवत्कृतमंगलं॥ वैवाहिकेविधौकन्यांप्रतिपाद्ययथागतं॥ जगामतपसेधीमान्स्वमाश्रमपदंततः॥
साचाहतांसखींबालांकृतार्थास्मिवरानने॥ संयुक्तामनुनादृष्ट्वात्वामहंरूपशालिना॥ तपस्तप्स्येहमतुलंनिर्व्यली
केनचेतसा॥ तीर्थांबुधौतपापाचनभविश्रीनेदृशीयथा॥ ईप्वातंचाहराजपुत्रंसाप्रश्रयावनतातदा॥ गंतुकामानिजंसखी
स्नेहविक्लवभाषिणी॥ सुभिरप्यमितप्रज्ञैर्नोपदेशोभवद्विधे॥ दातव्यःकिमुतस्त्रीभिरतोनोपदिशामिते॥ किंत्वस्याःस्त
नुमध्यायाःस्नेहाकृष्टेनचेतसा॥ त्वयाविश्रंभितान्चास्मिस्मारयाम्यरिसूदन॥ भर्त्तव्यारक्षितव्याचभार्याहिपतिना
सदा॥ धर्मार्थकामसंसिद्धौभार्याभर्त्तुःसहायिनी॥ यदाभर्त्ताचभार्याचपरस्परवशानुगौ॥ तदाधर्मार्थकामानांत्रयाणामपिसं
गमः॥ कथंभार्यामृतेधर्ममर्थंवापुरुषःप्रभो॥ प्राप्नोतिकाममथवातस्यांत्रितयमाहितं॥ तथैवभर्त्तारमृतेभार्याधर्मादिसाधने॥
नसमर्थात्रिवर्गोयंदंपत्योःसमुपाश्रितः॥ देवतापितृभृत्यानामतिथीनांचपूजनं॥ नपुंभिःशक्यतेकर्त्तुमृतेभार्यांनृपात्मज॥ प्रा
प्तोपिचार्थोमनुजैरानीतोपिनिजंगृहं॥ क्षयमेतिविनाभार्यांकुभार्याश्रयेणच॥ ॥ कामस्तुनैवःकस्यास्तिप्रत्यक्षेणोपलभ्यते॥
दंपत्योःसहपुत्रेणत्रयीधर्ममवाप्नुयात्॥ पुत्राणांयोनिरन्यावैनान्यतोभार्यांविना॥ पितृन्पुत्रैस्तथैवान्नसाधनैरतिथीनपि॥ प
पूजाभिरमरांस्तद्वत्साध्वीभार्यानिरोधयेति॥ स्त्रियश्चापिविनाभर्त्राधर्मकामार्थसंततिः॥ नैवतस्मात्समंलोकान्नदंपतीत्रयंधि
मो गच्छतः॥ एतन्मयोक्तंयुवयोर्गमिष्यामियथेप्सितं॥ त्वंवर्धस्वानयासार्धंधनपुत्रसुखायुषा॥ इत्युक्त्वासंपरिष्वज्यस्वसखींतं ॥राम॥
नमस्यच॥ जगामदिव्यायागत्याययाभिप्रेतमासनं॥ सोपिशत्रुजितःपुत्रस्तामारोप्यतुरंगमं॥ निर्गंतुकामःपातालाद्विज्ञातोद ॥३७॥

37A

नुसंभवैः॥ ततस्तैः सह सोत्कृष्टं ह्रियते ह्रीयते त्विति॥ कन्यारत्नं यदानीतं दिवः पातालकेतुना॥ तिष्ठति स्वेतिजस्यं ततस्तेतदा दानवो
त्तमाः॥ शरवर्षैर्गदाशस्त्रैर्वर्द्धयुर्न्नयनंदन॥ सतु शत्रुजितः पुत्रस्ततस्तान्यतिवीर्यवान्॥ चिच्छेद शस्त्रजालानि प्रहसन्निव लील
या॥ ह्लेलेन पातालतलं मसिशत्ररुष्टि सायकैः॥ छिन्नैः संछन्नमस्य येमत्तु ध्वजशरोत्करैः॥ ततोस्त्रं त्वाष्ट्रमादाय चिक्षेप प्र
तिदानवान्॥ तेन ते दानवाः सर्वे सह पातालकेतुना॥ ज्वालामालातितीव्रेण संपुटस्थिन्नयास्तदा॥ ॥ निर्दग्धाः कापिलं ते
जः समासाद्येन सागराः॥ ततः स राजपुत्रोऽश्वी निहत्यासुरसत्तमान्॥ स्त्रीरत्नेन समं तेन समागच्छत्पितुः पुरं॥ प्रणिपत्य च तत्
सर्वं स तु पित्रे न्यवेदयत्॥ पातालगमनं चैव कुंडलायाश्च दर्शनं॥ तद्वन्मदालसाप्राप्तिं दानवैश्चापि संगरं॥ वधं च तेषा
मस्त्रेण पुनरागमनं तथा॥ इति श्रुत्वा पिता तस्य चरितं चारुचेतसः॥ प्रीतिमानभवद्वैदं परिष्वज्याह चात्मजं॥ सत्पुत्रेण त्वया
पुत्र तारितोऽहं सहात्मना॥ भयेभ्यो मुनयस्त्राता येन सद्धर्मचारिणा॥ मत्पूर्वैः ख्यातिमानीतं मया विस्तारितं यशः॥ पराक्रमवता
वीर त्वया तद्बहुलीकृतं॥ यदुपात्तं यशः पित्रा धनं वीर्यमथापि वा॥ तन्न ह्रापयते यस्तु स नरो मध्यमः स्मृतः॥ तद्वीर्यादभ्यधिकं यस्तु
पुरस्त्यस्वशक्तितः॥ निष्पादयति तं प्राज्ञा वदंति नरमुत्तमं॥ यः पित्रा समुपात्तानि धनवीर्ययशांसि वै॥ न्यूनतां नयति प्राज्ञास्त
माहुः पुरुषाधमं॥ तन्मया ब्राह्मणत्राणं कृतमासीद्यथा त्वया॥ ॥ पातालगमनं यच्च यच्चासुरविनाशनं॥ एतदभ्यधिकं
वत्स तेन त्वं पुरुषोत्तम॥ तद्धन्यो स्वयवानत्वमहमेव गुणाधिकः॥ त्वां पुत्रमीदृशं प्राप्य श्लाघ्यः पुत्रवतामपि॥ नेसपुत्र
कृतां प्रीतिं मन्ये प्राप्नोति मानवः॥ पुत्रेणानातिशयितो यः प्रज्ञादानविक्रमैः॥ धिक्तस्य जन्मयः पित्रा लोके विज्ञायते नरः॥
यः पुत्रात्ख्यातिमभ्येति तस्य जन्म सुजन्मनः॥ आत्मना ज्ञायते धन्यो मध्यः पितृपितामहैः॥ मातृपक्षेण मात्रा च ख्यातिं याति
नराधमः॥ तत्पुत्र धनवीर्येस्त्वं विवर्द्धस्व सुखेन च॥ गंधर्वतनयाचेयं माविपुज्येत वै त्वया॥ इति पित्रा बहुविधं प्रियमुक्त

ःपुनःपुनः॥ परिष्वज्य स्वमावासंस भार्यैः स विसर्जितः॥ स तया भार्यया सार्द्धं रेमे तत्र पितुः पुरे॥ अन्येषु च तथोद्यानवनपर्वतसा
नुषु॥ स्वलत्स्व स्नुरयोः पादौ प्रणिपत्य स च सा सुभ्रा॥ प्रातस्ततस्तेन सह रेमे सुमध्यमा॥ ततः काले बहुतिथे गते राजा पुनः सुतं
प्राह गच्छाशु विप्राणां त्राणाय च रमेदिनीं॥ अश्वमेनं समारुह्य प्रातः प्रातर्दिने दिने॥ आबाधा द्विजमुख्यानामन्वेष्टव्या
सदैव हि॥ दुष्टवृत्तः सन्ति शतशो दानवाः पापबुद्धयः॥ तेभ्यो न स्याद्यथा बाधा मुनीनां त्वं तथा कुरु॥ स तथोक्तस्तदा पित्रा तथा
चक्रे नृपात्मजः॥ परिक्रम्य महीं कृत्स्नां ववंदे चरणौ पितुः॥२२॥ अहन्यहन्यनुप्राप्ते पूर्वाह्णे नृपनंदनः॥ ततश्च शेषं दिवसं तया
रेमे सुमध्यया॥ एकदा तु चरन्सोऽथ ददर्श यमुनातटे॥ सातालकेतोरनुजं तालकेतुं कृताश्रमं॥ मायावी दानवः सोऽथ मुनिरू
पसमाश्रितः॥ स प्राह राजपुत्रं तं पूर्ववैरमनुस्मरन्॥ राजपुत्र ब्रवीमि त्वां तत्कुरुष्व यदीच्छसि॥ न च ते प्रार्थनाभंगः कार्यः सत्य
प्रतिश्रवः॥ यक्ष्ये यज्ञेन धर्माय कर्त्तव्याश्चमयेष्टयः॥ चितयस्तच्च कर्त्तव्या नास्ति मे दक्षिणा यतः॥ ततः प्रयच्छ मे वीर दक्षिणा
र्थे स्वभूषणं॥ यदेतत्कंठलग्नं ते रक्ष चेमं ममाश्रमं॥ यावदंतर्जले देवं वरुणं यादसां पतिं॥ वैदिकैर्वारुणैर्मंत्रैः प्रजानां पु
ष्टिहेतुकैः॥ अभिष्टूय त्वरायुक्तः समभ्येमीति वादिनं॥ तं प्रणम्य ततः प्रादात्तस्मै कंठभूषणं॥ प्राह चैनं भवान्यातु निर्व्यली
केन चेतसा॥ स्थास्यामि तावदत्रैव तवाश्रमसमीपतः॥ तावदेशान्महाभाग यावदागमनं तव॥ नैतेत्र कश्चिदाबाधां करि
ष्यति मयि स्थिते॥ विस्रब्धश्चात्वरन्ब्रह्मन्कुरुष्व त्वं मनोगतं॥ एवमुक्तस्ततस्तेन सममज्जन्नदीजले॥ ररक्षसोपि तस्यैव मा
याविहितमाश्रमं॥ गत्वाजगाम याता तस्मात्तालकेतुः पुनः पुरं॥ मदालसायाः प्रत्यक्षमन्येषां चैतदुक्तवान्॥ वीरः कुवलया
श्वोसौ मम आश्रमसमीपतः॥ केनापि दुष्टदैत्येन कुर्वन्रक्षां तपस्विनां॥ युध्यमानो यथाशक्ति निघ्नन्ब्रह्मद्विषो युधि॥ मायामाश्रि
त्य पापेन भिन्नः शूलेन वक्षसि॥ म्रियमाणेन तेनेदं दत्तं मे कंठभूषणं॥ प्रापितश्चाग्निसंयोगं स च तैः शूद्रतापसैः॥ कृतार्त्तहेषा

38A

गाढं वै त्रस्तः साश्रुविलोचनः ॥ नीतः सोश्वश्च तेनैव दानवेन दुरात्मना ॥ एतन्मायान्नृशंसेन दृष्टं दुःकृतकारिणा ॥ १२० ॥ यदत्रानंतरं कृ
त्यं कुरुष्वोत्तरकालिकं ॥ हृदयाश्वासनं चैतत्तद्गृहीताकंठभूषणं ॥ नास्माकं हि सुवर्णेन कृत्यमस्ति तपस्विनां ॥ इत्युक्तो सृज्यत भूमौ
स जगाम यथागतं ॥ निपपात जनः सोथ शोकार्त्तो मूर्छयातुरः ॥ स्वस्थेन चेतनां प्राप्य सर्वास्तान्नृपयोषितः ॥ राजपत्न्यश्च राजा च
विलेपुरतिदुःखिताः ॥ मदालसा तु तद्दृष्ट्वा तदीयं कंठभूषणं ॥ तत्याज सुप्रियान्प्राणान्श्रुत्वा च निहतं पतिं ॥ ततः पुरे महाक्रंदः
पौराणां भवने चभूत ॥ यथैव तस्य नृपतेः स्वगृहे समवर्त्तत ॥ राजा च तां मृतां दृष्ट्वा विना भर्त्रा मदालसां ॥ प्रत्युवाच जनं सर्वं वि
मृश्य स्वस्थमानसः ॥ न रोदितव्यं पश्यामि भवतामात्मनस्तथा ॥ सर्वेषामेव संचिंत्य संबंधानामनित्यतां ॥ किं नु शोचामि तनयं किं नु
मा शोचाहं स्नुषां ॥ विमृश्य कृतकृत्यत्वान्मन्ये शोच्यावुभावपि ॥ मच्छुश्रूषुर्मद्वचनात्द्विजरक्षणतत्परः ॥ प्राप्तो मे यः सुतो मृत्युं क
थं शोच्यः स धीमतां ॥ अवश्यं याति यद्देहस्तत् द्विजानां कृते यदि ॥ मम पुत्रेण संत्यक्तो नन्वभ्युदयकारितत् ॥ इयं च सत्कुलोत्पन्ना
भर्त्तर्येवमनुव्रता ॥ कथं नु शोच्या नारीणां भर्त्तुरन्यन्न दैवतं ॥ अस्माकं बांधवानां च तथान्येषां दयावतां ॥ ४४ ॥ शोच्या ह्येषा भवेदे
वं यदि भर्त्रा वियोगिनी ॥ या तु भर्त्तुर्वधं श्रुत्वा तत्क्षणादेव भामिनी ॥ भर्त्तारमनुयातेयं न शोच्यातो विपश्चितां ॥ ताः शोच्याः या वि
योगिन्यः स्वहभर्त्रा कुलांगनाः ॥ कष्टं तास्ता न गच्छंति कष्टदास्युः कुलात्मनो ॥ भर्त्तावियोगस्तन्वयानानुभूतः कृतज्ञया ॥ दातारं स
र्वसौख्यानामिह चामुत्र चोभयोः ॥ लोकयोः काहि भर्त्तारं नारी मन्येत मानुषं ॥ न स शोच्यो न चैवेयं नाहं तज्जननी न च ॥ त्यजता
ब्राह्मणार्थाय प्राणान्सर्वे स्म तारिताः ॥ विप्राणां मम धर्मस्य गतः स सुमहामतिः ॥ आनृण्यमर्द्धभुक्तस्य त्यागाद्देहस्य मे सुतः ॥ मा
तुः सतीत्वं महद्वंशे वैमल्यं शौर्यमात्मनः ॥ संग्रामे संत्यजन्प्राणान्सो विंदत द्विजरक्षणे ॥ ततः कुवलयाश्वस्य माता भर्तुरनंतरं ॥
श्रुत्वा पुत्रवधं तादृक् प्राह दृष्ट्वा तु तं पतिं ॥ न मे माता न मे स्वसा प्राप्ता प्रीतिर्नृपेदृशी ॥ श्रुत्वा मुनिपरित्राणाद्धतं पुत्रं यथा मया ॥

॥मा॰पु॰॥ ॥३९॥ 39

शोचतां बांधवानां मेनिश्चनं तोऽतिदुःखितोऽसि दुःखिताः॥ म्रियंते व्याधिनाक्लिष्टास्तेषां माता तथा प्रजा॥ संग्रामे युद्ध्यमानाये भीता गोद्वि
जरक्षणात॥ सुम्यक्शस्त्रैर्विपद्यंते त एव भुवि मानवाः॥ अर्थिनामित्रवर्गस्य विद्विषां च पराङ्मुखः॥ योन याति पिता तेन पुत्री माता च वी
रसूः॥ गर्भक्लेशः स्त्रियो मन्ये सा फलं यं भजते तदा॥ यदारि विजयी वास्या संग्रामे वा हतः सुतः॥ पुत्रावूचतुः॥ ततः स राजा संस्कारं सुत्रप
त्नीमलंभयत॥ निर्गम्य च बहिः स्नातो ददौ पुत्राय चोदकं॥ तालकेतुश्च निर्गम्य तथैव यमुनाजलात॥ राजपुत्रमुवाचेदं प्रणयान्मधुरं
वचः॥ गच्छ भूपालपुत्र त्वं कृतार्थोऽहं कृतस्त्वया॥ कार्यं यथाभिलषितं त्वय्यत्राविचलेस्थिते॥ वारुणं यज्ञकार्यं च जले शस्य महात्म
नः तन्मयासाधितं सर्वं यन्ममासीदभीप्सितं॥ प्रणिपत्य स तं प्रायाद्राजपुत्रः पुरं पितुः॥ समारुह्य तमेवाश्वं सुपर्णानिलविक्रमं॥
१५४॥ ४॥ ॥ इति श्रीमार्कंडेयपुराणे कुवलयाश्वीये ॥२१॥ पुत्रावूचतुः॥ ४॥ ॥ स राजपुत्रः संप्राप्य वे
गाद्दात्मपुरं ततः॥ पित्रोर्ववंदिषुः पादौ दिदृक्षुश्च मदालसां॥ सोऽपश्यत्तदुद्विग्नमप्रहृष्टमुखं पुरं॥ पुनश्च विस्मिताश्च प्रहृष्टवद
नं पुनः॥ अन्यमुत्फुल्लनयनं दिष्ट्यादिष्ट्येति वादिनं॥ परिष्वजंतमन्योन्यमतिकौतूहलान्वितं॥ चिरंजीवोरु कल्याणहतास्ते परिपं
थिनः॥ पित्रोः प्रह्लादयमनैया स्माकमकंटकः॥ इत्येवं वादिभिः पौरैः पुरः पृष्ठे च संवृतः॥ तत्क्षणं प्रभवानंदं प्रविवेश पितुर्गृहं॥
पिता च तं परिष्वज्य माता चान्ये च बांधवाः॥ चिरंजीवेति कल्याणीर्ददुस्तस्मै तदाशिषं॥ प्रणिपत्य ततः सोऽथ किमेतदिति विस्मितः॥
पप्रच्छ पितरं चाय सोऽस्मै सर्वं तदुक्तवान॥ स भार्यां तां मृतां श्रुत्वा हृदये ष्टां मदालसां॥ पितरौ च पुरो दृष्ट्वा लज्जाशोकाग्निमध्यगः॥
चिंतयामास सा बाला मां श्रुत्वा निधनं गतं॥ तत्याज जीवितं साध्वी धिग्मां निष्ठुरमानसं॥ नृशंसोऽहमनार्योऽहं विना तां मृगलोचनां॥ म ॥रामः॥
त्कृते निधनं प्राप्तां यज्जीवाम्यतिनिर्घृणः॥ पुनः स चिंतयामास परिसंस्तभ्य मानसं॥ मोहाद्भ्रमम पास्यैवं निःश्वस्योच्छ्वस्य चातुरः॥ ॥३९॥
मृतेति सा मन्निमित्तं त्यजामि यदि जीवितं॥ किं मयोपहृतं तस्याः श्लाघ्यमेतत्तु योषितां॥ यदि रोदिमि वाहीनं हाप्रियेति वदन्मुहुः॥

39A

तयाप्यस्मत्क्षममेतन्नो वयं हि पुरुषाः किमु ॥ अयशोकजुशेदीनो मज्जाहीनो मलाञ्चितः ॥ विपक्षस्य भविष्यामी ततः परिभवा
स्पदं ॥ मयारिशातनात्कार्यं राज्ञः २५ अशेषणां पितुः ॥ जिवीतं तस्य चायत्तं संस्थाप्यं तत्कथं मया ॥ किं त्वत्र मन्ये कर्त्तव्यं त्यागो भो
गस्य योषितः ॥ सचापि नोपकाराय तन्वंग्याः किंनु सर्वथा ॥ मयान्कृशं संकर्त्तव्यं नापकार्युपकारि वा ॥ यामदर्थे स्वजत्प्रा ।
णांस्तदर्थे त्यामि दं मम ॥ इति कृत्वा मतिं सोपनिष्पाद्योदकदानकं ॥ क्रियाव्यानंतरं कृत्वा प्रत्युवाच ऋतुध्वजः ॥ यदि साम न
मतन्वंगी नस्यात्मायामदालसा ॥ अस्मिन् जन्मनि नान्या मे भवित्री सहचारिणी ॥ तामृते मृगशावाक्षीं गंधर्वेतनयां
महं ॥ नभोक्ष्ये योषितं कांचिदिति सत्यं मयोदितं ॥ स धर्मचारिणी पत्नी तां मुक्त्वा गजगामिनीं ॥ कांचिन्नान्यां करिष्यामि
तेनेसत्यंमयोदितं ॥ एवं स वीनृपरित्यज्य स्त्रीभोगांस्तातसर्वदा ॥ क्रीडन्नास्ते समं तुल्यैर्वयस्यैः शीलसंपदा ॥ एतत्तस्य परं कार्यं तात
च लोके न शक्यते ॥ कर्तुं ममत्यंतदुःप्रापमीश्वरैः किमुतेतरैः ॥ २६ ॥ इति वाक्यं तयोः श्रुत्वा विमर्शमगमत्पिता ॥ विमृश्य चाह तौ पुत्रौ नागरा
ट् प्रहसन्निव ॥ अशक्यमिति ज्ञात्वा तत करिष्यंति मानवाः ॥ कर्मण्युद्यममुद्योगहान्या हानिस्ततः परा ॥ आरभेत नरः कर्म स्व
पौरुषमहापयन् ॥ निष्पत्तिः कर्मणो दैवे पौरुषे च व्यवस्थिता ॥ तस्मादहं तथा यत्नं करिष्ये पुत्रकावितः ॥ तपश्चर्यां समास्था
य यथैतत्सेत्स्यते चिरात् ॥ पुत्र उवाच ॥ एवमुक्त्वा स नागेंद्रः प्लक्षावतरणं गिरेः ॥ तीर्थं हिमवतो गत्वात्यस्ते पे सुदुस्तरं ॥ तुष्टाव ।
गीर्भिश्च ततस्तत्र देवीं सरस्वतीं ॥ तन्मयानानियताहारो भूत्वा त्रिषवणाप्लुतः ॥ अश्वतर उवाच ॥ जगद्धात्रीमहं देवीमारिराध
यिषुः शुभां ॥ स्तोष्ये प्रणम्य शिरसा ब्रह्मयोनिं सरस्वतीं ॥ सदसद्देवि यत्किंचिन्मोक्षवं धार्थवत्पदं ॥ तत्सर्वं त्वय्यसंयोगं योग वेदमातरं ३
वद्देवि संस्थितं ॥ त्वमक्षरं परं देवि यत्र सर्वं प्रतिष्ठितं ॥ अक्षरं परमं ब्रह्म जगच्चैतत्क्षरात्मकं ॥ दारुण्यवस्थितो वह्निः भौमाश्च परमा
णवः ॥ तथा त्वयि स्थितं ब्रह्म जगच्चेदमशेषतः ॥ ॐकाराक्षरसंस्थानं यत्ते देवि स्थिरास्थिरं ॥ तत्र मात्रात्रयं सर्वमस्ति यद्देवि नास्ति च

३ सत्ब्रह्मप्रतिपादकं ॥ असत्पकर्मप्रतिपादकं ॥ असंयोगं रूपयोगिकं च ३

अग्निष्टोमात्यग्निष्टोमोक्थ्यषोडशीवाजपेयातिरात्रोप्तोर्यामाः सोमसंस्थाः २ । १ अगस्त्यो बाल्यादयश्च आगमादयो वा । १ कालाशीतोसर्वे ... त्रयः कालास्तथा १ । १ शक्लाश्रणिकगोणाः उदात्तादयो वा । दोषजातपित्तस्वफा: ३

॥ मा० पु० ॥ त्रयो लोकास्त्रयो देवास्त्रैविद्यं पावकत्रयं ॥ त्रीणि ज्योतींषि वर्गाश्च त्रयो धर्मादयस्तथा ॥ त्रयो गुणास्त्रयः शब्दास्त्रयो दोषास्तथावस्थाः ॥ पि
तरो हि निशादयः ॥ एतन्मात्रात्रयं देवि तव रूपं सरस्वती ॥ विभिन्नदर्शिनामाद्या ब्रह्मणो हि सनातना ॥ सोमसंस्था हविःसंस्थाश्च सप्त पाकसंस्था २
॥ ४० ॥ याः ॥ तास्त्वदुच्चारणाद्देवि क्रियंते ब्रह्मवादिभिः ॥ अनिर्देश्यं तथा चान्यादर्द्धमात्राश्रितं परं ॥ अविकार्यक्षयं दिव्यं परिणामविवर्जि
तं ॥ तवैव च परं रूपं यन्न शक्यं मयेरितुं ॥ न चास्येन न वा जिह्वाताल्वोष्ठादिभिरुच्यते ॥ इंद्रोपि वसवो ब्रह्मा चंद्रार्कौ ज्योतिरेव च
40 विश्वावासं विश्वरूपं विश्वेशं परमेश्वरं ॥ सांख्यवेदांतवेदोक्तं बहुशाखास्थिरीकृतं ॥ अनादिमध्यनिधनं सदसन्न सदेव तु ॥ सर्वस्मात् ... स्वतंत्र ...
एकं त्वनेकं मप्येकं भवभेदसमाश्रितं ॥ अनाख्यं षड्गुणाख्यं च बह्वाख्यं त्रिगुणाश्रयं ॥ नानाशक्तिमतामेकं शक्तिवैभाविकं परं ॥
अस्याय [illegible] पर्व च सुखासुखमहासौख्यरूपं त्वद्विभाव्यते ॥ ४७ ॥ एवं देवि त्वया व्याप्तं सकलं निष्कलं च यत् ॥ अद्वैतावस्थितं ब्रह्म यच्च द्वैते व्यव
स्थितं ॥ येर्था नित्या ये विनश्यंति चान्ये येर्थाः स्थूला ये च सूक्ष्मातिसूक्ष्मा ॥ ये वा भूमौ येंतरिक्षेन्यतो वा तेषां सर्वं त्वत्त एवोप ... ४
पञ्चमूर्त्त लब्धिः ॥ यच्चामूर्तं यच्च मूर्तं समस्तं यद्वा भूतेष्वेकमेकं च किंचित् ॥ यद्दिव्यस्ति क्ष्मातले खेन्यतो वा तत्संबद्धं त्वत्स्वरैर्व्यंजनैश्च ॥ एवं
स्तुता तदा देवी विष्णोर्जिह्वा सरस्वती ॥ प्रत्युवाच महात्मानं नागमश्वतरं ततः ॥ ४८ ॥ सरस्वत्युवाच ॥ वरं ते कंबलभ्रातः प्रयच्छाम्युर
गाधिप ॥ तदुच्यतां प्रदास्यामि यत्ते मनसि वर्त्तते ॥ अश्वतर उवाच ॥ सहायं देहि देवि त्वं पूर्वं कंबलमेव मे ॥ समस्तस्वरसंबं
धमुभयोः संप्रयच्छ च ॥ सरस्वत्युवाच ॥ सप्त स्वरा ग्रामरागाः सप्त पन्नगसत्तम ॥ गीतकानि च सप्तैव तावतीश्चापि मूर्छनाः ॥
तानाश्चैकोनपंचाशत्तथा ग्रामत्रयं च यत् ॥ एतत्सर्वं भवान् गाता कंबलश्चैव ते सखा ॥ ज्ञास्यते मत्प्रसादेन भुजंगेंद्र ॥ रामः ॥
परं तथा ॥ चतुर्विधं पदं तालं त्रिःप्रकारं लयत्रयं ॥ यतित्रयं तथातोद्यं मया दत्तं चतुर्विधं ॥ एतद्भवान्मत्प्रसादात्पन्नगेंद्र ॥ ४१ ॥
परं च यत् ॥ अस्यांतर्गतमायत्तं स्वरव्यंजनयोश्च यत् ॥ तदशेषं मया दत्तं भवतः कंबलस्य च ॥ यथा नान्यस्य भूलोके पाता

मंद्र मध्य ताराः। सजीवा निर्जीवा मिश्राः। मुखेन गीयते सजीवः। यंत्रेण निर्जीवः। उभाभ्यां मिश्रः।

२ अग्न्याधानाग्निहोत्रदर्शपूर्णमासचातुर्मास्याग्रयणनिरूढपशुबंधसौत्रामणि हविःसंस्थाः ॥ ३ । प्राहीसंचारी आरोही गति गुंफाद्याः ४
२ हिस्थालीपाकपर्वणश्राद्धश्रवणाश्वयुजीचैत्रीति पाकसंस्थाः ७

40A

लेवापि पन्नग ॥ प्रणेतारौ भवंतौ च सर्वस्यास्य भविष्यतः ॥ पाताले देवलोके च मर्त्यलोके चैव पन्नगौ ॥ इत्युक्त्वा सा तदा देवी सर्वजि
ह्वा सरस्वती ॥ जगामादर्शनं सद्यो नागस्य कमलेक्षणा ॥ तयोश्च तद्यथावृत्तं भ्रात्रोः सर्वमजायत ॥ विज्ञानमुभयो रम्यं पदतालस्
स्वरादिकं ॥ ततः कैलासशैलेंद्रशिखरस्थितमीश्वरं ॥ गीतकैः सप्तभिर्गीतं तंत्रीलयसमन्वितैः ॥ आरिराधयिषुर्देवमनंगांग
हरं हरं ॥ प्रचक्रतुः परं यत्नं उभौ संहतवाक्कलौ ॥ प्रातर्निशायां मध्याह्ने संध्ययोश्चापि तत्परौ ॥ ततः कालेन महता स्तूयमानो वृ
षध्वजः ॥ तुतोष गीतकैस्तौ च प्राह संगृह्यतां वरः ॥ ततः प्रणम्याश्वतरः कंबलेन समं तदा ॥ विज्ञापयन्महादेवं शितिकंठ
मुमापतिं ॥ यदि नो भगवान्प्रीतो देवदेव त्रिलोचन ॥ ततो यथाभिलषितं वरमेनं प्रयच्छ नौ ॥ मृता कुवलयाश्वस्य पत्नी देव मदाल
सा ॥ तेनैव वयसा सद्यो दुहितृत्वं प्रयातु मे ॥ जातिस्मरा यथा पूर्वं तद्वत्कांति समन्विता ॥ योगिनी योगमाता च जायतां वचनात्तव
॥ देव हि स्वरड्ढा च ॥ यथोक्तं पन्नगश्रेष्ठ सर्वमेतद्भविष्यति ॥ मत्प्रसादादसंदिग्धं शृणु देव भुजंगम ॥ श्राद्धावसाने प्राशिष्य
न्मध्यमं पिंडमात्मना ॥ कामं चेममनुध्याय कुरु त्वं पितृपूजनं ॥ तत्क्षणादेव सा सुभ्रूर्भविता मध्यमात्फणात ॥ समुत्प
स्यति कल्याणी न यथा रूपा यथा मृता ॥ एतच्छ्रुत्वा ततस्तौ तु प्रणिपत्य महेश्वरं ॥ रसातलमनुप्राप्तौ परितोषसमन्वितौ ॥ त
था च कृतवान्श्राद्धं स नागः कंबलानुजः ॥ पिंडं च मध्यमं तद्वद्यथावदुपयुक्तवान् ॥ तमस्मि ध्यायतः कामं ततः सा तनु
मध्यमा ॥ जज्ञे निश्वसतः सद्यस्तद्रूपा मध्यमात्फणात ॥ न चापि कथयामास कस्यचित्स भुजंगमः ॥ अंतर्गृहे तां सुद
तीं स्त्रीभिर्गुप्तामधारयत ॥ तौ चानुदिनमागम्य सुतौ नागपतेः सुखं ॥ ऋतुध्वजेन सहितौ चिक्रीडाते मराविव ॥ एकदा तु
सुतौ प्राह स नागोश्वतरो मुदा ॥ यन्मया प्राग्वचेमुक्तं हि क्रियते किं न तत्तथा ॥ स राजपुत्रो युवयोरुपकारी ममांतिकं ॥ किं ने हानीय
ते वत्सा युपकाराय मानवः ॥ एवमुक्तौ पुनस्तेन पित्रा स्नेहवता सुतौ ॥ गत्वा तस्य पुरं सख्युरेमाते तेन धीमता ॥ ततः कुवलयाश्वं तौ

रुत्वा किंचित् कथंतरं॥ अथ तं प्रणम्यो वेतौ स्वगेहगमनं प्रति॥ तावाहनस्य पुत्रो सौनन्चिरं भवतोर्गृहं॥ धनवाहनवस्त्रादि यन्म
॥मा० पु०॥ दीयं तथैव वां॥ यद्यस्य वांछितं तं दातुं धनं रत्नं मयापि वा॥ मदीयतां द्विजसत्तौ यदि वां प्रणयो मयि॥ एतावताहं दैवेन वंचितो
॥४१॥ स्मि दुरात्मना॥ यन्मद्वत्स्वधाम मत्वं नो मदीये क्रियते गृहे॥ यदि वां मत्प्रियं कार्यं अनुग्राह्योस्मि वा यदि॥ तद्धनेमम गेहे च मम
५१ स्वमनुकल्प्यतां॥ युवयोर्यन्मदीयं तन्ममकं युवयोः स्वकं॥ एतत्सत्यं विजानीतं सप्राणो बहिश्चरः॥ पुनर्नैवं विभिन्नोहं
वक्तव्याहि द्विजोत्तमौ॥ मत्प्रसादपरौ प्रीत्या शापितौ हृदयेन मे॥ ततः स्नेहाद्रहृदयो तावुभौ नागनंदनौ॥ ऊचतुर्नृपतेः
पुत्रं किंचित्प्रणयकोविदौ॥ ऋतुध्वजन संदेहो यथैवाह भवानिदं॥ तथैव चास्मन्मनसि नात्र चिंत्यमन्यथा॥ किं त्वावयोः
समं पित्रा प्रोक्तमेतन्महात्मना॥ द्रष्टुं कुवलयाश्वं तमिच्छामीति पुनः पुनः॥ ततः कुवलयाश्वोसो समुत्थाय वरासनात्॥
यथाह तात इत्युक्त्वा प्रणाममकरोत्तयोः॥ कुवलयाश्व उवाच॥ धन्योहमतिपुण्योहं कोन्योस्ति सदृशो मया॥ यत्तातो
मामभिद्रष्टुं करोति प्रणयं मनः॥ उत्तिष्ठतां सुगच्छामस्तातज्ञां स क्षणमप्यहो॥ नातिक्रांतुमिच्छामि पश्यतस्य शपाम्य
हं॥ जड उवाच॥ एवमुक्त्वा ययौ सोयं सहताभ्यां नृपात्मजः॥ प्रातास्वगोतमीपुल्यात् निर्गम्य नगराद्बहिः॥ तन्मध्येन ययुस्ते
वै नागेंद्रनृपनंदनाः॥ मेने च राजपुत्रोसौ पारेतस्यास्तयोर्गृहं॥ ततश्चाकृष्य पातालं ताभ्यां नीतो नृपात्मजः॥ पाताले ददृशे
चो भौ स पन्नगकुमारकौ॥ फणामणिसमुद्योतौ व्यक्तस्वस्तिकलक्षणौ॥ विलोक्य तौ सुरूपांगौ विस्मयोत्फुल्ललोचनः॥
विहस्य चाब्रवीत्प्रेम्णा साधु भो द्विजसत्तमौ॥ कथयामासतुस्तौ च पितरं पन्नगेश्वरं॥ शांतमश्वतरं नागं माननीयं दिवौ
॥राम॥ कसां॥ रमणीयं ततो पश्यत्पातालं स नृपात्मजः॥ कुमारैस्तरुणैर्वृद्धैः उरगैरुपशोभितं॥ तथैव नागकन्याभिः क्रीडंतीभिरि
॥४१॥ तस्ततः॥ चारुकुंडलहाराभिस्ताराभिर्गगनं यथा॥ गीतशब्दैस्तथान्यत्र वीणावेणुस्वरान्वितैः॥ मृदंगपणवातोद्यहारि

वेस्मसताताकुलं ॥ वीक्ष्यमाणःसपातालंययौशत्रुजितःसुतं ॥ सहताभ्यामभीष्टाभ्यांपन्नगाभ्यामरिंदमः ॥ ततःप्रविश्य
तेसर्वेनागराजनिवेसनं ॥ ददृसुस्तेमहात्मानमुरगाधिपतिंस्थितं ॥ दिव्यमालांवरधरंमणिकुंडलभूषणं ॥ स्वच्छमुक्ता
फललताहारिहारोपशोभितं ॥ केयूरिणंमहाभागमासनेसंकांचने ॥ १० ॥ मणिविद्रुमवैडूर्यजालांतरितरूपके ॥ सता
भ्यांदर्शितस्तत्रतातोस्माकमसाविति ॥ वीरःकुवलयाश्वोयंपित्रेवासौनिवेदितः ॥ ततोननामचरणौनागेंद्रस्यऋतु
ष ध्वजः ॥ तमुत्थाप्यबलात्गाढंसनागःपरिस्वजे ॥ मूर्द्धिचैनंमुपाघ्रायचिरंजीवेत्युवाचह ॥ निहतामित्रवर्गस्त्वपित्रोःशु
श्रूषणंकुरु ॥ वत्सधन्यस्यकथ्यंतेपरोसस्यापितेगुणाः ॥ भवतोममपुत्राभ्यांमाभ्यांयेमेनिवेदिताः ॥ तदेतैरेववर्द्धस्वमतो
वाक्कायचेष्टितैः ॥ जीवितंगुणिनःश्लाघ्यंजीवन्नपिमृतोगुणी ॥ गुणवान्निर्वृत्तिंपित्रोःशत्रूणांहृदयेज्वरं ॥ करोत्या
त्महितंकुर्वन्नविश्वासेचमहाजने ॥ देवताःपितरोविप्रामित्रार्थिविकलादयः ॥ बांधवाश्चतथेच्छंतिजीवितंगुणिन
श्चिरं ॥ परपवादनिर्वृत्तानांदुर्गतेषुदयावतां ॥ गुणिनांसफलंजन्मसंश्रितानांविपद्गतेः ॥ पुत्रउवाच ॥ एवमुक्त्वास
तंविरंसुत्राविदमथाब्रवीत् ॥ पूजांकुवलयाश्वस्यकर्त्तुकामोभुजंगमः ॥ स्नानादिकंकर्मकृत्वासर्वमेवयथा
क्रमं ॥ मधुपानादिसंयोगमाहारंचयथेप्सितं ॥ ततःकुवलयाश्वेनहृदयोत्सवभूतया ॥ कथयास्वल्पकंकालं।
स्थास्यामोहृष्टचेतसः ॥ अनुमेनेचतंमौनीवचःशत्रुजितःसुतः ॥ तथाचकारचपतिःपन्नगानामुदारधीः ॥ स
मेस्यतैरात्मजभूपनंदनैर्महोरगानामधिपःससस्वाकं ॥ मुदायुतोन्नानिमृष्टानिचात्मवान्यथोपजोषंबुभुजेसभो
गवाक् ॥ २४ ॥ ४ ॥ ॥ ४ ॥ इतिश्रीमार्कंडेयपुराणेमदालसोपाख्यानेविंशोध्यायः ॥ २० ॥ ४ ॥ ॥ ४
पुत्रउवाच ॥ कृताहारंमहात्मानमधिपंपवनाशिनां ॥ उपासांचक्रिरेपुत्रभूपालतनयास्तया ॥ १ ॥ कथाभिरनुरूपाभिःस

॥मा०पु०॥ महात्मा भुजंगमः। प्रीतिं संजनयामास पुत्रस्सख्युरुवाच ह। तव भद्र सुखं ब्रूहि गेहमभ्यागतस्य यत्। कर्त्तव्यमुरगजन्मं कां
॥४२॥ पितरौ वसुतो मयी। हिरण्यं वा सुवर्णं वा वस्त्रं वाहनमासनं। यद्वाभिमतमत्यर्थं दुर्लभं तद्वृणुष्व मे ॥४॥ कुवलयाश्व उवाच
42 भवत्प्रसादाद्भगवन्सुवर्णादि गृहे मम। पितुरस्ति ममाद्यापि न किंचित्कार्यमीदृशेः। ताते वर्षसहस्राणि शासती मां
वसुंधरां। तथैव त्वपि याता लं नमे यांचासु रवं मनः। ते सभाग्याः सपुण्याश्च येषां पितरि जीवति। तरुणं कोटिसमं वित्तं
तारुण्यं वित्तकोटिषु। मित्रालितुल्यशिष्टानि तद्वद्देहमनामयं। जनेता ध्रियते वित्तं यौवनं किंतु नास्ति मे। व्यसस्य यैन्न
एां यांचा प्रवणं जायते मनः। सस्यशेषे कथं यांश्चा मम जिह्वा करिष्यति। येनें चिंत्यं धनं किंचिन्मम गेहेस्ति नास्ति वा॥
पितृबाहुतरुच्छायां संश्रिताः सुखिनो हि ते। ये तु बाल्यात्प्रभृत्येव विना पित्रा कुटुंबिनः। ते सुखास्वादविभ्रंशान्मन्ये धा
त्रैव वंचिताः। तद्वयं त्वत्प्रसादेन धनरत्नादिसंचयान्। पितृसक्तान्प्रयच्छामः कामतो नित्यमर्थिनां। तत्सर्वमिह संप्राप्तं
यदंघ्रियुगलं तव। मच्चूडामणिना घृष्टं यच्चांगस्पर्शमाप्तवान्। पुत्र उवाच। इत्येवं प्रश्रितं वाक्यं मुक्तः पन्नगसत्तमः॥
प्राह राजसुतं प्रीत्या पुत्रयोरुपकारिणं। यदि रत्नसुवर्णादिमत्तो वाप्तुं न ते मनः। यदन्यन्मनसः प्रीत्यै तद्ब्रूहि त्वं ददाम्य
हं। कुवलयाश्व उवाच। भगवंस्त्वत्प्रसादेन प्रार्थितस्य गृहे मम। सर्वमस्ति विशेषेण संप्राप्तं तव दर्शनात् ॥२६॥ कृतकृत्योस्मि
चैतेन सफलं जीवितं मम। यदंगसंस्पर्शमिति स्तव देवस्य मानुषः। ममोत्तमांगे त्वत्पादरजसा यदिहास्पदं। कृतं ते नैव न प्राप्तं
किं मया पन्नगेश्वर। यदि त्ववश्यं दातव्यो वरो मे मनसेप्सितः। तत्पुण्यकर्मसंस्कारो हृदयान्माभ्युपेतु मे। सुवर्णमणिरत्नादि ॥राम:॥
वाहनं गृहमासनं। स्त्रियोन्नपानं पुत्राश्च चारु माल्यानुलेपनं। एते च विविधाः कामाः गीतवाद्यादिकं च यत्। सर्वमेतन्मम
मतं फलं पुण्यवनस्पतेः। तस्मान्नरेण तन्मूलसेके यत्नः कृतात्मना। कर्त्तव्यः पुण्यसक्तानां न किंचिद्भुवि दुर्लभं। अश्वतर ॥४२॥

रउवाच ॥ एवं भविष्यति प्राज्ञ तव धर्माश्रिता मतिः ॥ संसेवेत स्फलं सर्वं धर्मस्योक्तं यथा त्वया ॥ तथाप्यवश्यं मद्गेहमागतेन त्वया
धुना ॥ त्वाहं यन्मानुषे लोके दुःप्रापं भवतो मतं ॥ पुत्र उवाच ॥ तस्य तद्वचनं श्रुत्वा स तदा पन्नगनंदनः ॥ मुखावलोकनं चक्रे
पन्नगेश्वरपुत्रयोः ॥ ततस्तौ प्रणिपत्योभौ राजपुत्रस्य यन्मतं ॥ तत्पितुः सकलं वीरौ कथयामासतुः स्फुटं ॥ तातास्य प
त्नी दयिता श्रुत्वेयं विनिपातितं ॥ अस्य जद्यितान्प्राणान् विप्रलब्ध्वा दुरात्मना ॥ केनापि कृतवैरेण दानवेन कुबुद्धिना
गंधर्वराजस्य सुता नाम्ना ख्याता मदालसा ॥ कृतज्ञोयं ततस्तात प्रतिज्ञां कृतवानिमां ॥ नान्या भार्या भवित्री मे वर्जयित्वा
मदालसां ॥ द्रष्टुं तां चारुसर्वांगीमयं वीरो ऋतुध्वजः ॥ तात वांछति यद्येतत् क्रियतेत्र कृतं भवेत् ॥ अश्वतर उवाच ॥ भूतैर्वियोगि
नो योगस्तादृशो रेवता दृशः ॥ कथमेतद्विना स्वप्नं मायां वा शंबरोदितां ॥ पुत्र उवाच ॥ प्रणिपत्य भुजंगेशं पुत्रः शत्रुजितस्ततः ॥
त्मा प्रत्युवाच महान् प्रेमलज्जासमन्वितः ॥ कुवलाश्व उवाच ॥ मायामयीमप्यधुना मम तात मदालसां ॥ यदि दर्शयतो म
परे न्येकृतमनुग्रहं ॥ अश्वतर उवाच ॥ तस्मात्प्रत्येहि वत्स त्वं मायां चेद्द्रष्टुमिच्छसि ॥ अनुग्राह्यो भवान्नो हि बालोप्यभ्यागतो
गुरुः ॥ ४ ॥ पुत्र उवाच ॥ आनयामास नागेंद्रो गुसांर्मयाम दालसां ॥ दर्शयामास च तदा राजपुत्राय तां शुभां ॥ इति यां संमोहनार्थाय
राजजस्य च ततः स्फुटं ॥ सेयं न वेति ते भार्या राजपुत्र मदालसा ॥ पुत्र उवाच ॥ स दृष्ट्वा तां तदा तन्वीं तत्क्षणाद्विगतत्रपः ॥ प्रियेति
तामभिमुखं ययौ वाचमुदीरयन् ॥ निवारयामास च तं नागश्चाश्वतरस्त्वरन् ॥ अश्वतर उवाच ॥ मायेयं पुत्र मा स्प्राक्षीः
प्रागेव कथितं तव ॥ अंतर्द्धानमुपैत्याशु मायासंस्पर्शनादिभिः ॥ ततः पपात मेदिन्यां स तु मूर्छापरिप्लुतः ॥ हा प्रियेति वद
न्साथ चिंतयामास भामिनीं ॥ स्वप्नो माया च नो वेत्ति नालं प्रत्ययवानहं ॥ येनाहं पातनेरीणां विनाशस्त्वं निपातितः ॥ मायेति
दर्शितानेन मिथ्यामायेति विस्फुटं ॥ वाय्वंबुतेजसां भूमेराकाशस्य च चेष्टया ॥ पुत्र उवाच ॥ ततः कुवलयाश्वं स समाश्वास्य

॥ मा० पु० ॥ भुजंगमः ॥ कथयामास तत्सर्वं मृतं संजीवनादिकं ॥ ततः प्रहृष्टः प्रतिलभ्य कांतां प्रणम्य नागं निजमाजगाम ॥ संस्तूयमानः
स्वपुरं तमश्वमारुह्य संचिंतितमभ्युपेतं ॥ ४४ ॥ ५ ॥ ॥ इति श्रीमार्कंडेयपुराणे मदालसोपाख्याने मदालसास
॥ ४३ ॥ मागमः एकविंशतमोध्यायः ॥ २१ ॥ ॥ पुत्र उवाच ॥ आगम्य स्वपुरं सोथ पित्रोः सर्वमशेषतः ॥ कथयामास
तन्वंगी यया प्राप्ता पुनर्मृतां ॥ ननाम सा च चरणौ श्वश्रूश्वशुरयोः शुभा ॥ स्वजनं च यथापूर्वं वंदनाश्लेषणादिभिः ॥ पूज
43 यामास तन्वंगी यथान्यायं यथावयः ॥ ततो महोत्सवो जज्ञे पौराणां तत्र वै पुरे ॥ ऋतुध्वजश्च सुचिरं तया रेमे सुमध्यमा ॥
निर्झरेषु च शैलानां निम्नगापुलिनेषु च ॥ काननेषु च रम्येषु वनेषूपवनेषु च ॥ पुण्यक्षयं वांछमाना सापि कामोपभोगतः ॥
सह तेनातिकांतासु रेमे रम्यासु भूमिषु ॥ ततः कालेन महता शत्रुजित्स नराधिपः ॥ सम्यक् प्रशास्य वसुधां कालधर्ममुपेयि
वान् ॥ ततः पौरा महात्मानं पुत्रं तस्य ऋतुध्वजं ॥ अभ्यषिंचन्सुराजानमुदाराचारचेष्टितं ॥ सम्यक्पालयतस्तस्य प्रजाः
पुत्रानिवौरसान् ॥ मदालसायाः संजज्ञे पुत्रः प्रथमजस्ततः ॥ तस्य चक्रे पिता नाम विक्रांत इति धीमतः ॥ तुतुषुस्तेन वै
भृत्या जहास च मदालसा ॥ सा वै मदालसा पुत्रं बालमुत्तानशायिनं ॥ उल्लापनच्छलेनाह रुदमानमविह्वलं ॥ शुद्धोसि रे ता
त न तेस्ति नाम कृतं च ते कल्पनयाधुनैव ॥ पंचात्मकं देहमिमं न तेस्ति नैवास्य त्वं रोदिषि कस्य हेतोः ॥ न वा भवान् रोदिति वि
श्वजन्मा शब्दोयमासाद्य महीशसूनुं ॥ विकल्प्यमाना विविधैर्गुणार्थैर्गुणाश्च भौताः सकलेंद्रियेषु ॥ भूतानि भूतैः परिदुर्बला
नि वृद्धिं समायांति यथेह पुंसः ॥ अन्नांबुपानादिभिरेव कस्य न तेस्ति वृद्धिर्न च नास्ति हानिः ॥ त्वं कंचुके शीर्यमाणे निजेस्मिन् त ॥ राम: ॥
स्मिंश्च देहे मूढतां मा व्रजेथाः ॥ शुभाशुभैः कर्मभिर्देहमेतन्मदादिमूढैः कंचुकस्ते पिनद्धः ॥ तातेति किंचित्तनयेति किंचिदंब ॥ ४३ ॥
ति किंचिद्दयितेति किंचित् ॥ ममेति किंचिन्न ममेति किंचिद्भौतं संघं बहु मामलपेथाः ॥ दुःखानि दुःखोपशमाय भोगान्सु

खाय जानाति विमूढचेताः॥ तान्येव दुःखानि पुनः सुखानि जानाति विद्वान विमूढचेताः॥ हासोस्थिसंदर्शनमक्षियुग्ममत्युज्ज्वलं य
त्कलुषं वसायाः॥ कुचादि पीनं पिशितं घनं यत्स्थानं रतेः किं नरको न योषित॥ यानं क्षितौ यानगतं च देहं देहेपि चान्यः पुरुषो नि
८ विष्टः॥ ममत्वमुर्व्यां न तथा यथा स्वे देहेतिमात्रं च विमूढतैषा॥ वर्द्धमानं सुतं सा तु राजपत्नी दिने दिने॥ तमुल्लापादिना बोध
मनयन्निर्मलात्मकं॥ यथा यथा बलं लेभे यथा लेभे मतिं पितः॥ तथा तया स बोधं च सो वायुन्मातृभाषितैः॥ इत्थं तया स तन
यो जन्मप्रभृति बोधितः॥ चकार न मतिं प्राज्ञो गार्हस्थ्यं प्रति निर्ममः॥ द्वितीयोस्याः सुतो जज्ञे तस्य नामाकरोत्पिता॥ सुबाहु
रयमित्युक्ते सा जहास मदालसा॥ तमप्येवं यथा पूर्वं बालसुल्लापवादिनी॥ प्राह वास्यास च प्राप्य तया बोधं महामतिः॥ क्रिया
स्वकारनिष्ठासान काश्चित्सफलकारणात्॥ तृतीयं तनयं जातं स राजा शत्रुमर्द्दनं॥ यदाह तेन सा सुभ्रू जहासातिचिरं पुनः॥ तथै
व सोपि तन्वंग्याः बालत्वादेव बोधितः॥ क्रियाश्चकार निःकामो न किंचिन्नृपकारणं॥ चतुर्थस्य सुतस्याथ चिकीर्षुर्नाम भर्
पतिः॥ ददर्श तां शुभाचारामीषद्धासां मदालसां॥ तामाह राजा हसतीं किंचित्कौतूहलान्वितः॥ क्रियमाणे स कुन्नाम्नि कथ्य
तां हास्यकारणं॥ विक्रांतश्च सुबाहुश्च तथान्यः शत्रुमर्द्दनः॥ शोभनानीति नामानि तानि मन्ये कृतानि वे॥ योग्यानि क्षत्रबंधूनां ति
शौर्योदार्यगुणानि च॥ अथ सत्यानि वा भद्रे यदि ते मनसि स्थितं॥ तदस्य क्रियतां नाम चतुर्थस्य सुतस्य मे॥ मदालसोवाच॥
ममाज्ञा भवता कार्या महाराज यथा त्वमां॥ तथा नाम करिष्यामि चतुर्थस्य सुतस्य ते॥ अलर्क इति धर्मज्ञः ख्यातिं लोकेषु
यास्यति॥ कनीयानेष ते पुत्रो मतिमांश्च भविष्यति॥ पुत्र उवाच॥ तच्छ्रुत्वा नाम पुत्रस्य कृतं मात्रा महीपतिः॥ अलर्क इत्यसं रा
बद्धं प्रहस्येदमथाब्रवीत॥ भवत्या यदिदं नाम मत्पुत्रस्य कृतं शुभे॥ किमेतदृशमसंबद्धमर्थः कोस्य मदालसे॥ मदालसोवा
च॥ कल्पनेयं महाराज कृता सा व्यवहारिकी॥ त्वत्कृतानां तथा नाम्नां शृणु सत्यं निरर्थतां॥ वदंति पुरुषाः प्राज्ञा व्यापिनं पुरुषं य

॥मा॰पु॰॥ तेः॥ क्रांतिश्च गतिरुद्दिष्टा देशाद्देशांतरं तु या॥ सर्वगो न प्रयातीह व्यापी देहेश्वरो ततः॥ ततो विक्रांतसंज्ञेयं मताममनिरर्थिका॥ सुबा
हुरिति या संज्ञा कृतान्यस्य सुतस्य ते॥ निरर्थी साप्यमूर्त्तस्य पुरुषस्य महीपतेः॥ पुत्रस्य यत्कृतन्नाम तृतीयस्यारिमर्द्दनः॥ मन्ये
॥४४॥ तच्चाप्यसंपद्धं शृणु चाप्यत्र कारणं॥ एक एव शरीरेषु सर्वेषु पुरुषो यदा॥ तदास्य राजन्कः शत्रुः को वा मित्रमिहेष्यते॥ भू
तैर्भूतानि मर्द्यंते अमूर्त्तो मर्द्यते कथं॥ क्रोधादीनां पृथक्भावात्कल्पनेयं निरर्थिका॥ यदि संव्यवहारार्थमसन्नाम प्रकल्प्य
५५ ते॥ नाम्नि कस्मादलर्कोख्ये नैरर्थ्यं भवतो मतं॥ एवमुक्तस्तया साधु मेहिष्या स महीपतिः॥ तथेत्याह महाबुद्धिर्दयितां तथ्य
वादिनीं॥ तं चापि सा सुतं सुभ्रूर्यथा पूर्वं सुतांस्तथा॥ प्रोवाच बोधजननं तामुवाच स पार्थिवः॥ करोषि किमिदं मूढे मम
भावाय संततेर्हु ष्टावबोधदानेन यथा पूर्वसुतेषु मे॥ यदि ते मत्प्रियं कार्यमनुष्ठाप्यं वचो मम॥ तदेनं तनयं मार्गे प्रवृत्तेः सं
नियोजय॥ कर्ममार्गः समुच्छेदं नैवं देवि गमिष्यति॥ पितृपिंडनिवृत्तिश्च नैवं साध्वि भविष्यति॥ पितरो देवलोकस्थास्तथा
तिर्यक्त्वमागताः॥ तद्वन्मनुष्यतां याता भूतवर्गेषु ये स्थिताः॥ तान्सपुण्यानपुण्यांश्च क्षुत्क्षामांस्तृट्परिप्लुतान्॥ पिंडो
य दकप्रदानेन नरः कर्मण्यवस्थितः॥ सदाप्याययते सम्यक्तद्वद्देवातिथीनपि॥ देवैर्मनुष्यैः पितृभिः प्रेतैर्भूतैः सगुह्यकैः॥ वयो
भिः कृमिभिः कीटैर्नर एवोपभुज्यते॥ तस्मात्तन्वंगि मे पुत्रं यत्कार्यं क्षत्रयोनिभिः॥ ऐहिकामुष्मिकायालं तत्कर्मप्रतिपाद
य॥ तेनैवमुक्ता सा साध्वी वरनारी मदालसा॥ अलर्कं नाम तनयं प्रोवाचोल्लापवादिनी॥ पुत्र वर्द्धस्व मे भर्त्तुर्मनोनंदय कर्म
भिः॥ ऐहिकामुष्मिकफलं तत्सवैंस्य कृ परियालय॥ मित्राणामुपकाराय दुर्हृदां नाशनाय च॥ धन्योसि रे यो वसुधामशत्रुरे ॥राम॥
कश्चिरं पालयितासि पुत्र॥ तत्पालनादिंद्रसमोपभोग्यं धर्म्यं फलं प्राप्स्यसि चामरत्वं॥ धरामरान्पर्वसु तर्पयेथाः समीहितं बं ॥४४॥
धुषु पूरयेथा॥ हितं परस्मै हृदि चिंतयेथा मनः परस्त्रीषु निवर्त्तयेथाः॥ सदा मुरारिं हृदि चिंतयेथास्तद्ध्यानतोंतः षड्रीन्जयेथाः

44A

मायां प्रबोधेन निवारयेथाः स्वजित्सु तामेव विचिंतयेथाः॥ अर्थागमाय क्षितिपान् जयेथा यशोऽर्जनायार्थमपि व्ययेथाः॥ पराप
वाद श्रवणाद्बिभेथा विपत्समुद्राज्जनमुद्धरेथाः॥ यज्ञैरनेकैर्विबुधानजस्रं अन्नैर्द्विजान्संश्रितोयाश्रितांश्च॥ स्त्रियश्च
कामैरतुलैश्चिराय युद्धेरिपूंस्तोषयिता स वीर॥ बालो मनो नंदय बांधवानां गुरोस्तथाज्ञाकरणैः कुमारः॥ स्त्रीणां युवा स
त्कुलभूषणानां वृद्धो वने वै सवनेचराणां॥ राज्यं कुर्वन्सुहृदो नंदयेथाः साधून्रक्षंस्तात यज्ञैर्यजेथाः॥ दुष्टान्निघ्नन्
वैरिणश्चाजिमध्ये गोविप्रार्थे वत्स मृत्युं व्रजेथाः॥ २६॥ ॥ इति श्रीमार्कंडेयपुराणे प्रवृत्तिमार्गानुशासनं॥
२७॥ ॥ पुत्र उवाच॥ एवमुह्यमानस्तु स तु मात्रा दिने दिने॥ ववृधे वयसा बालो बुद्ध्या चालर्कसंज्ञितः॥
स कौमारकमासाद्य ऋतुध्वजसुतस्ततः॥ कृतोपनयनः प्राज्ञः प्रणिपत्याह मातरं॥ मया यदंब कर्तव्यमैहिकामुष्मि-
काय वै॥ सुखाय तद्वदस्व त्वं प्रश्रयावनतस्य मे॥ मदालसोवाच॥ वत्स राज्याभिषिक्तेन प्रजारंजनमादितः॥ कर्तव्यमवि- शास्त्राविरोधेन
७ शास्त्राविरोधेन रोधेन स्वधर्मस्य महीभृता॥ व्यसनानि परित्यज्य सप्त मूलहराणि वै॥ आत्मा रिपुभ्यः संरक्ष्यो बहिर्मंत्रविनिर्गमात्॥
अष्टधा नाशमाप्नोति स्ववक्रात्स्यंदनाद्यथा॥ तथा राजाप्यसंदिग्धं बहिर्मंत्रविनिर्गमात्॥ दुष्टादुष्टं न जानीयादमात्य
रिदोषतः॥ चरैश्चरास्तथा शत्रोरन्वेष्टव्याः प्रयत्नतः॥ विश्वासो न तु कर्तव्यो राज्ञा मित्राप्तबंधुषु॥ कार्ययोगादमित्रे
४ संधिविग्रहादिनी ऽपि विश्वसीत नराधिपः॥ स्थानवृद्धिक्षयज्ञेन षाड्गुण्यविदितात्मना॥ भवितव्यं नरेंद्रेण न कामवशवर्तिना॥ प्रागा
त्मा मंत्रिणश्चैव ततो भृत्या महीभृता॥ जेयाश्चानंतरं पौरा विरुध्येत ततोऽरिभिः॥ यस्त्वेताननविजित्यैव वैरिणो विजिगी
षते॥ सोऽजितात्माजितामात्यः शत्रुवर्गेण बाध्यते॥ तस्मात्कामादयः पूर्वं जेयाः पुत्र महीभृता॥ तज्जये हि जयो राज्ञो रा
जा नश्यति तैर्जितः॥ कामः क्रोधश्च लोभश्च मदो मानस्तथैव च॥ हर्षश्च शत्रवो ह्येते नाशाय कुमहीभृतां॥ कामप्रसक्त

२ विद्याधर्मबुद्धिमंत्रैश्च स्थानसैन्यसुहृज्जनैः। शकुनैर्दैवतैश्चैव राज्ञां दशविधं बलं॥ आत्मासनप्रतापैश्च संग्रामैश्च सुहृज्जनैः। निद्राहारेंद्रि
याणि ति राज्ञां दश निधोजयः॥ ३

१ दृग्ध्यामनुपुत्रैः कामात्सुके पुत्र्यां मासनैः १ स्वकैः शापासराष्ट्रोन च्छायनीमासिकारणं) (अनुग्रहादस्य दैत्येन क्रोधात्सपुत्रो हतः ॥ अलस हरणा चैलः १ पश्चादन्तुतसः १) (अवापुद्दीनमौद्गु नोदलास्येदूर्वास सोनादरेण तेन शासः १।२
२ पुरंजयास्या राजा इंद्रपुरंगता हर्षी सि क्रोदे कैः पातितः ॥२॥

इकौशिकी नैकाकाहूतिः२

॥मा०पु०॥ ॥४४॥ मासानंस्रत्वा दंडं निपातितं ॥ निवर्त्तयेत्तथाक्रोधादनुग्राह्यं हतालज्जं ॥ हतमेलं तथा लोभान्मदादुल्लं द्विजेहितं ॥ मानादनायु
षः पुत्रं हतं हयोत्सुरंजयं ॥ एभिर्जितैर्जितं सर्वं मरुत्तेन महात्मना स्मृत्वा विवर्जयेदेतान्दोषांश्च महीपतिः ॥ काककोकिल भृंगाणां बकव्यालशिखंडिनां ॥ हंससानां कोहकुहानां शिक्ष्येत चरितं नृपः ॥ कौशिकस्य क्रियां कुर्वन्विपक्षे मनु
नुजेश्वरः ॥ चेष्टां पिपीलिकानां च काले भूपः प्रदर्शयेत् ॥ ज्ञेयाग्निविस्फुलिंगानां बीजचेष्टा च शाल्मलेः ॥ चंद्रसूर्यस्व
रूपं च नीत्यर्थे पृथिवीक्षिता ॥ बंधकास्यग्रसरभस्फलिन्यागुर्विणी स्तनात् ॥ प्रज्ञानृपेण चादेया तथा चंडालयोषि
तः ॥ शक्रार्कयमसोमानां तद्वद्वायोर्महीपतिः ॥ रूपाणि पंच कुर्वीत महीपालनकर्मणि ॥ २४ ॥ यथेंद्रश्चतुरो मासान्वा
र्षिघे णोवस्रत लं ॥ आप्यायेत्तथा लोकान्परिहारैर्महीपतिः ॥ मासानष्टौ यथा सूर्यस्तोयं हरति रश्मिभिः सूक्ष्मेणैवा
भ्युपायेन तथा शुल्कादि नान्नृपः ॥ यथा यमः प्रियद्वेष्यौ प्राप्ते काले नियच्छति ॥ तथा प्रियाप्रियौ राजा दुष्टादुष्टे समा
भवेत् ॥ पूर्णेंदुमालोक्य यथा प्रीतिमान्जायते नरः ॥ एवं यत्र प्रजाः सर्वा निर्वृतास्तच्छशिव्रतं ॥ मारुतः सर्वभूतेषु
निगूढश्चरते यथा ॥ एवं चरेन्नृपश्चारैः पौरामात्यारिबंधुषु ॥ न लोभार्थैर्न कामार्थैर्नार्थार्थैर्यस्य मानसः ॥ पदार्थैः कृ
ष्यते धर्मान्स राजा स्वर्गमृच्छति ॥ उत्पथग्राहिणो मूढान्स्वधर्माच्चलितान्नरान् ॥ यः करोति निजे धर्मे स राजा स्वर्गमृ
च्छति ॥ वर्णधर्मा न सीदंति यस्य राष्ट्रे तथाश्रमाः ॥ राज्ञस्तस्य सुखं तात परत्रेह च शाश्वतं ॥ एतद्राज्ञः परं कृत्यं तथैतद्वृ
द्धिकारणं ॥ स्वधर्मस्थापनं नृणां चाल्यते न कुबुद्धिभिः ॥ पालनेनैव भूतानां कृतकृत्यो महीपतिः ॥ सम्यक्पालयि
ता भागं धर्मस्याप्नोति वै यतः ॥ एवमाचरते राजा चातुर्वर्ण्यस्य रक्षणे ॥ स सुखी विहरत्येष शक्रस्यैति सलोकतां ॥
३२ ॥ ४ ॥ समयेतापालुहृकृत ॥ इति श्रीमार्कंडेयपुराणे मदालसोपाख्याने चतुर्विंशोध्यायः ॥ २४ ॥ ४ ॥ ॥४॥

पिपीलिकाहिनहुला सर्पमपिघ्नति भक्ष्यंते नसंदृश्यंतिव
दुसादृहनं ४ ४५
४ बिजान्महदर्थनि ष्पादनं अल्पं चेष्टा
४

काकात्सर्वशंका कोकिलात्माधुर्यं परपुष्टत्वं च भृंगात्सारग्राहित्वं मपिडयाङ्घ्रिहा नं च बकादेकाग्रता ग्रहणं
व्यालादुःसपर्शत्वं
शिखंडिनः क्षेत्र दर्शकत्वं सर्पग्रहणेम कतान्ह हंसाद्विवेककार्यं लोकुहात्संधानं

॥राम॥ ॥४४॥

५ वधकाज्रिर्घणतो पश्चात्कंटगोपनं स्मितमुखत्वं च ॥ शरभाद्विक्रमेण पचनुसेकः ॥ शल्मिन्या आर्त्तिशापनं ॥ गर्भिणीस्तनात् प्रजालाभे भाविन्येवत्सं ॥ चांडालयोषितां वैपनं साहि रोहृदयविलासं तरं

45A

पुत्र उवाच॥ तन्मातुर्वचनंश्रुत्वासोलर्कोमातरंपुनः॥ पप्रच्छवर्णधर्मांश्चधर्मान्येचाश्रमेषुच॥ अलर्क उवाच॥ कथितोयंमहाभागेरा
ज्यतंत्राश्रितस्त्वया॥ ममधर्मोहमिच्छामिश्रोतुंवर्णाश्रमात्मकं॥ मदालसोवाच॥ दानमध्ययनंयज्ञोब्राह्मणस्यत्रिधोदितः॥ धर्मो
नान्यश्चतुर्थोस्तिधर्मस्तस्यापदंविना॥ याजनाध्यापनेशुद्धस्तथापुत्रप्रतिग्रहः॥ एतत्सम्यक्समाख्यातंत्रितयंचास्यजीविका॥ दा
नमध्ययनंयज्ञःक्षत्रियस्याप्ययंत्रिधा॥ धर्मःप्रोक्तःक्षितेरक्षाशस्त्राजीवश्चजीविका॥ दानमध्ययनंयज्ञोवैश्यस्यापित्रिधैवसा॥
वाणिज्यंपाशुपाल्यंचकृषिश्चैवास्यजीविका॥ दानंयज्ञोथशुश्रूषाद्विजातीनांत्रिधामया॥ व्याख्यातःशूद्रधर्मोपिजीविका
कारुकर्मजा॥ तद्वद्विजातिशुश्रूषापोषणंक्रयविक्रयैः॥ वर्णधर्मास्त्विमेप्रोक्ताःश्रूयतामाश्रमाश्रयः॥ स्ववर्णधर्मात्सं
सिद्धिंनरःप्राप्नोतिवैयतः॥ प्रयातिनरकंप्रेत्यप्रतिषिद्धनिषेवणात्॥ यावत्तुनोपनयनंक्रियतेवैद्विजन्मनः॥ कामचेष्टोप
भक्ष्यस्तुतावद्भवतिपुत्रक॥ कृतोपनयनःसम्यक्ब्रह्मचारीगुरोर्गृहे॥ वसेततत्रधर्मोस्यकथ्यतेतन्निबोधमे॥ स्वाध्यायोर्य
ग्निशुश्रूषास्नानंभिक्षाटनंतथा॥ गुरोर्निवेद्यतच्चाद्यमनुज्ञातेनसर्वदा॥ गुरोःकर्मणिसद्योगःसम्यक्प्रीत्युपपादकः॥ ते
नाहूतःपठेच्चैवतत्परोनान्यमानसः॥ एकंद्वौसकलान्वापिवेदान्प्राप्यगुरोर्मुखात्॥ अनुज्ञातोवरान्दत्वादक्षिणांगुर
वेततः॥ गार्हस्थ्याश्रमकामस्तुगृहस्थाश्रममावसेत्॥ वानप्रस्थाश्रमंवापिचतुर्थंचेच्छयात्मनः॥ तथैववागुरोर्गेहेद्वि
जोनिष्ठामवाप्नुयात्॥ गुरोरभावेतत्पुत्रेतच्छिष्येतत्सुतंविना॥ शुश्रूषुर्निरभिमानोब्रह्मचर्याश्रमंवसेत्॥ उपावृत्तस्ततस्तस्मा
म द्गृहस्थाश्रमकाम्यया॥ ततोसमानर्षिकुलांतुल्यांभार्यामरोगिणीं॥ उद्वहेन्न्यायतोव्यंगांगृहस्थाश्रमकारणात्॥ स्वकर्मणाधनं
लब्ध्वापितृदेवातिथीनया॥ सम्यक्संप्रीणयेद्भृत्यान्पोषयेच्चाश्रितांस्तथा॥ भृत्यात्मजांजामयोयदीनार्थपतितानपि॥ यथा
शक्त्यान्नदानेनवयांसिपशवस्तथा॥ एषधर्मोगृहस्थस्यऋतावभिगमस्तथा॥ पंचयज्ञविधानंतुयथाशक्तिनहापयेत्॥ पि

॥मा० पु०॥ त्रदेवातिथिज्ञातिसुक्तशेषं स्वयं नरः॥ भुंजीत च समं भृत्यैर्यथाविभवमात्मनः॥ एष तूद्देशतः प्रोक्तो गृहस्थस्याश्रमो मया॥ वान
प्रस्थस्य धर्मं ते कथयाम्यवधार्यतां॥ अपत्यसंततिं दृष्ट्वा प्राज्ञो देहस्य चानतिं॥ वानप्रस्थाश्रमं गच्छेदात्मनः शुद्धिकारणात्॥ तत्रा
॥४६॥ रण्योपभोगश्च तपोभिश्चात्मकर्षणं॥ भूमौ शय्या ब्रह्मचर्यं पितृदेवातिथिक्रियाः॥ होमस्त्रिषवणं स्नानं जटावल्कलधारणं॥ सौना व
46 दिकरणं चैव वन्यस्नेहनिषेवणं॥ इत्येष आत्मशुद्ध्यर्थं मनसश्चापकारकः॥ वानप्रस्थाश्रमस्तस्माद्भिक्षोस्तु चरमो परः॥ चतुर्थस्य
स्वरूपं तु श्रूयतामाश्रमस्य ते॥ यश्च धर्मोस्य धर्मज्ञैः प्रोक्तस्तात महात्मभिः॥ सर्वसंगपरित्यागो ब्रह्मचर्यमकोपता॥ जितेन्द्रियत्वमा
वासेनैकस्मिन्वसतिश्चिरं॥ अनारंभस्तथाहारे भिक्षान्नं चैककालिकं॥ आत्मज्ञानावबोधेच्छा तथा चात्मावलोकनं॥ च[तुर्थे]
त्वाश्रमे धर्मो मयायं ते निवेदितः॥ सामान्यमन्यवर्णानामाश्रमाणां च मे शृणु॥ सत्यं शौचमहिंसा च अनसूया तथा क्षमा॥ आनृ
शंस्यमकार्पण्यं संतोषश्चाष्टमो गुणः॥ एते संक्षेपतः प्रोक्ता धर्मा वर्णाश्रमेषु च॥ एतेषु नित्यधर्मेषु स्वेषु तिष्ठेत्सम ततः॥ सया
तिक्रम्य लोके हि यावर्ण्णं द्विजश्चतुर्दश॥ यश्चावृत्तं स्वयं परो धर्मं स्ववर्णाश्रमसंज्ञितं॥ नरोन्यथा प्रवर्त्तेत सदंड्यो भूभृतो भवेत्॥ ये च
स्वधर्मसंत्यागात्पापं कुर्वंति मानवाः॥ उपेक्षतस्तान्नृपतेरिष्टापूर्त्तं प्रणश्यति॥ तस्माद्राज्ञा प्रयत्नेन सर्वैर्वर्णैः स्वधर्मतः॥ प्र
वर्त्ततोन्यथा दंड्याः स्थाप्याश्चैव स्वकर्मसु॥ ३६॥ ॥ ॥ इति श्रीमार्कंडेयपुराणे मदालसानुशासने॥ २८॥ ॥
मार्कंडेय उवाच॥ पत्कार्यपुरुषे लोहगार्हस्थ्यमनुवर्त्तता॥ वंधश्चस्यादकरणे क्रियायां यस्य चोच्छ्रितिः॥ उपकाराय यन्नृणां य
श्ववर्णं गृहे सतां॥ यथा च क्रियते तन्मे यथावत्पृच्छतो वद॥ मदालसोवाच॥ वत्स गार्हस्थ्यमास्थाय नरः सर्वमिदं जगत्॥ पुष्णाति ते ॥राम॥
न लोकांश्च स जयत्यभिवांछितान्॥ पितरो मुनयो देवा भूतानि मनुजास्तथा॥ कृमिकीटपतंगाश्च वयांसि पशवोसुराः॥ गृह ॥४६॥
स्थमुपजीवंति ततस्तृप्तिं प्रयांति च॥ मुखं चास्य निरीक्षंते अपि नो दास्यतीति वै॥ सर्वस्याधारभूतेयं वत्स धेनुस्त्रयीमयी॥ य

स्यांप्रतिष्टितंविश्वंविश्वहेतुश्चयामता॥ऋक्पृष्टासौयजुर्मध्यासामवक्त्रशिरोधरा॥इष्टापूर्त्तविशाणाचसाधुसूक्ततनूरुहा
शांतिपुष्टिशकृन्मूत्रावर्णपादप्रतिष्टिता॥उपजीव्यमानाजगतांसदायानापदीयते॥स्वाहाकारःस्वधाकारोवषट्कारश्चपुत्र
क॥हंतकारस्तथैवान्यस्तस्याःस्तनचतुष्टयं॥स्वाहाकारंस्तनंदेवाःपितरश्चस्वधामयं॥मुनयश्चवषट्कारंदेवभूतसुरेतराः॥
हंतकारंमनुष्याश्चपिबंतिसततंस्तनं॥एवमाप्याययत्येषादेवादीनखिलांस्त्रयी॥एतद्वृत्तचतुष्कंतुनरःस्तनचतुष्टये॥ननि
युंज्याद्यथाकालंतेनस्युस्तेविमानिताः॥देवादीनखिलान्येषुसंतर्पयतिमानवः॥तेषामुच्छेदकर्त्तायःपुरुषोत्यंतपापकृत॥
सतमस्यंधतामिस्रेतामिस्रेचनिमज्जति॥यस्त्वेतांमानवोधेनुंस्वैर्वत्सैरमरादिभिः॥१४॥पाययत्युचितेकालेसस्वर्गायोपपद्य
ते॥तस्मात्पुत्रमनुष्येणदेवर्षिपितृमानवाः॥भूतानिचानुदिवसंपोष्याणिस्वतनुर्यथा॥तस्मात्स्नातःशुचिर्भूत्वादेवर्षिपितृत
र्पणं॥प्रजापतेस्तथैवाद्भिःकालेकुर्यात्समाहितः॥सुमनोगंधधूपैश्चदेवानभ्यर्च्यमानवः॥ततोग्नेस्तर्पणंकुर्याद्दद्याच्चवलि
मित्यथ॥ब्रह्मणेगृहमध्येतुविश्वेदेवेभ्यएवच॥धन्वंतरिंसमुद्दिश्यप्रागुदीच्यांवलिंक्षिपेत॥प्राच्यांशक्राययाम्यांचयमायव
लिमाहरेत॥प्रतीच्यांवरुणायेवसोमायोत्तरतोवलिं॥दद्याद्धात्रेविधात्रेचबलिंद्वारेगृहस्यच॥अर्यमणेचबलिंदद्याद्गृहेभ्य
श्चसमंततः॥नक्तंचरेभ्योभूतेभ्योबलिमाकाशतोक्षिपेत॥पितृणांनिर्वपेच्चैवदक्षिणाभिमुखःस्थितः॥गृहस्थस्तत्परोभूत्वासुस
माहितमानसः॥ततस्तोयमुपादायतिष्ठताचमनायवै॥स्थानेषुनिक्षिपेत्प्राज्ञस्तास्ताउद्दिश्यदेवताः॥एवंगृहबलिंकृत्वागृहे
गृहपतिःशुचिः॥आप्यायनायभूतानांकुर्यादुत्सर्गमादरात॥श्वभ्यश्चश्वपचेभ्यश्चवयोभ्यश्चावपेद्भुवि॥वैश्वदेवंहिनामैत
सायंप्रातरुदाहृतं॥आचम्यचततःकुर्यात्प्राज्ञोद्वारावलोकनं॥मुहूर्त्तस्याष्टमंभागमुद्वीक्ष्योह्यतिथिर्भवेत॥अतिथिंतत्रसंप्रा
प्तंमन्नाद्येनोदकेनच॥संपूजयेद्यथाशक्तिगंधपुष्पादिभिःस्तथा॥नमित्रमतिथिंकुर्यान्नैकग्रामनिवासिनं॥अज्ञातकुलनामानं

श्वर

तत्कालसमुपस्थितं ॥ बुभुक्षुमागतं श्रांतं याचमानमकिंचनं ॥ ब्राह्मणं प्राहुरतिथिं स पूज्यः शक्तितो बुधैः ॥ न पृच्छेद्गोत्रचरणं स्वा
मा० र्क० ४ ॥ ध्यायं चापि पंडितः ॥ शोभनं शोभनाकारं तं मन्येत प्रजापतिं ॥ अनित्यं हि स्थितो यस्मात्तस्मादतिथिरुच्यते ॥ तस्मिंस्तुष्टे नृयज्ञोत्थामु
॥४७॥ च्येतृतु लोकहाश्रमी ॥ तस्माद्दत्वानु भुंक्ते यः स्वयं किल्बिषभृन्नरः ॥ स पापं केवलं भुंक्ते पुरीषं चान्यजन्मनि ॥ अतिथिर्यस्य भग्नाशो गृहा
त्प्रतिनिवर्तते ॥ स दत्वा दुःकृतं तस्मै पुण्यमादाय गच्छति ॥ अप्यंबुशाकदानेन यद्वाप्यश्नाति स स्वयं ॥ पूजयेत नरः शक्त्या तेनैवातिथि
47 मादरात ॥ कुर्याच्चाहरहः श्राद्धमन्नाद्येनोदकेन च ॥ पितृनुद्दिश्य विप्रं च भोजयेद्विप्रमेव वा ॥ अन्नस्याग्रं तथोद्धृत्य ब्राह्मणायोप
पादयेत ॥ भिक्षां च याचतां दद्यात्परिव्राड्ब्रह्मचारिणां ॥ ग्रासप्रमाणं भिक्षा स्यादग्रं ग्रासचतुष्टयं ॥ अग्रं चतुर्गुणं प्राहुर्हंतकारं द्वि
जोत्तमाः ॥ भोजनं हंतकारं वा अग्रं भिक्षामथापि वा ॥ अदत्वा तु न भोक्तव्यं यथाविभवविस्तरं ॥ पूजयित्वातिथीन्बंधून्ज्ञातिबंध
स्तथार्थिनः ॥ विकलान्बालवृद्धांश्च भोजयेच्चातुरांस्तथा ॥ वांछते क्षुत्परीतात्मा यथान्योन्नमकिंचनः ॥ कुटुंबिनो भोजनीयाः स्व
समं विभवे सति ॥ श्रीमंतं ज्ञातिमासाद्य यो ज्ञातिरवसीदति ॥ सीदता यत्कृतं तेन तत्पापं स समश्नुते ॥ सायं चैष विधिः कार्यः सूर्योढ
तत्र चातिथिं ॥ पूजयेत यथाशक्ति शयनासनभोजनैः ॥ एवमुद्वहतस्तात गार्हस्थ्यं भारमाहितं ॥ स्कंधे विधात्रा देवाश्च पितरश्च मह
र्षिभिः ॥ श्रेयोभिवर्षिणः सर्वे नवं स्यातिथिबांधवाः ॥ पशुपक्षिगणास्तत्प्रापेचान्ये सूक्ष्मकीटकाः ॥ गाथाश्चात्र महाभाग स्वयमत्रि
रगायत ॥ ताः शृणुष्व महाभाग गृहस्थाश्रमसंस्थिताः ॥ देवान्पितृंश्चातिथींश्च तद्वत्संपूज्य बांधवान् ॥ ज्ञामयोश्च गुरूंश्चैव गृह
स्थो विभवे सति ॥ श्वभ्यश्च श्वपचेभ्यश्च वयोभ्यश्चावपेद्भुवि ॥ वैश्वदेवं हि नामैतत्कुर्यात्सायं तथा दिने ॥ मांसमन्नं तथा शाकं गृहे य ॥राम॥
त्रापि साधितं ॥ न च तत्स्वयमश्नीयाद्विधिवत्तच्च निवेदयेत ॥ ४५ ॥ ॥ इति श्रीमार्कंडेयपुराणे मदालसोपा । ॥४७॥
॥ मदालसोवाच ॥ नित्यं नैमित्तिकं चैव नित्यनैमित्तिकं तथा ॥ गृहस्थस्य त्रिधा कमेतन्निशामय
स्याने ॥ १ ॥

47A

पुत्रक॥ पंचयज्ञाश्रितं नित्यं यदेतत्कथितं तव॥ नैमित्तिकं तथा चान्यत्पुत्रजन्मक्रियादिकं॥ नित्यनैमित्तिकं ज्ञेयं पर्वश्राद्धादि पंडितैः॥
तत्र नैमित्तिकं वक्ष्ये श्राद्धमाभ्युदयं तव॥ पुत्रजन्मनि यत्कार्यं जातकर्मसमं नरैः॥ विवाहादौ च कर्त्तव्यं सर्वं सम्यक्क्रमोदितं॥ पितरश्चा
त्र संपूज्या ख्याता नांदीमुखास्तु ये॥ पिंडाश्च दधिसम्मिश्रा न दद्याद्यवसमन्विताः॥ उदङ्मुखः प्राङ्मुखो वा यजमानः समाहि
तः॥ वैश्वदेवविहीनं तत्केचि[illegible]दिच्छंति मानवाः॥ युग्माश्चात्र द्विजाः कार्यास्तेषु ज्ञाश्च प्रदक्षिणं॥ एतन्नैमित्तिकं वृद्धौ तथान्य
च्चौर्ध्वदैहिकं॥ मृताहनि च कर्त्तव्यमेकोद्दिष्टं मृतस्य तत्॥ दैवहीनं तथैकार्घं तथैवैकपवित्रकं॥ आवाहनं न कर्त्तव्यमग्नौ
करणवर्जितं॥ प्रेतस्य पिंडमेकं च दद्यादुच्छिष्टसन्निधौ॥ तिलोदकं चापसव्यं तन्नामस्मरणान्वितं॥ अक्षय्यममुकस्येति स्थाने
विप्रविसर्जने॥ अभिरम्यतामिति ब्रूयाद्ब्रूयुस्तेऽभिरताः स्म ह॥ प्रतिमासं भवेदेतत्कार्यमावत्सरान्नरैः॥ अथ संवत्सरे पूर्णे यथात
त्क्रियते नरैः॥ सपिंडीकरणं कार्यं तस्यापि विधिरुच्यते॥ तच्चापि दैवरहितमेकार्घैकपवित्रकं॥ नैवाग्नौकरणं तत्र तथावाहन
वर्जितं॥ अपसव्यं च तत्रापि भोजयेदयुजो द्विजान्॥ विशेषस्तत्र चान्योऽस्ति प्रतिमासक्रियाधिकः॥ तं कथ्यमानमेकाग्रो व
दंत्यामे निशामय॥ तिलगंधोदकैर्युक्तं कुर्यात्पात्रचतुष्टयं॥ कुर्यात्पितृणां त्रितयमेकं प्रेतस्य पुत्रक॥ पात्रत्रये प्रेतपात्रम
र्घार्थं च प्रसेचयेत्॥ ये समाना इति जपन्पूर्ववच्छेषमाचरेत्॥ स्त्रीणामप्येवमेवैतदेकोद्दिष्टमुदाहृतं॥ सपिंडीकरणं तासां पु
त्राभावे [illegible] न विद्यते॥ प्रतिसंवत्सरं कार्यमेकोद्दिष्टं नरैः स्त्रियः॥ मृताहनि यथान्यायं नृणां यद्वदिहोदितं॥ पुत्रा
भावे सपिंडास्तु तदभावे सहोदकाः॥ मातुः सपिंडा ये च स्युर्येऽन्ये मातुः सहोदकाः॥ कुर्युरेवं विधिं सम्यगपुत्रस्य सुतासुताः॥ कु
र्युर्मातामहायैवं पुत्रिकातनयास्तथा॥ द्व्यामुष्यायणसंज्ञास्तु मातामहपितामहान्॥ पूजयेयुर्यथान्यायं श्राद्धैर्नैमित्ति
कैरपि॥ सर्वाभावे स्त्रियः कुर्युः स्वभर्तॄणाममंत्रकं॥ तदभावे च नृपतिः कारयेत्स्वकुटुंबवत्॥ तज्जातीयैर्नरैः सम्यग्दाहाद्याः

॥मा० कं०॥ सर्वेषामेव वर्णानां बांधवो नृपतिर्यतः॥ एतास्ते कथिता वत्स नित्या नैमित्तिकाः क्रियाः॥ क्रियां श्राद्धाश्रयामन्यां नित्यनैमित्तिकां
शृणु॥ दर्शे तत्र निमित्तं वै कालश्चेंदुक्षयात्मकः॥ नित्यता नियतः कालस्तस्य संसूचनात्मकः॥ २९॥ ॥ इति श्रीमा
॥४८॥ र्कंडेयपुराणे मदालसोपाख्याने २९॥ ॥ मदालसोवाच॥ सपिंडीकरणादूर्ध्वं पितुर्यः प्रपितामहः॥ स तु लेपभुजो
48 याति प्रलुप्तपितृपिंडकः॥ तेषामन्यश्चतुर्थो यः पुत्रलेपभुजो ऽभवत्॥ सोपि संबंधतो हीनमुपभोगं प्रपद्यते॥ पिता पितामहश्चै
व तथैव प्रपितामहः॥ पिंडसंबंधिनो ह्येते विज्ञेयाः पुरुषास्त्रयः॥ लेपसंबंधिनश्चान्ये पितामहपितामहात्॥ प्रभृत्युक्तास्त्रयस्ते
षां यजमानश्च सप्तमः॥ इत्येष मुनिभिः प्रोक्तः संबंधः साप्तपौरुषः॥ यजमानात्प्रभृत्यूर्ध्वमन्ये लेपभुजस्तथा॥ ततो ऽन्ये पूर्वजाः स्व
र्गे ये चान्ये नरकौकसः॥ ये च तिर्यक्त्वमापन्ना ये च भूतादिसंस्थिताः॥ तान्सर्वान्यजमानो वै श्राद्धं कुर्वन्यथाविधि॥ समाप्याय
यते वत्स येन येन शृणुष्व तत्॥ अन्नप्रकिरणं यत्तु मनुष्यैः क्रियते भुवि॥ तेन तृप्तिमुपायांति ये पिशाचत्वमागताः॥ यत्रांबु
स्नानवस्त्रोत्थं भूमौ पतति पुत्रक॥ तेन ये तरुतां प्राप्तास्तेषां तृप्तिः प्रजायते॥ यास्तु गंधांबुकणिकाः पतंति धरणीतले॥
ताभिराप्यायनं तेषां ये देवत्वं कुले गताः॥ उद्धृतेष्वथ पिंडेषु याश्चान्नकणिका भुवि॥ ताभिराप्यायनं तेषां ये तिर्यक्त्वं कुले ग
ताः॥ ये चादंताः कुले बालाः क्रियायोग्या ह्यसंस्कृताः॥ विपन्नास्ते तु विकिरसंमार्जनजलाशिनः॥ भुक्त्वा चाचमतां यच्च जलं य
च्चांघ्रिशोधने॥ ब्राह्मणानां तथैवान्ये तेन तृप्तिं प्रयांति वै॥ पिशाचत्वमनुप्राप्ताः कृमिकीटत्वमेव ये॥ एवं यो यजमानस्य यच्च
तेषां द्विजन्मनां॥ कश्चिज्जलान्नविक्षेपः शुचिरुच्छिष्ट एव वा॥ तेनान्येन कुले तत्र तत्तद्योन्यंतरं गताः॥ प्रयांत्याप्यायनं वत्स सम्य
क् श्राद्धक्रियावतां॥ अन्यायोपार्जितैरर्थैर्यच्छ्राद्धं क्रियते नरैः॥ तृप्यंति तेन चंडालपुल्कसाद्यासु योनिषु॥ एवमाप्यायनं वत्स ॥राम॥
बहूनामपि बांधवैः॥ श्राद्धं कुर्वद्भिरन्नांबुशाकैरपि हि जायते॥ तस्माच्छ्राद्धं नरो भक्त्या शाकैरपि यथाविधि॥ कुर्वीत कुर्वतः श्राद्धं कु ॥४८॥

दौहित्रं खड्गमित्याहुः रूपसंदुहितुस्तिलाः। कपिलाया घृतं चैव दौहित्रमिति कीर्तितं॥ अप्रसूतो भवेद्दर्भः प्रसूतः कुश उच्यते। अमूलः कुतपो ज्ञेयः पितृणां दत्त क्षयं॥ ४

द्वितीयप्रपाठकस्यास्य योऽनुवाकास्त्रिनाचिकेताः॥ तदध्यायी [illegible] मधुवाता इति ऋचाध्यायी त्रिमधुः॥ ब्रह्ममेतुमित्यादि त्रिसुपर्णः॥ ४

५४A २ वेदविहितं व्रताचरणपूर्वं सामाध्येता। यजुर्वेदे क्रतुव्रताचरणपूर्वमध्येता। ऋग्वेदे कदेशव्रताचरणपूर्वमध्येता ३

लोकश्चिन्नसीदति। तस्य कालानहं वक्ष्ये नित्यनैमित्तिकाम्यकान्। विधिना येन च नरैः क्रियते तन्निबोध मे। कार्यं श्राद्धममावास्यां मासि मासु

२ हेमंतशिशिरयोरूत्यापक्षिषु तु यत्क्षये। तथाष्टकासु च व्यवश्यमिष्टकालान्निबोध मे॥ विशिष्टब्राह्मणप्राप्तौ सूर्येन्दुग्रहणायने। विषुवद्दिवसे संक्रांतिव्यतिपाते युगत्र

कश्राद्धार्हद्रव्यसंपत्तौ तथा दुःस्वप्नदर्शने। जन्मर्क्षे ग्रहपीडासु श्राद्धं कुर्वीत चेच्छया॥ विशिष्टः श्रोत्रियो योगी वेदविज्ज्येष्ठसामगः॥ त्रि — मूर्धानं द्विजोत्तमः

णाचिकेतस्त्रिमधुस्त्रिसुपर्णः षडंगवित्। दौहित्रऋत्विक् जामाता स्वस्रीयः श्वशुरस्तथा॥ पंचाग्निकर्मनिष्ठश्च तपोनिष्ठोऽथ मा — अग्निहोत्रस्तु स्मार्तानुष्ठाय

तुलः। मातृपितृपरश्चैव शिष्यसंबंधिबांधवाः॥ एते द्विजोत्तमाः श्राद्धे समस्ताः केतनक्षमाः॥ अवकीर्णी तथा रोगी न्यूनांगो वातया

६ पुनःसंस्कृतः धिकः। योनिभूर्वृस्तथा काणः कुंडो गोलोऽप्यपुत्रकः। मित्रध्रुक् कुनखी कुष्ठी श्यावदंतो निराकृतिः॥ अभिशस्तस्तथा स्तेनः पिशु — क्षत्रः ५

परदोपवर्ती ७ नः सोमविक्रयी॥ कन्यादूषयिता वैद्यो गुरुपित्रोस्त्यागी [illegible]कः। भृतकाध्यापको मैत्रः परपुष्टापतिस्तथा। वेदोज्झोऽग्निसंत्यागी — सूतः ६

लेनाविक्रेकः ६ द्वृषलीपतिस्तथा। तथान्ये च विकर्मस्थाः वर्ज्याः पित्रेषु वै द्विजाः। निमंत्रयेत पूर्वेद्युः श्वो वा कान् द्विजसत्तमान्। देवे नियोगे पि — निरध्ययनः ६

उपेक्षकः ७ त्र्ये च तांस्तथैवोपकल्पयेत्। तैश्च संयमिभिर्भाव्यं यश्च श्राद्धं करिष्यति। श्राद्धं दत्वा च भुक्त्वा च यस्यां चामंत्रणं निशि। श्राद्धं द — सवेनासवेन

वेतनाध्यापकः ७ त्वा च भुक्त्वा च मैथुनं योऽनुगच्छति। पितरस्तयोस्तं मासं तस्मिन् रेतसि शेरते॥ गत्वा तु योषितं श्राद्धे यो भुंक्ते यस्तु गच्छति। रेतोमूत्र — पौनर्भवमितिकर्षः

कृताहारास्तं मासं पितरस्तयोः॥ तस्मात्तु प्रथमं कार्यं प्राज्ञेनोपमंत्रणं। अप्राप्तौ तद्दिने वापि हित्वा योषित्प्रसंगिनं। भिक्षार्थमा — लेनाविक्रेतृकः ६

स्त्रप्रापसपोषकः॥ ८ गतान्वापि काले संयमिनो यतीन्। भोजयेत्प्राणिपातादैः प्रसाद्य यतमानसः॥ यथैव शुक्लपक्षाद्वै पितॄणामसितः प्रियः। तथापु — पुंश्चलीपतिः ६

राह्णः स्वः वाह्णात् पितॄणामतिरिच्यते। संपूज्य स्वागतेनेतान् अभ्युपेतान् गृहे द्विजान्। पवित्रपाणिराचांतानासने सूपवेशयेत्॥

पितॄणामयुजः कामं युग्मान् दैवे द्विजोत्तमान्। एकैकं वापि पितॄणां च देवानां च स्वशक्तितः॥ तथा मातामहानां च तुल्यं वा वैश्वदेविकं॥

[illegible] मातामहानां चतुर्थं वा वैश्वदेविकं॥ पृथक्कृतयोस्तथा चान्ये केचिदिच्छंति मानवाः॥ प्राग्मुखान् देवसंकल्पान् पित्र्यानुदङ्मुखानु

पुनर्भोजनमध्वा वा भारसाधनमैथुनं॥ दानं प्रतिग्रहो होमः श्राद्धभुक् चाष्ट वर्जयेत्॥ दंतधावनतांबुलं स्निग्धस्नानमभोजनं॥

रत्यौषधं परान्नं च श्राद्धकृत् सप्त वर्जयेत्॥

॥मा० कै०॥ दक्षुखान् ॥ तथा मातामहानांच विधिरुक्तो मनीषिभिः ॥ विष्टरार्थे कुशान्दत्वा संपूज्यार्घादिना ततः ॥ पवित्रकाणि दत्वा च तेभ्योनु
ज्ञामवाप्य च ॥ कुर्यादावाहनं प्राज्ञो देवानां मंत्रतो द्विजः ॥ यवांभोभिस्ततश्चार्घं दत्वा वैश्वदेवकं ॥ गंधमाल्यांबुधूपं च दत्वास
॥४९॥ व्यकसदीपकं ॥ अपसव्यं पितॄणां च सर्वमेवोपकल्पयेत् ॥ दर्भांश्च द्विगुणान्कृत्वा तेभ्योनुज्ञामवाप्य च ॥ मंत्रपूर्वं पितॄणां च
कुर्यादावाहनं बुधः ॥ अपसव्यं तथाचार्घं यवार्थं च तथा तिलैः ॥ निःपादयेन्महाभाग पितॄणां प्रीणने रतः ॥ अग्निकार्यमनु
49 ज्ञातः कुरुष्वेति द्विजैस्ततः ॥ जुहुयाद्व्यंजनक्षारवर्ज्जमन्नं यथाविधि ॥ अग्नये कव्यवाहनाय स्वाहेति प्रथमाहुतिः ॥ सोमाय वै पितृ
मते स्वाहेत्यनाताभवेत् ॥ यमाय प्रेतपतये स्वाहेति तृतीयाहुतिः ॥ हुतावशिष्टं दद्याच्च भाजनेषु द्विजन्मनां ॥ भाजनालंभनं कृत्वा
दत्वा चान्नं यथाविधि ॥ यथासुखं जुषध्वं भो इति वाच्यमनिष्ठुरं ॥ भुंजीरंश्च ततस्तेपि तच्चित्ता मौनिनः सुखं ॥ यावत्तृप्ता भवेद
न्नेयावदश्नंति वाग्यताः ॥ पितरस्तावदश्नंति यावच्चोक्ता हविर्गुणाः ॥ यद्यदिष्टतमं तेषां तत्तदन्नमसत्वरः ॥ अक्रुध्यंश्च न
रोदद्यात्संस्तवेन प्रलोभयेत् ॥ रक्षोघ्नांश्च जपेन्मंत्रांस्तिलैश्च विकिरेन्महीं ॥ सिद्धार्थकैश्च रक्षार्थं श्राद्धं हि प्रचुरच्छलं ॥ तृप्ते
स्तृप्ताः स्थ तृप्ताः स्म इति वादिभिः ॥ अनुज्ञातो नरस्त्वन्नं विकिरेद्भुवि सर्वतः ॥ तद्वदाचमनार्थाय दद्याद्दंभः सकृत्सकृत् ॥
अनुज्ञां च ततः प्राप्य यतवाक्कायमानसः ॥ सतिलेन ततोन्नेन पिंडान्सर्वेण पुत्रक ॥ माषाः सर्वत्र वैग्राह्याः नग्राह्या अग्नि
पिंडयोः ॥ ब्राह्मणानां यथामधं तथा मासाग्निपिंडयोः ॥ पितॄनुद्दिश्य दर्भेषु दद्यादुच्छिष्टसन्निधौ ॥ पितृतीर्थेन तोयं च द
द्यात्तेभ्यः समाहितः ॥ पितॄन्संचिंत्य तद्भक्त्या यजमानोन्यथाक्रमं ॥ तद्वन्मातामहानां च दद्यात्पिंडान्यथाविधि ॥ गंधमाल्या ॥रामः॥
दिसंयुक्तान्दद्यादाचमनं ततः ॥ दत्वा च दक्षिणां शक्त्या सुस्वधास्त्विति तान्वदेत् ॥ तैश्च तुष्टैस्तथेत्युक्ते वाचयेद्वैश्वदेवि ॥४९॥
कान् ॥ प्रियंतामिति भद्रं वो विश्वेदेवा इतीरयेत् ॥ तथेति चोक्ते तैर्विप्रैः प्रार्थनीयास्तथाशिषः ॥ विसर्जयेत्प्रिया एयुक्त्वा प्रीति

माषवर्ज्जेन ॥ माषाः सर्वत्र वै ग्राह्या न ग्राह्या अग्निपिंडयोः
ब्राह्मणानां यथामघं तथा माषाग्निपिंडयोः ५

49A

पस्यचभक्तितः॥आहारमनुगच्छेच्चआगच्छेच्चानुमोदितः॥ततोनित्यक्रियांकुर्यात्भोजयेच्चतथातिथीं॥नित्यक्रियांपितृणां
चकेचिदिच्छंतिसत्तमाः॥नपितृणांतथैवान्येशेषंपूर्ववदाचरेत्॥पृथक्पाकेनचैवान्येकेचित्पूर्वंचपूर्ववत्॥ततस्तदन्नंभु
जीतसहभृत्यादिभिर्नरः॥एवंकुर्वीतधर्मज्ञःश्राद्धंपित्र्यंसमाहितः॥यथाचद्विजमुख्यानांपरितोषोभिजायते॥त्रीणिश्राद्धेप
वित्राणिदौहित्रंकुतपस्तिलाः॥वर्ज्यानिप्राहुरत्रविप्रेभ्यःकोपोध्वगमनंत्वरा॥राजतंचतथापात्रंशस्तंश्राद्धेषुपुत्रक॥रजतस्य
तथाकार्यंदर्शनंदानमेववा॥राजतेहिस्वधादुग्धापितृभिःश्रूयतेमही॥तस्मात्पितृणांरजतमभीष्टंप्रीतिवर्द्धनं॥ह१॥ ॥
इतिश्रीमार्कंडेयपुराणेश्राद्धकल्पेरपं॥३॥ ॥मदालसोवाच॥अतःपरंशृणुष्वेदंपुत्रभक्त्यामयाहृतं॥पितृणां
प्रीतयेयद्यद्वर्ज्यंयाप्रीतिकारकं॥मासंहविष्यमन्नस्यमांसैस्तृप्तिंयांतिपितामहाः॥त्रीन्मासान्हारिणमांसंविज्ञेयंपितृतृप्तये॥पु
ष्णातिचतुरोमासान्शशस्यपिशितंपितॄन्॥शाकुनंपंचवैमासान्षण्मासान्शूकरामिषं॥छागलंसप्तवैमासानैणेयंचा
ष्टमासिकं॥करोतितृप्तिंनववैरुरोर्मांसंनसंशयः॥गवयस्यतुमांसेनतृप्तिःस्याद्दशमासिकं॥तथैकादशमासांस्तुऔरभ्रंपितृ
तृप्तिदं॥संवत्सरंतथागव्यंपयःपायसमेववा॥वाध्रीणसामिषंलौहंकालशाकंतथामधु॥त्रिविधंत्विंद्रियक्षीणंश्वेतछद्दम
६ लोहोरक्तच्छाग जायति॥वाध्रीणसंतुतंप्राहुर्योज्ञियाःश्राद्धकर्मणि॥रक्तपादोरक्तशिराःरक्तचंचुर्विहंगमः॥कृष्णवर्णश्चतथापक्षीवाध्री
णसोपिसमतः॥दौहित्रंखड्गमित्याहुःपर्यंदुहितृस्तिलाः॥कपिलायाघृतंचैवदौहित्रमितिचोच्यते॥दुहित्रामिषमन्यच्चयु २
इतंततुकुलोद्भवैः॥अनंततांप्रयच्छंतितृप्तिंगौरांसुतस्तथा॥पितृणांनात्रसंदेहोगयाश्राद्धंचपुत्रक॥राजश्यामाकश्यामाकौ स्थूलस्तस्मो ३
तद्वच्चैवप्रसाधिका॥नीवाराःपौष्कराःश्चैवन्यानिपितृतृप्तये॥यवव्रीहीसगोधूमौतिलामुद्गाःससर्षपाः॥प्रियंगवःकोविदा
रानिष्पावाश्चात्रशोभनाः॥वर्ज्यामर्कटकाःश्राद्धेराजमाषास्तथाणवः॥विप्रुषिकामसूराश्चश्राद्धकर्मणिगर्हिताः॥लशुनंगृंज

लोंके२ ४ दुहिचानीतं

२ वर्षास्तु प्रतिसमनालनीर्गति मोदे किम्भूतं॥ [illegible] चांगलादिकूपजं वा अल्पगलाशयजं वा २ कुले गृहे तिष्ठतीति कुलस्थो मार्जारः॥ मणिकां धूलिम

नं चैव यवसं कुवियं मसूरकं ॥ करंभं यानि चान्यानि हीनानि रसवर्णतः ॥ गांधारिकाम लाक्षनि लवणान्यौषराणि च ॥ आरक्ताश्चैव नि स्यति मणि
र्यासाः प्रत्यक्षलवणानि च ॥ वर्ज्यान्येतानि वै श्राद्धे यच्च वाचा न शस्यते ॥ यच्चाप्युत्कोचतः प्राप्तं पतिताद्यदुपार्जितं ॥ अन्यायकन्या कासा मुषकः
शुल्कोत्थं द्रव्यं चात्र विगर्हितं ॥ दुर्गंधि फेनिलं चांबु तथैवाप्यतरोदकं ॥ न लभेद्यत्र गोतृप्तिं नक्तं यच्चाप्युपाहृतं ॥ यच्च सर्वाय तो ६
त्सृष्टं [illegible] त्ववियं ॥ यच्चाभोज्यनिपानजं ॥ तद्वर्ज्यं सलिलं तात सदैव पितृकर्मणि ॥ मार्गमाविकमौष्ट्रं च सर्वमेकशफं च यत्
॥मा० कं०॥
॥५०॥
50 त माहिषं चामरं चैव धेन्वा गोश्चाप्यनिर्दशं ॥ पित्र्यर्थं मे प्रयच्छ स्वेत्युक्त्वा यच्चाप्युपाहृतं ॥ वर्ज्यानीयं सदा सद्भिस्तत्पयः श्रा
द्धकर्मणि ॥ वर्ज्या जंतुमती रूक्षा क्षितिः प्लुष्टा तथाग्निना ॥ अनिष्टा दुष्टशब्दोग्रा दुर्गंधा श्राद्धकर्मणि ॥ कुलस्यमणिका सक्ष्व
१ मौष्कः उष्ट्रांग त्वाधमौष्ट्रकैलंघका ॥ कुलाधमो विप्रसहाश्च तथा वैरोगिणोस्यजाः ॥ नग्नाः पातकिनश्चैव घ्नंति दृष्ट्या पितृक्रियां ॥ अपुमा
१ लंघकोनित्य क्रियाहीनः नयो विद्धः श्वकुक्कुटो ग्रामसूकरः ॥ श्वा चैव हंति श्राद्धानि यातुधानाश्च दर्शनात् ॥ तस्मात्सुसंवृते दद्यात्तिलैश्च विकिरेन्महीं
एवं रक्षा भवेच्छ्राद्धे कृता तात तो भयोरपि ॥ शावसूतकसंस्पृष्टं दीर्घरोगिभिरेव च ॥ पतितैर्मलिनैश्चैव न पुष्णाति पितामहान्
॥ वर्जनीयं तथा श्राद्धे सदोदक्यादिदर्शनं ॥ चंडं मौंडं समाभाषाय जमाने न चादरात् ॥ केशकीटावपन्नं च तथा
श्वभिरवेक्षितं ॥ पूतिपर्युषितं चैव वार्ताकाभिषवास्तथा ॥ वर्जनीया हि वै श्राद्धे तथा वस्त्रानिलोहितं ॥ श्रद्धया पर
या दत्तं पितृणां नामगोत्रतः ॥ यदाहारास्तु ते जातास्तदाहारत्वमेति तत् ॥ तस्माच्छ्रद्धावता श्राद्धं यच्छंसं पितृकर्मणि ॥ त
थातच्चैव दातव्यं पितृणां तृप्तिमिच्छता ॥ योगिनश्च सदा श्राद्धे भोजनीया विपश्चिता ॥ योगाधारा हि पितरस्तस्मात्तान्
भोजयेत्सदा ॥ ब्राह्मणानां सहस्रस्य योगी त्वग्राशनी यदि ॥ यजमानं च भोक्तृंश्च नौरिवांभसि तारयेत् ॥ पितृगाथास्त ॥राम॥
देवात्र गीयंते ब्रह्मवादिभिः ॥ या गीताः पितृभिः पूर्वमैलस्यासन्महीपतेः ॥ कदा नः संततावग्र्यः कस्यचिद्भविता सुतः ॥ ॥५०॥

८ त्यक्ताग्निर्विषयः ८ पितृदेवयोः ९ लवणाशाकाः।

50A

॥२२॥ यो योगिभुक्तशेषान्नैर्भुवि पिंडं प्रदास्यति ॥ गयायामथवा पिंडं खड्गमांसं महाहविः ॥ कालशाकं तिलाढ्यं वा कृशरं मासतृ
प्तये ॥ वैश्वदेव्यं च सौम्यं च खड्गमांसं महाहविः ॥ विषाणवर्जं खड्गाद्यमास्यो दाशयामहे ॥ तथा वर्षात्रयोदश्यां मघासु च य
थाविधि ॥ मधुसर्पिःसमायुक्तं पायसं दक्षिणायने ॥ तस्मात्संपूजयेद्भक्त्या स्वपितॄन्यतमानसः ॥ कामानभीप्सन्सकलान्
पापाच्चात्मविमोचनं ॥ वसून्रुद्रांस्तथादित्यान्नक्षत्रग्रहतारकाः ॥ प्रीणयंति मनुष्याणां पितरः श्राद्धतर्पिताः ॥ आयुः प्र
ज्ञां धनं विद्यां स्वर्गं मोक्षं सुखानि च ॥ प्रयच्छंति तथा राज्यं पितरः श्राद्धतर्पिताः ॥ एतत्ते पुत्र कथितं श्राद्धकर्म यथोदितं ॥ का
म्यानां श्रूयतां वत्स श्राद्धानां तिथिकीर्तनं ॥ ३२ ॥ ॥ ॥ इति श्रीमार्कंडेयपुराणे श्राद्धकल्पे ॥ ३१ ॥ ॥ ॥
मदालसोवाच ॥ प्रतिपद्धनलाभाय द्वितीया द्विपदाप्रदा ॥ वरार्थिनी तृतीया तु चतुर्थी शत्रुनाशिनी ॥ श्रियं प्राप्नोति पंचम्यां
षष्ठ्यां पूज्यो भवेन्नरः ॥ गणाधिपत्यं सप्तम्यामष्टम्यां वृद्धिमुत्तमां ॥ स्त्रियो नवम्यां प्राप्नोति दशम्यां पूर्णकामतां ॥ वेदांस्त
थाप्नुयात्सर्वानेकादश्यां क्रियापरः ॥ द्वादश्यां जयलाभं च प्राप्नोति पितृपूजकः ॥ प्रजां वृद्धिं पशून्वृद्धिं स्वातंत्र्यं पुष्टिमुत्त
मां ॥ दीर्घमायुस्तथैश्वर्यं कुर्वाणस्तु त्रयोदशीं ॥ अवाप्नोति न संदेहः श्राद्धं श्रद्धापरो नरः ॥ यथासंभावितान्नेन श्रद्धासंप
त्समन्वितः ॥ विक्रस्या पितरो यस्य मृताः शस्त्रेण वा हताः ॥ तेन कार्यं चतुर्दश्यां तेषां तृप्तिमभीप्सता ॥ श्राद्धं कुर्वन्नमावास्यां
यत्नेन पुरुषः शुचिः ॥ सर्वान्कामानवाप्नोति स्वर्गं चानंत्यमश्नुते ॥ कृत्तिकासु पितॄनर्च्य स्वर्गं प्राप्नोति मानवः ॥ अपत्य
कामो रोहिण्यां सौम्ये तेजस्वितां लभेत् ॥ शौर्यमार्द्रासु चाप्नोति क्षेत्रादि च पुनर्वसौ ॥ पुष्टिं पुष्ये सदाभ्यर्च्य आश्लेषासु वरा
न्सुतान् ॥ मघासु स्वजने श्रेष्ठ्यं सौभाग्यं फाल्गुनीषु च ॥ प्रदानशीलो भवति सापत्यश्चोत्तरासु वै ॥ प्रयाति श्रेष्ठतां सत्सु हस्ते
श्राद्धप्रदो नरः ॥ रूपयुक्तस्तु चित्रासु तथापत्यान्यवाप्नुयात् ॥ वाणिज्यलाभदा स्वाती विशाखा पुत्रकामदा ॥ कुर्वतां चानुराधा

ऽपा

सद्गुर्वै च चक्रवर्तितां ॥ आधिपत्यं च ज्येष्ठासु मूले चारोग्यमुत्तमं ॥ आषाढासु यशः प्राप्तिरुत्तरासु विशोकतां ॥ श्रवणेन शुभांल्लोका
॥मा०पु०॥ न्धनिष्ठासु धनं महत् ॥ वेदवित्त्वमभिजिति भिषक्सिद्धिं च वारुणे ॥ अजाविकं प्रोष्ठपदे विद्यागावस्तथोत्तरे ॥ रेवतीषु तथा कुप्यम
॥५१॥ श्विनीषु तुरंगमान् ॥ आढ्यं कुर्वंस्तथाप्नोति भरणीष्वायुरुत्तमं ॥ तस्मात्काम्यानि कुर्वीत ऋक्षेष्वेतेषु तत्त्ववित् ॥ ३३ ॥ ॥
त इति श्रीमार्कंडेयपुराणे मदालसोपाख्याने श्राद्धकल्पः समाप्तः ॥ ३१ ॥ ॥ मदालसोवाच ॥ एवं पुत्र गृ
51 हस्थेन देवताः पितरस्तथा ॥ संपूज्या हव्यकव्याभ्यामन्नेनातिथिबांधवाः ॥ भूतानि भृत्यास्सकलाः पशुपक्षिपिपीलकाः ॥ भिक्ष
वोपयाचमानास्तु ये चान्ये वसता गृहे ॥ सदाचारवता तात साधुना गृहमेधिना ॥ पापं भुंक्ते समुल्लंघ्य नित्यनैमित्तिकीः क्रियाः ॥
अलर्क उवाच ॥ कथितं मे त्वया मातर्नित्यं नैमित्तिकं च यत् ॥ नित्यनैमित्तिकं चैव त्रिविधं कर्म पौरुषं ॥ सदाचारमहं श्रो
तुमिच्छामि कुलनंदनि ॥ किं कुर्वन्न सुखमाप्नोति परत्रेह च मानवः ॥ मदालसोवाच ॥ गृहस्थेन सदा कार्यमाचारपरिपालनं ॥ न
ह्याचारविहीनस्य सुखमत्र परत्र च ॥ यज्ञदानतपांसीह पुरुषस्य न भूतये ॥ भवंति यः सदाचारं समुल्लंघ्य प्रवर्त्तते ॥ दुराचा
रो हि पुरुषो नेहायुर्विंदते महत् ॥ कार्यो यत्नः सदाचारे आचारो हंत्यलक्षणं ॥ तस्य स्वरूपं वक्ष्यामि सदाचारस्य पुत्रक ॥ स
य माहितमनाः श्रुत्वा तथैव परिपालय ॥ त्रिवर्गसाधने यत्नः कर्तव्यो गृहमेधिना ॥ तत्संसिद्धौ गृहस्थस्य सिद्धिरत्र परत्र च ॥ पादे
नाप्यस्य पारत्र्यं कुर्यात्संचयमात्मवान् ॥ अर्द्धेन चात्मभरणं नित्यनैमित्तिकान्वितं ॥ पादं चात्मार्थमायस्य मूलभूतं विवर्द्धयेत् ॥
एवमाचरतः पुत्र अर्थसाफल्यमृच्छति ॥ तद्वत्पापनिषेधार्थं धर्मः कार्यो विपश्चिता ॥ परत्रार्थं तथा चान्यः काम्यात्रैव फलप्र ॥राम॥
दः ॥ प्रत्यवायभयात्कामस्तथान्यश्च विरोधवान् ॥ द्विधा कामो निगदितस्त्रिवर्गो याविरोधकृत् ॥ परस्परानुबंधांश्च सर्वानेतान्वि ॥५१॥
चिंतयेत् ॥ विपरीतानुबंधांश्च धर्मादीस्तान्शृणुष्व मे ॥ धर्मो धर्मानुबंधोर्थो धर्मो र्थोनर्थसाधकः ॥ उभाभ्यां च द्विधा कामस्तेन तौ वु

स्वभार्यामृतौ गमा तु

51A

द्विधापुनः॥ ब्राह्मे मुहूर्त्ते बुध्येत धर्मार्थौ चानुचिंतयेत॥ कायक्लेशांश्च तन्मूलान्वेदतत्वार्थमेव च॥ उषस्यावश्यकं कृत्वा कृतशौचः
समाहितः॥ समुत्थाय तथाचम्य प्राङ्मुखो नियतः शुचिः॥ पूर्वां संध्यां सनक्षत्रां पश्चिमां सदिवाकरां॥ उपासीत यथान्यायं नैनां जह्या
दनादपि॥ असत्प्रलापमनृतं वाक्पारुष्यं च वर्जयेत॥ असच्छास्त्रमसद्वादमसत्सेवां च पुत्रक॥ सायंप्रातस्तथा होमं कुर्वीत नियता
त्मवान्॥ नोदयास्तमये बिंबमुदीक्षेत विवस्वतः॥ केशप्रसाधनादर्शदर्शनं दंतधावनं॥ पूर्वाह्ण एव कुर्वीत देवतानां च तर्प
णं॥ ग्रामावसथतीर्थानां क्षेत्राणां चैव वर्त्मनि॥ न मूत्रमनुतिष्ठेत न कृष्टे न च गोव्रजे॥ नग्नां परस्त्रियं नेक्षेन्न पश्येदात्मनः शकृ
त॥ उदक्यादर्शनं स्पर्शो वर्ज्यं संभाषणं तथा॥ नाप्सु मूत्रं पुरीषं वा मैथुनं वा समाचरेत॥ नाधितिष्ठेच्छकृन्मूत्रकेशभस्मकपालिकाः
तुषांगारास्थिचर्माणि रज्जुवस्त्रादिकानि च॥ नाधितिष्ठेत्तथा प्राज्ञः पथि पश्वालिवासुवि॥ पितृदेवमनुष्याणां भूतानां चत
ध्यार्चनं॥ कृत्वा विभवतः पश्चाद्गृहस्थो भोक्तुमिच्छति॥ उदङ्मुखः प्राङ्मुखो वा स्वाचांतो वाग्यतः शुचिः॥ भुंजीतान्नं चैश्चित्तो ह्यंत त८
र्जानुः सदा नरः॥ उपघातमृते दोषं नान्नस्यादीरयेद्बुधः॥ प्रत्यक्षं लवणं वर्ज्यमन्नमुच्छिष्टमेव च॥ न गच्छन्न तु तिष्ठन्नैव विण्मू सचाछ्य
त्रोत्सर्गमात्मवान्॥ कुर्वीत नैव माचामेन्न किंचिदपि भक्षयेत॥ उच्छिष्टो नालपेत्किंचित्स्वाध्यायं च विवर्जयेत॥ गां ब्राह्मणानलं
न चैवाग्निं स्वमूर्द्धानं न संस्पृशेत॥ न पश्येत रविं नेंदुं न नक्षत्राणि कामतः॥ भिन्नासनं तथा शय्यां भाजनं च विवर्जयेत॥ गुरूणामा
सनं देयं प्रत्युत्थानादिसत्कृतं॥ अनुकूलं तथालापमभिवादनपूर्वकं॥ तथानुगमनं कुर्यात्प्रतिकूलं न संलपेत॥ नैकवस्त्रश्च
भुंजीत न कुर्याद्देवतार्चनं॥ न चार्चयेद्द्विजानग्नौ होमं कुर्वीत बुद्धिमान्॥ न स्नायीत नरो नग्नो न शयीत कदाचन॥ न पाणिभ्यामु
भाभ्यां च कंडूयेदात्मनः शिरः॥ न चाभीक्ष्णं शिरःस्नानं कार्यं निष्कारणं नरैः॥ शिरःस्नातश्च तैलेन नांगं किंचिदुपस्पृशेत॥ अनध्या
येषु सर्वेषु स्वाध्यायं च विवर्जयेत॥ ब्राह्मणानलगोसूर्यान्न मेहेत कदाचन॥ उदङ्मुखो दिवा रात्रौ उत्सर्गं दक्षिणामुखः॥ आबा

धा॰सुययाकामंकुर्यान्मूत्रपुरीषयोः॥दुष्कृतंनगुरोर्ब्रूयात्क्रुद्धंचैनंप्रसादयेत्॥परिवादंनशृणुयादन्येषामपिकुर्वतां॥पंथादे
॥ना॰पु॰॥ योब्राह्मणानांराज्ञोदुःखातुरस्यच॥विद्याधिकस्यगुर्विण्याभारार्त्तस्यमहीयसः॥मूकांधबधिराणांचमत्तस्योन्मत्तकस्यच॥पुंश्च
॥पत्र॥ ल्याःकृतवैरस्यबालस्यपतितस्यच॥देवालयंचैत्यतरुंतथैवचचतुष्पथं॥विद्याधिकंगुरुंचैवबुधःकुर्यात्प्रदक्षिणं॥उपानद्वस्त्रमा
ल्यानिधृतान्यन्यैर्नधारयेत्॥उपवीतमलंकारंकरकंचैववर्जयेत्॥प्रशस्तानिचसर्वाणिकुर्यात्दीर्घजीविना॥चतुर्दश्यांतथा
52 ष्टम्यांपंचदश्यांचपर्वसु॥तैलाभ्यंगंतथाभोगंयोषितश्चविवर्जयेत्॥नक्षिप्तवाहुजंघश्चप्राज्ञस्तिष्ठेत्कदाचन॥नचापिविक्षिपे
त्पादौपादंपादेननाक्रमेत्॥मर्माभिघातमाक्रोशंपैशुन्यंचविवर्जयेत्॥दंभाभिमानतैक्ष्ण्यानिनकुर्वीतविचक्षणः॥मूर्खोन्मत्तव्य
सनिनोविरूपान्मायिनस्तथा॥न्यूनांगानतिरिक्तांगान्नोपहासेनदूषयेत्॥परस्यदंडंनोद्यच्छेत्शिक्षार्थंपुत्रशिष्ययोः॥तद्वन्नोपवि
शेत्प्राज्ञःपादेनाकृष्यचासनं॥संयावंकृसरांमांसंनात्मार्थमुपसाधयेत्॥सायंप्रातश्चभोक्तव्यंकृत्वाचातिथिपूजनं॥उदङ्मुखः
प्राङ्मुखोवावाग्यतोदंतधावनं॥कुर्वीतसततंवत्सवर्जयेद्दुर्ज्यवीरुधं॥नोदक्शिराःस्वपेज्जातुनचप्रत्यक्शिराःपुनः॥शिरस्यग
स्त्यमाधायशयीतायपुरंदरं॥नतुगंधवतीष्वप्सुस्नायीतनमहानिशि॥उपरागेपरंस्नानंमृतेदिनमुदाहृतं॥अपमृज्यान्नचस्ना
तोगात्राण्यंबरपाणिभिः॥नचापिधूनयेत्केशान्वाससीनचनिर्धुनेत्॥नानुलेपनमादद्यादस्नातःस्नातकःक्वचित्॥नचापि
रक्तवासाःस्यात्चित्रासितधरोपिवा॥नचकुर्याद्विपर्यासंवाससोर्नैचभूषणयोः॥वर्ज्यंचविदशंवस्त्रमत्यंतोपहतंचयत्॥केश
कीटावपन्नंचतथाश्वभिरेक्षितं॥अवलीढंविलीढंचसारोद्धारणदूषितं॥एष्टमांसंतथामांसंवर्ज्यंमांसंचसूत्रकं॥नभक्षयीत ॥राम॥
सततंप्रत्यक्षलवणानिच॥वर्ज्यंचिरोषितंपुत्रभक्ष्यंपर्युषितंचयत्॥पिष्टशाकेक्षुपयसांविकारान्नयनंदन॥तथामांसविका ॥पत्र॥
राश्चैववर्ज्योनाश्चिरोषितः॥उदयास्तमनेभानोःशयनंचविवर्जयेत्॥नास्नातोनैवसंविष्टोनचैवान्यमनानरः॥नचैवशयनेनोर्व्यां

मुपविश्येनराद्ववत॥ नचैकवस्त्रोनवदन्नेस्यतामप्रमादवा॥ भुंजीतपुरुषःस्नातःसायंप्रातर्यथाविधि॥ परदारानगंतव्याःपुरुषेण
विपश्चिता॥ इष्टापूर्त्तायुषांहंत्रीपरदारागतिर्नृणां॥ नहीदृशमनायुष्यंलोकेकिंचनविद्यते॥ यादृशंपुरुषस्येहपरदाराभिमर्षणं
देवताचाग्निकार्याणितथागुर्वभिवादनं॥ कुर्वीतसम्यगाचम्यतद्वदन्नभुजिक्रियां॥ अफेनशब्दगंधाभिरद्भिरच्छाभिरादरात॥ आ
चमेत्पुनश्चपुण्याभिःप्राङ्मुखोवाप्युदङ्मुखः॥ द्विः॥ अंतर्जलादावसथाद्वल्मीकान्मूषकस्थलात॥ कृतशौचावशिष्टाश्चवर्जये
त्पंचवैमृदः॥ प्रक्षाल्यहस्तौपादौचसम्यगभ्युक्ष्यसमाहितः॥ अंतर्जानुःसदाचामेत्त्रिश्चतुर्वापिबेदपः॥ परिमृज्यद्विरास्यंचखा
निमूर्द्धानमेवच॥ सम्यगाचम्यतोयेनक्रियाःकुर्वीतवैशुचिः॥ देवतानामृषीणांचपितॄणांचैवयत्नतः॥ समाहितमनाभूत्वा
कुर्वीतसततंनरः॥ क्षुतेवलीढेवांतेचतथानिष्ठीवनादिषु॥ कुर्यादाचमनंस्पर्शंगोपृष्ठस्यार्कदर्शनं॥ क्षुत्वानिष्ठीव्यवासव्य
या परिधार्यंचमेद्बुधः॥ कुर्वीतालभनंवापिदक्षिणश्रवणस्यवै॥ यथाविभवतोह्येतत्पूर्वाभावेततःपरं॥ नविद्यमानेपूर्वोक्ते उ
त्तरप्राप्तिरिष्यति॥ नकुर्याद्दंतसंघर्षंनासनोदेहताडनं॥ स्वप्नाध्यापनभोज्यानिसंध्यायेश्चविवर्जयेत॥ संध्ययोर्मैथुनंवा
पितथाप्रस्नानमेवच॥ सर्वाह्णेतातदेवानांमनुष्याणांचमध्यमे॥ मानोतथापरान्हेचकुर्वीतपितृसज्जनं॥ शिरःस्नानश्चकुर्वी
तदैवंपित्र्यमथापिवा॥ प्राङ्मुखोदङ्मुखोवापिश्मश्रुकर्मचकारयेत॥ व्यंगांविवर्जयेत्कन्यांअकुलांचापिरोगिणीं॥ विरक्तां
पिंगलांचैववाचालांसर्वदूषितां॥ अव्यंगांगींसौम्यनाम्नींसर्वलक्षणलक्षितां॥ तादृशीमुद्वहेत्कन्यांश्रेयस्कामोनरःसदा
उद्वहेत्पितृमातृभ्यांसप्तमींपंचमींतथा॥ रक्षेद्दारांस्त्यजेदीर्ष्यांतथाह्निस्वप्नमैथुने॥ परोपतापकंकर्मजंतुपीडांचवर्ज
येत॥ उदक्याःसर्ववर्णानांवर्ज्यारात्रिचतुष्टयं॥ स्त्रीजन्मपरिहारार्थंपंचमींचापिवर्जयेत॥ ततःषष्ठ्यांव्रजेद्रात्रौशेषयुग्मासु
पुत्रक॥ पर्वाणिवर्ज्जयेन्नित्यमस्तुकालेऽपियोषितः॥ तस्मान्निसंगनरोगकेज्येष्ठयुग्मासुपुत्रकः॥ युग्मासुपुत्राजायंतेस्त्रियोयु

२५६म मीस्मशानैः

रमासुरातिषु॥ विधर्मिणोह्नि यर्वीरथ्यं संध्याकाले च षंढकाः॥ सुरकर्मणि वांते च स्त्रीसंभोगे च पुत्रक॥ स्नायीत चैलवान्प्रा
॥मा० पु०॥ ज्ञः कटभूमिमुपेत्य च॥ देववेदद्विजातीनां साधुसभ्यमहात्मनां॥ गुरोः पतिव्रतानां च तथा यज्वितपस्विनां॥ परिवादं न कुर्वीत
॥५३॥ परिहासं च पुत्रक॥ कुर्वेतामविनीतानां न श्रोतव्यं कथंचन॥ देवपित्र्यातिथेयाश्च क्रियाः कुर्वीत वै बुधः॥ स्वाध्यायं वापि कु
र्वीत यथाशक्त्या सदा द्विजः॥ नोत्कृष्टशय्यासन योनोवकृष्टस्य चारुहेत॥ धवलांबरसंवीतः सितपुष्पविभूषितः॥ न चामं
63 गल्यचेष्टः स्यान्न चामंगल्यवाग्भवेत॥ नोद्धतोन्मत्तमत्तैश्च नाविनीतैश्च पंडितः॥ गच्छेत मैत्रीं नाशीलैर्न च चौर्यादिदूषितैः॥
न चातिव्ययशीलैश्च न लुब्धैर्नातिवैरिभिः॥ नानृतकैस्तथा क्रूरैः सहासीत कदाचन॥ न बंधकीभिर्नान्येन बंधकीपति
भिस्तथा॥ साईं न बलिभिः कार्यं न निस्वैर्न च निंदितैः॥ न सर्वशंकिभिर्नित्यं न च दैवपरैर्नरैः॥ कुर्वीत साधुभिर्मैत्रीं सदाचा
रावलंबिभिः॥ प्राज्ञैरपिशुनैः शक्तैः कर्मण्युद्योगभागिभिः॥ वेदविद्याव्रतस्नातैः सहासीत सदा बुधः॥ ध॥ सुहृद्दीक्षित
नृपालस्नातकश्वशुरैः सह॥ ऋत्विगादीन्षडर्ध्यार्हानर्चयेच्च गृहागतान्॥ यथाविभवतः पुत्र प्रतिसंवत्सरोषितान्॥ अर्चे
येन्मधुपर्केण यथाकालमतं द्विजः॥ तिष्ठेच्च शासने तेषां श्रेयस्कामो हि जोत्तमः॥ न तान्परिवदेत्प्राज्ञः श्रात्कुष्टश्चापि ते सह॥ स
म्यक्गृहार्चनं कृत्वा यथास्थानमनुक्रमात॥ संपूजयेत्ततो वह्निं दद्याच्चैवाहुतीः क्रमात॥ प्रथमां ब्रह्मणे दद्यात्प्रजानां पतये
ततः॥ तृतीयां चैव गृह्येभ्यः कश्यपाय तथा परां॥ ततोनुमतये दत्वा दद्याद्गृहबलिं ततः॥ पूर्वं ख्यातो मया यस्ते नित्यकर्मक्रिया ॥राम॥
विधिः॥ वैश्वदेवं ततः कुर्यादिमांस्तत्र बलीन्शृणु॥ यथास्थानं विभागं तु देवानुद्दिश्य वै पृथक॥ पर्जन्यापोधरित्रीणां दद्या ॥५३॥
त्तु मणिके त्रयं॥ ततो धातुर्विधातुश्च दद्यात द्वारि गृहस्य तु॥ वायवे च प्रतिदिशं दिग्भ्यः प्राच्यादितः क्रमात॥ ब्रह्मणे त्वंतरिक्षा
यसूर्याय च यथाक्रमं॥ विश्वेभ्यश्चैव देवेभ्यः विश्वभूतेभ्य एव च॥ उषसे भूतपतये दद्याच्चोत्तरतः स्तत॥ स्वधा नम इति सुक्त्वा

पितृभ्यश्चापि दक्षिणे ॥ कृत्वापसव्यं वायव्यां यश्चैतत्तं तु भाजनं ॥ अन्नाद्यं शेषमिश्रं वै तोयं दद्याद्यथाविधि ॥ ततोन्नाग्रं समुद्धृत्य हंत
कारोपकल्पनं ॥ यथाविधि यथान्यायं ब्राह्मणायोपपादयेत् ॥ कुर्यात्कर्माणि तीर्थेन स्वेन स्वेन यथाविधि ॥ देवादीनां तथा कु
र्याद्ब्राह्मेणाचमनक्रियां ॥ अंगुष्ठोत्तरतो रेखा पाणेर्यो दक्षिणस्य च ॥ एतद्ब्राह्ममिति ख्यातं तीर्थमाचमनाय तत् ॥ तर्जन्यंगुष्ठयोरंतः पि
त्र्यं तीर्थमुदाहृतं ॥ पितॄणां तेन तोयादि दद्यान्नांदीमुखान्विना ॥ अंगुल्यग्रे तथा दैवं तेन दिव्यक्रियाविधिः ॥ तीर्थं कनिष्ठिकामूले का
यं तेन प्रजापतेः ॥ एवमेभिः सदा तीर्थैर्देवानां पितृभिः सह ॥ सदा कार्याणि कुर्वीत नान्यतीर्थेन कर्हिचित् ॥ ब्राह्मेणाचमनं कार्यं
पित्र्यं पित्र्येण सर्वदा ॥ दैवतीर्थेन देवानां प्राजापत्यं निजेन च ॥ नांदीमुखानां कुर्वीत प्राज्ञः पिंडोदकक्रियां ॥ प्राजापत्येन तीर्थेन य
च्च किंचित्प्रदीयते ॥ युगपज्जलमग्निं च बिभृयान्न विचक्षणः ॥ गुरुदेवान्प्रति तथा न च पादौ प्रसारयेत् ॥ नाचक्षीत धयंतीं गां ज
लं नांजलिना पिबेत् ॥ शौचकालेषु सर्वेषु गुरुष्वल्पेषु वा पुनः ॥ न विलंबेत शौचार्थं मुखेनानलं धमेत् ॥ पुत्र तत्र न वास्तव्यं य
यत्र नास्ति चतुष्टयं ॥ ऋणप्रदाता वैद्यश्च श्रोत्रियः सजला नदी ॥ जितामित्रो नृपो यत्र बलवान्धर्मतत्परः ॥ तत्र नित्यं वसेत्प्राज्ञः
कुतः कुनृपतौ सुखं ॥ पौराः सुसंहिता यत्र सततं न्यायवर्तिनः ॥ यत्रामत्सरिणो लोकास्तत्र वासः सुखोदयः ॥११॥ यस्मिन्कृ
षीवला राष्ट्रे प्रायशो नातिभोगिनः ॥ यत्रौषधान्यशेषाणि वसेत्तत्र विचक्षणः ॥ तत्र पुत्र न वस्तव्यं यत्रैतास्त्रितयं सदा ॥ जि
गीषुः पूर्ववैरी च जनश्च सततोत्सवः ॥ वसेन्नित्यं सुशीलेषु सहवासिषु पंडितः ॥ यत्राप्रधृष्यो नृपतिर्यत्र सस्यसदा मही ॥
सुहृद्दीक्षितभूपालस्नातकश्वशुरास्तथा ॥ जामातृऋत्विगाचार्यान्न चेयीत गृहागतान् ॥ यज्वा दाता व्यसनिनो वसेत्तत्र सु
बुद्धिमान् ॥ देवाग्निपितृभक्तश्च सदाचाररतो नृपः ॥ इत्येतत्कथितं सर्वं मयाते हितकाम्यया ॥ अतः परं शृणुष्व त्वं वर्ज्याव
र्ज्यप्रतिक्रियां ॥ भोज्यमन्नं पर्युषितं स्नेहाक्तं चिरसंस्थितं ॥ अस्नेहाश्चापि गोधूमयवगोरसविक्रियाः ॥ शशकः कच्छपो गो

॥मा०शु०॥ पासेधामस्योयसहस्त्रकाः॥ भक्ष्या ह्येते सदा वर्ज्यौ ग्रामसूकरकुक्कुटौ॥ पितृदेवादिशेषं च श्राद्धे ब्राह्मणकाम्यया॥ प्रोक्षितं
चैव धार्थं च खादन्मांसं न दोषभाक्॥ शंखाश्मस्वर्णरूप्याणां रज्जूनामथ वाससां॥ शाकमूलफलानां च तथा विदलचर्मणां॥
॥५४॥ मणिरत्नप्रवालानां तथा मुक्ताफलस्य च॥ पात्राणां चमसानां च वारिणा शुद्धिरिष्यते॥ ताम्रायःकांस्यरैत्यानां त्रपुणः सीसकस्य स
च शौचं यथार्थं कर्त्तव्यं क्षाराम्लोदकवारिणा॥ तथायसानां तोयेन भस्मनाः संघर्षणेन च॥ सस्नेहानां च पात्राणां शुद्धिरुष्णेन
54 वारिणा॥ स्फ्ये धान्याजिनानां च मुसलोलूखलस्य च॥ संहतानां च वस्त्राणां प्रोक्षणं संचयस्य च॥ वल्कलानामशेषाणां शु
द्धिरम्लेन वारिणा॥ तृणकाष्ठोपलानां च प्रोक्षणं शुद्धिरिष्यते॥ कौशेयाविकयोरूषैः कुतपानामरिष्टकैः॥ आविकानां समस्ता
नां केशानां चापि मेध्यता॥ सिद्धार्थानां च कल्केन तिलकल्केन वा पुनः॥ सांशुनातातपवितीडपघातवतां सदा॥ तथा कार्पासिका
नां च विशुद्धिर्जलभस्मना॥ नागदंतास्थिशृंगाणां तक्षणाच्छुद्धिरिष्यते॥ पुनःपाकेन भांडानां पार्थिवानां च मेध्यता॥ शुचि
मेध्यं कारुहस्तः पण्यं यच्च प्रसारितं॥ योषिन्मुखं बालमुखं मासवृद्धसुखं तथा॥ रथ्यागतमविज्ञातं दासवर्गेण यत्कृतं॥ वा
क्प्रशस्तं चिरानीतमनेकांतरितं लघु॥ प्रातिप्रभूतं बालस्य वृद्धातुर्विचेष्टितं॥ कर्मान्तागारशालाश्च स्तनंधयसुताः स्त्रियः॥ र
शुचयस्तथैवायः स्रवंतो गंधबुद्बुदाः॥ रश्मिभिर्विशुध्यते कालदाहमार्जनेन गोक्रमेण॥ लिप्याद्दुल्लेखनात्सेकाद्भूमसंमा
र्जनाचेनात॥ केशकीटावपन्नेन गोघ्रातमक्षिकान्वितं॥ भस्मदं तु नस्त्रवातप्रक्षेपमव्यं विशुद्ध्यति॥ औदुंबराणामम्लेन क्षा ओदुंबरं ताम्रमुच्यते
रेण त्रपुसीसयोः॥ भस्माद्भिश्च कांस्यानां शुद्धिः प्लावो द्रवस्य च॥ अमेध्याक्तस्य मृत्तोयैर्गंधापहरणेन च॥ अन्येषां चैव तद्र ॥रामा॥
व्यमेव लेपगंधापहारतः॥ शुचि मांसं तु चंडालक्रव्याद्यैर्विनिपातितं॥ रथ्यागतं तु चैलादि शुचि गोतृप्तिदं पयः॥ रजोग्निरश्वो गौश्छा ॥५४॥
यारश्मयः पवनो मही॥ विप्रुषो मक्षिकाद्याश्च दुष्टसंगाददोषिणः॥ अजाश्वं मुखतो मेध्यं न गोर्वत्सस्य चाननं॥ मातुः प्रस्रवने

54A

मेध्यं शकुनेः फलपातने ॥ आसनं शयनं यानं पथिनावौ तृणानि च ॥ सोमसूर्यांशुपवनैः शुध्यंते तानि पण्यवत् ॥ रथ्योपसर्पणे स्ना
नेक्षुत्पानाद्यैकर्मसु ॥ आचमेत यथान्यायं वासो विपरिधाय च ॥ स्पृष्टानामप्यसंस्पृश्यैर्विरथ्याकर्दमांभसा ॥ पक्केष्टकचिता
नांच मेध्यता वायुसंगमात् ॥ प्रभूतोपहतादन्नादग्रमुद्धृत्य संत्यजेत् ॥ शेषस्य प्रोक्षणं कुर्यादाचम्याद्भिस्तथा मृदा ॥ उपवास
स्त्रिरात्रं तु दुष्टभक्ष्याशिनो भवेत् ॥ अज्ञाते ज्ञातपूर्वे च तद्दोषापगमेन तु ॥ उदक्याशावनग्नांश्च सूतिकांतावसायिनः ॥ स्पृष्ट्वा
स्नायीत शौचार्थं तथैव मृतहारिणः ॥ नारं स्पृष्ट्वास्थि सस्नेहं स्नातः शुध्यति मानवः ॥ आचम्यैव तु निःस्नेहं गामालभ्यार्कमीक्ष्य
वा ॥ न लंघयेत्तथैवासृक्ष्ठीवनोद्वर्तनानि च ॥ गृहादुच्छिष्टविण्मूत्रपादांभांसि क्षिपेद्बहिः ॥ पंच पिंडाननुद्धृत्य न स्नायात्प
रवारिणि ॥ स्नायीत देवखातेषु सरोहृदसरित्सु च ॥ नोद्यानादौ विकालेषु प्राज्ञस्तिष्ठेत्कदाचन ॥ नालपेज्जनविद्विष्टान्वी
रहीनां तथा स्त्रियं ॥ देवतापितृसच्छास्त्रयज्ञसत्रादिनिंदकैः ॥ कृत्वा तु स्पर्शनालापं शुध्यतेर्कावलोकनात् ॥ अवलोक्य त
थोदक्यामंत्यजं पतितं शवं ॥ विधर्मिसूतिकाषंढविवस्त्रांता ॥ वसायिनः मृतनिर्यातकांश्चैव परदाररतांश्च ये ॥ एतदेव हि २७
कर्तव्यं प्राज्ञैः शोधनमात्मनः ॥ अभोज्यसूतिकाषंढमार्जाराखुश्वकुक्कुटान् ॥ पतितापविद्धचंडालमृतहारांश्च धर्मवित् ॥
संस्पृश्य शुध्यति स्नानादुदक्याग्राममूकरौ ॥ तद्वच्च सूतिकाशौचदूषितौ पुरुषावपि ॥ अलर्क उवाच ॥ भवत्या कीर्ति
ताभोज्या य एते सूतिकादयः ॥ अमीषां श्रोतुमिच्छामि तत्त्वतो लक्षणानि हा ॥ मदालसोवाच ॥ ब्राह्मणी ब्रह्मणश्चैव या
वरोपत्यमागतौ ॥ तावुभौ सूतिकासुक्तौ तयोरन्नं विगर्हितं ॥ न जुहोत्युचिते काले नास्नाति न च स्नाति च ॥ पितृदेवाचैनां द्वि
नः षंढः स परिगीयते ॥ दंभार्थे यजते यश्च तप्यते च तपस्तथा ॥ न परमार्थमित्युक्तः समार्जारः प्रकीर्तितः ॥ विभवे सति
नैवात्ति न ददाति जुहोति च ॥ तमाहुराखुं सस्यान्नं सुत्का कृच्छ्रेण शुध्यति ॥ सभागतानां मर्त्यानां यश्च पातं समाश्रयेत् ॥

यश्चब्राह्मणत्यक्तःकिल्बिषासीनराधमः॥ नित्यस्यकर्मणोहानिंनकुर्वीतकदाचन॥ ५

तमाहुःकुकुटंदेवास्तस्याप्यन्नंविगर्हितं॥ स्वधर्मंयःसमुच्छिद्यपरधर्मंसमाश्रये॥ अनापदिसविद्वद्भिःपतितःपरिकीर्त्तितः॥ दे
॥मा०सु०॥ वत्यागीगुरुत्यागीगुरुयत्नुमुक्तस्तथा॥ गोब्राह्मणस्त्रीवधकृद्धयविदुःप्रचक्ष्यते॥ येषांकुलेनवेदोस्तिनशास्त्रंनैवच
॥५५॥ व्रतं॥ तेनग्नाःकीर्त्तिताःसद्भिस्तेषामन्नंविगर्हितं॥ आशाकर्त्तुस्वदात्ताचदातुश्चप्रतिषेधकः॥ शरणागतंयस्त्यजतिसचाण्डा
लोधमोनरः॥ येबांधवैःपरित्यक्ताःसाधुभिर्ब्राह्मणैरपि॥ कुंडाशीयश्चतस्यान्नंभुक्त्वाचांद्रायणंचरेत्॥ योनित्यकर्मणोहानिंकु
55 र्यान्नैमित्तिकस्यच॥ भुक्त्वान्नंतस्यशुद्ध्येतत्रिरात्रोपोषितोनरः॥ यस्यचानुदिनंहानिंनकुर्वीतकदाचन॥ तस्यत्वकरणेबंधःके
वलंमृतजन्मसु॥ दशाहंब्राह्मणस्तिष्ठेद्दानहोमादिवर्जितः॥ क्षत्रियोद्वादशाहंचवैश्योमासार्द्धमेवच॥ शूद्रस्तुमासमासीतनित्यक
र्मविवर्जितः॥ अरोगस्त्वहादिविधिनानित्यकर्मविधिस्मृतः॥ पादकृच्छ्रंततःकृत्वागांदत्वाशुद्धिमाप्नुयात्॥ ततःपरंनित्यकर्मकु
र्युःसर्वेयथोदितं॥ प्रेतायसलिलंदेयंबहिर्गत्वाचगोत्रजैः॥ प्रथमेह्नितृतीयेवासप्तमेनवमेतथा॥ तस्यास्थिसंचयःकार्योच
तुर्थेगोत्रिकेदिने॥ ऊर्द्धंसंचयनात्तेषामंगस्पर्शोविधीयते॥ सोदकैस्तुक्रियाःसर्वाःकार्याःसंचयनात्परं॥ स्पर्शएवसपिंडानां
मृजाहानिस्तयोर्मयोः॥ अन्नक्षमिक्षयाशस्त्रतोयाहिधनवह्निषु॥ विषप्रयातादिमृतेप्रायोनाशकयोरपि॥ बालेदेशांतरस्थे
चतथाप्रव्रजितेमृते॥ सद्यःशौचमथान्येष्वन्यथामुक्तमशौचकं॥ नैवार्द्धदेहिकंकार्यंनचकार्योदकक्रिया॥ गर्भस्रावेतदे
वोक्तंपूर्णेकालेनशुद्ध्यति॥ ब्राह्मणानामहोरात्रंक्षत्रियाणांदिनत्रये॥ षड्रात्रमपिवैश्यानांशूद्राणांद्वादशाधिकं॥ सपिं
डानांसपिंडस्तुमृतोन्यस्मिन्मृते॥ यदि॥ पूर्वाशौचसमाख्यातैःकार्यातस्यादिनैःक्रियाः॥ एषएवविधिर्दृष्टोजन्मन्यपिहि ॥राम॥
सूतके॥ सपिंडानांसपिंडेषुयथावत्सोदकेषुच॥ जातेसुतेपितुःस्नानंसचैलस्यविधीयते॥ मृतेचसर्वबंधूनामित्याह ॥५५॥
भगवान्मनुः॥ तत्रापियदिवान्यस्मिन्जातेजायेतवापरः॥ तत्रापिशुद्धिरुदितापूर्वजन्मादितैर्दिनैः॥ दशाद्वादशमासा

55A

र्द्धमाससंख्यागतैर्दिनैः॥९९॥ स्वाः स्वाः कर्मक्रियाः कुर्युः सर्ववर्णा यथाविधि॥ प्रेतमुद्दिश्य कर्त्तव्यमेकोद्दिष्टं ततः परं॥ सपिंडीक
करणं चैव कार्यमावत्सरान्नरैः॥ ततः पितृत्वमापन्ने दर्शपौर्णादिभिस्त्रिभिः॥ प्रीणनं तस्य कर्त्तव्यं यथाश्रुतिनिदर्शनं॥ दा
नानि चैव देयानि ब्राह्मणेभ्यो मनीषिभिः॥ मद्यदिष्टतमं लोके यच्चास्य दयितं गृहे॥ तत्तद्गुणवते देयं तद्देवास्य मिच्छता॥ प्रेतं प्रेत
समुद्दिश्य भूमिधेन्वादिकं स्वकं॥ दद्याद्येनास्य संप्रीताः पितरः संति पुत्रकं॥ दशैर्णस्तु दिवसैः स्पृष्ट्वा सलिलं वाहनायुधं॥ ब्रा
ह्मणाः सलिलं स्पृष्ट्वा क्षत्रियो वाहनायुधं॥ वैश्यः प्रतोदं रश्मींश्च यष्टिं शुद्धिमवाप्नुयात्॥ प्रतोदं दंडौ च तथा सर्वेव वर्णाः कृत
क्रियाः॥ स्वधर्मवर्णनिर्दिष्टमुपादानं तथा क्रियाः॥ कुर्युः समस्ताः स्वचयः परत्रेह च भूतिदाः॥ अध्येतव्या त्रयी विप्रा भवित
व्यं विपश्चिता॥ धर्मतो धनमाहार्यं यष्टव्यं चापि यत्नतः॥ यच्चापि कुर्वतो नात्मा जुगुप्सामेति पुत्रक॥ तत्कर्त्तव्यमशंकेन यन्न
गोप्यं महाजने॥ एवमाचरतो वत्स पुरुषस्य गृहे सतः॥ धर्मार्थकामसंप्राप्त्या परत्रेह च शोभनं॥१०३॥ ॥ ॥
इति श्री मार्कंडेयपुराणे सदाचाराध्यायः॥३०॥ ॥ पुत्र उवाच॥ स एवमनुशास्तः सन्मात्रा संप्राप्तयौवनः॥
ऋतुध्वजसुतश्चक्रे सम्यग्दारपरिग्रहं॥ पुत्रांश्चोत्पादयामास यज्ञैश्चायजत प्रभुः॥ पितुश्च सर्वकालेषु चकाराज्ञानुपा
लनं॥ ततः कालेन महता संप्राप्य चरमं वयः॥ चक्रेभिषेकं पुत्रस्य तत्र राजा ऋतुध्वजः॥ भार्यया सह धर्मात्मा यियासुस्तप
सेवनं॥ अवतीर्णो महीरक्षो महाभागो महातपाः॥ मदालसा च तनयं प्राहेदं पश्चिमं वचः॥ कामोपभोगसंसर्गप्रसाल
नकरहिता॥ मदालसोवाच॥ यदा दुःखमसह्यं ते प्रियबंधुवियोगजं॥ स्कंधावारोद्भवं वापि वित्तनाशसंभवं॥ भविता कु
र्वीतो राज्यं गृहधर्मावलंबिनः॥ दुःखायतनभूतो हि ममत्वालंबनो गृही॥ तदास्मात्पुत्र निष्कृष्य मद्दत्तादंगुलीयकात्॥ वा
च्यं ते शासनं यत्र सूक्ष्माक्षरनिवेशितं॥ पुत्र उवाच॥ इत्युक्त्वा प्रददौ तस्मै सौवर्णं चांगुलीयकं॥ आशिषश्चापि या योग्याः पु

रुषस्य गृहे सतः॥ ततः कुवलयाश्वोसौ सा च देवी मदालसा॥ पुत्राय दत्वा तद्राज्यं तपसे काननं गतौ॥ सोप्यलर्को यथान्यायं पु
॥मा०पु०॥ त्रवन्मुदिताः प्रजाः॥ धर्मतः पालयामास स्वे स्वे कर्मण्यवस्थिताः॥ १४ दुष्टेषु दंडं शिष्टेषु सम्यक् च परिपालनं॥ कुर्वन्परां
॥५६॥ मुदां लेभे इयाज च महामखैः॥ प्रजायंत सुतास्तस्य महाबलपराक्रमाः॥ धर्मात्मानो महात्मानो विमार्गपरिपंथिनः॥
चकार सोर्थं धर्मेण धर्ममर्थेन चात्मवान्॥ तयोश्चैवाविरोधेन बुभुजे विषयानपि॥ एवं बहूनि वर्षाणि तस्य पालय
56 तो महीं॥ धर्मार्थकामसक्तस्य जग्मुरेकमहर्यथा॥ वैराग्यं नास्य संजज्ञे भुंजतो विषयान्प्रियान्॥ न चाप्यलमभूत्तस्य भ्र
न्तोर्थान्युपार्जने॥ तं तथा भोगसंसर्गप्रमत्तमजितेंद्रियं॥ सुबाहुर्नाम शुश्राव भ्राता तस्य वने चरन्॥ तं बुबोधयिषुः सो
यश्चिरं ध्यात्वा महामतिः॥ तद्वैरिसंश्रयं तस्य श्रेयो मन्ये तभूपतेः॥ ततः स काशिभूपालमुदीर्णबलवाहनं॥ स्वराज्यप्रा
प्तये गत्वा दृढहृशाः शरणं कृतौ॥ सोपि चक्रे बलोद्योगमलर्कं प्रति पार्थिवः॥ दूतं च प्रेषयामास राज्यमस्मै प्रदीयतां॥ सोपि
नैच्छत्तदादातुमाज्ञापूर्वं स्वधर्मवित्॥ प्रत्युवाच स तं दूतमलर्कः काशिभूभृतः॥ मामेवाभ्येत्य हार्देन याच्यतां राज्यमग्र
जः॥ नाक्रांत्या संप्रदास्यामि भयेनाल्पमपि क्षितेः॥ सुबाहुरपि नो याच्ञां चकार मतिमांस्तदा॥ न धर्मः क्षत्रियस्येति मा
नी वीर्यधनो हि सः॥ ततः समस्तसैन्येन काशिराट्परिवारितः॥ आक्रांतुमभ्यगाद्राष्ट्रमलर्कस्य महीपतेः॥ अनंतरैश्च संश्ले
षमभ्येत्य तदनंतरं॥ तेषामन्येतरैर्भृत्यैः समाक्रम्यानयद्वशं॥ अपीडयच्च सामंतान्तस्य राष्ट्रं ततो बलात्॥ तस्य दुर्गांतपा
लांश्च चक्रे वाटविकान्वशे॥ कांश्चिच्चोपप्रदानेन कांश्चिद्भेदेन पार्थिवान्॥ साम्नैवान्यान्वशं निन्ये निभृतास्तस्य ये भवन्॥ ॥राम॥
ततः सोल्पबलो राजा परचक्रावपीडितः॥ कोशक्षयमवाप्याथ्यैः पुररोधं तथारिणा॥ इत्थं संपीड्यमानस्तु क्षीणकोशो दि ॥५६॥
ने दिने॥ विषादमागात्परमं व्याकुलत्वं च चेतसः॥ आर्तिं च परमां प्राप्य तत्स्मारांगुलीयकं॥ यदुद्दिश्य पुरा प्राह माता सा

ससद्भिः सह कर्त्तव्यः संतः संगस्य भेषजं॥ कामः सर्वात्मना हेयो हातुं चेच्छक्यते न सः॥२

56A

स्यमदालसा॥ ततः स्नात्वा शुचिर्भूत्वा वाचयित्वा द्विजोत्तमान्॥ निष्क्रम्य शासनं तस्माद्ददर्शैणस्फुटाक्षरं॥ तत्रैतद्धि लिखितं मात्रा वा
चयामास पार्थिवः॥ प्रकाशपुलकांगोसौ प्रहर्षोत्फुल्लमानसः॥ संगः सर्वात्मना त्याज्यः स चेत्त्यक्तुं न शक्यते न सः॥ मुमुक्षांप्र
तिकर्त्तव्यः सैव तस्यापि भेषजं॥ वाचयित्वा च बहुशो नृणां श्रेयः कथं त्विति॥ मुमुक्षयेति निश्चित्य सा च सत्संगतो यतः॥ ततः
सत्साधुसंपर्कं चिंतयन्पृथिवीपतिः॥ दत्तात्रेयं महासनमगच्छत्सुरमार्त्तिमान्॥ तं समेत्य महात्मानमकल्मषमसंगिनं॥
प्रणिपत्याभिसंपूज्य यथान्यायमभाषत॥ ब्रह्मन्कुरु प्रसादं मे शरण्य शरणार्थिनः॥ दुःखापहारं कुरु मे दुःखार्त्तस्याति
कामिनः॥ दत्तात्रेय उवाच॥ दुःखापहारमद्यैव करोमि तव पार्थिव॥ सत्यं ब्रूहि किमर्थं ते दुःखं च पृथिवीपते॥ कस्य त्वं क
स्य वा दुःखं तत्त्वमेव विचार्यतां॥ अंगान्यंगी निरंगं च सर्वांगानि विचिंतय॥ पुत्र उवाच॥ इत्युक्तश्चिंतयामास स राजा तेन
धीमता॥ त्रिविधस्यापि दुःखस्य स्थानमात्मानमेव च॥ स विमृश्य चिरं राजा पुनः पुनरुदारधीः॥ आत्मानमात्मना धी
रः प्रहस्येदमुवाच ह॥ नाहमुर्वी न सलिलं न ज्योतिरनिलो न च॥ नाकाशं किंतु शारीरं समेत्य सुखमश्नुते॥ ऊनातिरिक्ततो
याति पंचकेस्मिन्सुखासुखं॥ यदि स्यान्मम किं नु स्यादन्यस्थेपि हि तन्मयि॥ नित्यप्रभूतसंभावे न नाधिक्यान्नतोन्नते॥
तथा च ममतास्यक्ते विशेषो नोपलभ्यते॥ तन्मात्रावस्थिते सूक्ष्मे तत्तोयांशेन पश्यतः॥ तथैव भूतसंभावं शरीरे किं सु
खासुखं॥ मनस्यवस्थितं दुःखं सुखं वा मानसं च यत्॥ यतस्ततो न मे दुःखं सुखं न च ह वा मनः॥ नाहंकारो न च मनो बुद्धि
र्नाहं यतस्ततः॥ अतः करणजं दुःखं पारक्यं मम तत्कथं॥ नाहं शरीरं न मनो यतोहं पृथक्शरीरान्मनसस्तथाहं॥ तत्संतु चे
तस्यथवापि देहे सुखानि दुःखानि च किं मम॥ मात्र॥ राजस्य वांछां कुरुते ग्रजोस्य देहस्य चेत्संचमयः सराशिः॥ गुणप्रवृत्त्या
मम किं तु तत्र तत्स्थः स चाहं च शरीरतोन्यः॥ न यस्य हस्तादिकमस्य शेषमासन्नमासन्नतरादिहांग॥ कस्य तस्य नागा

॥मा॰पु॰॥ श्वरयादिकोशेः स्वल्पोपि संबंधइहास्य पुंसः। तस्मान्नमेरिपुर्नचमेस्तिदुःखं नमेसुखं नोपि पुरं च कोशः॥ नचाश्वनागादि
बलं च तस्य चिंता च मे नास्ति न चापि तस्य॥ यथा घटीकुंभकमंडलुस्थमाकाशमेकं बहुधा स च काशियोहमन्येषु देहेषु
॥५७॥ शरीरभेदैः॥ ५७॥ ॥इति श्रीमार्कंडेयपुराणे दत्तात्रेयीये ३८॥ ॥सुत्र उवाच॥ द
त्तात्रेयं ततो विप्रं प्रणिपत्य स पार्थिवः॥ प्रत्युवाच महात्मानं प्रश्रयावनतो वचः॥ सम्यक्प्रपश्यतो ब्रह्मन्मम दुःखं
57 न किंचन॥ असम्यग्दर्शिनो मग्नाः सर्वे दुःखार्णवे॥ यस्मिन्यस्मिन्ममत्वेन संविस्तुसः प्रजायते॥ ततस्ततः समा
दाय दुःखान्येव प्रयच्छति॥ मार्जारभक्षिते दुःखं यादृशं गृहकुक्कुटे॥ न तादृङ्ममताशून्ये कलविंके थ मूषके
सोहं न दुःखी न सुखी यतोहं प्रकृतेः परः॥ योभूताभिभवो भूतैः सुखदुःखात्मको हि सः॥ दत्तात्रेय उवाच॥ एवमे
तन्नरव्याघ्र यथैतद्व्याहृतं त्वया॥ ममेति मूलं दुःखस्य न ममेति च निर्वृतेः॥ मत्प्रश्नादेव ते ज्ञानमुत्पन्नमिदमुत्त
मं॥ ममेति प्रत्ययो येन क्षिप्तः शाल्मलितूलवत्॥ अहमित्यंकुरोत्पन्नो ममेति स्कंधवान्महान्॥ गृहक्षेत्रादिशाखः
श्च पुत्रदारादिपल्लवः॥ धनधान्यमहापत्रो नैककालं प्रवर्द्धितः॥ पुण्यापुण्यप्रसुप्पश्च सुखासुखमहाफलः॥ अप
वर्गपथव्यापी मूढसंपर्कसेचनः॥ विविसान्वंगमालाढ्यो हृदिजातो महातरुः॥ संसाराध्वपरिश्रांता येत छायां समाश्रिताः॥ भ्रां
तिज्ञानसुखाधीनास्तेषामात्यंतिकं कुतः॥ यैः सत्संगमयाश्मशाणशितेन ममतातरुः॥ छिन्नो विद्याकुठारेण ते गत्वा तेन वर्त्मना
प्राप्य ब्रह्मवनं शीतं नीरजस्कमकंटकं॥ प्राप्नुवंति परां प्राज्ञा निर्वृत्तिं वृत्तिवर्जिताः॥ भूतेंद्रियमयं स्थूलं न त्वं राजन्न चाप्य ॥राम॥
हं॥ न तन्मात्रमयावावां चानैवांतःकरणात्मको॥ किं न पश्यसि राजेंद्र प्रधानमिदमावयोः॥ यतः परो हि क्षेत्रज्ञात्संघातोयं ॥५७॥
गुणात्मकः॥ मशकोदुंबरेषीकामुंजमत्स्याम्भसां यथा॥ एकत्वेपि पृथग्भावस्तथा क्षेत्रात्मनोरपि॥ अलर्क उवाच॥

भगवंस्त्वत्प्रसादेन ममाविर्भूतमुत्तमं॥ ज्ञानं प्रधानचिद्व्यक्तिविविक्तिकरमीदृशं॥ किंत्वत्र विषयाक्रांते स्थैर्ये वत्वं न चेतसि॥
न चापि वेद्मि मुच्येय कथं प्रकृतिबंधनात्॥ कथं न भूयां भूयश्च कथं निर्गुणतामियां॥ कथं च ब्रह्मणैक्यं व्रजेयं शाश्वते न वै॥ तन्मे यो
गं तथा ब्रह्मन् प्रणताया भियाचते॥ सम्यग्वद महाप्राज्ञ सत्संगो ह्युपकृन्नृणां॥ ३८॥ ॥ इति श्रीमार्कंडेयपुराणे द
त्तात्रेयीये ३८॥ ॥ दत्तात्रेय उवाच॥ शरीरं मंडले द्रष्टा गुरुज्ञानं ततो हि यत्॥ ज्ञानपूर्वो वियोगो योऽज्ञानेन स
ह योगिनः॥ सा मुक्तिर्ब्रह्मणा चैक्यमनैक्यं प्राकृतैर्गुणैः॥ योगे च शक्तिर्विरुद्धा येन श्रेयः परं भवेत्॥ मुक्तिर्योगात्तथा योगः संतत्यागो भ
हीयते॥ सा मंदेरोषोद्भवं दुःखं ममत्वासक्तचेतसां॥ तस्मात्संगं प्रयत्नेन मुमुक्षुः संत्यजेन्नरः॥ संगाभावान्ममेत्यस्याः ख्यातेर्हानिः
प्रजायते॥ निर्ममत्वं सुखायैव वैराग्याद्दोषदर्शनात्॥ ज्ञानादेव च वैराग्यं ज्ञानं वैराग्यपूर्वकं॥ एकमेव परं ब्रह्म सत्स्वमन्यत् वि
कल्प्यते॥ कामो मोहस्तथा शोक एकत्वमनुपश्यति॥ तद्गृहं यत्र वसति तद्भोज्यं येन जीवति॥ यन्मुक्तये तदेवोक्तं ज्ञानम
ज्ञानमन्यथा॥ उपयोगेन पुण्यानामपुण्यानां पार्थिव॥ कर्त्तव्यानां च नित्यानामकामकरणात्तथा॥ असंचयादपूर्वस्य
क्षयात्पूर्वार्जितस्य च॥ कर्मणो मोक्षमाप्नोति वैपरीत्येन तस्य तु॥ कर्मणा बंधमाप्नोति शरीरं च पुनः पुनः॥ एतत्ते कथितं
ज्ञानं योगं चेमं निबोध मे॥ यं प्राप्य ब्रह्मणा योगी शाश्वतान्यतां व्रजेत्॥ प्रागात्मात्मना जेयो योगिनां स हि दुर्जयः॥
कुर्वीत तज्जये यत्नं तस्योपायं शृणुष्व मे॥ प्राणायामैर्दहेद्दोषान्धारणाभिश्च किल्बिषं॥ प्रत्याहारेण संसर्गान्
ध्यानेनानीश्वरान्गुणान्॥ यथा पर्वतधातूनां ध्मातानां दह्यते मलं॥ तथेंद्रियकृता दोषा दह्यंते प्राणनिग्रहात्॥
प्रथमं साधनं कुर्यात्प्राणायामस्य योगवित्॥ प्राणापाननिरोधस्तु प्राणायाम उदाहृतः॥ लघुमध्योत्तरीयाख्यः प्राणाया
मस्त्रिधोदितः॥ तस्य प्रमाणं वक्ष्यामि तदलर्क शृणुष्व मे॥ लघुर्द्वादशमात्रस्तु द्विगुणः स तु मध्यमः॥ त्रिगुणाभिश्च मात्रा

र न

॥मा॰पु॰॥

॥५८॥

58

मिरुक्तशीय उदाहृतः॥ निमेषोन्मेषणे मात्रा तालो लघ्वक्षरो मतः॥ प्राणायामस्य संख्यार्थं स्मृतो द्वादशमात्रकः॥ प्रथमेन ज
येत्स्वेदं मध्यमेन तु वेपथुं॥ विषादं हि तृतीयेन जयेद्दोषाननुक्रमात्॥ मृदुत्वं सेव्यमानास्तु सिंहशार्दूलकुंजराः॥ य
था यांति तथा प्राणो वश्यो भवति योगिनः॥ वश्यं मत्तं यथेच्छातो नागं नयति हस्तिपः॥ तथैव योगी छंदेन प्राणं नय
ति साधितं॥ यथा हि साधितः सिंहो मृगान्हंति न मानुषान्॥ तद्वन्निषिद्धः पवनः किल्बिषं न नृणां तनुं॥ तस्माद्युक्तः सदा
योगी प्राणायामपरो भवेत्॥ श्रूयतां मुक्तिफलदे तस्यावस्थाचतुष्टयं॥ ध्वस्तिः प्राप्तिस्तथा संवित्प्रसादश्च महीपते॥
स्वरूपं शृणु चैतेषां कथ्यमानमनुक्रमात्॥ कर्मणामिष्टदुष्टानां जायते फलसंचयः॥ चेतसो विकषायत्वं यत्र सा ध्वस्तिरु
च्यते॥ ऐहिकामुष्मिकान्कामाल्लोभमोहात्मकांस्तथा॥ निरुध्यास्ते सदा योगी प्राप्तिः सा सार्वकामिकी॥ अतीतानागतानर्था
न्विप्रकृष्टतिरोहितान्॥ विजानातींदुसूर्यर्क्षग्रहाणां ज्ञानसंपदा॥ तुल्यप्रभावस्तु यदा योगी प्राप्नोति संविदं॥ तदा संविदि स
ति ख्याता प्राणायामस्य सा स्थितिः॥ यांति प्रसादं येनास्य मनः पंच च वायवः॥ इंद्रियाणींद्रियार्थाश्च प्रसाद इति स्मृतः॥
शृणुष्व च महीपाल प्राणायामस्य लक्षणं॥ युंजतश्च यथायोगं यादृग्विधृतमानसं॥ पद्ममर्द्धासनं वापि तथा स्वस्तिक
रा मासनं॥ आस्थाय योगी युंजीत कृत्वा च प्रणवं हृदि॥ समः समासनो भूत्वा संहृत्य चरणावुभौ॥ संवृतास्यस्तथा चोरू सम्य
ग्विष्टभ्य वाग्यतः॥ पार्ष्णिभ्यां लिंगवृषणावस्पृशन्प्रयतः स्थितः॥ किंचिदनामितशिरा दंतैर्दंतान्नसंस्पृशन्॥ संपश्य
न्नासिकाग्रं स्वं दिशश्चानवलोकयन्॥ रजसा तमसो वृत्तिं सत्वेन रजसस्तथा॥ संछाद्य निर्मले सत्वे स्थितो युंजीत योग ॥रामः॥
वित्॥ इंद्रियाणींद्रियार्थेभ्यः प्राणादीन्मन एव च॥ निगृह्य समवायेन प्रत्याहारमुपक्रमेत्॥ यस्तु प्रत्याहरेत्कामान्कू ॥५८॥
र्मोंगानीव सर्वशः॥ सदात्मरतिरेकस्थः पश्यत्यात्मानमात्मनि॥ स बाह्याभ्यंतरं शौचं निष्पाद्याकंठनाभितः॥ पूरयित्वा बु

धोदेहं प्रत्याहारमुपक्रमेत् ॥ प्राणायामाद् शद्धौ च धारणा सामिधीयते ॥ द्वे धारणे स्मृते योगे योगिभिस्तत्त्वदृष्टिभिः ॥ तथैव योगयुक्तस्य
योगिनो नियतात्मनः ॥ सर्वे दोषाः प्रणश्यंति स्वस्थश्चैवोपजायते ॥ वीक्षते च परं ब्रह्म प्राकृतांश्च गुणान्पृथक् ॥ व्योमादि परमाणूंश्च तत्
यात्मानमकल्मषं ॥ इत्थं योगी जिताहारः प्राणायामपरायणः ॥ जितां जितां शनैर्भूमिमारोहेत यथा गृहं ॥ दोषान्व्याधिं तथा मोहमा
क्रांतां भूरनिर्जितां ॥ विवर्द्धयति नारोहेत्तस्माद्भूमिमनिर्जितां ॥ प्राणानामुपसंरोधात्प्राणायाम इति स्मृतः ॥ धारणेत्युच्यते चेयं
धार्यते यन्मनो नया ॥ शब्दादिभ्यः प्रवृत्तानि यदक्षाणि जितात्मभिः ॥ प्रत्याह्रियंते योगेन प्रत्याहारस्ततः स्मृतः ॥ उपायश्चात्र कथि
तो योगिभिः परमर्षिभिः ॥ येन व्याधादयो दोषा न जायंते हि योगिनः ॥ यथा तोयार्थिनस्तोयं यंत्रनालादिभिः शनैः ॥ आपिबेयुस्तथा वायुं
पिबेद्योगी जितश्रमः ॥ प्राक्प्राण्यां हृदये चाथ तृतीया च तथोरसि ॥ कंठे मुखे नासिकाग्रे नेत्रभ्रूमध्यमूर्द्धसु ॥ किंचित्तस्मात्परस्मिंश्च धा
रणा परमा स्मृता ॥ दशैता धारणाः प्राप्य प्राप्नोत्यक्षरसाम्यतां ॥ नाध्मातः क्षुधितः श्रांतो न च व्याकुलचेतनः ॥ युंजीत योगं राजेंद्र
योगी सिद्ध्यर्थमात्मनः ॥ नातिशीते न चैवोष्णे न द्वंद्वे नानिलात्मके ॥ काले चैतेषु युंजीत न योगं ध्यानतत्परः ॥ सशब्दाग्निजलाभ्यासे जी
र्णे गोष्ठे चतुष्पथे ॥ शुष्कपर्णचये नद्यां श्मशाने च सरीसृपे ॥ सभये कूपतीरे वा चैत्यवल्मीकसंचये ॥ देशेष्वेतेषु तत्त्वज्ञो योगाभ्या
सं विवर्जयेत् ॥ सत्त्वस्यानुपपत्तौ च देशकालविवर्जितौ ॥ न सतो दर्शनं योगे तस्मात्तं परिवर्जयेत् ॥ देशानेताननादृत्य मूढत्वाद्यो यु ब
नक्ति वै ॥ विघ्नाय तस्य ये दोषा जायंते तन्निबोध मे ॥ बाधिर्यं जडता लोपः स्मृतेर्मूकत्वमंधता ॥ ज्वरश्च जायते सद्यस्तद्वदज्ञानयोगि
नः ॥ प्रमादाद्योगिनो दोषा यद्येते स्युश्चिकित्सितं ॥ तेषां नाशाय कर्त्तव्यं योगिनां तन्निबोध मे ॥ स्निग्धां यवागूमत्युष्णां भुक्त्वा तत्रैव धा
रयेत् ॥ वातगुल्मप्रशांत्यर्थं गुदावर्त्ते ततो दधि ॥ यवागूर्वापि पवने वायुग्रंथीन्परिक्षिपेत् ॥ तद्वत्कंपे महाशैलं स्थिरं मनसि धारये
त् ॥ विघाते वचसो वापि बाधिर्ये श्रवणेंद्रिये ॥ तथैवाम्लफलं ध्यायेत्तृष्णार्त्तो रसनेंद्रिये ॥ यस्मिन्यस्मिन्रुजा देहे तस्मिंस्तदुपकारि

त्

ते॥ धारयेद्वारणामुष्मे शीतां शीते विदाहिनीं॥ कालं शिरसि संस्थाप्य काष्ठं काष्ठेन ताडयेत्॥ लुप्तस्मृतेः स्मृतिः सद्यो योगिनस्तेन जा
मा॰ पु॰ यते॥ द्यावापृथिव्यो वाय्वग्नी व्यापिनावनुधारयेत्॥ अमानुषात्सत्वजाता द्वाधास्थिति चिकित्सितं॥ अमानुषं सत्वमंतर्यो
॥ ५९ ॥ गिनं प्रविशेद्यदि॥ वाय्वग्नी धारणाचैवं देहसंस्थं विनिर्दहेत्॥ एवं सर्वात्मना कार्या रक्षा योगविदान्नृप॥ धर्मार्थकाममोक्षा
59 णां शरीरं साधनं यतः॥ प्रवृत्तिलक्षणाख्याता योगिनो विस्मयात्तथा॥ विज्ञानं विलयं याति तस्माज्ज्ञेयाः प्रवृत्तयः॥ अलोल्य
मारोग्यमनिष्ठुरत्वं गंधः शुभो मूत्रपुरीषमल्पं॥ कांतिः प्रसादः स्वरसौम्यता च योगप्रवृत्तेः प्रथमं हि चिह्नं॥ अनुरागं जनो
याति परोक्षे गुणकीर्त्तनं॥ न विभ्यति च सत्वानि सिद्धेर्लक्षणमुत्तमं॥ शीतोष्णादिभिरत्युग्रैर्यस्य बाधा न जायते॥ न भीतिमेति
चान्येभ्यस्तस्य सिद्धिरुपस्थिता॥ ६४॥ ॥ इति श्रीमार्कंडेयपुराणे योगचिकित्सानाम॥ ३९॥ ॥ ॥
दत्तात्रेय उवाच॥ उपसर्गाः प्रवर्त्तंते दृष्टे ह्यात्मनि योगिनः॥ ये तांस्ते संप्रवक्ष्यामि समासेन निबोध मे॥ काम्याः क्रियास्त
था कामान्मानुषानभिवांछति॥ स्त्रियो दानफलं विद्यां मायां कुप्यं धनादिकं॥ देवत्वममरेशत्वं रसायनवयक्रियां॥ मरुत्प्र
पतनं यज्ञं जलाग्निविशनं तथा॥ श्राद्धानां शकदानानां फलानि नियमांस्तथा॥ तथोपवासात्पूर्त्ताच्च देवताभ्यर्चनादपि॥ ते
भ्यस्तेभ्यश्च कर्मभ्य उपसृष्टोभिवांछति॥ चित्तमित्थं प्रवर्त्तंतं यत्नाद्योगी निवर्त्तयेत्॥ ब्रह्मसंगि मनः कुर्वन्नुपसर्गात्प्रमुच्य
ते॥ उपसर्गैर्जितैरेभिरुपसर्गास्ततः पुनः॥ योगिनः संप्रवर्त्तंते सत्वराजसतामसाः॥ प्रतिभः श्रावणो दैवो भ्रमावर्त्तौ तथाप ॥ राम ॥
रौ॥ पंचैते योगिनो योगविघ्नाय कटुकोदयाः॥ वेदार्थकाव्यशास्त्रार्थो विद्याशिल्पान्यनेकशः॥ प्रतिभांति यतस्तानि प्राति ॥ ५९ ॥
भः स तु योगिनः॥ शब्दार्थानखिलान्वेत्ति शब्दं गृह्णाति चैव यत्॥ योजनानां सहस्रेभ्यः श्रावणः सोभिधीयते॥ अष्टौ वदातु दृश्यं
ते समंतादेवयोनयः॥ उपसर्गं तमप्याहुर्दैवमुन्मत्तवद्बुधाः॥ भ्राम्यते यं निरालंबं मनो दोषेण योगिनः॥ समस्ताधारविभ्रंशाद्

59A

मः सपरिकीर्त्तितः ॥ आवर्त्तेऽभ्रवतो यस्य ज्ञानावर्त्तो यदाकुलः ॥ चित्तनाशकृदावर्त्त उपसर्गः स उच्यते ॥ एतैर्नाशितयोगास्तु सकला
देवयोनयः ॥ उपसर्गैर्महाघोरैरावर्त्यंते पुनः पुनः ॥ प्रावृत्य कंबलं शुक्लं योगी तस्मिन्मनोमयं ॥ चिंतयेत्परमं ब्रह्म कृत्वा तत्प्रवणं म
नः ॥ योगयुक्तः सदा योगी लघ्वाहारो जितेंद्रियः ॥ सूक्ष्मास्तु धारणाः सप्त भूराद्या मूर्ध्नि धारयेत् ॥ धरित्रीं धारयन्योगी तत्सौख्यं
प्रतिपद्यते ॥ आत्मानं मन्यते चोर्वीं तद्गंधं च जहाति सः ॥ तथैवाप्सु रसं सूक्ष्मं तद्वद्रूपं च तेजसि ॥ स्पर्शं वायौ तथा तद्वद्बिभ्रतस्त
स्य धारणां ॥ व्योम्नः सूक्ष्मप्रवृत्तिं च शब्दं तद्वज्जहाति सः ॥ मनसा सर्वभूतानां मनस्त्वाविशते यदा ॥ मानसीं धारणां बिभ्रन्मनः
सूक्ष्मं जहाति च ॥ तद्वद्बुद्धिमशेषाणां सत्त्वानामेत्य योगवित् ॥ परित्यजति सूक्ष्माणि सप्तैतानि योगवित् ॥ सम्यग्विज्ञा
पयो लयं तस्यावृत्तिर्न विद्यते ॥ एतासां धारणानां तु सप्तानां सूक्ष्ममाप्तवान् ॥ दृष्ट्वा दृष्ट्वा ततः सिद्धिं त्यक्त्वा त्यक्त्वा परां भ
जे ॥ यस्मिन्यस्मिंश्च कुरुते भूते रागं महीपते ॥ तस्मिंस्तस्मिन्समासक्तिं संप्राप्य स विनश्यति ॥ तस्माद्विदित्वा सूक्ष्माणि संसक्तानि परस्परं ॥
परित्यजति यो योगी स परं प्राप्नुयात्पदं ॥ एतान्येव तु संधाय सप्त सूक्ष्माणि पार्थिव ॥ भूतादीनां विरागोऽत्र सद्भावज्ञस्य मुक्तये ॥ गंधा
दिषु समासक्तमित्येतदखिलं ततः ॥ पुनरावर्त्तयेद्रूपस ब्रह्मा परमानुषं ॥ सप्तैता धारणा योगी समतीत्य यदि स्थितः ॥ तस्मिंस्ता
स्मिंश्च यं सूक्ष्मे याति भूते नरेश्वर ॥ देवानामसुराणां च गंधर्वोरगरक्षसां ॥ देहेषु लयमाप्नोति संगं नाप्नोति कर्हिचित् ॥ अणिमा महि
मा चैव लघिमा प्राप्तिरेव च ॥ प्राकाम्यं च तथैशित्वं वशित्वं च तथा परं ॥ यत्र कामावसायित्वं गुणानेतानथैश्वरान् ॥ प्राप्नोत्यष्टौ
नरव्याघ्र परं निर्वाणसूचकान् ॥ सूक्ष्मात्सूक्ष्मतरोऽणीयान् शीघ्रत्वाल्लघिमा गुणः ॥ महिमाशेषपूज्यत्वात्प्राप्तिर्नाप्राप्यमस्य यत् ॥
प्राकाम्यमस्य व्यापित्वादीशित्वं चेश्वरो यतः ॥ वशित्वाद्वशिता नाम योगिनः सप्तमो गुणः ॥ यत्रेच्छास्थानमप्युक्तं यत्र कामावसायिता ॥
ऐश्वर्यकारणैरेभिर्योगिनः प्रोक्तमष्टधा ॥ मुक्तिसंसूचकं भूप परं निर्वाणचेतसः ॥ ततो न जायते नैव वर्द्धते न विनश्यति ॥ नापिस्य

योगाग्निनायतिः॥निर्दग्ध २

यमवाप्नोति परिणामं न गच्छति॥ छेदं क्लेदं तथा दाहं शोषं भूरादितो न च॥ भूतवर्गादवाप्नोति शब्दाद्यैर्ह्रियते न च॥ न चास्य संति शब्दाद्या
॥मा॰पु॰॥ स्तद्भोक्ता तेन युज्यते॥ यथा हि कानकं खंडमपद्रव्यवदग्निना॥ दग्धदोषं द्वितीयेन खंडेनैक्यं व्रजेन्नृप॥ न विशेषमवाप्नोति तद्वद्दो
॥६०॥ षस्तेनैक्यं प्रयाति ब्रह्मणा सह॥ यथाग्निरग्नौ संक्षिप्तः समानत्वमनुव्रजेत॥ तदाख्यस्तन्मयो भूत्वा न गृह्येत विसेषतः॥ परेणब्र
ह्मणा तद्वत्प्राप्यैकं दग्धकिल्विषः॥ योगी याति पृथग्भावं न कदाचिन्महीपते॥ यथा जले जलं चैक्यं निक्षिप्तमनुगच्छति॥ तथा॥
60 त्मा सात्म्यमभ्येति योगिनः परमात्मनि॥४०॥ ॥इति श्रीमार्कंडेयपुराणे दत्तात्रेयालर्कसंवादे योगवत्र्भे नाम
३४॥ अलर्क उवाच॥ मानावमानौ यावेतौ प्रीत्युद्वेगकरौ नृणां भगवन्योगिनश्चर्यां श्रोतुमिच्छामि तत्त्वतः॥ ब्रह्मवर्त्मन्यनु
सरन्योगी नावसीदति॥ दत्तात्रेय उवाच॥ मानावमानौ यावेतौ प्रीत्युद्वेगकरौ नृणां॥ तावेव विपरीतार्थौ योगिनः सिद्धि
कारकौ॥ मानावमानौ यावेतौ तावेवाहुर्विषामृते॥ अवमानोऽमृतं तत्र मानस्तु विषमं विषं॥ चक्षुःपूतं न्यसेत्पादं वस्त्रपू
तं जलं पिबेत॥ सत्यपूतं वदेद्वाक्यं बुद्धिपूतं विचिंतयेत॥ आतिथ्यश्राद्धयज्ञेषु देवयात्रोत्सवेषु च॥ महाजनेषु सिद्ध्यर्थी न
गच्छेद्योगवित्क्वचित॥ व्यस्ते विधूमे व्यंगारे सर्वस्मिन्भुक्तवज्जने॥ अटेत योगविद्भैक्षं न तु तेष्वेव नित्यशः॥ यथैवमवम
न्यंते जनाः परिभवंति च॥ तथा युक्तश्चरेद्योगी सतां धर्ममदूषयन॥ भैक्षं चरेद्गृहस्थेषु यायावरगृहेषु च॥ श्रेष्ठा तु प्रथमा चेति वृत्ति
रस्योपदिश्यते॥ अथ नित्यं गृहस्थेषु शालीनेषु चरेद्यतिः॥ श्रद्दधानेषु दांतेषु श्रोत्रियेषु महात्मसु॥ अत ऊर्ध्वं पुनः सापि अदु ॥राम॥
ष्टापतितेषु च॥ भैक्षचर्या विवर्णेषु जघन्या वृत्तिरिष्यते॥ भैक्षं यवागूं तक्रं वा पयो यावकमेव च॥ फलं मूलं विपक्वं वा कणपि ॥६०॥
ण्याकसक्तवः॥ इत्येते वै शुभाहारा योगिनां सिद्धिकारकाः॥ तान्प्रयुंजीत मुनिर्भक्त्या परमेण समाधिना॥ अपः पूर्वं सकृत्प्राश्य
तूष्णीं भूत्वा समाहितः॥ प्राणायेति ततस्तस्य प्रथमा ह्याहुतिः स्मृता॥ अपानाय द्वितीया तु समानायेति चापरा॥ उदानाय चतु

60A

यीस्याद्यानायेति च यं च मां। प्राणायामैः प्रयम्भत्याशेषं भुंजीत कामतः। अपः पुनः सकृत्प्राश्य आचम्य हृदयं स्पृशेत्। अस्ते
यं ब्रह्मचर्यं च त्यागो लोभस्तथैव च। व्रतानि पंच भिक्षूणामहिंसापरमाणि वै। अक्रोधो गुरुशुश्रूषा शौचमाहारलाघवं।
नित्यं स्वाध्याय इत्येते नियमाः पंच कीर्तिताः। सारभूतमुपासीत ज्ञानं यत्कार्यसाधनं। ज्ञानानां बहुता चेयं योगविघ्नकरी
हि सा। इदं ज्ञेयमिदं ज्ञेयमिति यस्तृषितश्चरेत्। अपि कल्पसहस्रायुर्नैव ज्ञेयमवाप्नुयात्। सक्तसंगो जितक्रोधो लघ्वाहारो जितेंद्रि
यः पिधाय बुद्ध्या द्वाराणि मनो ध्याने निवेशयेत्। शून्येष्वेवावकाशेषु गुहासु च वनेषु च। नित्ययुक्तः सदा योगी ध्यानं सम्यगुपक्र
मेत्। वाग्दंडः कर्मदंडश्च मनोदंडश्च ते त्रयः। यस्यैते नियता दंडाः स त्रिदंडी महायतिः। सर्वमात्ममयं यस्य सदसज्जगदीदृश
गुणागुणमयं तस्य कः प्रियः को नृपाप्रियः। विशुद्धबुद्धिः समलोष्टकांचनः समस्तभूतेषु समः समाहितः। स्थानं परं शाश्वतम
व्ययं च यतिर्हि गत्वा न पुनः प्रजायते। वेदाच्छ्रेष्ठाः सर्वयज्ञक्रियाश्च यज्ञाज्जाप्यं ज्ञानमाहुश्च जाप्यात्। ज्ञानाद्ध्यानं संगरागव्यपे
तं तस्मिन्प्राप्ते शाश्वतस्योपलब्धिः। समाहितो ब्रह्मपरोऽप्रमादी शुचिस्तथैकांतरतिर्जितेंद्रियः। समाप्नुयाद्योगमिमं महात्मा विमुक्तिमा
प्नोति ततः स्वयोगतः॥ ॥ इति श्रीमार्कंडेयपुराणे दत्तात्रेयालर्कसंवादे ४१॥ ॥ दत्तात्रेय उवाच
एवं यो वर्तते सम्यक् योगी योगव्यवस्थितः। न स व्यावर्तितुं शक्यो जन्मांतरशतैरपि। दृष्ट्वा च परमात्मानं प्रत्यक्षं विश्वरूपिणं। विश्वपा
दशिरोग्रीवं विश्वेशं विश्वभावनं। तत्प्राप्तये महापुण्यमोमित्येकाक्षरं जपेत्। तदेवाध्ययनं तस्य स्वरूपं शृण्वतः परं। अकारश्च तथो
कारो मकारश्चाक्षरत्रयं। एतास्तिस्रः स्मृता मात्राः सात्त्वराजसतामसाः। निर्गुणा योगिगम्यान्या अर्धमात्रा तु सा स्मृता। गांधारीति
च विज्ञेया गांधारस्वरसंश्रया। पिपीलिकागतिस्पर्शा प्रयुक्ता मूर्ध्नि लक्ष्यते। यदा प्रयुक्त ॐकारः प्रतिनिर्याति मूर्द्धनि। तदोंकार
मयो योगी अक्षरे त्वक्षरो भवेत्। प्राणो धनुः शरो ह्यात्मा ब्रह्म वेध्यमुदाहृतं। अप्रमत्तेन वेद्धव्यं शरवत्तन्मयो भवेत्। ओमित्येतत्त्रयो देवा

क्रि

॥मा०पु०॥ स्तयो लोकास्त्रयोग्नयः॥ विस्नुक्रमास्त्रयश्चैव ऋक्सामानि यजूंषि च॥ मात्राश्चार्द्धं च तस्रस्तु विज्ञेयाः परमार्थतः॥ तत्र युक्तस्य यो योगी स त
ल्लयमवाप्नुयात्॥ अकारस्त्वथ भूर्लोक उकारश्चोच्यते भुवः॥ सव्यंजनो मकारश्च स्वर्लोकः परिकल्पते॥ व्यक्ता तु प्रथमा मात्रा द्विती
॥६१॥ क याव्यक्तसंज्ञिका॥ मात्रा तृतीया चिच्छक्तिरर्द्धमात्रा परं पदं॥ अनेनैव क्रमेणैता विज्ञेया योगभूमयः॥ ओमित्युच्चारणात्सर्वं गृही
तं सदसद्भवेत्॥ ह्रस्वा तु प्रथमा मात्रा द्वितीया दीर्घसंयुक्ता॥ तृतीया तु प्लुतार्द्धाख्या वचसः सा त्वगोचरा॥ इत्येतदक्षरं ब्रह्म पर
61 मोंकारसंज्ञितं॥ यस्तं वेद नरः सम्यक् तथा ध्यायति वा पुनः॥ संसारचक्रमुत्सृज्य त्यक्तत्रिविधबंधनः॥ प्राप्नोति ब्रह्मणि लयं प
रमे परमात्मनि॥ अक्षीणकर्मबंधस्तु ज्ञात्वा मृत्युमरिष्टतः॥ उत्क्रांतिकाले संस्मृत्य पुनर्योगित्वमृच्छति॥ तस्मादसिद्धयोगेन
सिद्धयोगेन वा पुनः॥ ज्ञेयान्यरिष्टानि सदा येनोत्क्रांतौ न सीदति॥४२॥ ॥ इति श्रीमार्कंडेयपुराणे योगवर्णने ओं
कारमाहात्म्यं॥४२॥ ॥दत्तात्रेय उवाच॥ अरिष्टानि महाराज शृणु वक्ष्यामि तानि ते॥ येषामालोकनान्मृत्युं निजं
जानाति योगवित्॥ देवमार्गं ध्रुवं शुक्रं सोमच्छायामरुंधतीं॥ यो न पश्येन्न जीवेत्स नरः संवत्सरात्परं॥ अरश्मिबिंबं सूर्यस्य व
ह्निं चैवांशुमालिनं॥ दृष्ट्वैकादशमासेभ्यो नरो नोर्द्ध्वं स जीवति॥ वांत्यां मूत्रे पुरीषे वा सुवर्णं रजतं तथा॥ प्रत्यक्षमथवा स्वप्ने जी
वितं दशमासिकं॥ दृष्ट्वा प्रेतपिशाचादीन् गंधर्वनगराणि च॥ सुवर्णवर्णान्वृक्षांश्च नव मासान्स जीवति॥ स्थूलः कृशः कृशः
स्थूलो योऽकस्मादेव जायते॥ प्रकृतेश्च निवर्तेत तस्यायुश्चाष्टमासिकं॥ खंडं यस्य पदं पार्ष्ण्योः पादस्याग्रेथवा भवेत्॥ पांसुक
र्दमयोर्मध्ये स सप्त मासान्स जीवति॥ कपोतगृध्रकाकोलवायसो वापि मूर्द्धनि॥ क्रव्यादो वा खगो लीनः षण्मासायुःप्रदर्श ॥रामः॥
कः॥ हन्यते काकपंक्तीभिः पांसुवर्षेण वा पुनः॥ स्वां छायां चान्यथा दृष्ट्वा पंच मासान्स जीवति॥ अनभ्रे विद्युतं दृष्ट्वा दक्षिणां दि ॥६१॥
शमाश्रितां॥ पयसींद्रधनुर्वापि जीवितं द्वित्रिमासिकं॥ घृते तैले तथादर्शे तोये वा चात्मनस्तनुं॥ यः पश्येदशिरस्कां वा मासादू

61A

र्ध्वेन जीवति॥ यस्य वस्त्रसमो गंधो गात्रे ग्राव समोपि वा॥ तस्याहुर्मासिकं ज्ञेयं योगिनोन्यप्र जीवितं॥ यस्य वेस्नातमात्रस्य हृत्सादम
वस्नुष्यति॥ पिवतश्च जलं शोषो दशाहं सोपि जीवति॥ स्तंभितो मारुतो यस्य मर्मस्थानादिहं ततः॥ न हृष्यसंवुसंस्पर्शो त्तस्य मस्युरु
पस्थितः॥ ऋक्षवानरयानस्थो गायन्यो दक्षिणां दिशं॥ स्वप्ने प्रयाति तस्यापि न मृत्युः कालमृच्छति॥ रक्तकृष्णांवरधरा गायंती हसं
तीच॥ दक्षिणाशां नयेन्नारी स्वप्ने सोपि न जीवति॥ नग्नं क्षपणकं स्वप्ने हसमानं महस्यवे॥ एनं वावीक्ष्य वल्गंतं विंध्यान्मृत्युमुप
स्थिते॥ आमस्तकतलाद्यस्तु निमग्नं पंकसागरे॥ स्वप्ने पश्येत्तथा स्नानं नरः स द्योम्रियेतसः॥ केशांगारांस्तथा भस्मभुजगा॥
न्निर्जलां महीं॥ हृष्टा स्वप्ने दशाहं तु मृत्युरेकादशे हनि॥ करालैर्विकटैः कृष्णैः पुरुषैरुद्यतायुधैः॥ पाषाणैस्ताडितः स्वप्ने स
द्यो मृत्युं समाप्नुयात्॥ सूर्योदये यस्य शिवा क्रोशंती याति सन्मुखं॥ विपरीतं परीतं वा स सद्यो मृत्युमृच्छति॥ यस्य वै भुक्तमात्रेपि
तरयं पीड्यते क्षुधा॥ जायते दंतसंघर्षः स गतायुर संशयं॥ दीपादिगंधनो वेत्ति वमत्यग्निं तथा निशि॥ नात्मानं परनेत्रस्थं वी
क्ष्यते न स जीवति॥ शक्रायुधं चार्धरात्रे दिवा ग्रहगणं तथा॥ दृष्ट्वा मन्येत संक्षीणमात्मजीवितमात्मवान्॥ नासिका वक्रतां
मेति कर्णयोर्नम्रतोन्नती॥ नेत्रं च वामं स्रवति यस्य तस्यायुरुद्गतं॥ आरक्ततामेति मुखं जिह्वा चापि सितां तथा॥ तदा प्राज्ञो
विजानीयान्मृत्युमासन्नमात्मनः॥ उष्ट्ररासभयानेन यः स्वप्ने दक्षिणां दिशं॥ प्रयाति तं विजानीयात् सद्यो मृत्युं नरेश्वर॥ पिधाय क
र्णौ निर्घोषं न शृणोत्यात्मसंभवं॥ नश्यते चक्षुषो ज्योति यस्य सोपि न जीवति॥ पततो यस्य वै गर्तेस्वप्ने द्वारं पिधीयते॥ न चोत्तिष्ठ
ति यः श्वभ्रात्तदंतं तस्य जीवितं॥ ऊर्ध्वा च दृष्टिर्न च संप्रतिष्ठा रक्ता पुनः संपरिवर्तमाना॥ मुखस्य चोष्मा शुषिरा च नाभिः
शंसंति पुंसामपरं शरीरं॥ स्वप्नेग्निं प्रविशेद्यस्तु न च निःक्रमते नरः॥ जलप्रवेशादपि वा तदंतं तस्य जीवितं॥ यश्चाभिहन्यते दु
ष्टैर्भूतै रात्राववा दिवा॥ स मृत्युं सप्तरात्रांतात् पुमान् नाप्नोत्यसंशयं॥ स्ववस्त्रममलं शुक्लं रक्तं पश्यत्यथासितं॥ यः पुमान् मृत्यु

मासन्न ५ (left margin)

ह (right margin)

स (right margin)

यः (left margin)

ग्गो ४

ध्वंसेतस्यतेषांनकिंचन वेस्मनो १२

मासन्नंतस्यापिहिविनिर्दिशेत्॥स्वभाववैपरीत्यंतुप्रकृतेश्चविपर्ययः॥कथयंतिमनुष्याणांसमासन्नोयमंतकः॥येषाविनी
॥मा०पु०॥ तःसततंयेस्यपूज्यतमाःमताः॥तानेवयोवजानातितानेवचविनिंदति॥देवतानार्चयेद्वृद्धान्गुरून्विप्रांश्चनिंदति॥माता
॥६१॥ पित्रोरसत्कारंजामातृहननंकरोतियः॥योगिनांज्ञानविदुषामन्येषांचमहात्मनां॥प्राप्तकालःपुरुषस्तद्विज्ञेयंविचक्षणैः॥
योगिनासततंयत्नादरिष्टान्यवनीपते॥संवत्सरांतस्तज्ज्ञेनफलदानिदिवानिशं॥विलोकयानिसदाचैवफलपंक्तिशुभोह
णा॥विज्ञातकार्योमनसिसचकालोनरेश्वर॥ज्ञात्वाकालंचतंसम्यगभयस्थानमाश्रितः॥युंजीतयोगीकालोसौयथा
62 तस्याफलोभवेत्॥दृष्ट्वारिष्टंतथायोगीत्यक्त्वामरणजंभयं॥तत्स्वभावंतदालोक्यकालोयावद्दिवाकरः॥तस्यभागेतथै
वाह्नायोगंयुंजीतयोगवित्॥पूर्वाह्णेचापराह्णेवामध्याह्नेवादिनेदिने॥यत्रवारजनीभागेतदरिष्टंनिरीक्षितं॥तत्रैवतावद्युं
जीतयावत्स्यान्नहितद्दिने॥ततस्त्यक्त्वाभयंसर्वंजित्वातंकालमात्मवान्॥तत्रैवावसथेस्थित्वायत्रवास्थैर्यमा
॥तत्रैवावसथेस्थित्वायत्रवास्थैर्यमात्मनः॥युंजीतयोगीनिर्जित्यत्रीन्गुणान्परमात्मनि॥तन्मयश्चात्मनोभूत्वा
चिद्वृत्तिमपिसंत्यजेत्॥ततःपरमनिर्वाणमतीन्द्रियमगोचरं॥यद्बुद्धेर्यन्नचाख्यातुंशक्यतेतत्समश्नुते॥एतत्सर्वंस
समाख्यातंतववत्सयथार्थतः॥प्राप्स्यसेयेनतद्ब्रह्मसंक्षेपाच्चनिबोधमे॥शशांकरश्मिसंयोगाच्चंद्रकांतोमणिःपयः॥
समुत्सृजतिनायुक्तःसोपमायोगिनःस्मृता॥यथार्करश्मिसंयोगादर्ककांतोहुताशनं॥आविःकरोत्येकःसन्नुपमासैव
योगिनः॥पिपीलिकाखुनकुलगृहगोधाकपिंजलाः॥वसंतिस्वामिवद्गेहेध्वस्तेयांतिततोन्यतः॥दुःखंतुस्वामिनो ॥राम॥
यत्राजेंद्रसोपमायोगसिद्धये॥स्वदेहिकाल्पदेहाग्रमुखाग्रेणाल्पलीयसा॥करोतिमन्दारच्चयंउपदेशःसयोगिनः॥प ॥६२॥
शुपक्षिमनुष्याद्यैःपत्रपुष्पफलान्वितं॥दृष्ट्वाविलुप्यमानंतुदृष्ट्वासिद्ध्यतियोगिनः॥रुरुशावविषाणाग्रमालक्ष्यतिल

पिर

62A

काङ्क्षतिं॥ सहतेन विवर्द्धते योगी सिद्धिमवाप्नुयात्॥ इव कूलमुपादाय पात्रमारोहते भुवः॥ तुंगमार्गविलोक्यैव विज्ञातं किं
न योगिना॥ सर्वं स्वजीवनायालं निरवाते पुरुषस्य या॥ ना चेष्टां तत्वतो ज्ञात्वा योगिनः कृतकृत्यता॥ तद्देहं यत्र वसति नद्धो
ज्यैन जीवति॥ येन निष्पाद्यते चार्यस्तत्स्वकं ममतात्र कः॥ अभ्यर्थितोप्यितैः कार्यं करोति करणैर्यथा॥ तथैव बुद्ध्यादिभियो
गी यारकं साधयेत्परं॥ पुत्र उवाच॥ अत्रिसुतं प्रणम्याथ सोलर्कः पृथिवीपतिः॥ प्रश्रयावनतो वाक्यमुवाचातिमुदा
न्वितः॥ अलर्क उवाच॥ दिष्ट्या देवैरिदं ब्रह्मन्नपराभिभवसंभवं॥ उपपादितमत्युग्रं प्राणसंदेहदं भयं दिष्ट्या काशिपति
भरिबलसंयस्य राक्रमः॥ यदुसेकादिहायाताः ततः स युष्मत्संगदो मम॥ दिष्ट्यैव मे दवलब्ध्वाहं दिष्ट्या भवस्याश्वमे हताः॥
दिष्ट्याकोशः सर्वयानो दिष्ट्याहं भीतिमागतः॥ दिष्ट्यात्वत्पादयुगलं मम स्मृतिपथं गतं॥ दिष्ट्यात्वदुक्तयः सर्वा मम चेत
सि संगताः॥ दिष्ट्या ज्ञानं ममोत्पन्नं भवतश्च समागतात्॥ भवता चैव कारुण्यं दिष्ट्या ब्रह्मन्कृतं मयि॥ अनर्थो
प्यर्थतां याति पुरुषस्य शुभोदये॥ तथेदमुपकाराय व्यसनं संगमे त्वया॥ सुबाहुरुपकारी मे स च काशिपतिः प्रभो॥
ययोः कृतेहं संप्राप्तो योगीश भवतोन्तिकं॥ सोहं भवत्प्रसादाग्निनिर्दग्धाज्ञानकिल्बिषः॥ तथा यतिष्ये येनेदृक्
नन्नद्यां दुःखभाजनं॥ परित्यक्ष्यामि गार्हस्थ्यमार्तिपादपकाननं॥ त्वत्तोनुज्ञां समासाद्य ज्ञानदातुर्महात्मनः॥ दत्ता
त्रेय उवाच॥ गच्छ राजेन्द्र भद्रं ते यथा ते कथितं मया॥ निर्ममो निरहंकारस्तथा चर विमुक्तये॥ पुत्र उवाच॥ एवमुक्तः प्र
णम्यैनं समाजगाम त्वरान्वितः॥ यत्र काशिपतिर्भ्राता सुबाहुश्चास्य चाग्रजः॥ समुपेत्य महाबाहुं सोलर्कः काशिभूपतिं॥ सुबा
होरग्रतो वीरमुवाच प्रहसन्निव॥ राज्यका[illegible] मुक्क काशीशमभुत्पतां राज्यमर्जितं॥ यथा वा रोचते तत्ते सुबाहोः संप्रयच्छ वा॥
काशिराज उवाच॥ किमलर्क परित्यक्तं राज्यं ते संगरं विना॥ क्षत्रियस्य न धर्मोयं भवांश्च क्षत्रधर्मवित्॥ निर्जितामात्यव

गैस्तुस्यत्कामरणंभयं॥संदधीतमरंराजालुब्धमुद्दीस्यवैरिणं॥तंजित्वान्नपतिर्भोगान्यथाभिलषितान्हितान्॥भुंजीत
॥मा०पु०॥ परमंसिद्ध्यैयजेतचमहामखैः॥अलर्कउवाच॥एवमीदृशकंवीरममाप्यासीन्मनःपुरा॥सांप्रतंविपरीतार्थंमेशृणुचा
॥ई३॥ प्यत्रकारणं॥पथ्यंभौतिकःसंघस्तथांतःकरणंनृणां॥गुणाश्चसकलंतद्ददर्शयेयेनजंतुषु॥चिच्छक्तिरेकएवायंपय
त्प दानान्योस्तिकश्चन॥तदाकीर्तिज्ञानांमित्रस्वाम्यरिभंत्स्यता॥तन्मयादुःखमासाद्यत्वद्भयोद्भवमुत्तमं॥दत्तात्रेयप्रसादेन
ज्ञानंप्राप्तंनरेश्वर॥निर्जितेंद्रियवर्गस्तुत्यक्तासंगमशेषतः॥मनोत्रसालिसंधास्यतज्जयेपरमोजयः॥संसाध्यममन्य
63 त्तत्सिद्धौयतःकिंचिन्नविद्यते॥इंद्रियाणिचसंयम्यततःसिद्धिंनियच्छति॥सोहंनतेरिर्नममासिशत्रुःसुबाहुरेषानमे
पकारीदृष्टंमयासर्वमिदंयथात्मा॥अन्विष्यतांभूपरिपुस्त्वयान्यः॥इत्युक्तःसतेनाभिहितोनरेंद्रेंद्रःसमुत्थायततः
सुबाहुः॥दिदृक्षितंभ्रातरमभ्यनंदत्काशीश्वरंवाक्यमिदंबभाषे॥४५॥ ॥इतिश्रीमार्कंडेयपुराणेऽलर्को
पाख्याने॥४३॥ ॥सुबाहुरुवाच॥यदर्थंनयशार्दूलत्वामहंशरणंगतः॥तन्मयासकलंप्राप्तंयास्यामित्वंसुखी
भव॥काशिराजउवाच॥किंनिमित्तोभवान्प्राप्तोनिष्पन्नोर्थश्चकस्तव॥सुबाहोतन्ममाचक्ष्वपरंकौतूहलंहिमे॥ममा
क्रांतमलर्केणपितृपैतामहंमहत्॥राज्यंदेहीतिनिर्जित्यतुत्वयाहममिनोदितः॥ततोमयासमाक्रम्यराज्यमस्यानुजस्यते
एतत्तेवशमानीतंतदुत्सृजस्वकुलोचितं॥सुबाहुरुवाच॥काशिराजनिबोधत्वंयदर्थमयमुद्यमः॥कृतोमयाभवांश्चैव ॥राम॥
कारितोयंतमुद्यमं॥भ्राताममायंग्राम्येषुसक्तोभोगेष्वतत्त्ववित्॥विमूढोबोधवंतौचभ्रातरावग्रजौमम॥तयोर्ममचय ॥ई३॥
न्मात्रावाल्येस्तन्यंयथासुखे॥तथाचबोधोविन्यस्तःकर्णयोरवनीपते॥तयोर्ममचविज्ञेयाःपदार्थायेसतोन्नमि
प्राकाराःमनसानीताःस्तेमात्रानास्यपार्थिव॥यथैकसार्थयानानामेकस्मिन्नवसीदति॥दुःखंभवतिसाधूनांतथा

63A

स्माकं महीपते॥ नाहं स्यमोहमापन्नो सीदस्यस्मिन्नरेश्वर॥ संबंधिन्यस्य देहस्य विन्नतिमात्रकस्यनां॥ ततोमायाविनिक्षिप्यदुः
खाद्वैराग्यकस्यनां॥ भविष्यस्यस्य हि भवानि स्युद्योगाय संश्रितः॥ तदस्य दुःखाद्वैराग्यं संबोधादवनीपते॥ समुद्धृतं कृतं कार्यं
मद्भ्रतेस्तु अज्ञाम्यहं॥ उह्यामदालसागर्भे तस्याः पीत्वात यास्तनं॥ नान्यनारीसुतैर्यातं वर्त्मयात्विति पार्थिव॥ विचार्यैतन्मया
सर्वेयुष्मसंश्रय पूर्वकं॥ कृतं तद्व्यापि निष्पन्नं प्रयासे सिद्धये पुनः॥ श्रितो मया भवांश्चैव कारितः कार्यमुत्तमं॥ उपेक्ष्यते
सीदमानः स्वजनो बांधवः सुहृत॥ येन रेंद्र नतान्मन्ये सेंद्रियान्विकलाहिते॥ सुहृदि स्वजने बंधौ समर्थे यो सीदति॥१६॥ धर्मा
र्थकाममोक्षाख्यो वास्ततत्र न स्वसौ॥ एतत्त्वत्संगमाद्भूपं मया कार्यं महत्कृतं॥ स्वस्ति तेस्तु गमिष्यामि ज्ञानभाग्भव सत्तम॥ काशि
राजउवाच॥ उपकारस्त्वया साधो अलर्कस्य कृतो महान॥ ममोपकाराय कथं नं करोषि स्वमानसं॥ फलदायी सतां सद्भिः सं
गमो नाफलोदयः॥ तस्मात्त्वत्संश्रयाद्युक्ता मया प्राप्तुं समुन्नतिः॥ सुबाहुरुवाच॥ धर्मार्थकाममोक्षाख्यं पुरुषार्थचतुष्ट
यं॥ तत्र धर्मार्थकामाख्यं सकलो हीयते जनः॥ तत्ते संक्षेपतो वक्ष्ये तदिहैकमनाः श्रृणु॥ श्रुत्वा च सम्यगालोच्य यतेथाः श्रेयसे नृ
प॥ ममेति प्रत्ययो नरपनकार्योहमिति त्वया॥ सम्यगालोच्य धर्मो हि धर्माभावो निराश्रयः॥ कोवाहमिति संज्ञेयमित्यालोच्यं
त्वयालं॥ नाराश्च्यंतगेन मालोच्यमालोच्यापररात्रिषु॥ अव्यक्ताद्यं विशेषांतं संविकारमचेतनं॥ व्यक्ताव्यक्तं त्वया ज्ञेयं ज्ञा
ताकस्याहमित्युत॥ एतस्मिन्नेव विज्ञाते विज्ञातमखिलं त्वया॥ अनात्मन्यात्मविज्ञानमस्वे स्वमिति मूढता॥ सोहं सर्वग
तो भयलोकसंव्यवहारतः॥ मयेदमुच्यते सर्वं त्वया दृष्टोग्रजाम्यहं॥ एवमुक्त्वा ययौ धीमान्सुबाहुः काशिभूपतिं॥ का
शिराजोपि संपूज्य सोलर्कं स्वपुरं ययौ॥ अलर्कोपि सुतं ज्येष्ठमभिषिच्य नराधिप॥ वनं जगाम संत्यक्तसर्वसंगः स्वसिद्ध
ये॥ ततः कालेन महता निर्द्वंद्वो निःपरिग्रहः॥ प्राप्य योगर्द्धिमतुलां परं निर्वाणलक्षणां॥ पश्यं नु जगदिदं सर्वं सदेवासुरमानुषं॥

पाशैर्गुणमयैर्बद्धं बध्यमानं च नित्यशः ॥ पुत्रासन्मात्रमित्रारिस्वपारक्यादिभावितैः ॥ आकृष्यमाणं करणैः दुःखार्त्तम
॥मा॰पु॰॥ ॥६४॥ नन्तदर्शिनं ॥ अज्ञानपंकगर्त्तस्थमनुद्धारं महामतिः ॥ आत्मानं च समुत्तीर्णो गाथामेतामगायत ॥ अहो कष्टं यदस्माभिः पूर्वरा
ज्यमनुष्ठितं ॥ इति पश्चान्मया ज्ञातं योगान्नास्ति परं सुखं ॥ पुत्र उवाच ॥ तातैतत्ते समाख्यातं सम्युक्तं योगमुत्तमं ॥ प्राप्य सेत
64 स्य मनुष्ठितं ॥ इति पश्चान्मया ज्ञातं योगान्नास्ति परं सुखं ॥ वि
स्तरं ब्रह्म यत्र गत्वा न शोचसि ॥ ततोहमपि यास्यामि किं यज्ञैः किं जपेन मे ॥ कृतकृत्यस्य करणं ब्रह्मभावाय कल्पते ॥ व
तोनुज्ञामवाप्याहं निर्द्वन्द्वो निःपरिग्रहः ॥ प्रयतिष्ये तथा मुक्तो यथा यास्यामि निर्वृतिं ॥ पक्षिण ऊचुः ॥ एवमुक्त्वा स पित
रं प्राप्यानुज्ञां परस्परं ॥ ब्राह्मणः जगाम मेधावी त्यक्त्वा सर्व परिग्रहः ॥ सोपि तस्य पिता तद्वत्क्रमेण सुसमाहितः ॥ वानप्र
स्थं समास्थाय चतुर्थाश्रममभ्यगात् ॥ तत्रात्मजं समासाद्य हित्वा बंधं गुणोत्थकं ॥ प्राप सिद्धिं परां प्राज्ञस्तत्कालोपात्त
सन्मतिः ॥ एतत्ते कथितं ब्रह्मन्यत्पृष्टा भवता वयं ॥ सविस्तरं यथावच्च किमन्यच्छ्रोतुमिच्छसि ॥ य श्वेतच्छृणुयाद्विप्र पठेद्वा सुस
माहितः ॥ अलर्कात्रेय संवादे मसुभा न्मुच्यते नरः ॥ [illegible] ॥ इति श्री मार्कंडेय पुराणे अलर्कोपाख्याने
तायिता पुत्र संवादः समाप्तः ॥ ३८ ॥ ॥ जैमिनिरुवाच ॥ सम्यगेतत्समाख्यातं भवद्भिर्द्विजसत्तमाः ॥ प्रवृत्तं च
निवृत्तं च द्विविधं कर्म वैदिकं ॥ अहो पितृप्रसादेन भवतां ज्ञानमीदृशं ॥ येन तिर्यक्त्वमाप्यैतत्प्राप्य मोहस्तिर
स्कृतः ॥ धन्या भवंतः संसिद्धौ प्राग्वस्थापितं मनः ॥ भवतां विषयोद्भूतेन नैमोहेश्वाप्यते यतः ॥ दिष्ट्या भगवता तेन मार्कंडे
येन धीमता ॥ भवंतो वै समाख्याताः सर्वसंदेहहृत्तमाः ॥ संसारेस्मिन्मनुष्याणां भ्रमतामतिसंकटे ॥ भवद्विधैः समं संगो जा
ते यतेनात्मतपस्विनां ॥ यद्यहं संगमासाद्य भवद्भिर्ज्ञानदृष्टिभिः ॥ न स्यां कृतार्थस्तन्न्यूनं नमेन्यत्र कृतार्थता ॥ प्रवृत्ते च निवृत्ते च ॥राम॥ ॥६४
भवतां धर्मकर्मणि ॥ मतिरस्तमला मन्ये यथान्यानां न कस्यचित् ॥ यदि त्वनुग्रहवती मयि बुद्धिर्द्विजोत्तमाः ॥ भवतां त

64A

समाख्यातुमर्हथेदमशेषतः ॥ कथमेतत्समुद्भूतं जगत्स्थावरजंगमं ॥ कथं च प्रलयं का[illegible]ले पुनर्यास्यति सत्तमाः ॥ कथं च वंशा देवर्षि
पितृभूतादिसंभवाः ॥ मन्वंतराणि च कथं वंशानुचरितं च यत् ॥ यावत्यः सृष्टयश्चैव यावंतः प्रलयास्तथा ॥ यथा कल्पविभागाश्च
यथा मन्वंतरस्थितिः ॥ यथा च क्षितिसंस्थानं यत्प्रमाणं च वै भुवः ॥ यथा स्थिताः समुद्रादिनिम्नगाः काननानि च ॥ भूर्लोकादिश्च लो
कानां गणः पातालगश्च यः ॥ गतिस्तथार्कसोमादिग्रहर्क्षज्योतिषामपि ॥ श्रोतुमिच्छाम्यहं सर्वमे[illegible]तत्संप्लवं ॥ उपसंहृते च यच्छे
षं जगत्यस्मिन्भविष्यति ॥ पक्षिण ऊचुः ॥ प्रश्नभारोऽयमतुलो यस्त्वया मुनिसत्तम ॥ पृष्टस्तं ते प्र[illegible]मस्तच्छृणुष्व हे जैमिने ॥ मार्कं
डेयेन कथितं पुरा क्रोष्टुकये यथा ॥ द्विजपुत्राय शांताय व्रतस्नाताय धीमते ॥ मार्कंडेयं महात्मा[illegible]उपासीनं द्विजोत्तमैः ॥ क्रोष्टुकि
ः परिपप्रच्छ यदेतत्पृष्टवान्भवान् ॥ तस्य चाकथयत्प्रीत्या मुनिर्भृगुनंदनः ॥ तत्तेऽहं कथयिष्यामि शृणु त्वं द्विजसत्तम ॥ प्र
णिपत्य जगन्नाथं पद्मयोनिं प्रजापतिं ॥ जगद्योनिं स्थितं सृष्टौ स्थितौ विष्णुस्वरूपिणं ॥ प्रलये चांतकर्त्तारं रौद्रं रुद्रस्वरूपि
णं ॥ मार्कंडेय उवाच ॥ उत्पन्नमात्रस्य पुरा ब्रह्मणोऽव्यक्तजन्मनः ॥ पुराणमेतद्वेदाश्च मुखेभ्योऽस्य विनिर्गताः ॥ पुराणसंहि
ताश्चक्रुर्बहुलाः परमर्षयः ॥ वेदानां प्रविभागाश्च कृतास्तैस्तु सहस्रशः ॥ धर्मो ज्ञानं सवैराग्यमैश्वर्यं च महात्मनः ॥ तस्योप
देशेन विना सहसिद्धं चतुष्टयं ॥ वेदान्सप्तर्षयस्तस्माज्जगृहुः सप्त मानसाः ॥ पुराणं जगृहुश्चाद्या मुनयस्तस्य मानसाः ॥ भृगोः
सकाशाच्च्यवनात्तेनोक्तं तु द्विजन्मनां ॥ ऋषिभिश्चैव दक्षाय प्रोक्तमेतन्महात्मभिः ॥ दक्षेण चापि कथितमिदमासीत्तदा म
म तुभ्यं कथयाम्यद्य कलिकल्मषनाशनं ॥ सर्वमेतन्महाभाग श्रूयतां मे समाधिना ॥ यथा श्रुतं मया पूर्वं दक्षस्य गदतो मुने ॥
प्रणिपत्य जगद्योनिमजमव्ययमाश्रयं ॥ चराचरस्य जगतो धातारं परमं पदं ॥ ब्रह्माणमादिपुरुषमुत्पत्तिस्थितिसंस्थये ॥ य
स्कारणमनौपम्यं यत्र सर्वं प्रतिष्ठितं ॥ तस्मै हिरण्यगर्भाय लोकतंत्राय धीमते ॥ प्रणम्य सम्यग्वक्ष्यामि लोकसर्गमनुत्तमं ॥ म

॥मा॰पु॰॥ हदाद्यंविशेषांतंसर्वैरूपंस लक्षणं॥ प्रमाणैःपंचभिर्गम्यंस्रोतोभिःषड्भिरन्वितं॥ पुरुषाधिष्ठितंनित्यमनित्यमिवचस्थितं॥
तच्छ्रुयतांमहाभागपरमेणसमाधिना॥ प्रधानंकारणंयत्तदव्यक्ताख्यंमहर्षयः॥ यदाहुःप्रकृतिंसूक्ष्मांनित्यांसदसदा
॥६५॥ त्मिकां॥ ध्रुवमक्षय्यमजरममेयंचाप्यसंश्रयं॥ गंधरूपरसैर्हीनंशब्दस्पर्शविवर्जितं॥ अनाद्यंतंजगद्योनिंत्रिगुणंप्रभ
65 वाप्ययं॥ असांप्रतमविज्ञेयंब्रह्माग्रेसमवर्तत॥ प्रलयस्यानुतेनेदंव्याप्तमासीदशेषतः॥ गुणसाम्यात्ततस्तस्मात्क्षेत्रज्ञा
धिष्ठितान्मुने॥ गुणभावाद्वद्यमानेसर्गकालेततःपुनः॥ प्रधानतत्वमुद्भूतंमहांतंतत्समावृणोत॥ यथाबीजंत्वचात्तद्वदव
व्यक्तेनावृतोमहान्॥ सात्विकोराजसश्चैवतामसश्चत्रिधोदितः॥ ततस्तस्मादहंकारस्त्रिविधोवैव्यजायत॥ वैकारि
कस्तैजसश्चभूतादिश्चैवतामसः॥ महतासोवृतस्त्वापियथाव्यक्तेनवैमहान्॥ भूतादिस्तुविकुर्वाणःशब्दतन्मात्रकं॥ त
तः॥ ससर्जशब्दतन्मात्रादाकाशंशब्दलक्षणं॥ आकाशंशब्दतन्मात्रंभूतादिश्चावृणोत्ततः॥ आकाशस्तुविकुर्वाणःस्पर्शमात्रं
ससर्जह॥ बलवानभवद्वायुस्तस्यस्पर्शोगुणोमतः॥ आकाशशब्दतन्मात्रंस्पर्शमात्रंसमावृणोत॥ ततोवायुर्विकुर्वाणोरूप
मात्रंससर्जह॥ ज्योतिरुत्पद्यतेवायोस्तद्रूपगुणमुच्यते॥ स्पर्शमात्रंतथावायुरूपमात्रंसमावृ[illegible]॥ ज्योतिश्चापिविकुर्वाण
रसमात्रंससर्जह॥ संभवंतिततोह्यापश्चांद्रस्तावैरसात्मिकाः॥ रसमात्रास्तुताह्यापोरू[illegible]त्रंसमावृणोत॥ आपश्चापि
विकुर्वाणागंधमात्रंससर्जिरे॥ संघातोजायतेतस्मात्तस्यगंधोगुणोम[illegible]॥ तस्मिंत[illegible]॥ तुतन्मात्रंतेनतन्मात्रतास्मृ
ताः॥ अविशेषवाचकत्वादविशेषास्ततश्चते॥ नशांतानापितेघोरानमूढाश्चाविशेषिणः॥ भूततन्मात्रसर्गोयम ॥रामः॥
हंकारात्तुतामसात्॥ वैकारिकादहंकारात्सत्वोद्रिक्तात्तुसात्विकः॥ वैकारिकःससर्गस्तुयुगपत्संप्रवर्त्तते॥ बुद्धींद्रिया ॥६५॥
णिपंचचैवपंचकर्मेंद्रियाणिमे॥ तैजसानींद्रियाण्याहुर्देवावैकारिकादश॥ एकादशंमनस्तत्रदेवावैकारिकाःस्मृताः

65A

श्रोत्रं त्वक् चक्षुषी जिह्वा नासिका चेति पंचमी ॥ शब्दादीनामवाप्त्यर्थं बुद्धियुक्तानि चक्ष्यते ॥ पादौ पायुरुपस्थश्च हस्तौ वाक्
पंचमी भवेत् ॥ गतिर्विसर्गो ह्यानंदः शिल्पं वाक्यं च कर्म तत् ॥ आकाशं शब्दतन्मात्रं स्पर्शमात्रं समाविशत् ॥ द्विगुणो जायते वा शा
युस्तस्य स्पर्शो गुणो मतः ॥ रूपं तथैवाविशतः शब्दस्पर्शगुणावुभौ ॥ त्रिगुणस्ततस्त्वग्निः शब्दस्पर्शरूपवान् ॥ शब्दस्पर्शश्च
रूपं च रसमात्रं समाविशत् ॥ तस्माच्चतुर्गुणा ह्यापो विज्ञेयास्तु रसात्मिकाः ॥ शब्दः स्पर्शश्च रूपं च रसो गंधं समाविशत् ॥
संहता गंधमात्रेण आचिन्वंतं महीमिमां ॥ तस्मात्पंचगुणा भूमिः स्थूला भूतेषु दृश्यते ॥ शांता घोराश्च मूढाश्च विशेषास्ते
ततः स्मृताः ॥ परस्परानुप्रवेशाद्धारयंति परस्परं ॥ भूमेरंतस्त्विदं सर्वं लोकं समावृतं ॥ विशेषाश्चेंद्रियग्राह्या ह्यनियतत्वाच्च ते लोका
स्मृताः ॥ गुणपूर्वस्य पूर्वस्य प्राप्नुवंत्युत्तरोत्तरं ॥ नानावीर्याः पृथग्भूताः सप्तैते संहतिं विना ॥ नाशक्नुवन्प्रजाः स्रष्टुम
समागम्य कृत्स्नशः ॥ समेत्यान्योन्यसंयोगमन्योन्याश्रयिणश्च ये एकसंघातचिह्नाश्च संप्राप्यैक्यमशेषतः ॥ पुरुषाधिष्ठि
तत्वाच्च अव्यक्तानुग्रहेण च ॥ महदाद्या विशेषांता ह्यंडमुत्पादयंति ते ॥ जलबुद्बुदवत्तत्र क्रमाद्वृद्धिमथागमत् ॥ भूतेभ्यो
ऽण्डं महाबुद्धे वृहत्तदुदकेशयं ॥ प्राकृतेंडे विवृद्धः स क्षेत्रज्ञो ब्रह्मसंज्ञितः ॥ स वै शरीरी प्रथमः स वै पुरुष उच्यते ॥ आ
दिकर्त्ता च भूतानां ब्रह्माग्रे समवर्तत ॥ तेन सर्वमिदं व्याप्तं त्रैलोक्यं सचराचरं ॥ मेरुस्तस्योल्बसंभूतो जरायुश्चापिप
र्वताः ॥ समुद्रा गर्भसलिलं तस्यांडस्य महात्मनः ॥ तस्मिन्नंडे जगत्सर्वं सदेवासुरमानुषं ॥ द्वीपान्यद्रिसमुद्राश्च सज्यो
तिर्लोकसंग्रहः ॥ जलानिलानलाकाशैस्ततो भूतादिना बहिः ॥ वृत्तं तु दशगुणैरेकैकस्येन वै पुनः ॥ महता तत्प्रमाणे
न सहैवांडे नैव स्थिताः ॥ महांस्तैः सहितः सर्वैरव्यक्तेन समावृतः ॥ एभिरावरणैरंडं सप्तभिः प्राकृतैर्वृतं ॥ अन्योन्यमावृत्य च
ताश्चाष्टौ प्रकृतयः स्थिताः ॥ एषा सा प्रकृतिर्नित्या तदंतः पुरुषश्च सः ॥ ब्रह्माख्यः कथितो यस्ते समासाच्छ्रूयतां पुनः ॥ यथाम

तथा तमसि सत्वे च रजोप्यनुस्यूतं स्थितम ॥८॥

मा० पु० मीना जले कश्चिदुन्मस्तन्न जलसंभवं ॥ वलयं क्षिपते ब्रह्मा स तथा प्रकृतीर्विभुः ॥ अव्यक्तं क्षेत्रमुद्दिष्टं ब्रह्मा क्षेत्रज्ञ उच्यते ॥ ए
ह्रीं तत्समस्तं जानीया क्षेत्रक्षेत्रज्ञलक्षणं ॥ इत्येष प्राकृतः सर्गः क्षेत्रज्ञाधिष्ठितस्तु सः ॥ अबुद्धिपूर्वः प्रथमः प्रादुर्भूतस्तडिद्य
था ॥ ॥ ॥ इति श्रीमार्कंडेयपुराणे भुवनोत्पत्तौ ब्रह्मजन्मनिर्देशो नाम ध्यायः ॥ क्रौष्टुकिरुवाच ॥ ॥ भ
भगवंस्तत्त्वसंभूतिर्यथावत्कथिता मम ॥ ब्रह्मांडे ब्रह्मणो जन्म तथा चोक्तं महात्मनः ॥ एतदिच्छाम्यहं श्रोतुं त्वत्तो भृगुकुलोद्व
66 ह ॥ यदा न सृष्टिर्भूतानां मस्ति किंचित्तदानवा ॥ काले वै प्रलयस्यास्य सर्वस्मिन्नुपसंहृते ॥ मार्कंडेय उवाच ॥ यदा तु प्र
कृतौ याति लयं विश्वमिदं जगत् ॥ तदोच्यते प्राकृतोयं विद्वद्भिः प्रतिसंचरः ॥ आत्मन्यवस्थिते व्यक्ते विकारे प्रतिसंहृते
प्रकृतिः पुरुषश्चैव स्वधर्मेणावतिष्ठतः ॥ तदा तमश्च सत्वं च समत्वेन गुणौ स्थितौ ॥ अनुद्रिक्तावन्यूनौ च ओतप्रोतौ प
रस्परं ॥ तिलेषु वा यथा तैलं घृतं वा पयसि स्थितं ॥ उत्पत्तिर्ब्रह्मणो यावदायुर्वै द्विपरार्द्धिकं ॥ तावद्दिनं सुरेशस्य तत्समः संय
मो निशा ॥ अहर्मुखे प्रबुद्धस्तु जगदादिरनादिमान् ॥ सर्वहेतुरचिंत्यात्मा परः कोप्यपरं क्रियः ॥ प्रकृतिं पुरुषं चैव प्रविश्या
शु जगत्पतिः ॥ क्षोभयामास योगेन परेण परमेश्वरः ॥ यथा मदो नरस्त्रीणां यथा वा माधवानिलः ॥ अनुप्रविश्य क्षोभा
य तथासौ योगमूर्तिमान् ॥ प्रधाना क्षोभ्यमानात्तु स देवो ब्रह्मसंज्ञितः ॥ समुत्पन्नोंडकोशस्थो यथा ते कथितं मया ॥ स ए
व क्षोभकः पूर्वं स क्षोभ्यः प्रकृतेः पतिः ॥ स संकोचविकाशाभ्यां प्रधानत्वेपि संस्थितः ॥ उत्पन्नः स जगद्योनिरगुणोपि रामः
रजोगुणं ॥ भुंजन्प्रवर्त्तते सर्गे ब्रह्मत्वं समुपाश्रितः ॥ ब्रह्मत्वेन प्रजाः सृष्ट्वा ततः सत्वातिरेकवान् ॥ विष्णुत्वमेत्य धर्मेण
कुरुते परिपालनं ॥ ततस्तमोगुणोद्रिक्तो रुद्रत्वे चाखिलं जगत् ॥ उपसंहृत्य वै शेते त्रैकाल्यस्त्रिगुणोगुणः ॥ यथा प्राग्व्या ह्रीं
पकः क्षेत्री पालको लावकस्तथा ॥ तथा स संज्ञामायाति ब्रह्मविष्णुहरात्मिकां ॥ ब्रह्मत्वे सृजते लोकान्रुद्रत्वे संहरत्यपि

66A

विष्णुत्वे चाप्युदासीनः पाति लोकान् स एव च॥ रजो ब्रह्मा तमो रुद्रो विष्णुः सत्त्वं जगत्पतिः॥ एत एव त्रयो देवा एत एव त्र
यो गुणाः॥ अन्योन्यमिथुना ह्येते अन्योन्याश्रयिणस्तथा॥ क्षणं वियोगो न ह्येषां न त्यजंति परस्परं॥ एवं ब्रह्मा ज
गत्स्रष्टा देवदेवश्चतुर्मुखः॥ रजोगुणं समाश्रित्य सृष्ट्यर्थं संव्यवस्थितः॥ हिरण्यगर्भो देवादिरनादिरुपचारतः॥ प
द्मकर्णिकासंस्थो ब्रह्माग्रे समजायत॥ तस्य वर्षशतं त्वेकं परमायुर्महात्मनः॥ ब्राह्मेणैव हि मानेन तस्य संख्यां नि
बोध मे॥ निमेषैर्दशभिः काष्ठा तथा पंचभिरुच्यते॥ कला त्रिंशत्तु वै काष्ठा मुहूर्तस्त्रिंशदेव ता॥ अहोरात्रं मुहूर्तानां नृ
णां त्रिंशत्तु वै स्मृतं॥ अहोरात्रैस्तु त्रिंशद्भिः पक्षौ द्वौ मास उच्यते॥ तैः षड्भिरयनं वर्षं द्वे ऽयने दक्षिणोत्तरे॥ तद्देवानामहोरात्रं दिनं
तत्रोत्तरायणं॥ दिव्यैर्वर्षसहस्रैस्तु कृतत्रेतादिसंज्ञितं॥ चतुर्युगं द्वादशभिस्तद्विभागं शृणुष्व मे॥ चत्वारि तु सहस्रा
णि वर्षाणां कृतमुच्यते॥ शतानि संध्या चत्वारि संध्यांशश्च तथाविधः॥ त्रेता त्रीणि सहस्राणि दिव्याब्दानां शतत्रयं॥
तस्य संध्या समाख्याता तासंध्यांशश्च तथाविधः॥ द्वापरं द्वे सहस्रे तु वर्षाणां द्वे शते तथा॥ तस्य संध्या समाख्याता द्वे ति
शते न्ये तदंशकः॥ कलिः सहस्रं दिव्यानामब्दानां द्विजसत्तम॥ संध्यासंध्यांशकश्चैव शतकौ समुदाहृतौ॥ एषा द्वादशसा
हस्री युगाख्या कविभिः स्मृता॥ एतत्सहस्रगुणितमहर्ब्राह्ममुदाहृतं॥ ब्राह्मणो दिवसे ब्रह्मन् मनवस्तु चतुर्दश॥ भवंति
भागशस्तेषां सहस्रं तद्विभज्यते॥ देवाः सप्तर्षयः सेंद्रा मनुस्तत्सूनवो नृपाः॥ मनुना सह सृज्यंते संह्रियंते च पूर्ववत्॥ चतु
र्युगानां संख्याता साधिका ह्येकसप्ततिः॥ मन्वंतरं तस्य संख्यां मानुषाब्दैर्निबोध मे॥ त्रिंशत्कोट्यस्तु संपूर्णाः संख्याताः
संख्यया द्विज॥ सप्तषष्टिस्तथान्यानि नियुतानि च संख्यया॥ विंशतिश्च सहस्राणि कालोऽयं साधिकं विना॥ एतन्मन्वं
तरं प्रोक्तं दिव्यैर्वर्षैर्निबोध मे॥ अष्टौ शतसहस्राणि दिव्यया संख्यया स्मृतं॥ द्वापंचाशत्तथान्यानि सहस्राण्यधिकानि तु॥

॥मा० पु०॥ चतुर्द्दशगुणो ह्येष कालो ब्राह्ममहः स्मृतं ॥ तस्यांते प्रलयः प्रोक्तो ब्राह्मो नैमित्तिको बुधैः ॥ भूर्लोकोथ भुवर्लोकः स्वर्लोकस्त
॥६७॥ न्निवासिनः ॥ तदा विनाशमायांति महर्लोकश्च तिष्ठति ॥ तद्वासिनो पितापेन जनलोकं प्रयांति वै ॥ एकार्णवे च त्रैलोक्ये
ब्रह्मा स्वपिति वै निशि ॥ तत्प्रमाणैव सा रात्रिस्तदंते सृज्यते पुनः ॥ एवं तु ब्रह्मणो वर्षमेवं वर्षशतं च यत् ॥ शतं च तस्य वर्षाणां
परमित्यभिधीयते ॥ पंचाशद्भिस्तथा वर्षैः परार्द्धमिति कीर्त्यते ॥ एकमस्य परार्द्धं तु व्यतीतं द्विजसत्तम ॥ तस्यांते भून्महा
67 कल्पः पाद्म इत्यभिधीयते ॥ द्वितीयस्य परार्द्धस्य वर्त्तमानस्य वै द्विजाः ॥ वाराह इति कल्पोयं प्रथमः परिकीर्त्तितः ॥ ॥
इति श्रीमार्कंडेयपुराणे कल्पस्थितिः ॥ ४५ ॥ ॥ क्रोष्टुकिरुवाच ॥ यथा ससर्ज वै ब्रह्मा भगवानादि
कृत्प्रजाः ॥ प्रजापतिः पतिर्देवस्तन्मे विस्तरतो वद ॥ मार्कंडेय उवाच ॥ कथयाम्येष ते ब्रह्मन्ससर्ज भगवान्यथा ॥ लोककृ
द्धाम्यतः कृत्स्नं जगत्स्थावरजंगमं ॥ पद्मावसानसमये निशासुप्तोत्थितः प्रभुः ॥ सत्वोद्रिक्तः सदा ब्रह्मा शून्यं लोकमवै रा
क्षत ॥ इमं चोदाहरंत्यत्र श्लोकं नारायणं प्रति ॥ ब्रह्मस्वरूपिणं देवं जगतः प्रभुमव्ययं ॥ आपो नारा इति प्रोक्ता आपो
वै नरसूनवः ॥ ता सु शेते स यस्माच्च तेन नारायणः स्मृतः ॥ विबुद्धः सलिले तस्मिन्विज्ञायांतर्गतां महीं ॥ अनुमानात्समु
द्धारं कर्त्तुकामस्तदा क्षितेः ॥ अकरोत्स तनूरन्याः कल्पादिषु यथा पुरा ॥ मत्स्यकूर्मादिकास्तद्वद्वाराहं रूपमास्थितः
वेदयज्ञमयं दिव्यं वेदयज्ञमयो विभुः ॥ रूपं कृत्वा विवेशाप्सु सर्वगः सर्वसंभवः ॥ समुद्धृत्य च पातालान्मुमोच सलिले
भुवं ॥ जनलोकस्थितैः सिद्धैश्चिंत्यमानो जगत्पतिः ॥ तस्योपरि जलौघस्य महती नौरिव स्थिता ॥ विततत्वात्तु देह ॥राम॥
स्य न मही याति संप्लवं ॥ ततः क्षितिं समीकृत्य पृथिव्यां सोसृजद्गिरीन् ॥ प्राक्सर्गे दह्यमाने तु सर्वे संवर्त्तकाग्नि ॥६७॥
ना ॥ तेनाग्निना विशीर्णास्ते पर्वता भुवि सर्वशः ॥ शैला एकार्णवे मग्ना वायुना ह्यप्सु संहताः ॥ निषक्ता यत्र यत्रा

संस्तत्र ततश्चाचऊभवत् ॥ प्रविभागं ततः कृत्वा स मद्वीपो यथोचितं ॥ भूराद्यांश्चतुरो लोकान्पूर्ववत्समकल्पयत् ॥ सृष्टिं चिंतय
तस्तस्य कल्पादिषु यथा पुरा ॥ अबुद्धिपूर्वकस्तस्मात्प्रादुर्भूतस्तमोमयः ॥ तमो मोहो महामोहस्तामिस्रो ह्यंधसंज्ञितः ॥ अवि
द्या पंचपर्वैषा प्रादुर्भूता महात्मनः ॥ पंचधावस्थितः सर्गो ध्यायतोऽप्रतिबोधवान् ॥ बहिरंतश्चाप्रकाशः संवृतात्मा नगात्म
कः ॥ मुख्या नगा यतः प्रोक्ता मुख्यसर्गस्ततस्त्वयं ॥ तं दृष्ट्वासाधकं सर्गममन्यदपरं पुनः ॥ तस्याभिध्यायतः सर्गस्तिर्यक्
स्रोतो ह्यवर्तत ॥ तस्मात्तिर्यक्प्रवृत्तः स तिर्यक्स्रोतस्ततः स्मृतः ॥ पश्वादयस्ते विख्यातास्तमःप्राया ह्यवेदिनः ॥ उत्प
थग्राहिणश्चैव ते ज्ञाने ज्ञानमानिनः ॥ अहंकृता अहंमाना अष्टाविंशद्वधात्मकाः ॥ अंतःप्रकाशास्ते सर्वे आवृताश्च
परस्परं ॥ तमप्यसाधकं मत्वा ध्यायतोऽन्यस्तदाभवत् ॥ ऊर्द्ध्वस्रोतस्तृतीयस्तु सात्विकः समवर्त्तत ॥ ते सुखप्रीतिबहुला बहिरं
तस्त्वनावृताः ॥ प्रकाशा बहिरंतश्च ऊर्द्ध्वस्रोतोभवाः स्मृताः ॥ तुष्टात्मनस्तृतीयस्तु देवसर्गो हि स स्मृतः ॥ तस्मिन्सर्गेऽभवत्प्रीति
र्निष्पन्ने ब्रह्मणस्तदा ॥ ततोऽन्यं स तदा दध्यौ साधकं सर्गमुत्तमं ॥ अथाभिध्यायतस्तस्य सत्याभिध्यायिनस्ततः ॥ प्रादुर्बभौ
तदाव्यक्तादर्वाक्स्रोतस्तु साधकः ॥ यस्मादर्वाग्व्यवर्त्तंत ततोऽर्वाक्स्रोतसः स्मृताः ॥ ते च प्रकाशबहुलास्तमोद्रिक्ता र
जोधिकाः ॥ तस्मात्ते दुःखबहुला भूयो भूयश्च कारिणः ॥ प्रकाशा बहिरंतश्च मनुष्याः साधकाश्च ते ॥ पंचमोऽनुग्रहः सर्गः
स चतुर्द्धा व्यवस्थितः ॥ विपर्ययेण शक्त्या च सिद्ध्या तुष्ट्या तथैव च ॥ निर्वृत्तं वर्त्तमानं च ते भविष्यंति वै पुनः ॥ भूतादिकानां ते
भूतानां षष्ठः सर्गः स उच्यते ॥ ते परिग्रहिणः सर्वे संविभागरतास्तथा ॥ नोदनाश्चाप्यशीलाश्च ज्ञेया भूताधिकास्तु ते ॥ इत्येते क
थिताः सर्गाः षडेवं मुनिसत्तम ॥ प्रथमो महतः सर्गो विज्ञेयो ब्रह्मणस्तु सः ॥ तन्मात्राणां द्वितीयस्तु भूतसर्गः स उच्यते ॥ वैका
रिकस्तृतीयस्तु सर्गश्चैंद्रियकः स्मृतः ॥ इत्येष प्राकृतः सर्गः संभूतो बुद्धिपूर्वकः ॥ मुख्यसर्गश्चतुर्थस्तु मुख्या वै स्थावरा

स्मृताः॥ तिर्यक्स्रोतस्तु यः प्रोक्तस्तिर्यग्योन्यः स पंचमः॥ श्र॰ योर्द्धस्रोतसां षष्ठो देवसर्गः सुतस्मृतः॥ ततोर्वाक्स्रोतसांसर्गो
॥मा॰ पु॰॥ :सप्तमः स तु मानुषः॥ अष्टमोनुग्रहः सर्गः सात्विकः स्तामसश्च सः॥ पंचैते वैकृताः सर्गाः प्राकृतास्तु त्रयः स्मृताः॥ प्राकृतो
॥ई च॥ वैकृतश्चैव कौमारो नवमः स्मृतः॥ इत्येते वै समाख्याता नव सर्गाः प्रजापते॥ प्राकृता वैकृताश्चैव जगतो मूलहेतवः॥
सृजतो जगदीशस्य किमन्यच्छ्रोतुमिच्छसि॥४३॥ ॥४ इति श्रीमार्कंडेयपुराणे सर्गस्थितिर्नाम॰४॥ ॥४॥
68 क्रोष्टुकिरुवाच॥ समासात्कथिता सृष्टिर्न सम्यग्भगवतामम॥ देवादीनां भवान्ब्रह्मन्विस्तरात्ब्रवीतु मे॥ मार्कंडेयउ
वाच॥ कुशलाकुशलैर्ब्रह्मन्भाविताः पूर्वकर्मभिः॥ ख्यात्या तया विनिर्मुक्ताः प्रलये ह्युपसंहृताः॥ देवाद्यः स्थावरा
ताः प्रजा ब्रह्मश्चतुर्विधाः॥ ब्रह्मणः कुर्वतः सृष्टिं जज्ञिरे मानुसीस्तदा॥ ततो देवासुरपितृन्मानुषांश्च चतुष्टयं॥ सि
सृक्षुरंभांस्येतानि स्वमात्मानमयूयुजत॥ युक्तात्मनस्तमोमात्रा उद्रिक्ताभूत्प्रजापतेः॥ सिसृक्षोर्जघनात्पूर्वमसुरा
जज्ञिरे ततः॥ उत्ससर्ज ततस्तां तु तमोमात्रात्मिकां तनुं॥ सापविद्धा तनुस्तेन सद्यो रात्रिरजायत॥ अन्यां तनुमुपादाय
सिसृक्षुः प्रीतिमानभूत॥ सत्वोद्रिक्तास्ततो देवा मुखतस्तस्य जज्ञिरे॥ उत्ससर्ज च भूतेशस्तनुं तामपि स प्रभुः॥ साचा
पविद्धा दिवसं सत्वप्रायमजायत॥ सत्वमात्रात्मिकामेवं ततोन्यां जगृहे तनुं॥ पितृवन्मन्यमानस्य पितरस्तस्यज
ज्ञिरे॥ सृष्ट्वा पितृंस्तु ससर्ज तनुं तामपि स प्रभुः॥ सा चोत्सृष्टाभवत्संध्या दिननक्तांतरस्थिता॥ रजोमात्रात्मिकामन्यांत
नुं भेजे स प्रभुः॥ ततो मनुष्याः संभूता रजोमात्रासमुद्भवाः॥ सृष्ट्वा मनुष्यान्स विभुः ससर्ज तनुं ततः॥ ज्योत्स्ना सम र ॥रामः॥
भवत्सा चराश्यं तेह मुखे च या॥ इत्येतास्तनवस्तस्य देवदेवस्य धीमतः॥ ख्याता रात्र्यहनी चैव संध्याज्योत्स्ना च वै द्वि ॥ई च॥
ज॥ ज्योत्स्ना संध्या तथैवाहः सत्वमात्रात्मकं त्रयं॥ तमोमात्रात्मिका रात्रिः सा वै तस्मात्तमोधिका॥ तस्माद्देवा दिवा रात्रावसुराश्च

दलान्विताः ॥ ज्योत्स्नागमे च मनुजाः संध्यायां पितरस्तथा ॥ भवंति बलिनोधृष्या विपक्षाणां न संशयः ॥ तद्दिव
येस मासाद्य प्रयांति च विपर्ययं ॥ ज्योत्स्ना रात्र्यहनी संध्या चत्वार्येतानि वै प्रभोः ॥ ब्रह्मणस्तु शरीराणि त्रिगुणोपाश्र
याणि च ॥ चत्वार्येतान्ययोत्पाद्य तनुमन्यां प्रजापतिः ॥ रजस्तमोमयीं रात्रौ जग्रहे क्षुत्तृडन्वितः ॥ ततोंधकारे क्षुत्क्षा
मानसृजद्भगवानजः ॥ विरूपाञ्छ्मश्रुलान्नत्तुमारब्धास्ते च तां तनुं ॥ रक्षाम इति तेभ्योन्ये यऊचुस्ते च राक्षसाः ॥ खा
दाम इति ये वोचुस्ते यक्षा भक्षणाद्द्विज ॥ तान्दृष्ट्वा ह्यप्रियेणास्य केशाः शीर्णास्तु वेधसः ॥ समारोहणहीनाश्च शि
रसो ब्रह्मणः शिरः ॥ सर्पणात्ते भवन्सर्पा हीनत्वादहयस्मृताः ॥ सर्पान्दृष्ट्वा ततः क्रुद्धः क्रोधात्मानो विनिर्ममे ॥ वर्णे
न कपिशेनोग्रास्ते भूताः पिशिताशनाः ॥ धयतो गां ततस्तस्य गंधर्वा जज्ञिरे सुताः ॥ पिवतो जज्ञिरे वाचं गंधर्वास्ते
न ते स्मृताः ॥ अष्टास्वेतासु सृष्टासु देवयोनिषु स प्रभुः ॥ ततः स्वछंदतोन्यानि वयांसि वयसोसृजत् ॥ सुखतोजाः
ससर्जोथ वक्षसस्त्वावयोसृजत् ॥ गाश्चैवोदरतो ब्रह्मा पार्श्वाभ्यां च विनिर्ममे ॥ पद्भ्यां साश्वान्समातंगान्रासभा
न गवयान्मृगान् ॥ उष्ट्रानश्वतरांश्चैव नानारूपाश्च जातयः ॥ ओषध्यः फलमूलिन्यो रोमभ्यस्तस्य जज्ञिरे ॥ एवं पश्वो
षधीः सृष्ट्वा ससृजे सोध्वरे विभुः ॥ तस्मादादौ च कल्पस्य त्रेतायुगमुखे तदा ॥ गौरजः पुरुषो मेधो अश्वाश्वतरगर्द
भाः ॥ एतान्ग्राम्यान्पशूनाहुरारण्यांश्च निबोध मे ॥ श्वापदं द्विखुरं हस्ती वानरः पक्षिपंचमाः ॥ उदकाः पशवः ष
ष्ठाः सप्तमास्तु सरीसृपाः ॥ गायत्रं च ऋचश्चैव त्रिवृत्साम रथंतरं ॥ अग्निष्टोमं च यज्ञानां निर्ममे प्रथमान्मुखात् ॥
यजूंषि त्रैष्टुभं छंदः स्तोमं पंचदशं तथा ॥ बृहत्साम तथोक्थ्यं च दक्षिणादसृजन्मुखात् ॥ सामानि जगतीछंदः
स्तोमं सप्तदशं तथा ॥ अतिरात्रं च यज्ञानां निर्ममे पश्चिमान्मुखात् ॥ एकविंशमथर्वाणमाप्तोर्यामाणमेव च ॥

॥मा॰पु॰॥
॥६९॥
69

अनुष्टुभं सवैराजमुत्तरादसृजन्मुखात् ॥ विद्युतोशनिमेघांश्च रोहितेंद्रधनूंषि च ॥ वयांसि च ससर्जादौ कल्पस्य भगवा
न्प्रभुः ॥ उच्चावचानि भूतानि गात्रेभ्यस्तस्य जज्ञिरे ॥ सृष्ट्वा चतुष्टयं पूर्वं देवासुरपितॄन्प्रजाः ॥ ततोसृजत्स भूतानि च
राणि स्थावराणि च ॥ यक्षान्पिशाचान्गंधर्वांस्तथैवाप्सरसां गणान् ॥ नरकिन्नररक्षांसि वयःपशुमृगोरगान् ॥
अव्ययं च व्ययं चैव यदिदं स्थाणु जंगमं ॥ तेषां ये यानि कर्माणि प्राक्सृष्ट्यां प्रतिपेदिरे ॥ तान्येव प्रतिपद्यंते सृज्य
मानाः पुनः पुनः ॥ हिंस्राहिंस्रे मृदुक्रूरे धर्माधर्मावृतानृते ॥ तद्भाविताः प्रपद्यंते तस्मात्तत्तस्य रोचते ॥ इंद्रियार्थेषु भू
तेषु शरीरेषु च स प्रभुः ॥ नानात्वं विनियोगं च धातैव व्यदधात्स्वयं ॥ नाम रूपं च भूतानां कृत्यानां च प्रपंचनं ॥ वेद
शब्देभ्य एवादौ देवादीनां चकार सः ॥ ऋषीणां नामधेयानि याश्च वेदेषु दृष्टयः ॥ शर्वर्यंते प्रसूतानां अन्येषां च द
दाति सः ॥ यथर्तुष्वृतुलिंगानि नानारूपाणि पर्यये ॥ दृश्यंते तानि तान्येव तथा भावा युगादिषु ॥ एवंविधाः सृष्टय
स्तु ब्रह्मणो व्यक्तजन्मनः ॥ शर्वर्यंते प्रबुद्धस्य कल्पे कल्पे भवंति वै ॥ ॥ इति श्रीमार्कंडेयपुराणे सृ
ष्टिस्थितिः ॥ क्रौष्टुकिरुवाच ॥ अर्वाक्स्रोतस्तु कथितो भवता यस्तु मानुषः ॥ ब्रह्मन्विस्तरतो ब्रूहि ब्रह्मा तमसृ
जद्यथा ॥ यथा च वर्णानसृजद्यद्गुणांश्च महामुने ॥ यच्च तेषां स्मृतं कर्म विप्रादीनां वदस्व तत् ॥ मार्कंडेय उवाच ॥ ब्रह्म
णः सृजतः पूर्वं सत्याभिध्यायिनस्तदा ॥ मिथुनानां सहस्रं तु मुखात्सोभवन्मुने ॥ जनास्ते ह्युपपद्यंते सत्त्वोद्रिक्ताः
सुचेतसः ॥ सहस्रमन्यद्वक्षस्तो मिथुनानां ससर्ज ह ॥ ते सर्वे रजसोद्रिक्ताः शुष्मिणश्चाप्यमर्षिणः ॥ ससर्जान्यत्सह ॥राम॥
स्रं तु द्वंद्वानामूरुतः पुनः ॥ रजस्तमोभ्यामुद्रिक्ता ईहाशीलास्तु ते स्मृताः ॥ पद्भ्यां सहस्रमन्यच्च मिथुनानां ससर्ज ह
उद्रिक्तास्तमसा सर्वे निःश्रीका ह्यल्पतेजसः ॥ ततः संघर्षमाणास्ते द्वंद्वोत्पन्नास्तु प्राणिनः ॥ अन्योन्यहृच्छयाविष्टा मै ॥६९॥

युनायोपचक्रमुः॥ततःप्रभृतिकल्पेस्मिन्मैथुनोत्पत्तिरुच्यते॥मासिमास्यार्त्तवंयद्वत्तत्तदासीत्तुयोषितां॥तस्मात्तदानसुषुवुः
सेवितैरपिमैथुनैः॥आयुषोंतेप्रसूयंतेमिथुनान्येवताःसकृत॥कुलिकंकुलिकाचैवउत्पद्यंतेमुमूर्षतां॥ततःप्रभृतिकल्पे
नां स्मिन्मिथुनानांहिसंभवः॥ध्यानेतुमनसातासांप्रजानांजायतेसकृत॥शब्दादिविषयःसर्गःप्रत्येकंपंचलक्षणः॥इत्येवमानसी
सृष्टिर्यावैपूर्वंप्रजापतेः॥तस्यान्वयायसंभूतायैरिदंपूरितंजगत॥सरित्सरःसमुद्रांश्चसेवंतेपर्वतानपि॥तास्तदाह्यल्पशीतो
ष्णायुगेतस्मिंश्चरंतिवै॥तत्पिंस्वाभाविकींप्राप्तविषयेसुमहामते॥नतासांप्रतिघातोस्तिनद्वंद्वोनापिमत्सरः॥पर्वतोदधि
सेविन्यस्त्वानिकेताश्चसर्वतः॥तावैनिःकामचारिण्योनित्यंमुदितमानसाः॥पिशाचोरगरक्षांसिनतदामत्सरिणोजनाः॥
पशवःपक्षिणश्चैवनतदाशनसरीसृपाः॥नानारकाःस्वेदजावातेह्यधर्मप्रसूतयः॥नमूलफलपत्राणिनार्त्तवाऋतवो
नच॥सर्वकालंसुखःकालोनात्यर्थंघर्मशीतता॥कालेनगच्छतातेषांचित्रासिद्धिरजायत॥ततश्चतर्षःपूर्वाह्लेमध्याह्लेच
वितृप्तता॥पुनस्तयेच्छतांतत्रिरन्नायासेनसाभवत॥इष्टंतांचतयायासोमानसःसमजायत॥अपांसौक्ष्म्यंततस्तासांसि
द्धिर्नाम्नारसोल्लासा॥समजायतचैवान्यासर्वकामप्रदायिनी॥असंस्कार्यैःशरीरैस्तुप्रजास्ताःस्थिरयौवनाः॥ता
संविनातुसंकल्पाज्जायंतेमिथुनाःप्रजाः॥समंजन्मचरूपंतुम्रियंतेचैवताःसमं॥अनिच्छाद्वेषसंयुक्तावर्त्तयंतिपरस्परं॥
तुल्यरूपायुषःसर्वाअधमोत्तमतांविना॥चत्वारितुसहस्राणिवर्षाणांमानुषानिवै॥आयुःप्रमाणंजीवंतिनचक्लेशा
द्विपत्तयः॥क्वचित्क्वचित्पुनःसाभूत्क्षितिराभानसर्वतः॥कालेनसृस्मःकालस्यादधोयांतिततःप्रजाः॥तयाताःक्रमशोनाशं
जग्मुःसप्ततुसिद्धयः॥तासुसर्वासुनष्टासुनभसःप्रच्युतारसा॥प्रायशःकल्पवृक्षास्तेसंभूतागृहसंस्थिताः॥सर्वेःप्रत्युपभो
गश्चतासांतेभ्यःप्रजायते॥वर्त्तयंतिस्मतेभ्यस्तास्त्रेतायुगमुखेतदा॥ततःकालेनवैरागःतासामाकस्मिकोभवत॥मासिमास्या

॥मा०पु०॥ नेवः पस्यागमौस्यतिः पुनःपुनः॥ रागोत्पत्या ततस्तासां वृक्षास्ते गृहसंस्थिताः॥ प्रलेभुर परे चासंश्रुतुः शाखमहीरुहाः॥ वस्त्रा
॥७०॥ णि च प्रसूयंते फले स्वाभरणानि च॥ तेष्वेव जायते तेषां गंधवर्णरसान्वितं॥ अमाक्षिकं महावीर्यं पुटके पुटके मधु॥ तेन
ता वर्तयंति स्म सुखे त्रेतायुगस्य वै॥ ततः कालांतरेणैव पुनर्लोभान्विता स्तु ताः॥ वृक्षांस्तुताः पर्यगृह्णन्मधु त्वाविष्ट चेत
सः॥ नेमुस्तेनापचारेण तेपितासां महीरुहाः॥ फलेषु चापरे वासं चक्रुः शालामहीरुहा॥ ततो द्वंद्वान्यजायंत शीतोष्णक्षु
70 त्पुखानि वै॥ तास्तु द्वंद्वोपघातार्थं चक्रुः पूर्वं पुराणि वै॥ मरुधन्वसु दुर्गेषु पर्वतेषु दरीषु च॥ संश्रयंति च दुर्गाणि धा
न्यं पार्वतमौदकं॥ कृत्रिमं च तथा दुर्गं मित्वा मित्वात्मनो गुणैः॥ मानार्थानि प्रमाणानि स्तास्तु पूर्वं प्रचक्रिरे॥ परमाणुप
रं सूक्ष्मं त्रसरेणुमहीरजः॥ वालाग्रंचैव लिक्षा च यूका चाथ यवोदरं॥ क्रमादष्टगुणान्याहुर्यवानष्टौ तथांगुलं॥ ष
डंगुलं पदं तच्च वितस्तिर्द्विगुणं स्मृतं॥ द्वे वितस्ती तथा हस्तो ब्रह्मतीर्थादिवेष्टितः॥ चतुर्हस्तं धनुर्दंडो नालिकायुगमे
व च॥ क्रोशो धनुःसहस्रे द्वे गव्यूतिस्तच्चतुर्गुणं॥ प्रोक्तं तु योजनं प्राज्ञैः संख्यानार्थमिदं परं॥ चतुर्णामथ दुर्गाणां
स्वसमुत्थानि त्रीणि वै॥ चतुर्थं कृत्रिमं दुर्गं ते चक्रुर्यत्नतस्तु वै॥ पुरं च खेटकं चैव तद्वद्द्रोणीमुखं द्विज॥ शाखानगरकं
चापि तथा खर्वटकं द्रिमीं॥ ग्रामसंघोषविन्यासं तेषु चावसथान्पृथक्॥ सोत्सेधं वप्रप्राकारं सर्वतः परिखावृतं॥ यो
जनार्द्धार्द्धविष्कंभमष्टभागोत्तरं पुरं॥ प्रागुदक्प्रवणं शस्तं शुद्धवंशबहिर्गमं॥ तदर्द्धेन तथा खेटं तत्पादेन च खर्वटं
न्यूनं द्रोणीमुखं तस्मादष्टभागेन चोच्यते॥ प्राकारपरिखाहीनं पुरं खर्वटमुच्यते॥ शाखानगरकं चान्यन्मंत्रिसा ॥राम॥
मंतभुक्तिमत्॥ तथा शूद्रजनप्रायाः सुसमृद्धकृषीवलाः॥ क्षेत्रोपभोगभूमध्ये वसतिर्ग्रामसंज्ञिता॥ अन्यस्मान्न ॥७०॥
गराद्यां कार्यमुद्दिश्य मानवैः॥ क्रियते वसतिः सा वै विज्ञेया वसतिर्नरैः॥ दुष्टप्रायो विना क्षेत्रैः परभूमिचरो बली ग्रामम

वद्रुमीसंज्ञो राजवद्द्रुमसंश्रयाः॥ शाकटारूढभांडश्च सगोपो विपणिं विना॥ गोसमूहं स्तयाघोषायत्तेक्षान्म निकेतनः॥ एवं ते
नगरादीस्तु कृत्वावासार्थमासनः॥ निकेतनानि द्वंद्वानां चक्रुश्चोपशमाय वै॥ गृहाकारा यथा पूर्वं तेषामासन्महीरुहाः॥ त
थासंस्मृत्य संस्मृत्य च क्रुर्वेश्मानि ताः प्रजाः॥ वृक्षस्यैवंगता शाखा यास्तथैवं चाथ रागताः॥ नताश्चैवोन्नताश्चैव तद्वच्छाखाः प्रच
क्रिरे॥ याः शाखाः कल्पवृक्षाणां पूर्वमासं द्विजोत्तम॥ ता एव शालारोहेण शालास्त्वं तेन ता स्मृताः॥ कृत्वा द्वंद्वोपघातं ते वार्त्तोपा
यमचिंतयन्॥ नष्टेषु मधुना साईं कल्पवृक्षेषु शेषतः॥ विषादव्याकुलास्ता वै प्रजास्तृष्णाक्षुधार्द्दिताः॥ प्रादुर्बभूवुर्धान्यानि
ततस्त्रेतामुखे तदा॥ वार्त्तार्थसाधिका ह्यन्या वृष्टिः संसार्विकामता॥ तस्यां वृष्ट्युदकानीह तदानिम्नेगतानि वै॥ वृष्ट्यातु वंधे
रभवन्स्रोतःखातानि निम्नगाः॥ ये पुरस्तादपां स्तोका आपन्नाः पृथिवीतले॥ अपां भूमेश्च संयोगादोषध्यस्तास्तदाभवन्॥
अफालकृष्टाश्चानुप्ताग्राम्यारण्याश्चतुर्दश॥ ऋतुपुष्पफलाश्चैव वृक्षगुल्माश्च जज्ञिरे॥ प्रादुर्भावस्तु त्रेतायामाद्यायामोषधि जे
स्य तु॥ तेनौषधेनावर्त्तंत प्रजास्त्रेतायुगे मुने॥ रागलोभौ समासाद्य प्रजास्ताः कस्मिकौ तदा॥ ततस्ताः पर्यगृह्णंत नदीक्षेत्राणि पर्व
तान्॥ वृक्षगुल्मौषधीश्चैव मात्सर्याच्च यथाबलं॥ तेन दोषेण ता नेशुरोषध्यो मिषतां द्विज॥ अग्रसन्भुवा तास्तु तदौषध्यो महा
मुने॥ नष्टासु च पुनस्तासु विभ्रांतास्ताः पुनः प्रजाः॥ ब्रह्माणं शरणं जग्मुः क्षुधार्त्ताः परमेष्ठिनं॥ स चापि तत्त्वतो ज्ञात्वा तास्तु ग्रस्ता वी
वसुंधरां॥ वत्सं कृत्वा सुमेरुं तु दुदोह भगवान्विभुः॥ दुग्धेयं गौस्तदा तेन सस्यानि पृथिवीतले॥ जज्ञिरे तानि बीजानि ग्राम्यारण्याः
स्तु ताः स्मृताः॥ ओषध्यः फलपाकांता गणाः सप्तदशास्तु ताः॥ व्रीहयश्च यवाश्चैव गोधूमाअणवस्तिला॥ प्रियंगवो ह्युदारा
श्च कोरदूषाः सचीनकाः॥ माषा मुद्गा मसूराश्च निष्पावाः सकुलत्थकाः॥ आढक्यश्चणकाश्चैव शणाः सप्तदश स्मृताः॥ इत्येता
ओषधीनां तु ग्राम्याणां जातयः पुराः॥ ओषध्यो याज्ञियाश्चैव ग्राम्यारण्याश्चतुर्दश॥ व्रीहयश्च यवाश्चैव गोधूमा अणवस्ति

लाः॥ प्रियंगुः सप्तमाद्येते कीर्त्तिताः सकुलत्थकाः॥ श्यामाकास्त्वथनीवारो जर्त्तिलाः सगवेधुकाः॥ कुरुविंदामर्कटकाः स्तथावेणुय
॥मा॰पु॰॥ वाश्चये॥ ग्रामारण्याः स्मृता ह्येते ओषध्यश्च चतुर्दश॥ यदाप्रसृष्टा ओषध्यो न प्ररोहंति ताः पुनः॥ ततः स तासां वृद्ध्यर्थं वार्त्तोपायं
चकारह॥ ब्रह्मा स्वयंभूर्भगवान्हस्तसिद्धिं च कर्मजां॥ ततः प्रभृत्यथौषध्यः कृष्टपच्याश्च जज्ञिरे॥ संसिद्धायां च वार्त्तायां ततस्तासां
॥७१॥ स्वयंप्रभुः॥ मर्यादाः स्थापयामास यथान्यायं यथागुणं॥ वर्णानामाश्रमाणां च धर्मान्धर्मभृतां वरः॥ लोकांश्च सर्ववर्णानां सम्य
71 क्धर्मानुपालिनां॥ प्राजापत्यं ब्राह्मणानां स्मृतं स्थानं क्रियावतां॥ स्थानमैंद्रं क्षत्रियाणां संग्रामेष्वपलायिनां॥ वैश्यानां मारुत
स्थानं स्वधर्ममनुवर्त्तिनां॥ गांधर्वं शूद्रजातीनां परिचर्यानुवर्त्तिनां॥ अष्टाशीतिसहस्राणि मुनीनामूर्द्ध्वरेतसां॥ स्मृतं तेषां तु य
स्थानं तदेव गुरुवासिनं॥ सप्तर्षीणां तु यत्स्थानं स्मृतं तद्वै वनौकसां॥ प्राजापत्यं गृहस्थानां न्यासिनां ब्रह्मणः क्षयं॥ योगिनाम
मृतं स्थानं मित्येताः स्थानकल्पनाः॥ ड॥ ॥ इति श्री मार्कंडेयपुराणे ४९॥ ॥ मार्कंडेय उवाच
ततोभिध्यायतस्तस्य जज्ञिरे मानसीः प्रजाः॥ तच्छरीरसमुत्पन्नैः कार्यैस्तैः कारणैः सह॥ क्षेत्रज्ञाः समवर्त्तंत गात्रेभ्यस्तस्य धी
ये मतः॥ ते सर्वे समवर्त्तंत ये मया प्रागुदाहृताः॥ देवाद्याः स्थावरांताश्च त्रैगुण्यविषये स्थिता॥ एवं भूतानि सृष्टानि स्थावराणि चराणि च
यदास्य ताः प्रजाः सर्वा नाभ्यवर्द्धंत धीमतः॥ तदान्यान्मानसान्पुत्रान्सदृशानात्मनोसृजत्॥ भृगुं पुलस्त्यं पुलहं क्रतुमंगिर
संतथा॥ मरीचिं दक्षमत्रिं च वसिष्ठं चैव मानसं॥ नव ब्रह्माण इत्येते पुराणे निश्चयं गताः॥ ततोसृजत्पुनर्ब्रह्मा रुद्रं रोषात्मसंभ
वं॥ संकल्पं चैव धर्मं च पूर्वेषामपि पूर्वजं॥ सनंदनाद्या ये च पूर्वं सृष्टाः स्वयंभुवा॥ न ते लोकेषु सज्जंते निरपेक्षाः समाहि ॥राम॥
ताः॥ सर्वे ते ह्यागतज्ञाना वीतरागा विमत्सराः॥ तेष्वेवं निरपेक्षेषु लोकसृष्टौ महात्मनः॥ ब्रह्मणोभून्महाक्रोधस्तत्रोत्पन्नो ॥७१॥
र्कसन्निभः॥ अर्द्धनारीनरवपुः पुरुषोतिशरीरवान्॥ विभजात्मानमित्युक्त्वा स तदांतर्दधे ततः॥ स चोक्तो वै पृथक्स्त्रीत्वं पु

71A

रूपं तेन तदाकरोत ॥ विभेद पुरुषत्वं च दशधैवैकधा तु सः ॥ सौम्यासौम्यैस्तथा शांतैर्येत्र स्त्रीत्वं च स प्रभुः ॥ विभेद तद्भासे च स्वरू
पैरसितैः सितैः ॥ ततो ब्रह्मात्मसंभूतं पूर्वं स्वायंभुवं प्रभुः ॥ आत्मनः सदृशं चक्रे प्रजापालो मनुं तदा ॥ शतरूपां च तां नारीं तपोनि
र्द्धूतकल्मषां ॥ स्वायंभुवो मनुर्देवः पत्नीत्वे जगृहे प्रभुः ॥ तस्माच्च पुरुषात्पुत्रौ शतरूपा व्यजायत ॥ प्रियव्रतोत्तानपादौ प्रख्याता
वात्मकर्मभिः ॥ कन्ये द्वे च तथाकूतिः प्रसूतिश्च ततः पिता ॥ ददौ प्रसूतिं दक्षाय तथाकूतिं रुचेः पुरा ॥ प्रजापतिः स जग्राह तयोर्यज्ञः
सदक्षिणः ॥ पुत्रो जज्ञे महाभाग दंपत्योर्मिथुनं ततः ॥ यज्ञस्य दक्षिणायां तु पुत्रा द्वादश जज्ञिरे ॥ यामा इति समाख्याता देवाः स्वायंभुवे त
दे ॥ तस्य पुत्रास्तु यज्ञस्य दक्षिणायां सभास्वराः ॥ प्रसूत्यां च तथा दक्षश्चतस्रो विंशतिं तथा ॥ ससर्ज कन्यास्तासां तु सम्यक् नामानि
मे शृणु ॥ श्रद्धा लक्ष्मीर्धृतिस्तुष्टिः पुष्टिर्मेधा तथा क्रिया ॥ बुद्धिर्लज्जा वपुः शांतिः सिद्धिः कीर्तिस्त्रयोदशी ॥ पत्न्यर्थं प्रतिजग्राह
वीय धर्मो दाक्षायणीः प्रभुः ॥ ताभ्यः शिष्टा यवीयस्य एकादश सुलोचनाः ॥ ख्यातिः सत्यथ संभूतिः स्मृतिः प्रीतिस्तथा क्षमा ॥ सन्नतिश्चा
नसूया च ऊर्जा स्वाहा स्वधा तथा ॥ भृगुर्भवो मरीचिश्च तथा चैवांगिरा मुनिः ॥ पुलस्त्यः पुलहश्चैव क्रतुश्च कवयस्तथा ॥ अत्रिर्वसिष्ठो
वह्निश्च पितरश्च यथाक्रमं ॥ ख्यात्याद्या जगृहुः कन्या मुनयो मुनिसत्तमाः ॥ श्रद्धा कामं चला दर्पं नियमं धृतिरात्मजं ॥ संतोषं च
तथा तुष्टिर्लोभं पुष्टिरसूयत ॥ मेधा श्रुतं क्रिया दंडं नयं विनयमेव च ॥ बोधं बुद्धिस्तथा लज्जा विनयं वपुरात्मजं ॥ व्यवसायं प्रज
ज्ञे वै क्षेमं शांतिरसूयत ॥ सुखं सिद्धिर्यशः कीर्तिरित्येते धर्मसूनवः ॥ कामान्नंदी सुतं हर्षं धर्मपौत्रमसूयत ॥ हिंसा भार्या त्वध
र्मस्य तस्यां जज्ञे तथानृतं ॥ कन्या च निकृतिस्ताभ्यां सुतौ द्वौ नरकं भयं ॥ माया च वेदना चैव मिथुनं त्विदमेतयोः ॥ नयाज्जज्ञे
यथैव माया मृत्युं भूतापहारिणं ॥ वेदना स्वसुतं चापि दुःखं जज्ञेऽथ रौरवात् ॥ मृत्योर्व्याधिजराशोकतृष्णाः क्रोधश्च जज्ञिरे
दुःखोत्तराः स्मृता ह्येते सर्वे वाधर्मलक्षणाः ॥ नैषां भार्यास्ति पुत्रो वा सर्वे ते ह्यूर्ध्वरेतसः ॥ निकृतिश्च तथा चान्यं मृत्योर्भार्याभ

॥मा॰पु॰॥ वन्मुने ॥ अलक्ष्मीर्नाम तस्यां च मृत्योः पुत्राश्चतुर्दश ॥ अलक्ष्मीसुत काश्चै ते मृत्योरादेशकारिणः ॥ विनाशकाले च नरान्
भजंते तेऽलुब्धतान् ॥ इंद्रियेषु दशस्वेते तथा मनसि च स्थिताः ॥ स्वे स्वे नरं स्त्रियं वापि विषये योजयंति च ॥ तथेंद्रिया
॥७२॥ णि चाक्रम्य रागलोभादिभिर्नरान् ॥ योजयंति यथा हानिं याति धर्मादिभिर्द्विज ॥ अहंकारगताश्चान्ये तथान्ये बुद्धिसं
72 स्थिताः ॥ विनाशाय नरस्त्रीणां यतंते मोहसंश्रयाः ॥ एवं त्वधर्मे लोसन्नाः सर्वे वापि भयंकराः ॥ तयेवान्यो गृहे पुंसां दुःस
हो नाम संस्थिताः ॥ क्षुत्क्षामो धोमुखो नग्नश्चीरी काकसमस्वनः ॥ स र्वं खादितुं सृष्टो ब्रह्मणा तमसो निधिः ॥ दंष्ट्राकराल स
सर्व मैवं बीभत्सास्य सुभैरवं ॥ तमत्तुकाममाहेदं ब्रह्मा लोकपितामहः ॥ सर्वे ब्रह्ममयः शुद्धः कारणं जगतोव्ययः ॥ ब्रह्मोवाच ॥ ना
त्तव्यं ते जगदिदं जहि कोपं शमं व्रज ॥ त्यजेतां तामसीं वृत्तिमवाप्य रजसः कलां ॥ दुःसह उवाच ॥ क्षुत्क्षामोस्मि जगन्नाथ पिपा
सुश्चास्मि दुर्बलः ॥ कथं तृप्तिर्भवेन्नाथ भवेयं बलवान्कथं ॥ कश्चाश्रमो ममास्त्याहि वसेयं यत्र निर्वृतः ॥ ब्रह्मोवाच ॥ तवा
श्रयो गृहे पुंसां जनानां धर्मविद्विषां ॥ पुष्टिर्निःस्वं क्रियाहान्या तव वत्स भविष्यति ॥ स्तुताविस्फोटा श्वते वस्त्रमाहारं च द
दामि वै ॥ क्षुतं कीटावपन्नं च तथा श्वभिरवेक्षितं ॥ भग्नभांडगतं तद्वत्सुखवातोपशामितं ॥ उच्छिष्टमपक्वमस्विन्नं वलीं म
ढमसंस्कृतं ॥ भग्नासनस्थितैर्भुक्तमासंदीगतमेव च ॥ विदिग्मुखं संध्ययोश्च नृत्यवाद्यस्वनाकुलं ॥ उदक्यास्यशोतो
भुक्तमुदक्याहृष्टमेव च ॥ यच्चोपघातकं किंचिद्भक्ष्यं पेयमथापि वा ॥ एतानि तव पुष्ट्यर्थमन्नमन्यद्ददामि ते ॥ अश्र
द्धयाहुतं दत्तमस्नातैर्यद्वयत्ययात् ॥ यच्चोंबुपूर्वकं किंचिच्छमनालोकितमेव च ॥ त्यक्तमाविष्कृतं यच्च दत्तं चैव तिविस्मया ॥राम:॥
त् ॥ दुष्टकुद्धार्तदत्तं च यक्ष तत्र पुष्पासितस्फलं ॥ यच्च योनर्मकः किंचित्करोत्यामुष्मिकं कर्म ॥ यच्च पौनर्भवायोपितघस्त ॥७२॥
तवत्तनय ॥ कन्यामुल्कोपधान्याय समुपात्तधनं क्रियाः ॥ तवैव यस्त्र पुष्ट्यर्थमसद्वारक्रियाश्रयाः ॥ यच्चाप्सु विहि

72A

तं किंचित्करो स्यामुष्मिकं नरः॥ तत्सर्वं तव कामांश्च ददामि तव सिद्धये॥ गुर्विण्या भिगमे संध्या नित्यकार्यव्यतिक्रमे॥ असंछ्रु
स्त्रक्रियालापदूषिते शुचरुः सदा॥ तवाभिभवसामर्थ्यं न भविष्यति सदा नृषु॥ पंक्तिभेदे वृथापाके पाकभेदे तथा कृते॥ नित्यं च गे
हकलहे भविता वसथ स्तव॥ अयोग्यमाले चतथा भस्यगोवाहनादिके॥ असंध्याभ्युषिताऽगारे कालेऽस्त्वतो भयं नृणां॥ तस्य
त्रयग्रहवीडासु त्रिविधोऽस्या तद्दर्शने॥ अशांतिकरान्यस्मन रानभिभविष्यसि॥ दूयोपवासिनो मद्य द्यूतस्त्रीषु रताः सदा
ति स्वच्छासनोपकर्त्तारो वैडालव्रतिकाश्च ये॥ अब्रह्मचारिणाधीतमिज्या चाविदुषा कृता॥ तपोवने ग्राम्यभुजो यतेश्चानिर्जि
तात्मनः॥ ब्राह्मणक्षत्रियविशां शूद्राणां च स्वकर्मतः॥ परिच्युतानां या चेष्टा परलोकार्थमीप्सतां॥ तासां च यत्फलं कृत्स्नं त
त्तेयस्म भविष्यति॥ अन्यच्च ते प्रयच्छामि पुष्ट्यर्थं तन्निबोध मे॥ भवतो वैश्वदेवांते नामोच्चारणपूर्वकं॥ एतत्तवेति दास्यंति य
न्नरा बलिमर्जितं॥ यः संस्कृताशां विधिवत्सुचिरं तलया बहिः॥ अलोलुपोजितस्त्रीकस्तद्गृहं यस्म वर्जय॥ यद्यंते हव्यक
व्याभ्यां देवतापितरस्तथा॥ जामयो तिथयश्चान्ये तद्गृहं यस्म वर्जय॥ यत्र मैत्री गृहे बालवृद्धयोषिन्नरेषु च॥ तथा स्वजन
वर्गेषु तद्गृहं यस्म वर्जय॥ योषितो भिरता यत्र न बहिर्गमनोत्सुकाः॥ त्यक्तानृतकथा यत्र यस्म तत्परिवर्जय यं यः संबंधियो
ग्यानि शयनान्यासनानि च॥ यत्र गेहे त्वया यस्म तद्दूर्यं वचनान्मम॥ यत्र सावर्णिकानि सं संसाधुकर्मण्यवस्थिताः॥ सामान्यो
पस्करे श्वयोत्यजे श्राय स्म तद्गृहं॥ यत्रासनस्यास्ति दृष्टसु गुरुवृद्धद्विजातिषु॥ नति स्तुति गृहं तच्च वर्ज्यं यस्म त्वया सदा॥
तरुकोणादिभिद्वीरं न विद्धं यस्य वेश्मनः॥ मम भेदाय वा पुंसां तद्ध्ये याभवनं नते॥ देवतातिथिभृत्यानामनिर्थिनां च वर्त्तनं॥ य
ग स्यावशिष्टेनान्नेन पुंसस्तस्य गृहं स्यां॥ सत्यवाक्या नृक्षमाशीलानहिंसत्वानुपातिनां॥ गुरूपातीहृशा नृ यस्म सज्जयेवान
सूयवः॥ भर्तृशुश्रूषणे लोयुक्ता मसत्स्त्रीसंगवर्जितां॥ कुटुंबभर्तृशेषान्नपुष्टां वेस्म जयो षितं॥ यजनाध्ययनाभ्यासदा

नासकृमतिं तथा॥ याजनाध्यापनादानकृतवृत्तिं द्विजं त्यजेत्॥ दानाध्ययनयज्ञेषु सदोद्युक्तं तु दुःसहः॥ क्षत्रियं त्यजसद्वृत्तिं शस्त्रा
॥मा०पु०॥ जीवी भवेत न॥ त्रिभिः पूर्वगुणैर्युक्तं यस्तु पाल्यवणिज्ययोः॥ कृषिश्चावा प्रवृत्तिं च त्यजेद्वैश्यमकस्मयं॥ दानेज्यादि द्विजन्मशु
॥७३॥ श्रूषातत्परं यस्तु संत्यजेत्॥ मद्यं च ब्राह्मणादीनां शुश्रूषावृत्तिपोषकं॥ श्रुतिस्मृत्यविरोधेन कृतवृत्तिं गृहे गृही॥ यत्र य
त्र च तत्पत्नी तस्यैवानुगतास्तिका॥ यत्र पित्रोर्गुरोः पूजा देवानां हितया नरः॥ पत्नी च यस्तु कुरुते तत्र लक्ष्मीभयं कु
73 तः॥ सदानुलिप्तं संध्यासु गृहमंबु समुक्षितं॥ कृतपुष्पबलिं यस्मात्त्वं शक्ता यदि वीक्षितुं॥ भास्करादृष्टशय्यानि नित्याग्नि
सलिलानि च॥ सूर्याव लोकि दीपानि लक्ष्म्यागेहानि भाजनं॥ यत्रोक्षा चंदनं वीणा आदर्शो मधुसर्पिषी॥ विषाणि ताम्रपात्रा
णि तद्गृहं न त वाश्रयः॥ यत्र कंटकिनो वृक्षा यत्र निष्पाववल्लरी॥ भार्या पुनर्भूर्वल्मीकं त्वद्गृहं मत्तवमंदिरं॥ यस्मिन् गृहे
नराः पंच स्त्रीत्रयं गोत्रयं तथा॥ अंधकारे धनाग्निश्च तद्गृहं मत्तवमंदिरं॥ एकच्छागं द्विवालेयं त्रिगवं पंचमाहिषं॥ ब
ड्वश्वं सप्तमातंगं गृहं यस्मात्त वाश्रयः॥ कुद्दालवात्रपिटकं तद्वत्स्थाल्यादि भाजनं॥ यत्र तत्रैव विक्षिप्तं तत वद्युः प्रतिश्र
यं॥ मुशलोलूखलेस्त्रीणामास्यात दुर्दुर्दुरं बरे॥ अवस्करे मंत्रणं च यत्क्षेमं तद्वयतत्त्तवा॥ लंघ्यंते यत्र धान्यानि पक्वापक्वा
नि वेश्मनि॥ तद्वच्छस्त्राणि तत्रत्वं यथेष्टं चर दुःसह॥ स्थालीपिधाने यत्राग्निर्दत्तो दर्वीकरेण वा॥ गृहे तत्र दुरिशानामं
शोवाणां समाश्रयः॥ मानुषास्थि गृहे यस्य अहोरात्रं मृतं स्थितः॥ तत्र यद्धमतवावासस्तत्या त्ये पाचर हसा॥ अदत्तेषु
ज्ञातेयेषु बंधोः पिंडे तयोदके॥ सपिंडैश्छेदकाश्चैव तत्काले तान्भजानुभज॥ यत्र पद्मं महापद्मो मुरभिर्मोदकाशनी॥ ॥रामः॥
वृषभे रावतो यत्र कस्यते तद्गृहं त्यज॥ अशस्त्रा देवता यत्र सशस्त्राश्चाहवं विना॥ कस्यंते मनुजैस्त्यक्ता तस्यरित्यजमंदि ॥७३॥
रं॥ पौरजानपदैर्यत्र प्रावृष्य सिद्धा महोत्सवाः॥ क्रियते पूर्ववत्स्नेहेन त्वं तत्र गृहे स्थितः॥ शूर्पवायुघटांभोभिः स्नानवस्त्रां

73A

वुविप्रुषा॥नखाग्रसलिलैश्चैवतान्मुंस्वहतलक्षणान्॥रेशाचारान्समयान्ज्ञानिधर्मोज्झयंहोयंहोमंमंगलंदेवतेज्याः॥स
म्यकृशौचविविधानलोकवादान्॥सुसांत्वयाकुर्वतांमास्तुसंगः॥मार्कंडेयउवाच॥इत्युक्तादुःसहंब्रह्मतत्रैवांतरधीयत
चकारशासनंसोपियदुक्तंब्रह्मणाद्विज॥४३॥ ॥इतिश्रीमार्कंडेयपुराणेदुःसहानुशासनं॥५०॥ ॥१॥
मार्कंडेयउवाच॥दुःसहस्याभवद्भार्यानिर्माष्टिर्नामनामतः॥जाताकलेस्तुपत्न्यांयाऋतौचंडालदर्शनात्॥तयो
रपत्यान्यभवन्जगद्व्यापीनिषोडश॥अष्टौकुमाराःकन्याश्चतथाष्टावतिभीषणाः॥दंताकृष्टिस्तथोक्तिश्चप
रिवर्तस्तथापरः॥अंगध्रुकशकुनिश्चैवगंडप्रांतरतिस्तथा॥गर्भहासस्यहाचान्यःकुमारास्तनयास्तयोः॥कन्याश्चान्या
स्तथैवाष्टौतासांनामानिमेशृणु॥नियोजिकावैप्रथमातथैवान्याविरोधिनी॥स्वयंहारकरीचैवभ्रामणीऋतुहारिका॥स्मृ
तिवीजहरेचान्येतयोःकन्येसुदारुणे॥अष्टमीद्वेषणीनामकन्याचातिभयावहा॥एतासांकर्मवक्ष्यामिदोषप्रशमनंचय
त्॥अष्टानांतुकुमाराणांश्रयतांद्विजसत्तम॥दंताकृष्टिःप्रसूतानांवालानांदशनस्थितः॥करोतिदंतसंघर्षंचिकीर्षुर्दुः
सहागमं॥तस्योपशमनंकार्यंसुप्तस्यसिततर्षपैः॥शयनस्योपरिक्षिप्तैर्मोषैस्तुदशनोपरि॥सौवर्चलौषधीस्नानाच्छास्त्रे
त्रानुकीर्तनात्॥उष्ट्रकरखङ्गास्थिक्षौमवस्त्रावधारणात्॥तिष्ठत्यनुःकुमारस्तुतयाक्तिस्तस्यसत्कुर्वता॥शुभेशुभेन्रणामुक्तेत स्त्र
ग्नि थोस्त्वितनान्यथा॥तस्मादुष्टंमंगल्यंवक्तव्यंपंडितैःसदा॥दुष्टेश्रुतेतथोवाक्येश्रीनर्मनीयोजनार्दनः॥चराचरगुरुर्ब्रह्मायाचास्य
कुलदेवता॥अन्यागर्भेपरागर्भसदैवपरिवर्त्तयन्॥रतिमाप्नोतिवाक्यंचविवक्षोरन्यदेवयत्॥परिवर्तकसंज्ञोयंतस्यापिसि
तसर्षपैः॥रक्षोघ्नमंत्रैर्जप्यैश्चरक्षांकुर्वीततत्त्ववित्॥अन्यश्चानिलवन्नृणामंगस्यःस्फुरणादितं॥शुभाशुभंसमाचष्टेदुष्ट
तस्यांगताडनं॥काकादिपक्षिसंस्थोन्यःश्वादेरंगगतोपिवा॥शुभाशुभंचयाकुनैःकुमारोन्योब्रवीतिवै॥तत्रापिदुष्टेव्यासे

जैर

पः प्रारंभस्याग एव च ॥ शुभेद्रुततरं कार्यमिति प्राह प्रजापतिः ॥ गंडांते सुस्थितश्चान्यो मुहूर्त्तोर्द्धं द्विजोत्तम ॥ सर्वारिष्टं मारोत्तिश
॥मा॰ पु॰॥ मंतस्य निशामय ॥ विप्रो त्वत्या देवतास्तु स्याम लोस्यात्तेन च द्विजो ॥ गोमत्रसर्षपस्नानैस्तद्दृस्मग्रहपूजनैः ॥ पुनश्च धर्मोपनिषत्कार
॥७४॥ लैः शास्त्रदर्शनैः ॥ अवज्ञया जन्मनश्च प्रशमं याति गंडवान् ॥ गर्भस्त्रीणां तयान्यस्तु कलहलासी सुदारुणः ॥ तस्य रक्षा सदा का
र्या नित्यं शौचनिषेवणात् ॥ प्रसिद्धमंत्रलिखनात् शुस्तमास्यांदिधारणात् ॥ विशुद्धगेहवसनात् अनायासाच्च वै द्विज ॥ त
थैव सस्यहा चान्यः सस्यर्द्धिमुपहंति यः ॥ तस्यापि रक्षां कुर्वीत जीर्णोपानद्विधारणात् ॥ दृषापसमनयनाच्चंडालाद्यप्रवेशना
74 त् ॥ वहिर्बलिप्रदानाच्च सोमांबुपरिकीर्त्तनात् ॥ परदारपरद्रव्यहरलादिशुमानवान् ॥ नियोजयति चैवान्या कन्या सा तु नियोजि
का ॥ तस्याः पवित्रपठनात् क्रोधलोभादिवर्जनात् ॥ नियोजयति मामेषा इत्येवं क्रोधवर्जनात् ॥ आर्त्तु ष्टान्येन मन्येत ताडितो वा
नियोजिका ॥ नियोजयस्येतमिति न गच्छेत्तद्दशं बुधः ॥ परदारामिसंसर्गे चित्तमासानमेव च ॥ नियोजयस्येवमामिति प्रा
ज्ञो विचिंतयेत् ॥ विरोधं कुरुते चान्या दंपत्योः प्रीयमाणयोः ॥ वंधूनां सुहृदां पित्रोः पुत्रैः सार्द्धणिकेश्वया ॥ विरोधिनी सा त
द्रक्षां कुर्वीत बलिकर्मणा ॥ तथातिवादसहनात् शास्त्राचारनिषेवणात् ॥ धान्यं खलाद्रूहा क्रोष्टा स्वयः सर्पिस्तथापरा ॥ स
मद्विमद्विमद्व्याद यहंति च कन्यका ॥ सा स्वयंहारिके त्युक्ता सदा तद्दानतत्परा ॥ महानसाद्द्धे सिद्धमन्नागारस्थितं तया ॥
परिवेष्यमाणं च सदा सार्द्धं भुंक्ते च भुंजतां ॥ उच्छिष्टाणां मनुष्याणां हरत्यन्नं च दुर्द्धरा ॥ कर्मांतागारशालाभ्यः सिद्धं द्विह
राति द्विज ॥ गोस्त्रीस्तनेभ्यश्च पयः क्षीराद्दधि सदैवसा ॥ द धो घृतं तिललौल्लं सुरागारात्तथा सुरां ॥ रंगं कुसुंभकादिभ्यः का ॥रामः॥
पीसास्त्रमेव च ॥ सा स्वयंहारिका नाम हरत्यविरतं द्विज ॥ कुर्याच्छिखंडिकोद्धारं रक्षार्थं कृत्रिमस्त्रियं ॥ रक्षा चैव गृहे ॥७४॥
लेख्या वश्यो चोच्छिष्टतातया ॥ होमाग्निदेवताधूपभस्मना च परिक्रिया ॥ कार्या क्षीरादिभांडानामेवं तद्रक्षणं स्मृतं ॥ उद्वे

74A

गंधनयत्यन्याहयेकस्थाननिवासिनः॥ पुरुषस्यनुयाप्रोक्ताभ्यामलौसातुकन्यका। तस्यास्तुरक्षांकुर्वीतविक्षिप्तैःसितसर्षपैः॥ आसने
शयनेचोर्व्यांयत्रास्तेसतुमानवः॥ चिंतयेच्चनरःपापामामेयपारुष्यचेतना। आमयस्यसकृज्जप्यंभवसूक्तंसमाधिना॥ स्त्रीणांपुष्पंहर
त्यन्यापुष्पहंतयातुकन्यका॥ अपपुष्पत्तिंसाज्ञेयादोषःसहाकृतुहारिका। कुर्वीततीर्थदेवौकश्चैत्यपर्वतसानुषु। नदीसंगमखातेषु
स्नपनेतत्प्रशांतये॥ मंत्रविद्भूततत्त्वज्ञःपर्वसुप्रसिचेद्द्विज। किंचित्सज्ञैश्चवेदोपसंप्रयुक्तैर्वरोषधैः॥ स्मृतिंचापहरत्यन्याप्रहृत्तासा
तुकन्यका॥ अपमप्रहृत्तासाज्ञेयानृणांयास्मृतिहारिका॥ विविक्तदेशसेवित्वात्तस्याश्चोपशमोभवेत्॥ बीजापहारिणीचान्यास्त्री
पुंसोरतिभीषणा॥ मेध्यान्नभोजनैःस्नानैस्तस्याश्चोपशमोभवेत्॥ अष्टमीदुःसहीनामकन्यालोकभयावहा॥ याकरोतिजनद्विष्टं
नरंनारीमथापिवा॥ मधुक्षीरघृताक्तांस्तुशालीस्त्वथजुहुयात्तिलान्॥ कुर्वीतमित्रविंदांचतथेष्टिंतत्प्रशांतये॥ एतेषांतुकुमाराणां
कन्यानांद्विजसत्तम॥ अष्टात्रिंशदपत्यानितेषांनामानिमेशृणु॥ दंताकृष्टिरथस्कन्याविजल्पाकलहातथा॥ अथवद्धान्‌तदुष्टो
क्तिविवर्ज्यांतत्प्रशांतये॥ तामेवचिंतयेत्प्राज्ञःप्रयतश्चगृहीभवेत्॥ कलहंकलहानेहेकरोत्यविरतंनृणां॥ कुटुंबनाशहेतुश्च
तत्प्रशांतिंनिबोधमे॥ दूर्वांकुरान्मधुघृतंक्षीराक्तान्बलिकर्मणि॥ विक्षिपेज्जुहुयाच्चैवतिलान्मंत्रंचकीर्तयेत्॥ सोमांबुदो
तयांभोधिंसरितश्चधरानिलौ॥ तथाक्तेस्तालुजिह्वोभ्रस्तुत्रस्तातुनिकेतनं॥ सएवपारसनासंस्थास्तानसाधून्‌वादये
ता॥ परिवर्त्तसुतौद्वौतुविरूपविकृतौद्विज॥ तौतुवृक्षाद्रिपरिखाप्राकारांभोधिसंश्रयौ॥ गुर्विण्याःपरिवर्त्तौतुकुरुतःपाद
यादिषु॥ क्रोष्टकेयपरिवर्त्तःस्याद्गमनेस्यान्योदरात्ततः॥ नवृक्षेचैववनेवाद्रिंनप्राकारंपयोनिधिं॥ परिखांनसमाक्रामेद्वृक्षा
गर्भधारिणी॥ अंगधुकृतनयंलेभेपिशुनंनाममन्नामतः॥ सोस्थिमज्जागतःपुंसांबलमत्त्यजितात्मनां॥ श्येनकाककपो
तांश्चगृध्रोलूकौचवैसुतान्॥ अथापशकुनिःपंचजगृहुस्तान्सुरासुराः॥ श्येनंजग्राहवैमृत्युःकाकंकालोगृहीतवान्॥

।।मा०पु०।। उलूकं निर्ऋतिश्चापि जग्धाहाति भयावहं ।। गृध्रं व्याधिस्तरीसोप्य कपोतं च स्वयं यमः ।। एते षामेव चैवोक्ता दूताः पापोपपादने
।।७५।। तस्मात् श्येनादयो यस्य निलीयंते शिरस्यथ ।। तेनात्मरक्षणायालं शांतिः कार्या द्विजोत्तम ।। गेहे प्रसूतिरेतेषां तद्वन्नीडनि
वेशनं ।। नृशस्तं वर्जयेद्गेहं कपोताक्रांतमस्तकं ।। श्येनः कपोतो गृध्रो वा कैशिको वा गृहे द्विज ।। प्रविष्टः कथयत्यंतं वसतां तत्र वे
75 श्मनि ।। ईदृक् कपस्यिजेद्गेहे शांतिं कुर्याद्द्विजोत्तमः ।। स्वप्नेपि हि कपोतस्य दर्शनं न प्रशस्यते ।। षड् यस्यानि कथ्यंते गंडप्रांतरते
स्तया ।। स्त्रीणां रजस्यवस्थानं तेषां कालांश्च मे शृणु ।। चत्वार्यहानि पूर्वाणि तथैवान्यत्त्रयोदशं ।। एकादशं तथैवान्यद् यस्सं
तस्य वै दिने ।। अन्यद्दिवाभिगमने श्राद्धदाने तथा परं ।। पर्वस्वथान्यत्तस्माच्च वर्ज्यान्येतानि पंडितैः ।। गर्भेहं तुःसुतानि घ्नामेहनी चापि
कन्यका ।। प्रविश्य गर्भं हंत्येको भुक्तामेहयते परा ।। जायंते मेहनात्तस्याः सर्पमंडूककच्छपाः ।। सरीसृपाणि चान्यानि पुरीष
मथवा पुनः ।। षण्मासान् गुर्विणीं मांसमृष्णुवानामसंयुतां ।। वृक्षच्छायाश्रितां रात्रौ स्थितां वा त्रिचतुष्पथे ।। श्मशानकल्पभूमि
स्थामुत्तरीयाविवर्जितां ।। रुदमानां निशीथे च आविशेतामिमौ स्त्रियं ।। सस्यहंतुस्तथैवैकः क्षुद्रको नाम नामतः ।। सस्यद्धि
ससदा हंति लब्ध्वारं धृष्णुष्व तत् ।। अमंगल्यदिनारंभे षत्पापेषु चेवसः ।। सित्रेष नुप्रवेशं वै करोत्यन्नोपसंगिषु ।। तस्मात्क
स्यः सुप्रशस्ते दिने भव्ये निशाकरे ।। कुर्याद्दारं भसुप्तिं च तत्प्रहृष्टः सहायवान् ।। नियोजिकेति या कन्या दुःसहस्य मयोदिता
जातं प्रचोदिता संज्ञं तस्याः कन्या चतुष्टयं ।। मत्तोन्मत्तप्रहृष्टांश्च नरान्नारीश्च ताः सदा ।। समाविशंति नाशाय चोदयंति च दारु
णाः ।। अधर्मं धर्मरूपेण अनर्थं चार्थरूपिणं ।। अकामं कामरूपेण मोक्षं चामोक्षरूपिणं ।। दुर्विनीतान्विना शौचं दर्शयंति ।।रामः।।
पृथक् नरान् ।। तस्यं साभिः प्रविष्टाभिः पुरुषार्थैः पृथक् नराः ।। तासां प्रवेशश्च गृहे संध्यारूढे ह्युदुंबरे ।। धात्रे विधात्रे च बलि ।।७५।।
पेत्रकालेन दीयते ।। भुंजतां पिबतां चापि संगिभिर्जल्पविग्रुषैः ।। नरनारीषु संक्रांतिस्तासामाशु भि जायते ।। विरोधिन्यास्त्रयः

पुत्रांश्चोरकोथाहकस्तया॥ तमःप्रच्छादकश्चान्यस्तत्स्वरूपं शृणुष्व मे॥ प्रदीपे तैलसंसर्गदूषिते लंघिते खले॥ मुशलोलूखले यत्र पादु
के चासनं स्त्रियः॥ सूर्पदात्रादिकं यत्र पदाकृष्टं तयासनं॥ यत्रोपलिप्तेनाभ्यर्च्यो विहारः क्रियते गृहे॥ दर्वीमुखेन यत्राग्निरहुतोन्य
त्र दीयते॥ विरोधिनोऽसुतास्तत्र विजृंभंते स्वकामतः॥ एको जिह्वागतः पुंसां स्त्रीणां चालीकसस्यनाकृ॥ चोदको नाम सप्रोक्तः पैसु
न्यं कुरुते गृहे॥ अवधानगतश्चान्यः श्रवणस्थो विदुमेतिः॥ करोति ग्रहणं तेषां वचसां ग्राहकस्तु सः॥ आक्रम्यान्यो मनोनृ
णां तमसा छादयद्दुर्मेदः॥ क्रोधं जनयते यस्तु तमःप्रच्छादकस्तु सः॥ स्वयंहार्यस्तु चौर्येण जनितं तनयत्रयं॥ सर्वेहार्ये द्विहा
रो चवीर्यहारी तथैव च॥ अनाचांतगृहे घेते मंदाचांतगृहेषु च॥ अप्रक्षालितपादेषु प्रविशत्सु महानसं॥ खलेषु गोष्ठेषु
चैवैद्रोहा येषु गृहेषु वै॥ तेषु सर्वेषु यथान्यायं विहरंति रमंति च॥ भ्रामण्यास्तनयस्त्वेकः कालजंघ इतिश्रुतः॥ ते न विष्टोर
तिस्थितो नैव प्राप्नोति वै मुने॥ भुंजन्यो गायते नृत्यन् हसते वलातेतु यः॥ संध्यामैथुनिनं चैव नरमाविशति द्विज॥ कन्यात्र
यं प्रजाता सा या कन्या ऋतुहारिणी॥ एकाकुचहरा कन्या अन्या व्यंजनहारिका॥ तृतीया तु समाख्याता कन्यका जातहारिणी॥
यस्या न क्रियते सर्वैः सम्यक्वैवाहिको विधिः॥ कालातीतो यवा तस्याहरत्येका कुचद्वयं॥ सम्यक्श्राद्धमदत्वा च तयानभ्यर्च्य
मातृकाः॥ विवाहितायाः कन्याया हरति व्यंजनं तया॥ स्वगंधपुष्पान्ये च तयानिर्धूपे सूतिकागृहे॥ प्रदीपशस्त्रमुशलभूतिसर्ष
पवर्जिते॥ अनुप्रविश्य सा जातमपहत्यासमंभवं॥ क्षणप्रसविनी बालं तत्रैवोत्सृजति द्विज॥ सा जातहारिणी नाम सुघोरा पिशि
ताशना॥ तस्मात्संरक्षणं कुर्याद्यत्नतः सूतिकागृहे॥ स्मृतिं चाश्रयतां नां या शून्यागारनिषेवणात॥ अपहंति सुतस्तस्या
:प्रचंडो नाम नामतः॥ पौत्रेभ्यस्तस्य संभूता लीकाः शतसहस्रशः॥ चंडालयोनयश्चाष्टौ दंडपाशासिभीषणाः॥ क्षुधा
विष्टास्तु ता लीकास्ताश्चंडालयोनयः॥ अभ्यधावंत चान्योन्यमत्तुकामाः परस्परं॥ प्रचंडो वारयित्वा तु यास्ताश्चंडालयो

नयः ॥ समयेस्यापयामास यादृशोत कृणुष्व मे ॥ अघ प्रसूति लोकानां मा वा संयोहि दास्यति ॥ इदं तस्याहमतुलं पातयिष्येन
॥मा०पु०॥ संशयः ॥ चंडालयोन्यावसथे लोकायाः प्रसविष्यति ॥ तस्याश्च संततिः सर्वा सा च सद्यो विनश्यति ॥ प्रसूता कन्यके द्वे तु स्त्री
॥७६॥ पुंसो वीजहारिणी ॥ वातरूपा घरूपा च तस्याः प्रहरणं तु ते ॥ वातरूपा निषेकांते सा यस्मै क्षिपते सुतां ॥ स पुमान् वातशुक्रत्वं
प्रयाति वनितापि वा ॥ तयैव गृह्यतः सद्यो निर्वीजत्वमरूपया ॥ अस्मात्तां शीनरो यो वै तया वा विद्यसाशनः ॥ निर्वीज
76 त्वं नरो याति नारी वा शौचवर्जिता ॥ विदेषणी तु या कन्या भ्रुकुटीकुटिलानना ॥ तस्या द्वौ तनयौ वा स्ता मपकारप्रकाशकौ ॥
ये स्त्रन्याभिरतं लोलमसज्जननिषेवणं ॥ पुरुषं द्वेषिणं चेतौ नरमाक्रम्यतिष्ठतः ॥ मात्रान्या चात तामित्रे रभीष्टे स्वजनेः परैः ॥
विद्विष्टो नाशमायाति पुरुषो धर्मतोर्थतः ॥ एकस्तस्या गुणान् द्वौ के प्रकाशयति पापकृत ॥ द्वितीयस्तु गुणान्नैत्री लोकस्या
मपकर्षति ॥ इत्येते दौःसहाः सर्वे यक्ष्मणः संततौ भवाः ॥ पापाचाराः समाख्याता यैर्व्याप्तमखिलं जगत ॥ ४ ॥ ॥ ४ ॥
इति श्रीमार्कंडेयपुराणे दुःसहवंशोत्पत्तिः ॥ ४ ॥ ॥ ४ ॥ मार्कंडेय उवाच ॥ इत्येष तामसः सर्गो ब्रह्मणोव्यक्तजं
न्मनः ॥ रुद्रसर्गं प्रवक्ष्यामि तन्मे निगदतः शृणु ॥ तनयश्च तथैवाष्टौ पत्न्यः पुत्राश्च येयथा ॥ कल्पादावात्मनस्तुल्यं सुतं प्र
ध्यायतः प्रभोः ॥ प्रादुरासीदथांके स्य कुमारो नीललोहितः ॥ रुदन्वै सुस्वरं सोथ ध्रुवं श्चाद्विजसत्तम ॥ किं रोदिषीति तं ब्रह्मा रुदंतं प्र
त्युवाच ह ॥ नाम देहीति तं सोथ प्रत्युवाच प्रजापतिः ॥ ब्रह्मोवाच ॥ रुद्र स्त्वं देवनाम्नासि मा रोदीर्धैर्यमावह ॥ एवमुक्तः स्ततः
सो थ सप्तकृत्वो रुरोद ह ॥ ततोन्यानि ददौ तस्मै सप्त नामानि स प्रभुः ॥ भवं शर्वमथेशानं तथा पशुपतिं द्विज ॥ भीममुग्रं महादेव ॥राम॥
मुवाच प्रपितामहः ॥ चक्रे नामान्यथैतानि पत्नीः पुत्रांश्च स प्रभुः ॥ सूर्यो जलं मही वह्निर्वायुराकाशमेव च ॥ दीक्षितो ब्राह्मणः ॥७६॥
सोम इत्येतास्तनवः क्रमात ॥ सुवर्चला तथैवोषा विकेशी चापरा शिवा ॥ स्वाहा दिशस्तथा दीक्षा रोहिणी च यथाक्रमं ॥ सू

यौदिनामिमाः पत्न्या रुद्रास्यैनीमभिः सह ॥ शनैश्चरस्तथा शुक्रो रोहितांगो मनोजवः ॥ स्कंदः सर्गोथ संतानो बुधश्चानुक्रमा
त्सुताः ॥ एवंप्रकारो रुद्रोसौ सतीं भार्यामविंदत ॥ दक्षकोपाच्च तत्याज सा सती स्वं कलेवरं ॥ हिमवद्दुहिता साभून्मेनायां द्वि
जसत्तम ॥ तस्यां भ्राता यमैनाकः सौंभोधेरुत्तमः सखा ॥ उपयेमे पुनश्चैनामनन्यां भगवान्भवः ॥ देवौ धातृविधातारौ भृगोः ख्या
तिरसूयत ॥ श्रियं च देवदेवस्य पत्नी नारायणस्य या ॥ आयतिर्नियतिश्चैव मेरोः कन्ये महात्मनः ॥ भार्ये धातृविधात्रेश्च तयोर्जा
तौ सुतावुभौ ॥ प्राणश्चैव मृकंडश्च पिता मम महायशाः ॥ मनस्विन्यमहं तस्मात्सुतो वेदशिरा मम ॥ धूम्रवत्यां समभवत्प्राणस्यापि
निबोध मे ॥ प्राणस्य द्युतिमान्पुत्र उत्पन्नस्तस्य चात्मजः ॥ अजायंत तयोः पुत्राः पौत्राश्च बहवोभवान् ॥ पत्नी मरीचेः संभूतिः
पौर्णमासमसूयत ॥ विरजाः पर्वतश्चैव तस्य पुत्रौ महात्मनः ॥ तयोः पुत्रांस्तु वक्ष्येहं वंशसंकीर्तने द्विज ॥ स्मृतिश्चांगिरसः
पत्नी प्रसूता कन्यकास्तथा ॥ सिनीवाली कुहूश्चैव राका चानुमतिस्तथा ॥ अनसूया तथैवात्रेर्जज्ञे पुत्रानकल्मषा
न् ॥ सोमं दुर्वाससं चैव दत्तात्रेयं च योगिनं ॥ प्रीत्यां पुलस्त्यभार्यायां दत्तोन्यस्तत्सुतोभवत् ॥ पूर्वजन्मनि योगस्त्यः स्मृतः
स्वायंभुवेंतरे ॥ कर्दमं चार्वरीवांश्च सहिष्णुश्च सुतास्त्रयः ॥ क्षमा तु सुषुवे भार्या पुलहस्य प्रजापतेः ॥ क्रतोश्च संततिर्भार्या
वालखिल्यानसूयत ॥ षष्टिर्यानि सहस्राणि ऋषीणामूर्द्ध्वरेतसां ॥ ऊर्ज्जायां तु वसिष्ठस्य सप्ताजायंत वै द्विजाः ॥ रजो गो
त्रोर्द्ध्वबाहुश्च सवनश्चानघस्तथा ॥ सुतपाः शुक्र इत्येते सर्वे सप्तर्षयः स्मृताः ॥ योसावग्निरभीमानी ब्रह्मणस्तनयोग्र
जः ॥ तस्मात्स्वाहा सुतांल्लेभे त्रीनुदारौजसो द्विज ॥ पावकं पवमानं च शुचिं चापि जलाशिनं ॥ तेषां तु संततावन्ये चत्वा
रिंशच्च पंच च ॥ कथ्यंते वह्नयश्चैव पिता पुत्रत्रयं च यत् ॥ एवमेकोनपंचाशद्वह्नयः परिकीर्तिताः ॥ पितरो ब्रह्मणा
सृष्टा ये व्याख्याता मया द्विज ॥ अग्निष्वात्ता बर्हिषदोनग्नयः साग्नयश्च ये ॥ तेभ्यः स्वधा सुते जज्ञे मेनां वै धारिणीं त

॥मा॰पु॰॥ याते उभे ब्रह्मवादिन्यौ योगिन्यौ वाप्युभे द्विज ॥ उत्तमज्ञानसंपन्ने सर्वैः समुदिते गुणैः ॥ इत्येषा दक्षकन्यानां कथिता यस्य संततिः
श्रद्धावान्संस्मरन्नेतां नानपत्योभिजायते ॥४॥ ॥४॥ इति श्रीमार्कंडेयपुराणे रुद्रसर्गः ॥४॥ ॥४॥
॥७७॥ क्रोष्टुकिरुवाच ॥ स्वायंभुवं त्वया प्रोक्तमेतन्मन्वंतरं तु यत् ॥ तदहं भगवन्सम्यक्श्रोतुमिच्छामि कथ्यतां ॥ मन्वंतरप्रमाणं
च देवा ये च ऋषयस्तथा ॥ ये च क्षितीशा भगवन् देवेंद्रश्चैव यस्तथा ॥ मार्कंडेय उवाच ॥ मन्वंतराणां संख्याता साधिका ह्ये
77 कसप्ततिः ॥ मानुषेण प्रमाणेन शृणु मन्वंतरं च मे ॥ त्रिंशत्कोट्यस्तु संख्याताः सहस्राणि च विंशति ॥ सप्तषष्टिस्तथा
न्यानि नियुतानि च संख्यया ॥ मन्वंतरप्रमाणं तु इत्येतत्साधिकं विना ॥ अष्टौ शतसहस्राणि दिव्यया संख्यया स्मृतं ॥
द्विपंचाशत्तथान्यानि सहस्राण्यधिकानि तु ॥ स्वायंभुवो मनुः पूर्वं मनुः स्वारोचिषस्तथा ॥ औत्तमस्तामसश्चैव रैव
तश्चाक्षुषस्तथा ॥ षडेते मनवोऽतीतास्तथा वैवस्वतोऽधुना ॥ सावर्णिः पंच रौच्यश्च भौत्यश्चागामिनस्त्वमी ॥ एतेषां वि
स्तरं नस्या मन्वंतरपरिग्रहे ॥ वक्ष्ये देवानृषींश्चैव यश्चेंद्रः पितरश्च ये ॥ उत्पत्तिसंग्रहो ब्रह्मन् श्रूयतामस्य संततेः ॥
पश्च तेषामनरस्त्रेत सुत्राणां महात्मनां ॥ मनोः स्वायंभुवस्यासन्दश पुत्रास्तु तत्समाः ॥ येरियं पृथिवी सर्वा सप्त
द्वीपा सपत्तना ॥ ससमुद्राकरवती प्रतिवर्षं निवेशिता ॥ स्वायंभुवेंतरे पूर्वमाद्ये त्रेतायुगे तदा ॥ प्रियव्रतस्य पुत्रैस्तैः
पौत्रैः स्वायंभुवस्य तु ॥ प्रियव्रतात्प्रजावंतौ वीरात्कन्या व्यजायत ॥ कन्या सा तु महाभागा कर्दमस्य प्रजापतेः ॥ कन्ये
द्वादश पुत्रांश्च सम्राट् कुक्षिश्च ते उभे ॥ ते सर्वे भ्रातरः शूराः प्रजायति समा दश ॥ अग्निध्रश्चाग्निबाहुश्च मेधामे
धातिथिर्वसुः ॥ ज्योतिष्मान् द्युतिमान् हव्यः सवनो मित्र एव च ॥ प्रियव्रतोऽभ्यषिंचत्तान्सप्त सप्तसु पार्थिवान् ॥ द्वीपे ॥राम॥
षु तेषु च मे लाद्वीपांस्तांश्च निबोध मे ॥ जंबूद्वीपे तथाग्नीध्रं राजानं कृतवान्पिता ॥ प्लक्षद्वीपेश्वरे स्थापितेन मेधातिथिः कृतः ॥७७॥

77A ज्योतिष्मंतं

शाल्मले तु वपुष्मंतं कुशाह्वये॥ क्रौंचद्वीपे द्युतिमंतं भव्यं शाकह्वये सुतं॥ पुष्कराधिपतिं चैव सवनं कृतवान्सुतं॥ महावीरो धातकि
श्च पुष्कराधिपतेः सुतौ॥ द्विधा कृत्वा तयोर्वर्षं पुष्करे संनिवेशयत्॥ भव्यस्य पुत्राः सप्तासन्नामतस्तान्निबोध मे॥ जलदश्च कुमा
रश्च सुकुमारो मनीचकः॥ कुसोत्तरोथ मोदाकिः सप्तमस्तु महाद्रुमः॥ तन्नामांकानि वर्षाणि शाकद्वीपे चकार सः॥ तथा द्यु
तिमतः सप्त पुत्रास्तांश्च निबोध मे॥ कुशलो मनोनुगश्चोष्णः प्रधानश्चांधकारकः॥ मुनिश्च दुंदुभिश्चैव सप्तमस्तु तथा परः॥ ते
षां स्वनामधेयानि क्रौंचद्वीपे तथाभवत्॥ ज्योतिष्मतः कुशद्वीपे पुत्रनामांकितानि वै॥ तत्रापि सप्त वर्षाणि तेषां नामानि मे
शृणु॥ उद्भिज्जं धेनुमंश्चैव द्वैरथं लंबमेव च॥ धृमत्प्रभाकरं चैव कपिलं चापि सप्तमं॥ वपुष्मतः सुताः सप्त शाल्मलेशस्य चाभ
वत्॥ श्वेतश्च हरितश्चैव जीमूतो रोहितस्तथा॥ वैद्युतो मानसश्चैव महीध्रः सुप्रभस्तथा॥ तथैव शाल्मले तेषां स्वनामानि तु सप्त
वै॥ सप्त मेधातिथेः पुत्राः प्लक्षद्वीपेश्वरस्य ये॥ तेषां नामांकितैर्वर्षैस्तद्वर्षे सप्तभिर्वृतं॥ पूर्वं शांतभयं वर्षं शिशिरं तु सुखोद
यं॥ आनंदं च शिवं चैव क्षेमकं च ध्रुवं तथा॥ प्लक्षद्वीपादिषु शाकद्वीपांतिकेषु च॥ ज्ञेयः पंचसु धर्मश्च वर्णाश्रमविभागतः॥ तेषु
सुखमायुश्च रूपं च बलं धर्मश्च नित्यशः॥ पंचस्वेतेषु वर्षेषु सर्वसाधारणं स्मृतं॥ अग्निध्राय पिता पूर्वं जंबूद्वीपं ददौ द्विज॥ त
स्य पुत्रा बभूवुर्हि प्रजापतिसमा नव॥ ज्येष्ठो नाभिरिति ख्यातस्तस्य किंपुरुषोनुजः॥ हरिवर्षस्तृतीयस्तु चतुर्थो भूदिलावृतः॥
रम्यश्च पंचमः प्रोक्तो हिरण्वान् षष्ठ उच्यते॥ कुरुश्च सप्तमस्तेषां भद्राश्वश्चाष्टमः स्मृतः॥ नवमः केतुमालश्च तन्नामा वर्षसं
स्थितिः॥ यानि किंपुरुषाद्यानि वर्जयित्वा हिमाह्वयं॥ तेषां स्वभावतः सिद्धिः सुखप्रायाश्चयत्नतः॥ विपर्ययो न तेष्वस्ति जरामृत्यु
भयं न च॥ धर्माधर्मौ न तेष्वास्तां नोत्तमाधममध्यमाः॥ नैव चतुर्युगावस्था नार्तवा ऋतवो न च॥ अग्निध्रसूनोर्नाभेस्तु ऋषभो
भूत्सुतो द्विज॥ ऋषभाद्भरतो जज्ञे वीरः पुत्रशताग्रजः॥ सोभिषिच्यर्षभः पुत्रं महाप्राज्ञं राज्यमास्थितः॥ तपस्तेपे महाभागः पुलहाश्र

मा० पु० मसंश्रयः॥ हिमाह्वं दक्षिणं वर्षं भरताय पिता ददौ॥ तस्मात्तु भारतं वर्षं तस्य नाम्ना महात्मनः॥ भरतस्याप्यभूत्पुत्रः सुमतिर्नाम
७८ धार्मिकः॥ तस्मिन्राज्यं समावेश्य भरतोपि वनं ययौ॥ एतेषां पुत्रपौत्रैस्तु सप्तद्वीपा वसुंधरा॥ प्रियव्रतस्य पुत्राणां भुक्ता स्वायंभुवे ५
तरे॥ एष स्वायंभुवः सर्गः कथितस्ते द्विजोत्तम॥ पूर्वे मन्वंतरे सम्यक् किमन्यत्कथयामि ते॥ ५३॥ ॥ इति श्रीमार्कंडे
78 यपुराणे सर्गवर्णनं॥ ५३॥ ॥ क्रौष्टुकिरुवाच॥ कति द्वीपाः समुद्रा वा पर्वता कति वा द्विज॥ कियंति चैव वर्षाणि ते
षां नद्यश्च का मुने॥ महाभूतप्रमाणं च गतिं चंद्रार्कयोरपि॥ एतत्प्रब्रूहि मे सर्वं विस्तरेण महामुने॥ मार्कंडेय उवाच॥ शतार्द्ध
कोटिविस्तारा पृथिवी कृत्स्नशो द्विज॥ तस्याः संस्थानमखिलं कथयामि शृणुष्व तत्॥ ये ते द्वीपा मया प्रोक्ता जंबुद्वीपादयो द्विज
पुष्करांता महाभाग शृणु एषां विस्तरं पुनः॥ द्वीपात्तु द्विगुणो द्वीपो जंबुः प्लक्षोथ शाल्मलिः॥ कुशः क्रौंचस्तथा शाकः पुष्करद्वी
प एव च॥ लवणेक्षुसुरासर्पिर्दधिक्षीरजलाब्धिभिः॥ द्विगुणैर्द्विगुणैर्वृद्ध्या सर्वतः परिवेष्टिताः॥ जंबुद्वीपस्य संस्थानं प्रव
क्ष्यामि तन्निबोध मे॥ लक्षमेकं योजनानां वृत्तो विस्तारदैर्घ्यतः॥ हिमवान्हेमकूटश्च निषधो मेरुरेव च॥ नीलः श्वेतस्तथा शृं
गी सप्तास्मिन्वर्षपर्वताः॥ द्वौ लक्षयोजनायामौ मध्ये तत्र महाचलौ॥ तयोर्दक्षिणतो ये तु ये चैवोत्तरतः स्थिताः॥ दश
भिर्दशभिन्न्यूनाः सहस्रैस्ते परस्परं॥ द्विसाहस्रोच्छ्रयाः सर्वे तावद्विस्तारिणश्च ते॥ समुद्रांतःप्रविष्टाश्च षडस्मिन्वर्षपर्व श्रीराम
ताः॥ दक्षिणोत्तरतो निम्ना मध्ये तुंगायता क्षितिः॥ वेद्यर्द्धे दक्षिणे त्रीणि त्रीणि वर्षाणि चोत्तरे॥ इलावृतं तयोर्मध्ये चंद्रार्द्धाका
रसंस्थितिः॥ ततः पूर्वेण तु भद्राश्वं केतुमालं तु पश्चिमे॥ इलावृतस्य मध्ये तु मेरुः कनकपर्वतः॥ चतुराशीतिसाहस्रं तस्योच्छ्रायो ॥ राम॥
महागिरेः॥ प्रविष्टः षोडशाधस्तात्तद्विस्तीर्णोथ षोडश॥ शरावसंस्थितत्वाच्च द्वात्रिंशन्मूर्ध्नि विस्तृतः॥ शुक्लः पीतोरुणः श्या ॥ ७८॥
श्वादिषु देव यथाक्रमं॥ विप्रो वैश्यस्तथा शूद्रः क्षत्रियश्च स्ववर्णतः॥ तस्योपरि तथा चाष्टौ पूर्वादिषु यथाक्रमं॥ इंद्रादि

78A

लोकपालानां तन्मध्ये ब्रह्मणः सभा। योजनानां सहस्राणि चतुर्दश समुच्छ्रिता॥ अयुतोच्छ्रायाश्च तस्याधस्तथा विष्कंभपर्वताः॥
प्राच्यादिषु क्रमेणैतं मंदरो गंधमादनः॥ विपुलश्च सुपार्श्वश्च केतुपादपशोभिताः॥ कदंबो मंदरे केतुर्जंबूर्वै गंधमादने॥ २
विपुलेच तथाश्वत्थः सुपार्श्वेच वटो महान्॥ एकादशशतायामा योजनानामिमे नगाः॥ जठरो देवकूटश्च पूर्वस्यां दिशि प
र्वतौ॥ आनीलनिषधप्राप्तौ परस्परनिरंतरौ॥ निषधः पारियात्रश्च मेरोः पार्श्वेतु पश्चिमे॥ यथा पूर्वौ तथैवैतावानीलनिष
धायतौ॥ कैलासो हिमवांश्चैव दक्षिणेन महाचलौ॥ पूर्वपश्चायतावेतावर्णवांतर्व्यवस्थितौ॥ शृंगवान् जारुधिश्चैव तथै
वोत्तरपर्वतौ॥ यथा पूर्वौ तथैवैतावानीलनिषधायतौ॥ येयेव दक्षिणे तद्वदर्णवांतर्व्यवस्थितौ॥ मर्यादपर्वता ह्येते क
थ्यंते ते द्विजोत्तम॥ हिमवद्धेमकूटादिपर्वतानां परस्परं॥ नवयोजनसाहस्रमुदग्दक्षिणतोत्तरं॥ मेरोरिलावृते तद्वदंत
रं चैव चतुर्दिशं॥ फलानि यानि वै जंब्वा गंधमादनपर्वते॥ गजदेहप्रमाणानि पतंति गिरिमूर्द्धनि॥ तेषां स्रवात्संभवति
रम्या तां जंबूनदीति वै॥ तत्र जांबूनदं नाम कनकं संप्रजायते॥ सा प्रतिक्रम्य वै मेरुं जंबूमूलं पुनर्नदी॥ विशति द्वि
जशार्दूल पीयमाना जनैश्च तैः॥ भद्राश्वे ऽश्वशिरा विष्णुर्भारते कूर्मसंस्थितिः॥ वराहः केतुमाले च मत्स्यरूपस्तथोत्तरे॥
तेषु नक्षत्रविन्यासाद्विषयाः समवस्थिताः॥ चतुर्ष्वपि द्विजश्रेष्ठ ग्रहाभिभवपाकदाः॥ ४४॥ ॥ इति श्रीमार्कं
डेयपुराणे भुवनकोशविन्यासे जंबूद्वीपवर्णनं नाम॥ ५४॥ ॥ मार्कंडेय उवाच॥ शैलेषु मंदराद्येषु चतुर्षु
द्विजसत्तम॥ वनानि यानि चत्वारि सरांसि च निबोध मे॥ पूर्वे चैत्ररथं नाम दक्षिणे नंदनं वनं॥ वैभ्राजं पश्चिमे शैले सावित्रं
चोत्तरेचले॥ अरुणोदं सरः पूर्वे मानसं दक्षिणे तथा॥ शीतोदं पश्चिमे मेरोर्महाभद्रं तथोत्तरे॥ शीतांतश्च सकुंजश्च कुलीरोथ सकंक
वान्॥ मणिशैलोथ वृषवान्महानीलो महाबलः॥ सुबिंदुर्दुर्धरो वेणुः सुमेघो निषधस्तथा॥ देवशैलस्य पूर्वेण मंदरश्च महाचलः॥

मा० पु०
॥७९॥
79

सुविंदुर्दुंदुभिर्वेणुः समेघो निषधस्तथा ॥ देवशैलस्य पूर्वेणामंदरश्च महाचलः ॥ त्रिकूटः शिखराद्रिश्च गोर्लिगोयपतंगकः ॥ रुचकः
सानुमांश्चैव ताम्रकोथ विशाखवान् ॥ श्वेतोदरः समूलश्च वसुधाकरश्च रत्नवान् ॥ एकशृंगो महाशैलो राजशैलः पिशाचकः ॥
पंचशैलोथ कैलासो हिमवांश्चाचलोत्तमः ॥ इत्येते दक्षिणे पार्श्वे मेरोः प्रोक्ता महाचलाः ॥ सुवक्षाः शिशिरश्चैव वैडूर्यः पिंगल
स्तथा ॥ पिंजरोथ तथा रुद्रः सुरसः कपिलो मधुः ॥ अंजनः कुक्कुटः कृष्णः पांडुरश्चाचलोत्तमः ॥ सहस्रशिखरश्चाद्रिः पारियात्रः
सशृंगवान् ॥ पश्चिमेन तथा मेरोर्विष्कंभात्पश्चिमाद्बहिः ॥ एते चलाः समाख्याताः शृणु यांस्तथोत्तरान् ॥ शंखकूटोथ ऋषभो हंस
नाभो तथाचलः ॥ कपिलेंद्रस्तथा शैलः सानुमान्नील एव च ॥ शातशृंगः स्वर्णशृंगः पुष्पको मेघपर्वतः ॥ विरजाख्यो वराहो
द्रिर्मयूरो रुधिरस्तथा ॥ इत्येते कथिता ब्रह्मन्मेरोरुत्तरतो नगाः ॥ एतेषां पर्वतानां तु द्रोण्योतीव मनोहराः ॥ वनैर्विमलपा
नीयैः सरोभिश्चोपशोभिताः ॥ तासु पुण्यकृतां जन्म मनुष्याणां द्विजोत्तम ॥ एते भौमा द्विजश्रेष्ठ स्वर्गाः स्वर्गगुणाधिकाः ॥
न तेषु पुण्यपापानामपूर्वाणामुपार्जनं ॥ पुण्योपभोग एवोक्तो देवानामपि तास्वपि ॥ शीतांताद्येषु चैतेषु शैलेषु
द्विजसत्तम ॥ विद्याधराणां यक्षाणां किन्नरोरगरक्षसां ॥ देवानां च महावासा गंधर्वाणां च शोभनाः ॥ महापुण्या मनो
ज्ञाश्च सदेवा पवनैर्युताः ॥ सरांसि च मनोज्ञानि सर्वर्तुसुखदोनिलः ॥ न चैतेषु मनुष्याणां वैमनस्यानि कुत्रचित् ॥ तदेत
त्पार्थिवं पद्मं चतुःपत्रं मयोदितं ॥ भद्राश्वभरताद्यानि पात्राण्यस्य चतुर्दिशं ॥ भारतं नाम यद्वर्षं दक्षिणेन मयोदितं ॥ तत्क
र्मभूमिर्नान्यत्र संप्राप्तिः पुण्यपापयोः ॥ एतत्प्रधानमाधेयं तत्र सर्वं प्रतिष्ठितं ॥ तस्मात्स्वर्गापवर्गौ च मानुष्य
नरकावपि तिर्यक्त्वमथवा पुण्यं नरः प्राप्नोति वै द्विज ॥ इति मार्कंडेयपुराणे ॥ ५५ ॥ मार्कंडेय उवाच ॥ ध्रुवाधारं ज
गद्योनेः पदं नारायणस्य यत् ॥ ततः प्रवृत्ता सा देवी गंगा त्रिपथगा नदी ॥ सा प्रविश्य सुधायोनिं सोममाधारमंभसां ॥ ततः

राम
॥७९॥

79A

प्रवृत्ता सा देवी गंगा त्रिपथगा नदी॥ सा प्रविश्य सुधायोनिं सोममाधारमंभसां॥ ततः संवर्द्धमार्करश्मिसंगतिपावनी॥
पपात मेरुशृंगे च सा चतुर्द्धा ततो ययौ॥ मेरुकूटतटांतेभ्य उच्चेभ्यो निवर्त्तिता॥ विकीर्णमाणसलिला निरालंबप
पात सा॥ मंदराद्येषु पादेषु प्रविभक्तोदका समं॥ चतुर्ष्वपि पपातांबु विभिन्नाद्रिशिलोच्चया॥ पूर्वा सीतेति विख्याता
ययौ चैत्ररथं वनं॥ तत्प्लावयित्वा तु ययावरुणोदं सरोवरं॥ शीतांतं च गिरिं तस्मात्ततश्चान्यान् गिरीन् क्रमात्॥ ग
त्वा भुवं समासाद्य भद्राश्वेऽजलधिं गता॥ तथैवालकनंदाख्या दक्षिणे गंधमादने॥ मेरुपादे च नं गत्वा नंदनं देवनंदनं
मानसं च महावेगा प्लावयित्वा सरोवरं॥ आसाद्य शैलराजानं रम्यं त्रिशिखरं तथा॥ तस्मात् पर्वतान् सर्वान् दक्षिणेय
क्रमोदितान्॥ तत् प्लावयित्वा संप्राप्ता हिमवंतं महागिरिं॥ दधार तत्र तां शंभुर्न मुमोच वृषध्वजः॥ भगीरथेनोप
वासैः स्तुत्या चाराधितो विभुः॥ तत्र मुक्ता च शर्वेण सप्तधा दक्षिणोदधिं॥ प्रविवेश त्रिधा प्राच्यां प्रतीच्यां च महान
दी॥ भगीरथरथस्यानुस्रोतसैकेन दक्षिणं॥ तथैव पश्चिमे पादे विपुले सा महानदी॥ सावंसरिति विख्याता वैभ्राजं
सा वनं ययौ॥ तस्मात्क्रमेण चाद्रीणां शिखरेषु निपत्य सा॥ सुवं तु पर्वतं प्राप्ता ततश्च शिखरं गता॥ सितोदं च सर
स्तस्मात्प्लावयंती महानदी॥ केतुमालं समासाद्य प्रविष्टा लवणोदधिं॥ सुपार्श्वं च तथैवाद्रिं मेरुपादं च सा गता॥
भद्रसोमेति विख्याता सा ययौ सवितुर्वनं॥ तत्प्लावयित्वा संप्राप्ता महाभद्रं सरोवरं॥ ततश्च शंखकूटं सा प्रयाता वै
महानदी॥ तस्माद्वृषभादीन्सा क्रमात्प्लाव्य शिलोच्चयान्॥ महार्णवमनुप्राप्ता प्लावयित्वोत्तरान् कुरून्॥ एवमे
षा मया गंगा कथिता ते द्विजर्षभ॥ जंबूद्वीपनिवेशश्च वर्षाणि च यथातथं॥ वसंति तेषु प्रजाः किंपुरुषादिषु॥ सु सर्वेषु
खप्राया निरातंका न्यूनोत्कर्षविवर्जिताः॥ नवस्वपि च वर्षेषु सप्त सप्त कुलाचलाः॥ एकैकस्मिंस्तथा देशे नद्यश्चा

द्भिर्विनिःसृतान् ॥ यानि किंपुरुषाद्यानि वर्षाण्यष्टौ द्विजोत्तम ॥ तेषूद्भिदानि तोयानि मेघांबु चात्र भारते ॥ वार्क्षी स्वा
॥मा०पु०॥ भाविकी देश्या तोयोत्था मानसी तथा ॥ कर्मजा चैव नृणां सिद्धिर्वर्षेष्वेतेषु चाष्टसु ॥ कामप्रदेभ्यो वृक्षेभ्यो वार्क्षी सिद्धि
॥८०॥ ः स्वभावजा ॥ स्वाभाविकी समाख्याता तत्सिद्धिर्देश्या च देशिकी ॥ अपां सौक्ष्म्याच्च तोयोत्था ध्यानोपेता च मानसी ॥ उप
80 साधनिका यानु कर्मजा सा प्युदाहृता ॥ न चैतेषु युगावस्था नाधयो व्याधयो न च ॥ पुण्यापुण्यसमारंभा न चैतेषु
द्विजोत्तम ॥ ॥ इति मार्कंडेयपुराणे गंगावतारः ॥ ५६ ॥ क्रौष्टुकिरुवाच ॥ भगवन्कथितस्त्वेष जंबूद्वीपः समासतः ॥
यदेतद्भवता प्रोक्तं कर्म नान्यत्र पुण्यदं ॥ पापदं वा महाभाग वर्जयित्वा तु भारतं ॥ इतः स्वर्गश्च मोक्षश्च मध्यं चा
न्तश्च गम्यते ॥ न खल्वन्यत्र मर्त्यानां भूमौ कर्म विधीयते ॥ तस्माद्विस्तरशो ब्रह्मन्ममैतद्भारतं वद ॥ ये चास्य भेदा
यावंतो यथा संस्थितिरेव च ॥ वर्षस्य द्विजश्रेष्ठ ये चास्मिन्वर्षपर्वताः ॥ मार्कंडेय उवाच ॥ भारतस्यास्य वर्षस्य
नवभेदान्निबोध मे ॥ समुद्रांतरिता ज्ञेयास्ते त्वगम्याः परस्परं ॥ इंद्रद्वीपः कसेरुश्च ताम्रवर्णो गभस्तिमान् ॥
नागद्वीपस्तथा सौम्यो गंधर्वो वारुणस्तथा ॥ अयं तु नवमस्तेषां द्वीपः सागरसंवृतः ॥ योजनानां सहस्रं वै द्वीपोयं
दक्षिणोत्तरं ॥ पूर्वे किराता यस्यांते पश्चिमे यवनाः स्मृताः ॥ ब्राह्मणाः क्षत्रिया वैश्याः शूद्राश्चांतःस्थिता द्विज ॥ इज्या
युद्धवणिज्याद्यैः कर्मभिः कृतजीवनाः ॥ तेषां संव्यवहारश्च एभिः कर्मभिरिष्यते ॥ स्वर्गापवर्गप्राप्तिश्च पुण्यं पापं
च वै तथा ॥ महेंद्रो मलयः सह्यः शुक्तिमानृक्षपर्वतः ॥ विंध्यश्च पारियात्रश्च सप्तैवात्र कुलाचलाः ॥ तेषां सहस्र ॥रामः
राश्चान्ये भूधरा ये समीपगाः ॥ विस्तारोच्छ्रायिणो रम्या विपुलाश्चित्रसानवः ॥ कोलाहलः स वैभ्राजो मंदरो दर्दुरा ॥८०॥
चलः ॥ वातंधमो वैद्युतश्च मैनाकः स्वरसस्तथा ॥ तुंगप्रस्थो नागगिरिर्गोधनः पांडुरस्तथा ॥ पुष्पगिरिर्दुर्जयंतो च

रेवतो गदरश्च ॥ ऋष्यमूकः सगोमंतः कूटशैलः कृतस्मरः ॥ श्रीपर्वतश्च कोरश्च शतशोन्ये च पर्वताः ॥ तैर्विमिश्रा जनप
दाम्लेछा स्वार्याश्च भागशः ॥ तैः पीयंते सरिच्छ्रेष्ठा यास्ताः सम्यग्निबोध मे ॥ गंगा सरस्वती सिंधुश्चंद्रभागा तथापगाः ॥ यमु
ना च शतद्रूश्च वितस्तैरावती कुहूः ॥ गोमती धूतपापा च बाहुदा च दृषद्वती ॥ विपाशा देविका च स्रुर्विशाला गंडकी तथा ॥
कौशिकी चापगा विप्र हिमवत्पादनिःसृता ॥ वेदस्मृतिर्वेदवती वृत्रघ्नी सिंधुरेव च ॥ वेण्या वस्यंदना चैव समीदानात
था परा पारा च चर्मण्वती रूपी विदिशा वेत्रवत्यपि ॥ सिप्रा ह्यवंती च तथा पारियात्राश्रयाः स्मृताः ॥ शोणो महानद
श्चैव रुक्मदा सुरथा क्रिया ॥ मंदाकिनी दशार्णा च चित्रकूटा तथापगा ॥ चित्रोत्पला वेतमसा करतोया पिशाचि
का ॥ तथान्या पिप्पलश्रोणी विशाला वंजुला नदी ॥ ससेनया शुक्तिमती वल्गुली त्रिदिवा क्रमुः ॥ ऋक्षपादप्रसू
ता वै तथा चान्यासु वाहिनी ॥ सिप्रा पयोष्णी निर्विंध्या तापी च निषधावती ॥ वेणा वैतरणी चैव सिनीवाहुः कुमु
द्वती ॥ तोया चैव महागौरी दुर्गा चांतःशिवा तथा ॥ विंध्यपादप्रसूता स्तानद्यः पापहराः शुभाः ॥ गोदावरी भैमरथी
कृष्णवेणा तथापगा ॥ तुंगभद्रा सुप्रयोगा वाह्या कावेर्येव यापगा ॥ सह्यपादविनिष्क्रांता इत्येताः सरिदुत्तमाः ॥ कृ
तमाला ताम्रपर्णी पुष्पजा सुत्पलावती ॥ मलयाद्रिसमुद्भूता नद्यः शीतजलास्त्विमाः ॥ पितृसोमर्षिकुल्या च
इक्षुला त्रिदिवा भया ॥ लांगूलिनी वंशकरा महेंद्रप्रभवाः स्मृताः ॥ ऋषिकुल्या कुमारी च मंदगा मंदवाहिनी ॥
कृशा पालाशिनी चैव शुक्तिमत्प्रभवाः स्मृताः ॥ सर्वाः पुण्याः सरस्वत्यः सर्वा गंगाः समुद्रगाः ॥ विश्वस्य मातरः
सर्वाः सर्वाः पापहराः स्मृताः ॥ अन्याः सहस्रशश्चोक्ताः क्षुद्रनद्यो द्विजोत्तम ॥ प्रावृट्कालवहाः संति सर्वका
लवहाश्च याः ॥ मत्स्याः कुमुदकुल्याश्च कुंतलाः काशिकोशलाः ॥ अथर्वाश्च कलिंगाश्च मशकाश्च वृकैः सह

मध्यदेशाजनपदाःप्रायशोमीप्रकीर्त्तिताः॥सह्यस्यचोत्तरेपादेयत्रगोदावरीनदी॥पृथिव्यामपिकृत्स्नायांसप्रदेशोमनो
मा॰पु॰॥ रमः॥गोवर्द्धनंपुरंरम्यंभार्गवस्यमहात्मनः॥वाल्हीकावाटधानाश्चआभीराःकालतोयकाः॥अपरांताश्चशूद्राश्चपल्ह
॥८१॥ वाश्चर्मखंडिकाः॥गंधारायवनाश्चैवसिंधुसौवीरमद्रकाः॥शतद्रुद्राःकलिंग्याश्चपारद्राहारमूषिकाः माठरारज्जुह
81 तकाःकैकेयादशमानिकाः॥क्षत्रियाःपरिवेशाश्चवैश्याःशूद्रकुलानिच॥कंबोजादरदाश्चैवबर्बराहंगलौकिकाः
चीनाश्चैवतुषाराश्चपल्हवावाह्यतोदराः॥आत्रेयाःसभरद्वाजाःप्रस्थलाश्चदशेरकाः॥लम्पकाःस्तनकाराश्चचू
लिकाजागुडैःसह॥औपधाश्चालिमद्राश्चकिरातानांचजातयः॥तामसाःहंसमार्गाश्चकश्मीरास्तंगणास्तथा
चूलिकाहहुकाश्चैवकुर्णादार्वास्तथैवच॥एतेदेशास्तुदीच्यांतुप्राग्देशान्निबोधमे॥अंध्रावाकासुजरखान्तर्गिरि न
वहिःगिराः॥तथांगवं[illegible]गेयास्तुमलहामालवर्त्तिकाः॥ब्रह्मोत्तराःप्रविजयामार्गवामेयमालकाः॥प्राग्ज्योति
षश्चमद्राश्चविदेहास्ताम्रलिप्तकाः॥मल्लामगधगोनर्द्दाःप्राच्यांजनपदाःस्मृताः॥अथापरेजनपदादक्षिणा
पथवासिनः॥पांड्याश्चकेरलाश्चैवचोलाःकुल्यास्तथैवच॥सेतुकामूषिकाश्चैवकुमाराःवानवासकाः॥महारा
ष्ट्रामाहिषिकाःकलिंगाश्चैवसर्वशः॥आभीराःसहवैषीकाआटव्याशरवाश्चये॥पुलिंदाविंध्यमौलेयावैद
र्भामांडिकैःसह॥पौरिकामालिकाश्चैवअश्मकाभोगवर्द्धनाः॥तैलिकाःकुंतलाश्चआंध्राउद्भिदानालकालिकाः॥
दाक्षिणात्याश्चदेशास्त्वपरांतान्निबोधमे॥सूर्यारकाःकालिवनाःदुर्गास्तालीसकैःसह॥काञ्चीयाश्चसुराष्ट्राश्च ॥राम॥
आवंताश्चार्बुदैःसह॥इत्येतेह्यपरांताश्चशृणुविंध्यनिवासिनः॥मनोज्ञाश्चकरूपाश्चमेकलाश्चोत्कलैःसह॥
उत्तमार्णादशार्णाश्चभोजाःकिष्किंधकैःसह॥तोसलाःकोशलाश्चैवत्रैपुरावैदिशास्तथा॥तुंबुराश्चतुंबुराश्चैव ॥८१॥
पुलिंदकाःसुनीलाश्चनूपमात्तममलैःसह।तथाकुरुमिनश्चैवसर्वैश्चैवकरस्कराः।नासिक्याश्चैवयेचान्येयेचैवांतरनर्मदा॥भारुकच्छाः
समाहेयांसर्वैसारस्वतैःसह ३

भारतं कथितं मम ॥ सरितः पर्वता देशा ये च तत्र वसंति वै ॥ किं तु कूर्मस्त्वया पूर्वं ५

81A

पारवो नेपथ्यैः सह ॥ अनयास्तुडिकेशाश्च वीरहोत्रा अवंतयः ॥ एते जनपदाः सर्वे विंध्यपृष्ठनिवासिनः ॥ ततो देशान्प्र
वक्ष्यामि पर्वताश्रयिणश्च ये ॥ निहीराहंसमार्गाश्च कुपथास्तंगनाः खशाः ॥ कुपथ्रावरणाश्चैव ऊर्णादर्वाः सहुहुकाः ॥
त्रिगर्त्ता मालवाश्चैव किराताः तामसैः सह ॥ कृतत्रेतादिकश्चात्र चतुर्युगकृतो विधिः ॥ एतत्तु भारतं वर्षं चतुःसंस्था
नसंस्थितं ॥ दक्षिणापरतो ह्यस्य पूर्वेण च महोदधिः ॥ हिमवानुत्तरेणास्य कार्मुकस्य यथा गुणः ॥ तदेतद्भारतं व
र्षं सर्वबीजं द्विजोत्तम ॥ ब्रह्मत्वममरेशत्वं देवत्वं मरुतां यथा ॥ मृगयक्षाप्सरश्चरा योनीस्तद्वत्सरीसृपाः ॥ स्थावराणां
च सर्वेषाम् इतो ब्रह्मन् शुभाशुभैः ॥ प्रयाति कर्मभूर्ब्रह्मन्नान्यलोकेषु विद्यते ॥ देवानपि विप्रर्षे सदैवेषमनोरथः ॥ अ
पि मानुष्यमाप्स्यामो देवत्वात्प्रच्युताः क्षितौ ॥ मनुष्याः कुर्वते यत्तु तन्न शक्यं सुरासुरैः ॥ स्वकर्मनिगडग्रस्तैः स्वक
र्मक्षपणोन्मुखैः ॥ न किंचित्क्रियते कर्म सुखलेशोपबृंहितैः ॥ इति मार्कंडेयपुराणे भारतवर्णनं नाम ॥ ५५ ॥ क्रोष्टुकि
रु ॥ भगवन्भवता सम्यग्भारते भगवान्हरिः ॥ कथितस्तस्य संस्थानं श्रोतुमिच्छाम्यशेषतः ॥ कथं स संस्थितो देवः कु
र्मरूपी जनार्दनः ॥ शुभाशुभं मनुष्याणां व्यवस्थितं चैव तत्कथं ॥ यथा मुखं यथा पादास्तस्य तद्ब्रूह्यशेषतः ॥ मार्कंडेय
उः ॥ प्राङ्मुखो भगवान्देवः कूर्मरूपी व्यवस्थितः ॥ आक्रम्य भारतं वर्षं नवभेदमिमं द्विज ॥ नवधा संस्थितिस्त्वास्य
नक्षत्राणि समंततः ॥ विषयाश्च द्विजश्रेष्ठ येसम्यक्तानि वोधमे ॥ मेदमद्रारिमांडव्यशाल्वनीपास्तथा शकाः ॥ उज्जि
हानास्तथा वत्सा घोषसंज्ञाः सयामुनाः ॥ मध्ये सारस्वता मत्स्याः शूरसेनाः समाथुराः ॥ धर्मारण्या ज्योतिषिकाः गो
रग्रीवा गुडाश्मकाः ॥ उद्देहकाः सपांचालाः साकेताः कंकमारुताः ॥ कालकोटिसमाखंडाः पारियात्रनिवासि
नः ॥ कापिंष्ठलाः कुरुराज्यास्तथैवोदुंवरा जनाः ॥ गजाह्वयाश्च कूर्मस्यैव भाख्यामा उवाचलः ॥ स्थ्यकर्णो व्याघ्र

जनाम ध्यनिवासिनः । कृत्तिकारोहिणी सौम्यमेतेषां मध्यवासिनां । नक्षत्रत्रितयं विप्र शुभाशुभविपाकदं । वृषध्वजो
जनश्चैव १

॥मा॰पु॰॥ मुखः खस्थ्याखिः कर्ष्यटः खानः ॥ तथा चंद्रपुरश्चैव खशाः समगधास्तथा ॥ शिवयोमेथिलाश्चौंड्रास्तथा वदनदंतुराः ॥ प्राग्ज्यो
॥८२॥ तिषाः सलौहित्याः सामुद्राः पुरुषादकाः ॥ पौर्णेंद्रको भद्रगौरस्तथोदयगिरिर्द्विज ॥ कालेयामेकलांवशस्तामलिप्ते
कपारयाः ॥ वर्द्धमानाः कोशलाश्च मुखे कूर्मस्य संस्थिताः ॥ रौद्रं पुनर्वसु तिष्यं नक्षत्रानितयं मुखे ॥ पादे तु
82 दक्षिणे देशानु कोष्टके वदतः शृणु ॥ कलिंगवंगौजठराः कोशलामूषिकास्तथा ॥ वेदयश्चोर्द्धकर्णाश्च मत्स्या
ध्राविंध्यवासिनः ॥ विदर्भानारिकेलाश्च धर्मद्वीपास्तथैलिकाः ॥ व्याघ्रग्रीवा महाग्रीवास्त्रैपुराः श्मश्रुधारि
णः ॥ कैष्किंधा हेमकूटाश्च निषधाः कवटास्थलाः ॥ दशार्णाहारिकानग्नानिषादाः काकुलालकाः ॥ तथैव पर्णश
वराः पादे वै पूर्वदक्षिणे ॥ आश्लेषर्क्षं तथा पित्र्यं फल्गुनी प्रथमा द्विज ॥ नक्षत्रत्रितयं पादमाश्रितं पूर्वदक्षिणं ॥ लंका
:कालाजिनाश्चैव शैलुकेलिकटास्तथा ॥ महेंद्रमलयाद्रौ च दर्दुरे च वसंति ये ॥ कर्कोटकवने चैव भृगुकच्छाः सकों
कणाः ॥ आभीराः सावराश्चैव वेणातीरनिवासिनः ॥ आवंतया दासपुरास्तथैवाचक्रवासिनः ॥ महाकर्णाः सकर्णा
टाः गोनंदाश्चित्रकूटकाः ॥ कोल्लाकोल्लगिरश्चैव क्रौंचद्वीपजटाधराः ॥ कावेरी ऋष्यकस्या नासिक्याश्चैवंजेजनाः ॥ तु
रि ष्णं खवैदूर्यमुक्तादिशैलप्रांतरिताश्च ये ॥ तथा वाचेराल्लोकाश्चर्म्मपत्तनवासिनः ॥ गणराज्यमहाराष्ट्राः कृष्णद्वीपनि
वासिनः ॥ सर्वाद्रौ मुकुंदाद्रौ च ये वसंति तथा जनाः ॥ नौवं धनाः सपिशिकास्तथा ये दक्षिणाश्रिताः ॥ कौवेराश्च त
थाये च ऋषिकास्तामसाश्रयाः ॥ ऋषभाः सिंहलाश्चैव तथा कांचीनिवासिनः ॥ तिलंगकुंजरदरीकच्छवासी च ये ॥राम॥
जनः ॥ ताम्रपर्णी तथा कुक्षिरिति कूर्मस्य दक्षिणे ॥ फल्गुन्यश्चोत्तराहस्तचित्राचर्क्षत्रयं द्विज ॥ कूर्मस्य दक्षिणे कुक्षौ ॥८२॥
चक्षेपादमथापरं ॥ कांबोजाः पल्हवाश्चैव तथैव वडवामुखाः ॥ तथैव सिंधुसौवीराः सानर्त्तावनितामुखाः ॥ यवनामार्ग

82A

गाः म्लङ्गाः कर्णप्राधेयवर्बराः॥ किराताः पारदाः खंडास्तथा पारशवाः कलाः॥ चूडकाहेमगिरिकाः सिंधुकालकरैवताः॥
सौराष्ट्रा बादराश्चैव द्रविडाः समहार्णवाः॥ एते जनपदाः पादे स्थिता वै दक्षिणे परे॥ स्वास्याविशाखामैत्रं च नक्षत्रत्रयमे
वच॥ मणिमेघः क्षुराद्रिश्च खंजनोस्तगिरिस्तथा॥ सापरान्तिकहैहयाश्च सारिकाद्रिप्रशस्तकाः॥ कोकणाः पंचनदकाः
रामठाः पारदास्तथा॥ तारक्षुर्निर्जगताकाश्चर्मकासाश्मवेश्मकाः॥ मुरुमुच्छुपुकाश्चुलु[illegible]वेणुमत्सां च ये जनाः॥ एके
क्षणाश्च सुगृहा दीर्घग्रीवाः सुचूलिकाः॥ अश्वकेशास्तथा पुच्छे जनाः कूर्मस्य संस्थिताः॥ ऐंद्रमरुस्तथा पादानक्ष
त्रत्रयमेव च॥ मांडव्याश्च तुषाराश्च अश्मकालखनास्तथा॥ कुरुहताः लउहाश्चैव स्त्रीराज्यं लौकिकास्तथा॥ नृसिंहवे
णुमत्स्यश्च वनावस्यास्तथापरे॥ चर्मरंगाश्च अश्मकालखनास्तथा॥ तथा फल्गुलुका घोराः सुगुरुरुहालकास्तथा॥
एकेक्षणा वाजिकेशा दीर्घपादास्तथैव च॥ वामाचारजनाः सर्वे स्थिताः कूर्मस्य भागुरे॥ आषाढाश्च वर्णं चैव श्रविष्ठा
वात्रशाद्धिताः॥ कैलासो हिमवांश्चैव वसुधमान्च सुमांस्तथा॥ धनुष्मान्कौंजरश्चैव क्रुद्वोलाश्च ये नराः॥ वशातयाः
सकैकेया भोगप्रस्थाः सयामुनाः॥ अंतर्द्वीपाः सगर्त्तीश्च अग्निध्रासार्जुनाः जनाः॥ तथैवाश्वमुखाः प्राप्ताश्चिपिटाः के
शधारिणः॥ दासेरका वाटधानाः सरधानास्तथैव च॥ पुष्करावर्त्तकैरातास्तथा तक्षशिलाश्रयाः॥ अम्बष्ठा मालवा मे
द्राः केशिकाः शरदंडिकाः॥ पिंगलामालहहकाहूणाः कोहलास्तथा॥ मांडव्या भूतिपुरकाः प्रांतका हेमतालकाः॥
पशोवस्याः सगांधाराः खिरण्या गव्यनामयाः॥ यौधेया दाशमेयाश्च राजन्याः श्यामकास्तथा॥ क्षेमधूर्त्ताश्च कूर्मस्य
वामं कुक्षिं समाश्रिताः॥ वारुणं चात्र नक्षत्रं तद्वत्सौष्ठपदीद्वयं॥ निमिकिंनवराज्यं च पशुपालं बुसकीचकं॥ काश्मीरकं ता
याराद्रुमनिसारजनास्तथा॥ हरदास्तंगनाश्चैव कुनदा वनराष्ट्रकाः॥ सैरिष्ठाश्रेयपुरकास्तथैव च नराज्यकाः॥ किरातावो

॥मा० पु०॥

॥८३॥

83

रकालिंदाजनापकुवलोलडाः॥ दीर्घोदामरकाश्चैवकुदनाश्चानुहीरकाः॥ एकपादाः खसाघोषाः स्वर्णभौमा तु विश्व
काः॥ तथावसुवनारिस्थाश्चीरप्रावरणाश्च ये॥ त्रिनेत्राः पौरवाश्चैव गांधर्वाश्च द्विजोत्तम॥ दर्वोत्तरं तु कूर्मस्य पा
दमेद्रे समाश्रिताः॥ देवस्य श्वाम्विदेवस्य याम्यं चर्क्षमिति त्रयं॥ तत्र पादे समाख्यातं पाकामं मुनिसत्तम॥ देशेषु
तेषु वै तानि नक्षत्राण्यपि वै द्विज॥ एतत्पीडास्वमी देशा पीड्यंते तत्क्रमोदिताः॥ यांति चाभ्युदयं विप्र ग्रहैः स
म्य[illegible]ग्व्यवस्थितैः॥ यस्यर्क्षस्य पतिर्यो वै ग्रहस्तद्वानितो भयं॥ तद्देशस्य मुनिश्रेष्ठ तस्योत्कर्षेभ्युदागमः॥ प्रसे
कं देशसामान्यनक्षत्राण्यपि वै द्विज॥ एतत्ग्रहसंभवं॥ भयं लोकस्य भवति शोभनं वा द्विजोत्तम॥ स्वकैरशो
भनैर्जैतोः सामान्यमिति कीर्तितं॥ ग्रहैर्भवति पीडोच्छा सस्या या सम शोभनं॥ तथैव शोभनः पाको दुःस्थितैः
ग्रहतो ग्रहैः॥ अस्योपकारायनृणां देशजेष्वासिकं द्विज॥ द्रव्येगोष्ठ शुभसेसु सुहृत्सुतनयेषु च॥ भार्यायां च
ग्रहे दुःस्थे भयं पुण्यवतां नृणां॥ आसन्न यास्य पुण्यानां सर्वत्रैवातिपापिनां॥ नैकत्रापि ह्य पापानां नराणां
जायते भयं॥ दिग्देशजनसामान्यं नृपसामान्यमात्मजं॥ नक्षत्रग्रहसामान्यं नरो भुंक्ते शुभाशुभं॥ परस्पराभिरक्षा शुभा
च ग्रहदोषेषु जायते॥ एतेभ्य एव विप्रेंद्र शुभदानिस्तथाशुभे॥ यदेतत्कूर्मसंस्थानं नक्षत्रेषु मयोदितं॥
एतत्तु देशसामान्यमशुभं शुभमेव च॥ तस्माद्द्विज्ञाय देशस्य ग्रहपीडां तथात्मनः॥ कुर्वीत शांतिमेधावी
लोकवादांश्च सत्तमः॥ आकाशाद्देवतानां चंद्रेस्यादीनां चंदोर्हदात॥ दृष्ट्वा पतंति ते लोकवादादतिश्रुता
तांस्तथैव बुधः कुर्याल्लोकवादान्न हापयेत॥ तथा तु करणान्नृणां मुक्तो दुःखागमक्षयः॥ शुभोदयः प्रहाणिश्च ॥राम॥
पापानां द्विजसत्तम॥ प्रज्ञाहानिं प्रकुर्युर्द्रव्यादीनां च कुर्वते॥ तस्माच्छांतिः परः प्राज्ञो लोकवादरतस्तथा॥ ॥८३॥
स्तो

83A

लोकं वा दांश्च शांतिंश्च ग्रहपीडासु कारयेत्॥ न देहानुपवासांश्च शास्त्रे चैव स्यादिवं दनैः॥ जपं होमं तथा दानं स्नानं क्रो
धादिवर्जनं॥ अद्रोहं सर्वभूतेषु मैत्रीं कुर्वीत पंडितः॥ वर्जयेद्दुष्टवाचं च मतिवादांस्तथैव च॥ ग्रहपूजां च कु
र्वीत सर्वपीडासु मानवः॥ एवं शाम्यंत्यशेषाणि घोराणि द्विजसत्तम॥ प्रयातानां मनुष्याणां ग्रहर्क्षोत्थान्यसं
शयं॥ एष कूर्मो मया ख्यातो भारते भगवान्विभुः॥ नारायणो ह्यचिंत्यात्मा यत्र सर्वं प्रतिष्ठितं॥ यत्र देवाः स्थिताः
सर्वे प्रतिनक्षत्रसंस्थया॥ यथा मध्ये हुतवहः पृथ्वी सोमश्च वै द्विज॥ मेषादयस्त्रयो मध्ये मुखे द्वौ मिथुनादिकौ
प्राग्दक्षिणे तथा पादे कर्कि सिंहौ व्यवस्थितौ॥ सिंहकन्या तुलाश्चैव कुक्षौ राशित्रयं स्थितं॥ तुला च वृश्चिकश्चो
भौ पादे दक्षिणपश्चिमे॥ पृष्ठे तु वृश्चिकं चैव सह धन्वी व्यवस्थिताः॥ वायव्ये चास्य वै पादे धनुर्ग्राहादिकत्रयं॥
कुंभमीनौ तथैवास्या उत्तरां कुक्षिमाश्रितौ॥ मीनमेषौ द्विजश्रेष्ठ पादे पूर्वोत्तरे स्थितौ॥ कूर्मे देशास्तथा स्रोलि
देशेष्वेतेषु वै द्विज॥ राशयश्च तथा र्क्षेषु ग्रहाराशिषु व्यवस्थिताः॥ तस्मात् ग्रहर्क्षपीडासु देशपीडां विनिर्दिशेत॥
तत्र स्नानं प्रकुर्वीत दानहोमादिकं तथा॥ स एष वैष्णवः पादो ब्रह्ममध्ये ग्रहस्य यः॥ नारायणाख्योऽचिंत्यात्मा का
रणं जगतः प्रभुः॥ इति मार्कंडेयपुराणे कूर्मनिवेशनं नाम॥ ५४॥ मार्कंडेय उवाच॥ एतत्ते भारतं वर्षं यथाव
त्कथितं मुने॥ कृतं त्रेता द्वापरं च तथा तिष्यं च तुष्टयं॥ अत्रैव तद्युगानां तु चातुर्वर्ण्यं च वै द्विज॥ चत्वारि च
त्रीणि चैव द्वे तथैवैकं शरत्शतं॥ जीवंत्यजनराः ब्रह्मन् कृतत्रेतादिके क्रमात्॥ देवकूटस्य पूर्वस्य शैलेंद्रस्य महाल
नः॥ पूर्वेण यत्स्थितं वर्षं भद्राश्वं तन्निबोध मे॥ श्वेतवर्णश्च नीलश्च शैवालश्च चलोत्तमः॥ कौलंजः पर्णशाला
यां पंच चैते कुलाचलाः॥ तेषां प्रसूतिरन्येपि वहवः क्षुद्रपर्वताः॥ तैर्विमिश्रा जनपदा नानारूपाः सहस्रशः

॥मा०पु०॥ महास्थलः शुकश्चैव सुद्धू धातुः सुमंगलः॥ इत्येवमादयोन्येपि शतशोथ सहस्रशः॥ सीताशंखावती भद्रा च काव
॥८४॥ तो दिकास्तथा॥ नद्यो बह्व्यो विस्तीर्णाः शीततोयाच वाहिकाः॥ तत्र वर्षे नराः शंखविशुद्धा हेमसप्रभाः॥ दि
व्यसंगमिनः पुण्याः दशवर्षशतायुषः॥ अधमोत्तमं न तेषु सन्ति सर्वे ते समदर्शनाः॥ तितिक्षादिभिरष्टाभिः प्रकृ
84 त्या तैर्गुणैर्युताः॥ तत्राप्यश्वशिरा देवश्चतुर्बाहुर्जनार्दनः॥ शिरोहृदयमेढ्रांघ्रिहस्तेश्चक्षुत्रयान्वितः॥ तस्याप्य
थैवं विषया विज्ञेया जगतः प्रभो॥ केतुमालमतीवर्षेनिबोधमम पश्चिमं॥ विशालो विमलः कुंभो जयंतो ह
रिपर्वतः॥ विशोको वर्धमानश्च सप्तैते कुलपर्वताः॥ अन्ये सहस्रशः शैला येषु लोकगणाः स्थितः॥ मोनंमोत
ममाहेयाः साकयोतकरंभकौ॥ अमालमसुखाश्चात्र वसंति शतशो जनाः॥ पिबंति ते नदीश्चैषां चक्षुः श्यामा
सुकेवलं॥ सुमेधा कामिनी श्यामं तथैवान्याः सहस्रशः॥ अत्राप्यायुः समं पूर्वैरत्रापि भगवान्हरिः॥ वाराह
रूपी पादास्य हृस्वे पार्श्वे तस्तथा॥ त्रिनक्षत्रयुते देशे नक्षत्राणि युतानि च॥ इत्येतत्केतुमालं च कथितं
मुनिसत्तम॥ अतः परं कुरूःन्वर्ष्ये निबोधेह ममोत्तरान्॥ तत्र वृक्षा मधुफला नित्यपुष्पफलोपगाः॥ व
स्त्राणि च प्रसूयंते फले षाभरणानि च॥ सर्वकामप्रदास्ते हि सर्वकालफलप्रदाः॥ भूमिर्मणिमयी वायुः
सुगंधः सर्वदा सुखः॥ जायंते मानवास्तत्र देवलोकपरिच्युताः॥ मिथुनानि प्रसूयंते समकालस्थिता
नि च॥ अन्योन्यमनुरक्तानि चक्रवाकोपमानि वा॥ चतुर्दशसहस्राणि तेषां सार्धानि वै स्थितिः॥ चंद्रकांत ॥राम॥
श्च शैलेंद्रः सूर्यकांतस्तथा परः॥ तस्मिन्कुलाचलौ वर्षे यन्मध्ये च महानदी॥ भद्रसोमा प्रयात्युर्व्यां पुण्या
मलजलोघिनी॥ सहस्रशस्तथैवान्या नद्यो वर्षेपि चोत्तरे॥ तथान्याः क्षीरवाहिन्यो घृतवाहिन्य एव च॥ द ॥८४॥

श्वेतह्रदस्तथैवात्र तथान्ये चान्नपर्वताः॥ अमृतस्वादुकस्यानि फलानि विविधानि च॥ वनेषु तेषु जायंते शतशोथ
सहस्रशः॥ तत्रापि भगवान्विष्णुरगमन्मत्स्यरूपतां॥ विभक्तो नवधा विप्र नक्षत्राणां त्रयं त्रयं॥ देशास्तथा हि नि
वधा विभक्ता मुनिसत्तम॥ चतुर्द्वीपः समुद्रे तु भद्रद्वीपस्तथा परः॥ तत्रापि पुण्यो विख्यातः समुद्रांतर्महामुने॥
इत्येतत्कथितं ब्रह्मन्कूर्मवर्षमथोत्तरं॥ शृणु किंपुरुषादीनि वर्षाणि गदतो मम॥ इति मार्कंडेयपुराणे वर्षवर्णने
५४॥ मार्कंडेय उवाच॥ यत्तु किंपुरुषं वर्षं तत्ते वक्ष्याम्यहं द्विज॥ तत्रायुर्दशसाहस्रं पुरुषाणां वपुष्मतां॥ अना
मया ह्यशोकाश्च नरास्तत्र तथा स्त्रियः॥ प्लक्षखंडश्च तत्रोक्तः स्नमहन्नंदनोपमः॥ तस्य ते वै फलरसं पिबंति सुरु
पासदा॥ स्थिरयौवना ह्यनिष्यंदाः स्त्रियश्चोत्पलगंधिकाः॥ अतः परं किंपुरुषाद्धरिवर्षं प्रचक्षते॥ महारजत
संकाशा जायंते तत्र मानवाः॥ देवलोकच्युताः सर्वे देवरूपाश्च सर्वशः॥ हरिवर्षे नराः सर्वे पिबंतीक्षुरसं शुभं॥
न जरा बाधते तत्र न जीर्यंते च कर्हिचित्॥ तावंतमेव ते कालं जीवंत्यथ निरामयाः॥ मेरोर्वर्षं तदप्रोक्तं मध्यमं य
दिलावृतं॥ न तत्र सूर्यस्तपति न ते जीर्यंति मानवाः॥ लभंते नात्मनो लाभं रश्मयश्चंद्रसूर्ययोः॥ नक्षत्राणां ग्रहाणां च
मेरोस्तत्र पराद्युतिः॥ पद्मप्रभाः पद्मगंधा जंबूफलरसाशिनः॥ पद्मपत्रायताक्षाश्च जायंते तत्र मानवाः॥ वर्षा
णां च सहस्राणि तत्रायुस्त्रयोदश॥ शरावाकारसंस्थानो मेरुर्मध्ये इलावृते॥ मेरुर्यत्र महाशैलस्तदाख्या
तमिलावृतं॥ रम्यकं वर्षमस्माच्च कथयिष्ये निबोध तत्॥ ब्रह्मंस्तत्रापि चोत्तुंगो न्यग्रोधो हरितच्छदः॥ तस्यापि
ते फलरसं पिबंतो वर्तयंति वै॥ वर्षायुतायुषस्तत्र नराः सत्फलभोजिनः॥ रतिप्रधाना विमला जरादौर्गंध्यव
र्जिताः॥ तस्मादप्युत्तरं वर्षं नाम्नाख्यातं हिरण्मयं॥ हैरण्वती नदी यत्र प्रभूतकमलोज्वला॥ महाबलाः सुतेज

मा० पु० श्रः स्त्रकाजायंते तत्र मानवाः ॥ यक्षरूपा महासत्वा धर्मिनः प्रियदर्शनाः ॥ इति मार्कंडेयपुराणे भुवनकोशे वर्षवर्णो
॥८५॥ नं ॥ ८४ ॥ क्रोष्टकिरुवाच ॥ कथितं भवता सर्वं यत्पृष्टोसि महामुने ॥ समुद्राद्रिसंस्थानं प्रमाणानि तथा ग्रहा ॥ ते
षां चैव प्रमाणं च यन्नक्षत्राणां च संस्थितिः ॥ भूरादयस्तथा लोका पातालान्यखिलानि च ॥ स्वायंभुवं तथाख्यातं मु
85 नेमन्वंतरं मम ॥ अनंतरमहं श्रोतुमिच्छे मन्वंतराणि वै ॥ मन्वंतराधिपान् देवानृषीस्तत्तनयान्नृपान् ॥ मार्कं
डेय उ० ॥ मन्वंतरं मयाख्यातं मनोः स्वायंभुवस्य यत् ॥ स्वारोचिषाख्यमन्यत्तु शृणु तस्मादनंतरं ॥ वरुणाया स्तटे
विप्ररूपेलास्पद्भिना वपि ॥ अद्दुस्वभावः सद्वृत्तो वेदवेदांगपारगः ॥ सदातिथिप्रियो रात्रावागतानां समाश्रयः ॥ नगर
तस्य जज्ञे मतिः पृथ्वीमटेयमिति निःसदा ॥ अतिरम्यवनोद्यानां नानानागर्तविशोभितां ॥ अथागतोतिथिर्विप्रः क
दाचित्तस्य वेश्मनि ॥ नानौषधीप्रभावज्ञो मंत्रविद्यं त्रसाधकः ॥ आभ्यर्चितस्तु तेनासौ श्रद्धापूतेन चेतसा ॥ त
स्याचष्टे स देशांश्च रम्याणि नगराणि च ॥ नदीशतानि शैलांश्च पुण्यायतनानि च ॥ सततो विस्मयाविष्टः प्राह तं न्या
द्विजसत्तमं ॥ अनेकदेशदर्शित्वेनातिश्रद्धासमन्वितं ॥ त्वन्नातिवृद्धो वयसन्नातिवृत्तश्च यौवनात् ॥ कथमत्ये
नकालेन पृथ्वीयमटितं द्विजा ॥ ब्राह्मणउ ॥ ममौषधीप्रभावेणाविप्रायति हतागतिः ॥ योजनानां सहस्रं हि दिना
र्द्धेन व्रजाम्यहं ॥ मार्कंडेय उ० ॥ ततः स विप्रस्तं भूयः प्रत्युवाचेदमादरात् ॥ श्रद्दधानो वचस्तस्य ब्राह्मणस्य विप
श्चितः ॥ मम प्रसादं भगवन्करो लौषधदानजं ॥ द्रष्टुमेतां ममम ही मतीवेच्छा प्रवर्त्तते ॥ स प्रादाद्ब्राह्मणस्तस्मै
पादलेपमुदारधीः ॥ अभिमंत्रयामास दिशमाख्यातं तेन यत्र तं ॥ तेनानुलिप्तपादेन स द्विजो द्विजसत्तम ॥ हि ॥राम:॥
मवंतमगात्द्रष्टुं नानाप्रश्रवणान्वितं ॥ सहस्रं योजनानां हि दिनार्द्धेन व्रजामि तत् ॥ आयास्यामीति संचिंत्य तदे ॥८५॥

ईणायरेणाहि॥ संप्राप्तो हिमवत्प्रस्थं नातिक्रांततनुर्द्विजः॥ विचचार ततस्तत्र तुहिनास्तृतभूतले॥ पादाक्रांते
ततस्याय तुहिनेन वलीयसा॥ प्रक्षालितः पादलेपः परमौषधिसंभवः॥ ततो जडगतिः सोथ इतश्चेतश्च पर्यटन्
ददर्शातिमनोज्ञानि सानूनि हिमभूभृतः॥ सिद्धगंधर्वजुष्टानि किंनराभिमतानि च॥ क्रीडाविहाररम्याणि
देवादीनामितस्ततः॥ दिव्याप्सरोगणशतैः संकीर्णान्यवलोकयन्॥ नातप्यत द्विजश्रेष्ठः प्रोद्भूतपुलको मु
निः॥ क्वचित्प्रस्रवणाम्भः प्रजल्पातमनोरमं॥ प्रनृत्तशिखिकेकाभिरन्यतश्च विनादितं॥ दात्यूहकोयष्टि
काद्यैः क्वचिच्चातिमनोहरं॥ पुंस्कोकिलकलालापैर्मनोहारिभिरन्वितं॥ प्रोत्फुल्लतरुगंधेन वासितानि
लवीजितं॥ मुदा युक्तः स ददृशे हिमवंतं महागिरिं॥ दृष्ट्वा च तं द्विजस्तुष्टो हिमवंतं महाचलं॥ श्वो द्रक्ष्यामीति
संचिंत्य मतिं चक्रे गृहं प्रति॥ विभ्रष्टपादलेपोसौ चिरेण जडसंक्रमः॥ चिंतयामास किमिदं मयाज्ञानादनु
ष्ठितं॥ पादप्रलेपो यन्नष्टो मे विलीनो हिमवारिणा॥ शैलोतिदुर्गमश्चायं दूरश्चाहमिहागतः॥ प्रयास्यति क्रि
याहानिमग्निशुश्रूषणादिका॥ कथमत्र करिष्यामि संकटं महदागतं॥ इदं रम्यमिदं रम्यमित्यस्मिन्वन
निर्झरे॥ सक्तदृष्टिरहं तृप्तिं न यास्येऽब्दशतैरपि॥ किंनराणां कलालापाः समंताच्छ्रोत्रहारिणः॥ प्रोत्फुल्लद्रु
तरुगंधाश्च घ्राणमभ्येत्य मिद्धतिः॥ सुखस्पर्शस्तथा वायुर्जलानि प्रस्रवंति च॥ हरंति कं न रंनात्र मनोज्ञानि
सरांसि च॥ एवं गते नु पश्येयं यदि कंचित्तपोधनं॥ स ममोपदिशेन्मार्गं गमनाय गृहं प्रति॥ श्रीमार्कंडेय उवाच
च॥ एवं संचिंतयन्विप्रो बभ्राम स हिमाचले॥ नष्टपादौषधीबलो वैक्लव्यं परमं गतः॥ तं ददर्शान्मतं च मु
निश्रेष्ठ वरूथिनी॥ वराप्सरा महाभागा मौनेया रूपशालिनी॥ तस्मिन्नदृष्टे ततः साभूद्द्विजवर्ये वरूथिनी॥

॥मा०पु०॥ मदनासक्तहृदयासानुरागा च तत्क्षणात्॥ चिंतयामास को वै परमलीयतराकृतिः॥ स पसं मे भवेज्जन्म यदि मान्नाव फलं
मन्यते॥ अहो स्य रूपमाधुर्यमहो स्य ललितागतिः॥ अहो गंभीरता दृष्टेः कुतो स्य सदृशो भुवि॥ दृष्टो देवालयो दैत्याः सि
॥८६॥ द्धगंधर्वकिंनराः॥ कथं मे कोपि नास्यस्य रूपतुल्यो महामनाः॥ दर्शयामास कमनीययाहमस्मिन्मय्येव सानुरागस्त
यायदि॥ भवेन्नैवेतन्मया तत्कृतः पुण्यसंचयः॥ यद्येवमपि सुस्निग्धां दृष्टिं मय्यभिपातयेत्॥ सुरापानमत्तान्यास्त्रै
86 लोक्यवनितास्ततः॥ मार्कंडेय उ०॥ एवं संचिंतयती सा दिव्ययोषा स्मरातुरा॥ आसानंदर्शयामास कमनीयतराकृ
तिं॥ सतां दृष्ट्वा द्विजसुतः चारुरूपां वरूथिनीं॥ सो पश्चात्संसमागम्य वाक्यमेतदुवाच ह॥ का त्वं कमलगर्भाभे कस्याः किं
वा त्र तिष्ठसि॥ ब्राह्मणोहमिहायातो नगरादरुणास्पदात्॥ पादस्ते पोत्र मे ध्वस्तो विलीना हिमवारिणा॥ यस्यानुभावद
त्राहमागतो मंदिरे स्मि सो॥ वरूथिन्युवाच॥ मौनेयाहं महाभाग नाम्ना ख्याता वरूथिनी॥ विचरामि सदैवात्र रमणीये हि
माचले॥ साहं त्वद्दर्शनाद्विप्र कामयेत्वं कृथ्यतां गता॥ प्रशाधि यन्मया कार्यं त्वदधीनास्मि सांप्रतं॥ ब्राह्मण उवाच॥ येनोपाये
न गच्छेयं निजं गेहं शुचिस्मिते॥ तन्ममाचक्ष्व मा हानिर्भवत्वखिलकर्मणां॥ नित्यनैमित्तिकानां च हान्या हानिर्द्विजन्मनः॥
भविष्यति त्वं कल्याणि मग्नं सुदूरमागमितः॥ प्रणश्यते न प्रवासो ब्राह्मणानां कदाचन॥ अपराध्यति मे हं भीरु देशादर्शनकौ
तुकं॥ स ते गृहे द्विजाग्न्यस्य निष्पत्तिः सर्वकर्मणां॥ नित्यनैमित्तिकानां तु हानिरेव प्रवासिनः॥ सा त्वं किं बहुनोक्तेन तथा
कुरु सुमध्यमे॥ यथा नास्तंगते सूर्ये पश्यामि निजमालयं॥ वरूथिन्युवाच॥ मैवं ब्रूहि महाभाग मा भूत्स दिवसो मम॥
मां परित्यज्य यत्र त्वं निजगेहमुपेष्यसि॥ अहो रम्यतरः स्वर्गो यतो न द्विजनंदन॥ ततो वयं परित्यज्य तिष्ठामोत्र सुराल ॥रामः॥
लयं॥ कुरु त्वं सह मया कांत कांतेत्र तुहिनाचले॥ रममाणो हि मर्त्यानां वं धनं न स्मरिष्यसि॥ तेजो वस्त्राण्यलंकारान्भक्ष्य ॥८६॥

86A

भो ज्यानलेपनं ॥ दास्याम्यत्र तवाहं ते स्मरेणावशगा कृता ॥ वीणावेणुस्वरं गीतं किन्नराणां मनोरमं ॥ भृंगाल्हादकरो वायुसुमशान्त
मुदकं शुचि ॥ मनोभिलषिता शय्या सुगंधमनुलेपनं ॥ इहासतो महाभाग गृहे किं तेधिकं निजे ॥ इहासतो नैव जरा कदाचित्ते भ
विष्यति ॥ त्रिदशानामियं भूमिर्यौवनोपचयप्रदा ॥ इत्युक्त्वा सानुरागा सा सहसा तरलेक्षणा ॥ आलिलिंग प्रसीदेति वदंती
कलमुन्मदा ॥ ब्राह्मण उवाच ॥ मा मां स्प्राक्षीर्व्रजान्यत्र दुष्टे यः सदृशस्तव ॥ अन्यन्मया याचिता त्वमन्यथैवाभ्युपैषि मां
सायं प्रातर्हुतं हव्यं लोकान्यच्छति शाश्वतान् ॥ त्रैलोक्यमेतदखिलं मूढे हव्ये प्रतिष्ठितं ॥ तदुपायं समाचक्ष्व येन यामि स्व
मालयं ॥ वरूथिन्युः ॥ किं ते नाहं प्रिया विप्र रमणीयो न किं गिरिः ॥ विद्याधरादीन्गंधर्वानुत्सृज्याभीष्टो हि कस्तव ॥ ब्राह्मण उ०
अभीष्टा गार्हपत्याद्याः सततं मे त्रयोग्नयः ॥ रम्यं ममाग्निशरणं वेदीविस्तरणी प्रिया ॥ वरूथिन्युः ॥ अभीष्टा वासगुणा येहि
ते यामादे दया द्विज ॥ तां करोषि कथं न त्वं मपि सद्धर्मपालनं ॥ त्वद्वियुक्ता न जीवामि तथा प्रीतिर्मम त्वयि ॥ नैतद्दाम्य
हं मिथ्या प्रसीद त्वं मम मानघ ॥ ब्राह्मण उ० ॥ यदि प्रीतिमती सत्यं नोपचाराद्ब्रवीषि मां ॥ तमुपायं समाचक्ष्व येन यामि स्व
मालयं ॥ वरूथिन्युः ॥ निजमालयमप्यस्मान्द्रष्टवान्यास्यस्यसंशयं ॥ स्वल्पं कालं मया सार्द्धं भुंक्ष्व भोगान्सुदुर्लभान् ॥ ब्रा
ह्मण उ० ॥ न भोगार्थाय विप्राणां शस्यते हि वरूथिनि ॥ इह क्लेशाय विप्राणां चेष्टा प्रेत्य फलप्रदा ॥ वरूथिन्युः ॥ संत्राणं म्रि
यमाणाया मम कृत्वा परत्र ते ॥ पुण्यस्यैव फलं भोगा विभोगास्त्वप्यत्र जन्मनि ॥ एवं च द्वयमप्येतत्त्वोपचयकारकं ॥ प्रत्या
ख्याता त्वहं मस्युत्वं च पापमवाप्स्यसि ॥ ब्राह्मण उ० ॥ परस्त्रियं नाभिलषे यदि स्युर्गुरवो मम ॥ तेन त्वां नाभिवांछामि कामं
र विलपमुच्य च ॥ मार्कंडेय उ० ॥ इत्युक्तः स महाभागः स्पृष्ट्वापः प्रयतः शुचिः ॥ प्राहेदं प्रणिपत्याग्निं गार्हपत्यमुपांशुना ॥ गि
भगवन्गार्हपत्याग्ने योनिस्त्वमसि कर्मणां ॥ त्वत्त आहवनीयोग्निर्दक्षिणाग्निश्च नान्यतः ॥ युष्मदाप्यायनाद्देवा वृष्ट्या

॥मा॰पु॰॥ सस्यादिहेतवः॥ भवंति सस्यादखिलं जगन्दवति नान्यतः॥ एवं त्वत्तो भवस्येतद्येन सत्येन वै जगत्॥ तयाहमद्य स्वं गेहं प
॥८७॥ श्येयं सति भास्करे॥ यथा वेदोदितं कर्म्म स्वकाले नो भितं मया॥ तेन सत्येन पश्येयं गृहस्थोद्य दिवाकरं॥ यथा न हि परद्रव्ये
87 परदारे षु मे मतिः॥ कदाचित्साभिलाषाभूत्तथैतत्सिद्धिमेतु मे॥ इति श्रीमार्कंडेयपुराणे स्वारोचिषेंतरे॥ ५६॥ मार्कंडेय उ॰
एवं तु वदतस्तस्य द्विजपुत्रस्य पावकः॥ गार्हपत्यः शरीरेस्य सन्निधानमथाकरोत्॥ तेन चाधिष्ठितः सोथ भामंडल
रा मध्यगः॥ व्यदीपयत तं देशं मूर्त्तिमानिव हव्यवाट्॥ तस्याश्च सुतरां तन्वता दृक् रूपे द्विजन्मनि॥ अनुरागो भवद्विप्र पश्य
स्यादेव योषितः॥ ततः साधिष्ठितस्तेन हव्यवाहेन तत्क्षणात्॥ यथा पूर्वं तया गंतुं प्रवृत्तो द्विज नंदनः॥ जगाम च त्वं नं
रायुक्तः तया सास्तनिरीक्षितः॥ श्वासा दृष्टिपातेन त्यानिश्वासा साकंपिकं वरं॥ ततः क्षणेनैव तदा निजं गेहमवाप्य सः॥ य
था प्रोक्तां द्विजश्रेष्ठश्चकार सकलाः क्रियाः॥ अथ सा चारुसर्वांगी तत्रासक्तात्ममानसा॥ निश्वासपरमा निन्ये दिन
शेषं तया निशां॥ निःश्वसंत्यनवद्यांगी हा हेति वदती मुहुः॥ मंदभाग्यमथात्मानं निनिंद मदिरेक्षणा॥ न विहारे न
चाहारे रमणीये न वा चले॥ न कंदरेषु शैलानां सा ववंध तदा रतिं॥ चकार रममाणे च चक्रवाकयुगे स्पृहां॥ सुकांतेन
वरारोहा निनिंद निजयौवनं॥ का गताहमिमं शैलं दुष्टदैववलात्कृता॥ क्व च प्राप्तः स मे दृष्टिगोचरं तादृशो जनः॥ यद्य
द्य स महाभागो न मया संगमेष्यति॥ तत्कामाग्निरवश्यं मां क्षपयिष्यति दुःसहः॥ रमणीयमभूद्येतं पुंस्कोकिलनिनादि
तं॥ तेन हीनं तदेवैतद्दहतीवाद्य मानसं॥ मार्कंडेय उ॰॥ इत्थं सा मदनाविष्टा जगाम मुनिसत्तम॥ वरूथेच तदा रागस्तस्मि
न्विप्रे प्रतिक्षणं॥ कलिन्नामा तु गंधर्वः सानुरागो निराकृतः॥ तया पूर्वं मभूत्सोथ तदवस्थां ददर्श तां॥ स चिंतयामास ॥राम॥
तदा किं त्वेषा गजगामिनी॥ निश्वासपरमा ग्लाना गिरा वक्त्रवरूथिनी॥ मुनिशापकृता किं तु केन चिद्वा विमानिता॥ वाष्पवा ॥८७॥

रियरिक्षिस्फ्रमियं धत्ते यतो मुखं॥ ततः स दध्यौ सुचिरं तमर्थं कौतुकात्कलिः॥ ज्ञातवांश्च प्रभावेण समाधेस्स यथातथ्यं
ततः स चिंतयामास तद्विज्ञाय मुनेः कलिः॥ ममोपपादितं साधु माग्यैरेतत्सुराकृते॥ मयैषा सानुरागेण बहुशः प्रार्थि
तासती॥ निराकृतवती सेयं मम प्राप्या भविष्यति मानुषे सानुरागेयं यत्र तद्रूपधारिणि॥ रंस्यते मय्यसंदिग्धं किं का
लेन करोमि तत्॥ मार्कंडेय उ०॥ आत्मप्रभावेन ततस्तस्य रूपं द्विजन्मनः॥ कृत्वा च चार यत्रास्ते सा निषण्णा वरूथिनी॥
सा तं दृष्ट्वा वरारोहा किंचिदुत्फुल्ललोचना॥ समेत्य प्राह तत्त्वं गो प्रसीदेति पुनः पुनः॥ त्वया त्यक्ता न संदेहः परित्यक्ष्यामि
जीवितं॥ न चाधर्मः कष्टतरः क्रियालोपाद्भविष्यति॥ मया समेत्य रमेतस्मिन्महात्मन्नगिरिकंदरे॥ मत्परित्राणजं धर्म्मम
वस्यं प्रातिपत्स्यमे॥ आयुषः सावशेषं मे ध्रुवमस्ति महामते॥ निर्वृतिस्तेन नूनं त्वं हृदयाह्लादकारकः॥ कलिरु०॥ किं क
रोमि क्रियाहानिर्भवत्यत्र न संशयः॥ त्वमप्येवंविधं वाक्यं ब्रवीषि तनुमध्यमे॥ तदहं संकटं प्राप्तो यद्ब्रवीमि करोषि त
त्॥ यदि तत्संगमो मे स्यात्त्वया सह नान्यथा॥ वरूथिन्यु०॥ प्रसीद यद्ब्रवीषि त्वं तत्करोमि न ते मृषा॥ ब्रवीम्येतद्वदाशंको
यत्ते कार्यं मयाधुना॥ कलिरु०॥ नाल संभोगसमये द्रष्टव्योहं त्वया बले॥ निमीलिताक्ष्याः संसर्गस्तव सुभ्रु मया सह व
रूथिन्यु०॥ एवं भवतु कल्याण यदीच्छसि तथास्तु तत्॥ मया सर्वप्रकारं हि वशेस्येयं तवाधुना॥ इति श्री मार्कंडेयपुरा
णे स्वारोचिषे मन्वंतरे॥ ५५॥ मार्कंडेय उ०॥ ततः सह तया सोथ रराम गिरिसानुषु॥ फुल्लकाननदृश्येषु नोज्ञेषु सरःसु
चा॥ कंदरेषु च शैलानां निम्नगापुलिनेषु च॥ मनोज्ञेषु तथान्येषु देशेषु मुदितो द्विज॥ वह्निनाधिष्ठितस्यासौ तद्रूपं त
त्र तस्य सा॥ अचिंतयत्संयोगकाले निमीलितविलोचना॥ ततः कालेन सा गर्भमवाप मुनिसत्तम॥ गंधर्ववीर्यतो रूपं चिं
तनाच्च द्विजन्मनः॥ तां गर्भधारिणीं सोपि सांत्वयित्वा वरूथिनीं॥ विप्ररूपधरो यातस्तया प्रीत्या विसर्जितः॥ ततो यज्ञेय

॥मा॰पु॰॥ द्युतिमानूज्वलंन्निव विभावसुः ॥ स्वरोचिर्भिर्यथा स्वर्यो भासयन्सकलादिशः ॥ स्वरोचिर्भिर्यतो भाति भास्वानिव स वाल
कः ॥ ततः स्वरोचिरित्येवं नाम्ना ख्यातो बभूव सः ॥ ववृधे स महाभागो वयसानुदिनं तथा ॥ गुणौघैश्च यथा वालः कला
॥८८॥ भिः शशिलांछनः ॥ स जग्राह धनुर्वेदं विद्याश्चस्तु महामनाः ॥ प्राप्तवांश्चाचिरेणैव तदा यौवनगोचरं ॥ मंदराद्रौ क
दाचित्स रम्ये स्वानुविचेष्टितः ॥ ददर्शैकां तदा कन्यां गिरेः प्रस्थे भयातुरां ॥ त्रायस्वेति निरीक्ष्यैनं सा तदा वाक्यमब्रवी
88 त् ॥ माभैषीरिति तां प्राह भयविक्लवलोचनां ॥ किमेतदिति तेनोक्ता विप्रेणाकंपमहात्मना ॥ ततः सा कथयामास श्वा
सक्षेपस्तुनास्तरं ॥ कन्योवाच ॥ अहमिंदीवराक्षस्य सुता विद्याधरस्य वै ॥ नाम्ना मनोरमाख्याता जाता या मनुधुव
नः ॥ मंदारविद्याधरजा सखी मम विभावरी ॥ कलावती चाप्यपरा सुता पारस्य वै मुनेः ॥ ताभ्यामहं समायाता कै
लासतटमुत्तमं ॥ तत्र दृष्टो मुनिः कश्चित्तपसातिकृशाकृतिः ॥ क्षुत्क्षामकंठो निस्तेजा दूरजातास्थितारकः ॥ म
या चहसितः क्रुद्धः स तदा मां शशाप ह ॥ क्षामः क्षामस्वरः किंचित्कंपिताधरपल्लवः ॥ त्वयावहसितो यस्मादना
र्ये दुष्टतापसि ॥ तस्मात्त्वामचिरेणैव राक्षसोपहरिष्यति ॥ इत्येवं शापे मत्सखीभ्यां स तु निर्भर्त्सितो मुनिः ॥ धिक्के ब्रा
ह्मण्यमक्षमायाहतं ते निखिलं तपः ॥ अमर्षेणैवमुक्तोसि तपसानातिकर्षितः ॥ क्षांसर्वस्यदं वै ब्राह्मण्यं यक्रो
धसंयमनं तपः ॥ एतच्छ्रुत्वा ददौ शापं तयोरप्यमितद्युतिः ॥ एकस्याः कुष्ठम—गे भाव्यंन्यस्यास्त्वयास्य यः ॥ तयो
स्तथैव जातं यथोक्तं न तत्क्षणात् ॥ मामप्येतन्महद्रक्षः सदोपैति पदानुगं ॥ नमं लो पि महानादं तस्य दूरे
पि गर्जतः ॥ त्वतीयमद्यदिवं यन्मे पृष्ठं न मुंचति ॥ अस्त्रग्रामस्य सर्वस्य हृदयं ज्ञाहमद्यते ॥ तत्स्य च्छामिमां रक्ष ॥राम:॥
रक्षसोस्मान्महाद्युते ॥ प्रादात्स्वायंभुवस्यादौ स्वयं रुद्रः पिनाकधृक् ॥ स्वायंभुवो वशिष्ठाय सिद्धवर्यीय दत्तवा ॥८८॥

88A

न॥नैनापिदत्तंमम्मातुःपित्रेचविद्यायुधायवै॥प्रादादौह्याह्निकंचापिमत्पित्रेस्वगुरास्वयं॥मयापिशिक्षितंवीर
सकाशाद्बालयापितुः॥हृदयंसकलास्त्राणामशेषरिपुनाशनं॥तदिदंगृह्यतांशीघ्रंमयोक्तंस्वपरायणं॥ततो
जहिदुरात्मानमेनंराक्षसंसमागतं॥मार्कंडेयउ०॥तथेत्युक्तेततस्तेनवाग्यतस्यस्वयततत्ततः॥अस्त्राणांहृदयंप्रादा
त्सरहस्यनिवर्त्तनं॥एतस्मिन्नंतरेरक्षस्तत्तदाभीषणाकृति॥नदमानंमहानादमाजगामत्वरान्वितं॥मयाभि
भूतासंत्राणमुपेपिद्रुतमेहिमे॥भक्षयेकिंचिरेणेतिब्रुवाणंतं॥ददर्शसः॥स्वरोचिश्चिंतयामाससहृष्टागतस्समु
पागतं॥गृहाणास्त्रेषुवचःसस्यंतस्यास्त्वितिमहामुने॥जग्राहसमुपेस्यैनांत्वरयासोपिराक्षसः॥त्राहित्राहीति
करुणंविलपंतीसुमध्यमां॥ततःस्वरोचिःसंक्रुद्धंदृंडास्त्रमतिभैरवं॥दृष्ट्वानिमेष्यतद्रक्षोददर्शानिमिषेक्ष य
णः॥हाहाभिभूतःसतदातामुत्सृज्यनिशाचरः॥प्रसीदशाम्यतामस्त्रंश्रूयतांचेत्यभाषत॥मोक्षितोहंत्वया
शापान्महाघोरान्महाद्युते॥प्रदत्ताद्दतितीव्रेणब्रह्ममित्रेणधीमता॥उपकारीनमेत्वत्तोमहाभागाधिकः॥
परः॥येनाहंस्मुमहाकष्टान्मत्तःशापाद्विमोक्षितः॥स्वरोचिरुवाच॥ब्रह्ममित्रेणमुनिनाकिंनिमित्तंमहात्मना॥
शापस्त्वंकीदृशःशप्तोवभ्रायोदत्तोभवत्पुरा॥राक्षसउ०॥ब्रह्ममित्रोष्टधाभिन्नमायुर्वेदमधीतवान्॥तस्यादश्योधिका
रंचक्रेपक्षप्तायर्वेणोहिजं॥अहमिंदीवराख्योयःख्यातःस्याजनकोभवं॥विद्याधरपतेःपुत्रोनलनाभस्यखे
द्विन॥सममयाचितःपूर्वंब्रह्ममित्रोभवन्मुनिः॥आयुर्वेदमशेषंमेभगवन्दातुमर्हसि॥यदानुबहुशोवीरमप्र
द्यायनतस्यमे॥नप्रादादायाचितोविद्यामायुर्वेदात्मिकांमम॥शिष्येभ्योददतस्तस्यमयांतर्द्धानगेनहि॥आयुर्वे
दात्मिकाविद्यागृहीतान्नतदामया॥गृहीतायांतुविद्यायांमासैरष्टभिरादरात्॥ममातिहर्षादंमवद्धासोतोव

॥मा० पु०॥ पुनः पुनः॥ प्रत्याभिज्ञाय मां हासान्मुनिः कोपसमन्वितः॥ विकंपिताधरः प्राह मामिदं परुषाक्षरं॥ गंधर्वराज
यस्मान्मे त्वया दृश्येन दुर्नेते॥ हता विद्या यहासंभ्रममं ज्ञाय वै कृतः॥ तस्मात्त्वं राक्षसः पापम मयाक्तिनिराकृ
॥दृष्टी॥ तः॥ भविष्यसि न संदेहः सप्तरात्रेण दारुणः॥ इत्युक्ते प्रणिपातात्यैरुपचारैः प्रसादितः॥ सममामाह पुनर्वि
89 प्रसत्त्वक्षणान्मदुमा॥ नसः॥ यन्मयोक्तमवश्यं तन्द्राविगंधर्व नान्यथा॥ किंतु त्वं राक्षसो भूत्वा पुनः सं
प्राप्स्यसे वपुः॥ नष्टस्मृतिर्यदाक्रुद्धः स्वमपत्यं चिरवादिपुः॥ निशाचरत्वं गतासि तदस्त्रानलतापितः॥ पु महा
नः संज्ञामवाप्य मामवाप्स्यसि निजं वपुः॥ तयैतत्त्वमधिष्ठानं लोकं गंधर्वसेवितं॥ सोहं त्वया भागमोक्षिता
स्मात्सुदारुणात्॥ निशाचरत्वाय धीरते नमे प्रार्थेनं कुरु॥ इमां ते तनयां भार्यां गृहाण घेमं महामते॥ मार्कंडे
य उ०॥ इत्युक्त्वा प्रददौ विद्यां स तु दिव्यांबरोज्वलः॥ लम्भ्रवणं परं दिव्यं प्रयच्छामि प्रतीक्षतां॥ आयुर्वेद
स्य सकलः स्वधीतो यं मया ततः॥ मुनेः सकाशात्स्मात्स्वपुराणं वसुराष्ट्रितः॥ दत्त्वा विद्यां ततः कन्यां स
दातु सुप चक्रमे॥ तमाह सा तदा कन्या जनेतारं स्वरूपिणं॥ अनुरागो ममात्यंत तातानीव महात्मनि॥ दृशी
नादेव संजातो विशेषेणोपकारिणि॥ किंतु मे या सखी सा च मत्कृते दुःखपीडिता॥ अतो नाभिलषे भो
गान् भोक्तुमेतेन वै सह॥ सुहृषेरपि नोकर्तुं मिस्वं शंक्यान्तशंसता॥ स्वभावकठिनैमादृक् कथं योषित्कारि
ष्यति॥ साहं यथा ते दुःखात्तैमत्कृते नेकन्यके पितः॥ तथास्यास्यामि तद्दुःखं सुमहानलतापिता॥ स्वरोचि
रुवा॥ आयुर्वेदप्रसादेन ते करिष्ये पुनर्नवे॥ सख्यौ तव महाशोकसमुद्धृते सुमध्यमे॥ मार्कंडेय उवाच॥ ॥रामा॥
ततः पित्रा स्वयं दत्तां तां कन्यां स्वविधानतः॥ उपयेमे गिरौ तस्मिन् स्वरोचिष्माहुदर्शनो॥ दत्त्वा तु तां तदा क ॥दृष्टी॥

न्यां मभिशप्तस्य च भामिनी॥ जगाम दिव्यया गत्या गंधर्वः स्वपुरं ततः॥ स चापि सहितस्तन्व्या तनुयानं तदा ययौ॥ कन्य
कायुगलं तत्र तच्छापोत्स्यगदातुरं॥ ततस्तयोः स तन्वंग्योः रोगघ्नैरोषधैः रसैः॥ चकार नीरुजौ देहौ स्वरोचिषि चिय शाज्ञि
तन्॥ ततोतिशोभने कन्ये विमुक्ते व्याधिनाम्बुने॥ कन्ये द्योतिततदिग्भागं चक्रे ते ते महीधरम॥ इति श्रीमार्कंडेयपुरा
णे स्वारोचिषे॥ थच॥ मार्कंडेय उ०॥ एवं विमुक्तरोगा तु कन्यका तं मुदान्विता॥ स्वरोचिषमुवाचेदं श्रणु च वचनं म
म॥ मंदारविद्याधरजा नाम्ना ख्याता विभावरी॥ उपकारिणेहमात्मानं प्रयच्छामि प्रतीच्छ मां॥ विद्यां च तुभ्यं दास्या
मि सर्वभूतरुतानि ते॥ यया भविष्यति मे ध्वंति प्रसाद प्रवणो भव॥ मार्कंडेय उ०॥ एवमस्त्विति तेनोक्ते धर्मज्ञेन स्वरो
चिषा॥ द्वितीया सा तदा कन्या इदं वचनमब्रवीत॥ कुमारब्रह्मचार्यासीत्पारो नाम पिता मम॥ ब्रह्मर्षिः सुमहाते
जा वेदवेदांगपारगः॥ तस्य पुंस्कोकिलालापरमणीयमधो पुरा॥ आजगामाप्सरा नाम्नाशं प्रख्याता पुंजिकस्थ
ला॥ काममैव लभ्यतानीतः स तया मुनिपुंगवः॥ तत्संयोगेहमुत्पन्ना तस्यां तत्र महाचले॥ विहायसा गतः सा च
मामस्मिन्विजने वने॥ बालामेकां महीपृष्ठे व्यालश्वापदसंकुले॥ ततः कलाभिः सोमस्य वर्द्धतीमिरहः स्वयं॥
आप्यायमाना हरहो वृद्धिं यातास्मि सत्तम॥ ततः कलावती सेतन्मम नाम महात्मना॥ गृहीता या कृतं पित्रा गं
धर्वेण सुमानुना॥ न दत्ताहं यदा पित्रा याचितेन महात्मना॥ दिवारिणा निशासुप्तास्तदा मे घातितः पिता॥ तेना
हमतिनिर्वेदाद्दारब्धा यादनोद्यता॥ निवारिता शंभुपत्न्या सत्या सत्यप्रतिश्रवा॥ मा शुचः सुभ्रु ते भर्त्ता महा
भोगो भविष्यति॥ स्वरोचिर्नाम पुत्रश्च मनुस्तस्य भविष्यति॥ आज्ञां च निधयः सर्वे करिष्यंति तवादृताः॥ यथाभि
लषितं वित्तं संप्रदास्यंति ते शुभे॥ यस्याव सेप्रभावेन विद्यायास्तां गृहाण मे॥ पद्मिनी नाम विद्येयं महापद्माभिर

मा० पु० जिता॥ तस्मादहं सदा सम्यक् तासती सत्यपरायणा॥ स्वरोचिस्त्वं ध्रुवं देवी नान्यथा सा वदिष्यति॥ साहं प्राणप्रदा याद्यानां वि
॥९०॥ द्यानां च वपुस्तथा॥ प्रयच्छामि प्रतीच्छ त्वं प्रसादसुमुखो भव॥ मार्कंडेय उवाच॥ एवमस्त्विति तामाह स तु कन्यां कलावति
विभावर्यास रुच्या च स्निग्धदृष्ट्या च मोदितः॥ जग्राह च ततः पाणीं सतयोरमितद्युतिः॥ ननंद स देवस्तेषु नस्यंती घ
स्मरः स च॥ इति मार्कंडेयपुराणे स्वारोचिषे॥ ६५॥ मार्कंडेय उवाच॥ ततः स ताभिः सहितः पत्नीभिरमितद्युतिः॥
१० रराम तस्मिन् शैलेंद्रे रम्यकाननिर्झरे॥ सर्वभोगोपपन्नानि मणिमंत्रिमधुराणि च॥ निधयः समुपाजह्रुः पद्मिन्याव
शवर्तिनः॥ स्रजो वस्त्राण्यलंकारान् गंधाढ्यमनुलेपनं॥ आसनान्यतिशुभ्राणि कांचनानि यथेच्छया॥ सौवर्णानि म
हाभाग करकान् भाजनानि च॥ तथा शय्याश्च विविधा दिव्यैरास्तरणैर्युताः॥ एवं स ताभिः सहितो दिव्यगंधादिवासि
ते॥ रराम स स्वरुचिर्भोमि भो क्षितिवरपर्वते॥ ताश्चापि सह तेनैव लेभिरे मुदमुत्तमां॥ रममाणा यथा स्वर्गे तथा सित
शिलोच्चये॥ अथ हंसी जगादैका चक्रवाकी जलेचरी॥ तस्य तासां च ललिते संबंधे च स्पृहावती॥ धन्योयमिति पुण्या
यं यो यं यो वनगोचरः॥ दयिताभिः सहैताभिः भुंक्ते भोगानभीप्सितान्॥ संति यौवनिनः श्लाघ्यास्तस्त्वो नाति
ति= शोभनाः॥ जरास्या मस्ति का पत्न्यः यतयश्चापि शोभनाः॥ अभीष्टा कस्यचिद्भार्या भर्ता कस्यापि दीप्सितः॥ परस्य
रानुरागास्सदा पत्यमतिदुर्लभं॥ धन्यायं दयिताभीष्ट एताश्चस्यातिवल्लभाः॥ परस्परानुरागो हि धन्यानामेव जा
यते॥ एतन्निशम्य वचनं कलहंस्या समीरितं॥ उवाच चक्रवाकी तां नातिविस्मितमानसा॥ नायं धन्यो यतो लज्जा
नास्य स्त्री संनिकर्षतः॥ अन्यां स्त्रियमयं भुंक्ते न सर्वास्वस्य मानसं॥ चित्तानुरागएकस्मिन्नाधिष्ठाने यतः स ॥राम॥
खि॥ ततो हि प्रीतिमानेष भार्यासु भविता कथं॥ एता न दयिताः पत्युर्नैतासां दयितः पतिः॥ विनोदमात्रमेवैता यथा ॥९०॥

परिजनोपरः ॥ एतासां च यदिष्टोयं तत्किं प्रालान्मुंचति ॥ आलिंगस्व परां कांतां ध्यातो वै कांतयान्यया ॥ विद्याप्रदा
नमृत्येन क्रीतोह्य यस्तु भस्त्रवत् ॥ प्रवर्त्तते न हि प्रेम समं बह्विषु कुत्रचित् ॥ कलहंसि पतिर्द्दैन्यो मम धन्याहमेव
च ॥ यस्यैकस्यां स्थिरं चित्तं यस्याश्चैवत्र चाश्रितं ॥ मार्कंडेय उव ॥ सर्वसत्वरुतज्ञोसौ स्वरोचिरपराजितः ॥ निशम्य लज्जि
तो दध्यौ सत्यमेव हि नान्यतं ॥ ततो वर्षशते नासौ रममाणो महागिरौ ॥ रममाणः समंताभिर्ददर्श पुरतो मृगं ॥ स्नि
ग्धपीतावयवं मृगीवृंदपहारिणं ॥ वासिताभिः सुतृप्ताभिः मृगीभिः परिवारितं ॥ आह्लष्ट घ्राणपुटकाजिघ्रतीस्ता
ततो मृगीः ॥ उवाच स मृगो लज्जां त्यागेन गम्यतां ॥ नाहं स्वरोचिस्तच्छीलो नैवैवाम सुलोचना ॥ निर्लज्जाः संति
बहवः तादृशास्तत्र गच्छत ॥ एकास्त्वनेकेऽनुगता यथा हास्यास्पदे जने ॥ अनेकाभिस्तथा चैको भोग्यदृष्ट्या निरी
क्षितः ॥ अस्य धर्मक्रियाहानिरहन्यहनि जायते ॥ द्वितीयभार्यायां चास्य कामासक्तस्तया परः ॥ यस्तादृशोन्य
स्तच्छीलः परलोकपराङ्मुखः ॥ तं कामयत भद्रं वो नाहं तुल्यः स्वरोचिषः ॥ मार्कंडेय उ० ॥ एवं निरस्यमानास्ता हरिणे
न मृगांगनाः ॥ श्रुत्वा स्वरोचिरात्मानं मेने स पतितं यथा ॥ त्यागे चकार च मनः स तासां मुनिसत्तम ॥ चक्रवाकीम
गप्रोक्तयानिज चर्योजुगुप्सितः ॥ स मेस्यताभिर्न्हे यश्च वर्द्धमानमनोभवः ॥ स्यासिप्तनिर्वेदकथैरेमेवर्षशतानिष
ट् ॥ किंतु धर्माविरोधेन कुर्वन्धर्माश्रिताः क्रियाः ॥ बुभुजे स्वरोचिर्विषयान्सहताभिरुदारधीः ॥ ततस्तु जज्ञि
रे तस्य त्रयः पुत्राः स्वरोचिषः ॥ विजयो मेरुनंदश्च प्रभावश्च महाबलः ॥ मनोरमा यि विजयं सुषुवे दीवरासुजा ॥
विभावरी मेरुनंदं प्रभा सचक्रावती ॥ पद्मिनीनाम या चिद्या सर्वभोगोपयादिका ॥ स तेषां ततः प्रभावेण चक्रे
पुरपिता त्रयं ॥ प्राच्यां तु विजयं नाम कामरूपेण गोत्तमे ॥ विजयाय सुतायादौ स ददौ पुरमुत्तमं ॥ उदीच्यां मेरुनंद

॥मा० पु०॥

॥६९॥

91

स्यपुरींनंदवतीमिति॥ख्यातांचकारशोभांतुंगवप्रप्राकारमालिनीं॥कलावतीसुतस्यापिप्रभासस्यनिवेशितं॥
पुरंतालमितिख्यातंदक्षिणापथमाश्रितं॥एवंनिवेश्यपुत्रान्सपुरेषुपुरुषर्षभः॥रेमेताभिस्समंविप्रमनोज्ञास्व
द्रिभूमिषु॥एकदातुगतोरण्यंमृगयायांतुधनुर्द्धरः॥चकर्षधनुरालोक्यवराहमतिदूरगं॥अथाहकाचिदभ्ये
त्यततथाहरिणांगना॥मय्येवपात्यतांबाणःप्रसीदेतिपुनःपुनः॥किमनेनहतेनाद्यमामाशुविनिपातय॥
त्वयाविनिपातितोबाणोमांदुःखान्मोचयिष्यति॥स्वरोचिरु०॥नतेशरीरंसरुजंमस्माभिरुपलक्ष्यते॥किंतुयत्का
रणंयेनत्वंप्राणान्दातुमिच्छसि॥मृग्युवाच॥अन्यासक्तहृदयेयत्रचेतःकृतास्पदं॥ममतेनविनामृत्युरौष
धंकिमुतापरं॥स्वरोचिरु०॥कस्त्वांनाभिलषेद्भीरुसानुरागासिकुत्रवा॥यस्याप्राप्तोनिजप्राणान्परित्यक्तुंव्यवस्य
सि॥मृग्युवाच॥त्वामेवेच्छामिभद्रंतेत्वयामेपहृतंमनः॥वृणोम्यहमतोमृत्युंमयिवाणोनिपात्यतां॥स्वरोचिरु०॥
त्वंमृगीचवलायामीनररूपधरावयं॥कथंत्वयासमंयोगोमद्विधस्यभविष्यति॥मृग्युवा०॥यदितापमद्वंचि
तंमयितेमांपरिष्वज॥एतावताहंभवताभविष्याम्यतिमानिता॥मार्कंडेयउवाच॥आलिलिंगततस्तांतुस्वरोचि
र्हरिणांगनां॥तेनाभिलिंगितासद्यःसाभूद्दिव्यवपुर्द्धरा॥ततःसविस्मयाविष्टःकात्वमित्यभ्यभाषत॥साचास्मैक
थयामासप्रेम्णालज्जाजडाक्षरं॥अहमभ्यर्थितादेवैःकाननस्यास्यदेवता॥उत्पादनीयोहिमनुस्त्वयामयिम
हामते॥प्रीतिमत्यांमयिसुतंभूर्लोकपरिपालकं॥त्वमुत्पादयदेवानांत्वामहंवचनाद्वदे॥मार्कंडेयउ०॥ततःसत
स्यांतनयंसर्वलक्षणलक्षितं॥तेजस्विनमिवात्मानंजनयामासतत्क्षणात्॥जातमात्रस्यतस्याथदेववाद्यानि
सस्वनुः॥जगुर्गंधर्वपतयोननृतुश्चाप्सरोगणाः॥सिषिचुर्भूतलंमेघानीरजस्कंमहीतलं॥पवनःपुष्पवर्षंच

॥राम॥

॥६९॥

सुमो चायसमंततः॥ तस्य तेजः समालोक्य नाम चक्रे पिता स्वयं॥ द्युतिमानिति येनास्य तेजसा भासिता दिशः॥ स बालो
द्युतिमान्नाम महाबलपराक्रमः॥ स्वरोचिषः सुतो यस्मात्तस्मात्स्वारोचिषोऽभवत्॥ स चापि विचरन्रम्ये कदाचिद्गि
रिनिर्झरे स्वरोचिर्ददृशे हंसं निजपत्न्या समन्वितं॥ उवाच स तदा हंसीं साभिलाषां पुनः पुनः॥ उपसंह्रियतामात्मा
चिरं ते क्रीडितं मया॥ किं सर्वकालं भोगैस्ते रासन्नं चरमं वयः॥ परित्यागस्य कालो मे तव चापि जले चरि॥ हंस्युवाच
अकालः को हि भोगानां सर्वभोगात्मकं जगत्॥ यज्ञाः क्रियंते भोगार्थं ब्राह्मणैः संयतात्मभिः॥ दद्याद् द्यूतं तथा भो
गान्वांछमाना विवेकिनः॥ दानानि च प्रयच्छंति पूर्त्तं धर्मांश्च कुर्वते॥ स त्वं नेच्छसि किं भोगान् भोगाश्चेष्टफलं नृणां॥
विवेके नातिरश्चां च किं पुनः संयतात्मनां॥ हंस उवाच॥ भोगे ह्यासक्तचित्तानां परमार्थाश्रिता मतिः॥ भविष्यति कदा
संगमुपेतानां च बंधुषु॥ पुत्रमित्रकलत्रेषु सक्ताः सीदंति जंतवः॥ सरः पंकार्णवे मग्ना जीर्णा वनगजा इव॥ किं न
पश्यसि वा भद्रे जातसंगं स्वरोचिषं॥ आबाल्यकामसंसक्तमग्नं स्नेहांबुकर्दमे॥ येचनेऽतीव भार्यासु सांप्रतं पु
पो त्रनप्तृषु॥ स्वरोचिषि मनो मग्नमुद्धारं प्राप्स्यसे कुतः॥ नाहं स्वरोचिषस्तुल्यः स्त्रीवश्यो वा जले चरि॥ विवेकवांश्च भो
गेभ्यो विनिवृत्तोऽस्मि सांप्रतं॥ मार्कंडेय उवाच॥ स्वरोचिरेतदाकर्ण्य जातोद्वेगः खगेरितं॥ आदाय भार्यास्तपसे ययौ चै
व तपोवनं॥ तत्र तप्त्वा तपो घोरं सह ताभिरुदारधीः॥ जगाम लोकानमलान्निर्धूताखिलकल्मषः॥ इति श्रीमार्कं
डेयपुराणे स्वारोचिषः सिद्धिर्नाम॥ ६९॥ मार्कंडेय उवाच॥ ततः स्वारोचिषं नाम्ना द्युतिमंतं प्रजापतिः॥ मनुं चकार भग
वांस्तस्य मन्वंतरं शृणु॥ तत्रांतरे तु ये देवा मुनयस्तत्सुताश्च ये॥ भूपालाः क्रोष्टुके ये तान्गदतो मे निशामय॥ देवाः पा
रावतास्तत्र तथैव तुषिता द्विज॥ स्वारोचिषेंतरे चेंद्रो विपश्चिदिति विश्रुतः॥ ऊर्ज्जस्तंबस्तथा प्राणो दत्तोलिः ऋषभ

मा०पु० स्तया॥ निष्वरस्यार्व्वरीवांश्च तत्र सप्तर्षयो भवन्॥ चैत्रकिंपुरुषाद्याश्च सुतास्तस्य महात्मनः॥ सप्तासन्सु महावीर्या
॥६९॥ ः पृथिवीपरिपालकाः॥ तस्य मन्वंतरं यावत्तावत्तत्सृतिसंभवैः॥ भुक्तेयमवनिः सर्वा द्वितीयं चैतदंतरं॥ स्वारोचिषस्य
चरितं जन्म स्वारोचिषस्य च॥ निशम्य मुच्यते पापैः श्रद्दधानो हि मानवः॥ इति श्रीमार्कंडेयपुराणे स्वारोचिष
92 मन्वंतरं॥ ६६॥ क्रौष्टिकिरुवाच॥ भगवन्कथितं सर्वं विस्तरेण त्वया मम॥ स्वारोचिषोऽथ तं जन्म ततः स्वारोचिषस्य
तु॥ या तु सा पद्मिनी नाम विद्या भोगोपपादिका॥ तत्संस्तायेनिधयस्तान्मे विस्तरतो वद॥ अष्टौ ये ते धयस्तेषां
स्वरूपं द्रव्यसंस्थितं॥ भवताभिहितं सम्यक् श्रोतुमिच्छाम्यहं गुरो॥ मार्कंडेय उवाच॥ पद्मिनी नाम या विद्या लक्ष्मीस्त
स्याश्च देवता॥ तदाधाराश्च निधयस्तन्मे निगदतः शृणु॥ तत्र पद्ममहापद्मौ तथा मकरकच्छपौ॥ मुकुंदो नील दकुं
श्च शंखश्चैवाष्टमो निधिः॥ देवतानां प्रसादेन साधुसंसेवनेन च॥ सत्यां मृद्धौ भवंत्येते सिद्धिस्तेषां च जायते॥
एभिरालोकितं चित्तं मनुष्यस्य महामते॥ यादृक्स्वरूपो भवति तन्मे निगदतः शृणु॥ पद्मो नाम निधिः पूर्वं सय
स्य भवति द्विज॥ स तस्य तत्सुतानां च तत्सुत्राणां च नान्यतः॥ दाक्षिण्यसारपुरुषस्तेन चाधिष्ठितो भवेत्॥ सत्वा
धारो महाभागो यतोसौ सात्विको निधिः॥ सुवर्णताम्ररूप्यादिधातूनां च परिग्रहं॥ करोत्यतितरां सोपि तेषां च
क्रयविक्रयौ॥ करोति च यथा यज्ञं दक्षिणाश्च प्रयच्छति॥ सभा देवनिकेतांश्च स कारयति तन्मनाः॥ सत्वाधारो
निधिश्चान्यो महापद्म इति स्मृतः॥ सत्वप्रधानो भवति तेन चाधिष्ठितो नरः॥ करोति पद्मरागादिरत्नानां तु प
रिग्रहं॥ समौक्तिकप्रवालादेस्तेषां च क्रयविक्रयं॥ ददाति योगशीलेभ्यस्तेषामावसथांस्तथा॥ स कारयति त ॥रामः॥
च्छीलः स्वयमेव च जायते॥ तत्प्रसूतास्तथा शीलाः पुत्रपौत्रक्रमेण तु॥ सर्वर्द्धिमात्रः सप्तासौ पुरुषांश्च न मुंचति॥ ॥६९॥

दा

92A

तामसो मकरो नाम निधिस्तेनावलोकितः ॥ पुरुषोथ तमःप्रायः सुशीलोपि हि जायते ॥ वाणखड्गर्ष्टिधनुषां शक्ति
प्रलयपरिग्रहं ॥ दर्शनं नाचकुरुते याति मैत्रीं च राजभिः ॥ ददाति सोथ वृत्तीनां भर्तृजा च तत्प्रियाः ॥ क्रयविक्र
यं च शस्त्राणां नान्यत्र प्रीतिमेति च ॥ एकस्यैव भवत्येष नरस्य न सुतानुगः ॥ द्रव्यार्थं दस्युतो नाशं संग्रामे
वापि सव्रजेत ॥ कच्छपाख्यो निधिर्योन्यो नरस्तेनाभिवीक्षितः ॥ तमःप्रधानो भवति यतो सौ तामसो निधिः ॥
व्यवहारानशेषांस्तु पण्यजानां करोति च ॥ कर्मोत्तानिखिलांश्चैव न विश्वमतिकस्य चित ॥ समस्तनि व
यथांगानि निर्गच्छास्ते हि कच्छपः ॥ तथा विष्टभ्य रत्नानि तिष्ठत्याकुलमानसः ॥ न ददाति न वा भुंक्ते तद्धिना
शभयाकुलः ॥ निधानमुर्व्यां कुरुते निधिः सोप्येकपूरुषः ॥ रजोगुणमयश्चान्यो मुकुंदो नाम यो निधिः ॥ न
रोवलोकितस्तेन तद्गुणो भवति द्विज ॥ वीणावेणुमृदंगादेरातोद्यस्य परिग्रहां ॥ करोति गायनं चित्तेन स्वतां
नुं च प्रयच्छति ॥ वंदिनां मागधसूतानां नराणां लास्यपाठिनां ॥ ददात्यहर्निशं भोगान्भुंक्ते तैस्तैः समं द्विज ॥ कु
लटासुरतिश्चास्य भवत्यन्येश्च तद्विधैः ॥ प्रयाति संगमेकं च स निधिर्भजते नरं ॥ रजः सत्वमयश्चान्यो नंदो
नाम महानिधिः ॥ उपैति स्तंभमधिकं नरस्तेनावलोकितः ॥ समस्तधातुरत्नानां पण्यवाद्यादिकस्य च ॥ परि
ग्रहं करोत्येष तथैव क्रयविक्रयौ ॥ आधारः स्वजनानां च आगताभ्यागतस्य च ॥ सहते नावमानोक्तिं स्व
ल्यामपि महामते ॥ स्तूयमानश्च महतीं प्रीतिं वध्नाति यच्छति ॥ यं यमिच्छति कामं मृदुत्वमुपयाति च ॥ वह्वो च
भार्या भवंत्यस्य सुसूतिमत्योतिशोभनाः ॥ तदन्वये सप्त च नरान्निधिर्नंदोनुवर्त्तते ॥ प्रवर्द्धमानो तु नरमष्टभागे
न सत्तमः ॥ दीर्घायुष्यं च सर्वेषां पुरुषाणां प्रयच्छति ॥ वंधूनामेव भरणं ये च दूरादुपागताः ॥ करोति नंदः स:

तेषां १

मा० पु० ॥ ६२ ॥ 93

परलोके न चादृतः ॥ भवत्यस्य न च स्नेहः सहवासिषु जायते ॥ एवं मिश्रे च शैथिल्यं प्रीतिमन्यैः करोति च ॥ तथैव सत्त्वरजसी
यो विभर्त्ति महानिधिः ॥ निधिः स नीलसत्त्वसंगी नरस्तेनोपलभ्या भवेत् ॥ वस्त्रकार्पासधान्यादि फलपुष्पपरिग्रहं ॥ मुक्ताविद्रु
मशंखवानां सुक्त्यादीनां तथा मुने ॥ काष्ठादीनां करोत्येष यच्चान्यज्जलसंभवं ॥ क्रयविक्रयमप्येषां नान्यत्र रमते मनः ॥ त
डागान् पुष्करिण्यश्च तथारामान् करोति च ॥ बंधं च सरितां स्नातयारोपयते नरः ॥ अनुलेपनपुष्पादि भोगभुक्तापि जाय
ते ॥ त्रिपौरुषश्चाप्ययं निधिर्नीलो नामेति विश्रुतः ॥ रजस्तमोमयश्चान्यः शंखसंज्ञो हि यो निधिः ॥ तेनोपनीयते विप्र तद्गुण
त्वं निधीश्वरः ॥ एकस्यैव भवत्येष न नरं नान्यमुपैति च ॥ यस्य शंखो निधिस्तस्य स्वरूपं क्रोष्टुके शृणु ॥ एक एवात्मना
स्वमन्नं भुंक्ते तथांबरं ॥ कदन्नभुक् परिजनो न च शोभनवस्त्रधृक् ॥ न ददाति सुहृद्भार्यासुतापुत्रस्नुषादिषु ॥ स्वपोष
णपरः शंखी नरो भवति सर्वदा ॥ इत्येते निधयः ख्याता नराणामर्थदेवताः ॥ मिश्रावलोकनात् मिश्रस्वभावः फल
दायिनः ॥ यथाख्यातस्वभावस्तु भवत्येषविलोकनात् ॥ सर्वेषामाधिपत्ये च श्रीरेषा हि जयप्रियिनी ॥ इति श्रीमार्कं
डेयपुराणे निधिलक्षणं ॥ ६८ ॥ क्रोष्टुकिरुः ॥ विस्तरात् कथितं ब्रह्मन्मम स्वारोचिषं त्वया ॥ मन्वंतरं तथैवाख्येयस्था
निधयो मया ॥ स्वायंभुवं पूर्वमेव मन्वंतरमुदाहृतं ॥ मन्वंतरं तृतीयं मे कथयोत्तमसंज्ञितं ॥ मार्कंडेय उवाच ॥
उत्तानपादपुत्रोऽभूत् उत्तमो नाम नामतः ॥ सुरुच्यास्तनयः ख्यातो महाबलपराक्रमः ॥ स धर्मात्मा महा
त्मा च पराक्रमधरो नृपः ॥ अतीत्य सर्वभूतानि बभौ मेरुरिवापरः ॥ समः शत्रौ च मित्रे च दारापुत्रे च धर्मवि
त् ॥ दुष्टेऽदुष्टे च यमवत्सोमवच्च महामुने ॥ वाभ्रवी बहुला नाम उपयेमे स धर्मवित् ॥ उत्तानपादतनयः शचीमिंद्र इ ॥ राम ॥
वोत्तमः ॥ तस्यामतीव तस्यासीद्द्विजवर्य मतः सदा ॥ स्नेहवद्धसितद्विजवर्यमतः सदा ॥ स्नेहबद्धमनो यद्वत् रोहिण्यां ॥ ॥ ६३ ॥

निर्वृतिं तस्य ददौ ॥ अन्यप्रयोजनाशक्तिमुपैति नहि तन्मनः ॥ स्वप्ने चैव तदालंबि मनो भूत्तस्य भूपतेः ॥ सतु तस्याः सुचार्वंग्या
दर्शनादेव पार्थिवः ॥ ददाहस्लोचने गात्रं गात्रस्पर्शे च तन्मयः ॥ श्रोत्रोद्वेगकरं वाक्यं प्रियमप्यवनीपतेः ॥ तस्यापि भूरिश
स्मानमेने परिभवास्पदं ॥ अवमेने अजदत्ता स्रुमान्याभरणानि च ॥ उत्तस्थावर्द्धपीतेव पिवतोस्य सुरासवं ॥ आहू
ता च नरेंद्रेण क्षणमात्रं करे धृता ॥ बुभुजे स्वल्पकं भक्ष्यं द्विजेन्द्रातिमुदायुता ॥ एवं तस्यानुकूलस्य नानुकूला म
हात्मनः ॥ अभूत्ततरमत्यर्थं चक्रे रागं महीभृतः ॥ अथापानगतो भूपः कदाचित्तामनिंदितां ॥ सुराभृतं पानपात्रं ग्रा
हयामास सादरं ॥ पश्यतां भूमिपालानां वारमुख्यासमन्वितः ॥ उपगीयमानो मधुरैः गायनैर्गीततत्स्वरैः ॥ सा तु
नेच्छति तत्पात्रमादातुं तस्य राज्ञः करी ॥ समस्तमवनीशानां ततः क्रुद्धस पार्थिवः ॥ उवाच द्वास्थमाहूय निःश्वसन्नुर
रगो यथा ॥ निरीक्षितस्त्वया देव्या प्रिययापतिरप्रियः ॥ द्वास्थ तां दुष्टहृदयामादाय विजने वने ॥ परित्यजाशु नैत
त्ते विचार्यं वचनं मम ॥ मार्कंडेय उ० ॥ ततो नृपस्य वचनं अविचार्य मेवेत्यसः ॥ द्वास्थस्तस्या स्तयास्तु भुमारो
पि प्यस्यंदनं वने ॥ सा च तं विनेत्यागं कृतं तेन महीभृता ॥ अपश्यमाना तं मेने परं कृत्यमनुग्रहं ॥ सोपि तत्राचराग
त्तिदह्यमानात्ममानसः ॥ औत्तानपादिर्भूपालो नान्यां भार्यामविंदत ॥ सस्मार तां सुचार्वंगीमहर्निशमनिर्वृतः ॥ च
कार च निजं राज्यं प्रजाधर्मेन पालयन् ॥ प्रजाः पालयतस्तस्य पितुः पुत्रानिवौरसान् ॥ आगम्य ब्राह्मणः कश्चिदि
दमाहार्त्तमानसः ॥ ब्राह्मण उवाच ॥ महाराज भृशार्त्तोस्मि श्रूयतां वदतो मम ॥ नृणामार्त्तिपरित्राणमन्यतो न नरा
धिपात् ॥ मम भार्या प्रसुप्तस्य केनाप्यपहृता निशि ॥ गृहद्वारमनु प्राप्य समानेतुमर्हसि ॥ राजोवाच ॥ नवेत्सि के
नापहृता कं च नीता च सा द्विज ॥ यतिष्येति गृहे कस्य कुतो वाप्यानयामि तां ॥ ब्राह्मण उवाच ॥ तथैव स्थगितं द्वा

तां

मा०पु० वं प्रसुप्तं स्य गृहे मम ॥ हृता हि भार्या किं केन न तद्विज्ञायते मया ॥ त्वं रक्षिता नो नृपते यस्माद्भागाद्धानवेतनः ॥ धर्मस्य तेन
२४ निश्चिंताः स्वपंति मनुजा निशि ॥ राजोवाच ॥ न ते दृष्टा मया भार्या या हृता च देहतः ॥ वयश्चैव मम ब्रूहि का शीली
ब्राह्मणी च ते ॥ ब्राह्मण उ० ॥ करालनेत्रा सा सुच्चैः ह्रस्वबाहुः कृशानना ॥ विरूपरूपा भूपाल न निंदामि तथापि तां ॥
94 — — — कर्कशवक्त्रपाना सौम्या चाति शीलतः ॥ इत्याख्याता मया भार्या सकरालनिरीक्षणा ॥ मनागतीतं भूपालत
स्याश्च प्रथमं वयः ॥ ईदृग्भूता हि मे भार्या सत्यमेतन्मयोदितं ॥ राजोवाच ॥ अलं ते ब्राह्मण तया भार्यामन्यां ददामि
ते ॥ सुखाय भार्या कल्याणी दुःखहेतुर्हि तादृशी ॥ अस्याकुरूपता विप्र कारणं शीलमुत्तमं ॥ रूपशीलविहीना
या त्याज्या सा सा तेन हेतुना ॥ ब्राह्मण उवा० ॥ रक्ष्या भार्या महीपाल इति न श्रुतिरुत्तमा ॥ भार्यायां रक्ष्यमाणायां प्रजा
भवति रक्षिता ॥ आत्मा हि जायते तस्यां सा रक्ष्या तो नरेश्वर ॥ प्रजायां रक्ष्यमाणायामात्मा भवति रक्षितः ॥ तस्याम
रक्ष्यमाणायां भविता वर्णसंकरः ॥ स पातयेन्महीपाल पूर्वान्स्वर्गादधः पितॄन् ॥ धर्महानिश्चानुदिनं अभार्य
स्य भवेन्मम ॥ नित्यक्रियायाविभ्रंशः स चापि पतनाय मे ॥ तस्यां च — पृथिवीपाल भवित्री मम संततिः ॥ तव षड्भा त
गदात्री सा पवित्री धर्महेतुका ॥ तदेतत्ते मया ख्यातं पत्नी सा मे हृता प्रभो ॥ तां समानय रक्षायामभवानधिकृतो य
तः ॥ मार्कंडेय उ० ॥ तस्येत्थं वचनं श्रुत्वा विमृश्य च नरेश्वरः ॥ सर्वोपकरणैर्युक्तमारुरोह रथोत्तमं ॥ इतश्चेतश्च ते
नासौ पर्यभ्रामन्मेदिनीं ॥ स ददर्श महारण्ये तापसाश्रममुत्तमं ॥ अवतीर्य च तत्रासौ प्रविश्य ददृशे मुनिं ॥ कौ राम०
श्यां वृष्यां समासीनं ज्वलंतमिव तेजसा ॥ स दृष्ट्वा नृपतिं प्राप्तं समुत्थाय त्वरान्वितः ॥ समान्य स्वागतेनैनं शिष्य
माहार्घमानय ॥ तमाह शिष्यः शनकैर्दातव्योर्घोस्य ते मुने ॥ तदाज्ञापय संचिंत्य तवाज्ञां हि करोम्यहं ॥ ततो विज्ञा २४

94A

तत्रत्यं तो भूपतेस्तस्य सद्द्विजः ॥ संभाषासनदानेन चक्रे संमाननमात्मवान् ॥ ऋषिरुवाच ॥ किंनिमित्तमिहायातो भवा
न्किं च चिकीर्षिति ॥ उत्तानपादतनयं वेद्मि त्वां सुत्तमं नृपं ॥ राजोवाच ब्राह्मण किंनिमित्तमिहागतो भवान्किं च चिकी
र्षिति उत्तानपादतनयं वेद्मि त्वां सुत्तमं नृपं ॥ राजोवाच ॥ ब्राह्मणस्य गृहाद्भार्या केनाप्यपहृता मुने ॥ अविज्ञा
तस्वरूपेणातामन्वेष्टुमिहागतः ॥ पृच्छामि यस्तु तन्मे त्वं प्रणतस्यानुकंपया ॥ अभ्यागतस्याग्रगृहं भगवन्वक्तुमर्ह
सि ॥ ऋषिरुवाच ॥ पृच्छ मामवनीपाल यस्ते ष्टव्यमशंकितः ॥ वक्तव्यं चेत्तव मया कथयिष्यामि तत्त्वतः ॥ राजोवा
च ॥ गृहागताय यन्मेर्घ्यं प्रथमे दर्शने मुने ॥ त्वया समुद्यतः कस्मात् अर्घोयं विनिवर्तितः ॥ ऋषिरुवाच ॥ त्वद्दर्शनेन न
रभसादाज्ञातोयं मया नृप ॥ यदा तदा मे तेन शिष्येण प्रतिबोधितः ॥ एष वेत्ति जगत्सर्वमत्प्रसादादनागतं ॥ यथाहं
समतीतं च वर्त्तमानं च सर्वशः ॥ आलोच्याज्ञापयेस्युक्तमतो ज्ञातं मयापि तत् ॥ ततो न दत्तवानर्घमहं तुभ्यं वि
धानतः ॥ सत्यं राजन्स्वमर्घार्हः कुले स्वायंभुवस्य वै ॥ तथापि नार्घयोग्यं त्वां मन्यामो वयमुत्तमं ॥ राजोवाच ॥ किं त
त्कृतं मया ब्रह्मन्ज्ञानादज्ञानतोपि वा ॥ येन त्वत्तोर्घमर्हामि नाहमभ्यागतश्चिरात् ॥ ऋषिरुवाच ॥ किं विस्मृतं ते
यत्पत्नी त्वया त्यक्ता महावने ॥ परित्यक्ता सत्या सार्द्धं त्वया धर्मो नृपाखिलः ॥ स एनकर्मणोर्हान्यायप्रयास्य
स्यतां नरः ॥ किं सुव्रते वार्षिकीयस्य हानिस्तेन नित्यकर्मणः ॥ पत्न्यानुकूलया भाव्यं यथाशीर्षं लेपि भर्त्तरि ॥ दुः
शीलापि तथा भार्या पोषणीया नरेश्वर ॥ प्रतिकूलापि सा पत्नी तस्य विप्रस्य याहृता ॥ तथापि धर्मकामो सौ ॥
त्वां सुघोनितवान्नृप ॥ चलतः स्थापयस्यन्यान्स्वधर्मे त्वं महीपते ॥ त्वां स्वधर्माद्विचलितं को परः स्थापयिष्य

॥मा॰ पु॰॥ ष्यति॥ मार्कंडेय उ॰॥ विलक्षः स महाबाहुरित्युक्तस्तेन धीमता॥ तथेत्युक्त्वाथ पप्रच्छ हृतां पत्नीं द्विजन्मनः॥ भगवन्नेके
न नीता सा पत्नी विप्रस्य कुत्र वा॥ अतीतानागतौ वेत्ति जगत्यचितो यं भवान्॥ ऋषिरुवाच॥ तां जहाराद्रितनयो व
॥९५॥ लाको नाम राक्षसः॥ द्रक्ष्यसे चाद्य तां भ॰ प उत्पलावर्त्तके वने॥ गच्छ संयोजयाशु त्वं भार्यां यां तं द्विजोत्तमं॥ मापाया
95 स्यद्यत्तां यातु त्वमिवासौ दिने दिने॥ इति श्रीमार्कंडेयपुराणे सा॰ उत्तमे ऋषिदर्शनं॥ ६९॥ मार्कंडेय उवा॰॥ अ
थारुरोह स्वरथं प्रणिपत्य स तं मुनिं॥ तेनाख्यातं वनं यच्च प्रययावुत्पलावनं॥ यथाख्यातं स्वरूपां तु भर्त्तुर्भार्यां
द्विजस्य तां॥ भक्षयंतीं ददर्शाथ श्रीफलानि नरेश्वरः॥ पप्रच्छ च कथं भद्रे त्वमेतद्वनमागता॥ स्फुटं तद्ब्रूहि वै सा
लेरपि भार्यासि धर्मतः॥ ब्राह्मण्युवाच॥ सुताहमतिरात्रस्य द्विजस्य वनवासिनः॥ पत्नी विशालपुत्रस्य यस्य नाम
त्वयोदितं॥ साहं हृता बलाकेन राक्षसेन दुरात्मना॥ प्रसुप्ता भवनस्यांते भ्रातृमातृवियोजिता॥ भस्मीभवतु त
द्रक्षो येनास्मि च वियोजिता॥ मात्राभ्रातृभिरन्यैश्च तिष्ठाम्यत्र सुदुःखिता॥ अस्मिन्वनेतिगहने येनानीयाहं मु
त्य ता॥ न वेद्मि कारणं किंचिन्नोपभुंक्ते समां नृप॥ ततस्तां परिपप्रच्छ विप्रपत्नीमनिंदितां॥ ब्राह्मणी ब्रूहि तद्रक्ष
ज्ये स्त्वामुत्सृज्य वैगतं॥ अहं भर्त्रा तवैवात्र प्रेषितो द्विजनंदिनि॥ ब्राह्मण्यु॰॥ अस्यैव काननस्यांतः सति तिष्ठति निशा
चरः॥ प्रविश्य पश्यतु भवानत्र विभेषितता यदि॥ मार्कंडेय उ॰॥ प्रविवेश ततः सोथ तया वर्त्मनि दर्शिते॥ ददर्श
राक्षसं तत्र वनमध्ये व्यवस्थितं॥ दृष्टमात्रे ततस्तस्मिं स्वरमाणः स राक्षसः॥ दूरादेव महीं मूर्ध्ना स्पृशन्पादांति ॥राम॥
कं ययौ॥ राक्षस उवाच॥ ममात्रागच्छता गेहं प्रसादः सुमहान्कृतः॥ प्रशाधि किं करोम्येष वसामि विषये तव ॥९५॥

95A

अर्घं तु मे प्रतिछस्व स्वीयतां चेदमासनं ॥ वयं भृत्या भवान्स्वामी दृष्टस्त्वं पुरुषर्षभ ॥ तस्मादादिश मे कृत्यं किंक
करोमि प्रशाधि मां ॥ राजोवाच ॥ त्वया राक्षस शार्दूल सर्वो मे यच्चितिः कृता ॥ किमर्थं ब्राह्मणवधूस्त्वयानीता निशा
चर ॥ तेयं स्वरूपा संस्यन्या भार्यार्थे चेत्त्वया हृता ॥ भक्षार्थे चेत्कथं नात्ता त्वयैतत्कथ्यतां मम ॥ राक्षस उवाच ॥ न व
यं मानुषाहारा अन्ये ते नृप राक्षसाः ॥ सुकृतस्य फलं यत्तु तदश्नीमो वयं नृप ॥ स्वभावं च मनुष्याणां योषितां
च विमानिताः ॥ मानिताश्च समश्नीमो न वयं जंतुखादकाः ॥ यदास्माभिर्नृणां क्षांतिः सत्का कुर्व्यंति देवता ॥
॥ मुक्ते दुष्टस्वभावे च गुणवंतो भवंति ते ॥ संति नः प्रमदा वह्व्यो रूपेणाप्सरसां समाः ॥ राक्षस्यः संभवे तासां
मानुष्या नो रतिः कथं ॥ राजोवाच ॥ यद्येषा नोपभोगाय नाहाराय निशाचर ॥ गृहं प्रविश्य विप्रस्य तत्किमेषा
बलाद्धृता ॥ राक्षस उवाच ॥ मंत्रवित्स द्विजश्रेष्ठो यज्ञे यज्ञे गतस्य मे ॥ रक्षोघ्नमंत्रपठनात्करोत्युच्चाटनं नृप ॥
बुभुक्षिता वयं तस्य मंत्रोच्चारणकर्मणा ॥ क्व यामः सर्वयज्ञेषु स ऋत्विग्भवति सद्द्विजः ॥ ततोस्माभिरिदं तस्य वै
कल्यमुपपादितं ॥ पत्न्या विना पुमान्नित्यं कर्मयोग्यो न जायते ॥ मार्कंडेय उवाच ॥ वैकल्योच्चारणात्तस्य
ब्राह्मणस्य महामुने ॥ ततः स राजा सुभृशं विषण्णः समजायत ॥ वैकल्यमेष विप्रस्य वदन्मामेव निंदति ॥
अनर्हमर्घदानस्य सोभ्याह मुनिसत्तमः ॥ वैकल्यं तस्य विप्रस्य राक्षसोप्याह मे यथा ॥ अपत्नीकतया
सोहं संकटं महदास्थितः ॥ मार्कंडेय उ० ॥ एवं चिंतयतस्तस्य पुनरप्याह राक्षसः ॥ प्रणामनम्रो राजानं ब
द्धांजलिपुटो मुने ॥ नरेंद्राज्ञाप्रदानेन प्रसादः क्रियतां मम ॥ भृत्यस्य प्रणतस्यास्य युष्मद्विधकरा वयं ॥ राजो
वाच ॥ अस्मत्स्मीति करत्वे तत्त्वयोक्तं यन्निशाचर ॥ तदर्थिनो वयं येन कार्येणाम्हणुयान्मम ॥ अस्यास्त्वा

यात्वब्राह्मण्यादौःशील्यमुपभुज्यतां॥ येनत्वयाऽत्तेदौःशील्येतद्विनीताभवदियं॥ नीयतांयस्यभार्येयंतस्यवेश्म
निशाचर॥ अस्मिन्कृतेकृतंसर्वंगृहमभ्यागतस्यमे॥ मार्कंडेयउ०॥ ततःसराक्षसस्तस्याःप्रविश्यांतःस्वमाय
या॥ भक्षयामासदौःशील्यंनिजशक्त्यान्नयात्वया॥ दौःशील्येनातिरौद्रेणपत्नीतस्यद्विजन्मनः॥ तेनसासंपरि
त्यक्तातमाहजगतीपतिं॥ ब्राह्मण्युवाच॥ स्वकर्मफलपाकेनपत्नीतस्यमहात्मनः॥ वियोजिताहंतद्धेतुम
सवक्ष्यामितेनघ॥ नास्यदोषोनुवातस्यममभर्तुर्महात्मनः॥ ममैवदोषोनान्यस्यस्वकृतंह्युपभुज्यते॥ अन्य
जन्मनिकस्यापिविप्रयोगःकृतोमया॥ सोयंममाप्युपनतःकोदोषोस्यमहात्मनः॥ राक्षसउ०॥ प्रापयामि
तवाद्येमादिमांभर्तृगृहंप्रभो॥ यदन्यत्करणीयंतेतदाज्ञापयपार्थिव॥ राजोवाच॥ अस्मिन्कृतेकृतंसर्वं
त्वयामेरजनीचर॥ आगंतव्यंचतेवीरकार्येकालेस्मृतेनमे॥ मार्कंडेयउ०॥ तथेत्युक्त्वाचतंरक्षस्तामादा
यद्विजांगनां॥ निन्येभर्तृगृहंशुद्धांदौःशील्यापगमात्तदा॥ तांप्रेषयित्वाराजापिस्वगृहंगुणसंयुतां॥ चिंता
यामासनिश्वस्यकिमत्रसुकृतंभवेत॥ अनघ्येयोप्यतोकष्टंसमामाहमहामनाः॥ वैकल्यंविप्रमुद्दिश्यत
थाचायंनिशाचरः॥ सोहंकथंकरिष्यामित्युक्त्वापत्नीमसाहिसा॥ अथयथाज्ञानतस्तंतंपृच्छामिमुनिसत्त
मं॥ मार्कंडेयउ०॥ सचिंत्येत्थंसभूपालःसमारुह्यरथंतदा॥ ययौतत्रसधर्मात्मात्रिकालज्ञोमहामुनिः॥ स
व अवरुह्यरथोपस्थात्समेत्यप्रणिपत्यच॥ यथावृत्तंसमाचख्येराक्षसेनसमागमं॥ ब्राह्मण्यादर्शनंचैवदौःशी ॥राम॥
ल्यापगमंतथा॥ प्रेषणंभर्तृगेहेचकार्यमागमनेचयत॥ ऋषिरुवाच॥ ज्ञातमेतन्मयासर्वंयत्कृतंतेनरा ॥९६॥
धिप॥ कार्यमागमनेचैवमत्समीपेतवाखिलं॥ पृच्छमामिहकिंकार्यंमयेत्युद्विग्नमानसः॥ त्वमागतोमहीपा

96A

लक्ष्मणु कार्येच यत्नया॥ पत्नी धर्मार्थकामानां कारणं प्रवरं नृणां॥ विशेषतः स्वधर्मेश्च संत्यक्तसज्जातिद्धिता
अपत्नीको नरो नृप न योग्यो निजकर्मणां॥ ब्राह्मणः क्षत्रियो वापि वैश्यः शूद्रोपि वा नृप॥ त्यक्तता भवता य
लीनशोभनमनुष्ठितं॥ अमार्यो हि यथा भर्त्तुः स्त्रीणां भार्या तथा नृणां॥ राजोवाच॥ भगवन् किं करोम्येष विया
कोमम कर्मणां॥ नानुकूलानुकूलस्य यस्मात्सा सत्यक्ता ततो मया॥ यद्यत्करोमि तत्सर्वं दह्यमानेन चेतसा॥ भग
वंस्त द्वियोगार्त्तिनी तेन्यातिनिरीक्षणात॥ सांप्रतं तु वने त्यक्ता न वेद्मि क्व नु सा गता॥ भक्षिता सापि विपिने सिं
हव्याघ्रनिशाचरैः॥ ऋषिरुवाच॥ न भक्षिता सा भूपाल सिंहव्याघ्रनिशाचरैः॥ सा त्वविप्लुतचारित्रा सांप्रतं तु
रसातले॥ राजोवाच॥ सा नीता केन पातालं क्वास्ते चादूषिता कथं॥ अत्यद्भुतमिदं ब्रह्मन् यथावद्वक्तुमर्ह
सि॥ ऋषिरुवाच॥ पाताले नागराजोस्ति प्रख्यातो शाल्लपोतकः॥ तेन दृष्टा त्वया सत्यक्ता भ्रममाणा महावने॥
सा रूपशालिनी तेन सानुरागेण पार्थिव॥ विदितार्थेन पातालं नीता माया विना तदा॥ ततस्तस्य सुता सुभ्रू
र्नंदा नाम महीयते॥ भार्या मनोरमाख्यस्य नागराजस्य धीमतः॥ तया मातुः सपत्नीयं सा भवित्रीति शोभना ह
लालमगेह मानीता गुप्ता चांतःपुरे धृता॥ यदा तु याचिता नंदा न ददाति न चोत्तरं॥ मूकं भविष्यसीत्याह शप्ता
तां तनया पिता॥ एवं शप्ता सुता तेन सा चास्ते तत्र भूपते॥ नीता तेनोरगेंद्रेण धृता तत्सुतया सती॥ मार्कंडे
य उवाच॥ ततो राजा परं हर्षमवाप्य तमपृच्छत॥ द्विजवर्य स दौर्भाग्यकारणं दयितां प्रति॥ राजोवाच॥ भग
वन् सर्वलोकस्य मयि प्रीतिरनुत्तमा॥ किं नु तत्कारणं येन स्वपत्नी नातिवत्सला॥ ममातीव च सा प्रेष्ठा प्रा
णेभ्योपि महामुने॥ साच मां प्रति दुःशीला कारणं ब्रूहि तद्द्विज॥ ऋषिरुवाच॥ पाणिग्रहणकाले तु सूर्यभौम

शनैश्चरे॥ गुरुशुक्रवाचस्पतिभ्यां च तव भार्यावलोकिता॥ त्वन्मर्त्तौव भवं दौमस्तस्याः सोमस्तदाभवत्॥ प
॥मा० पु०॥ रस्परविपक्षौ तौ ततस्ते पार्थिवे दृशौ॥ तत् कुरुष्व स्वधर्मेण परिपालय मेदिनीं॥ पत्नीसहायः सर्वाश्च कुरु ध
र्मवतीः क्रियाः॥ मार्कंडेय उवाच॥ इत्युक्तः प्रणिपत्यैनमारुह्य स्यंदनं ततः॥ उत्तमः पृथिवीपालः आज
॥९७॥ गाम पुरं द्विज॥ इति श्रीमार्कंडेयपुराणे उत्तममन्वंतरे॥ ६४॥ मार्कंडेय उवाच॥ ततः स नगरं प्राप्य तं ददर्श
97 द्विजं नृपः॥ समेतं भार्यया गेहे शीलवस्या सुदासुतं॥ ब्राह्मण उ०॥ राजवर्य कृतार्थोस्मि कृतो धर्मः रक्षितः॥
धर्मज्ञेन हि भवता भार्यामानयता मम॥ राजोवाच॥ कृतार्थस्त्वं द्विजश्रेष्ठ निजधर्मानुपालनात्॥ वयं संक
टिनो विप्र येषां पत्नी न वेश्मनि॥ ब्राह्मण उ०॥ नरेंद्र सा हि विपिने भक्षिता श्वापदैर्वने॥ अलं तया किमन्या सा
न पाणिर्गृह्यते त्वया॥ राजोवाच॥ न भक्षिता मे दयिता श्वापदैः सा हि जीवति॥ अविदूषितचारित्रा कथमत्र
करोम्यहं॥ ब्राह्मण उवाच॥ यदि जीवति ते भार्या तथैवाव्यभिचारिणी॥ तदापत्नीकृतं पापं जन्म किं क्रिय
ते त्वया॥ राजोवाच॥ आनीतापि हि सा विप्र प्रतिकूला सदैव मे॥ दुःखाय न सुखायातं तस्या मैत्री न चैव मयि॥
ब्राह्मण उवाच॥ तव संप्रीतये तस्या वरेष्टिरुपकारिणी॥ क्रियते मित्रकामेर्या मित्रविंदां करोम्यहं॥ अ
प्रीतयोः प्रीतिकरी सा हि संवदनं परं॥ भार्यापत्योर्मनुष्येंद्र तां तवेष्टिं करोम्यहं॥ यत्र सा तिष्ठते सुभ्रूस्त
व भार्या महीपते॥ तस्मादानीयतां शीघ्रं परां प्रीतिमुपैष्यसि॥ मार्कंडेय उ०॥ इत्युक्तः स तु संभारानशे ॥राम:॥
षानवनीपतिः॥ आनिनाय चकारेष्टिं स च तां द्विजसत्तमः॥ सप्तकृत्वः स तु तदा चकारेष्टिं पुनः पुनः॥ ॥९७॥
तस्य राज्ञो द्विजश्रेष्ठो भार्यासंमाननाय वै॥ यदारोपिततन्मैत्रीं तामममन्यत मानदः॥ स्वभर्त्तरि तदा विप्रस्त

97A

स्तमुवाचनराधिपं॥ आनीयतांनरश्रेष्ठसात्वयेष्टालनोंतिकं॥ सुखभोगांस्त्वयासार्द्धंयजयज्ञांस्तयाह्यतः॥
मार्कंडेयउ०॥ इत्युक्तस्तेनविप्रेणभूपालोविस्मितस्तदा॥ सस्मारतंमहावीर्यसत्यसंधंनिशाचरं॥ स्मृतस्तेनतदा
सद्यःसमुपेत्यनराधिपं॥ किंकरोमीतिसोप्याहप्रणिपत्याहतोमुने॥ ततस्तेननरेंद्रेणविस्तरेणनिवेदिते॥ गत्वा
पातालमादायराजपत्नीमुपाययौ॥ आनीताचातिहार्देनसाददर्शतदापतिं॥ उवाचचप्रसीदेतिभूयोभूयोमु
ब दावती॥ ततःसराज्ञारभसासस्वरंत्याहभामिनीं॥ प्रसन्नएवाहमतोभूयोभूयोब्रवीषिकिं॥ पत्न्युवाच॥ यदिप्रसा
दंप्रवणंनरेंद्रमयितेमनः॥ तदेतदभियाचेत्वांतत्कुरुष्वममानघ॥ राजोवाच॥ निःशंकाब्रूहीमत्तोहयन्मवस्या
किंचिदीप्सितं॥ तदलभ्यंनतेभीरुत्वदायत्तोस्मिनान्यथा॥ पत्न्युवाच॥ मदर्थंतेननागेनसुताशास्तासखीमम॥ म
काभविष्यसीत्याहसाचमेकत्वमागता॥ तस्याःप्रतिक्रियांप्रीत्याममशक्नोतिचेद्भवान्॥ वाग्विघातप्रशांत
र्थंततःकिंनकृतंमम॥ मार्कंडेयउ०॥ ततःसराजातंविप्रमाहास्तिकीदृशीक्रिया॥ तन्मेकथयनोदायसतुत
प्राहपार्थिवं॥ ब्राह्मणउ०॥ भूपसारस्वतीमिष्टिंकरोमिवचनात्तव॥ पत्नीतवेयमानन्त्यंयातुतद्वाक्यवत्तेना
तं॥ मार्कंडेयउ०॥ इष्टिंसारस्वतींचक्रेतदर्थंसद्विजोत्तमः॥ सारस्वतानिसूक्तानिजजापचसमाहितः॥ ततःप्र
वृत्तवाक्यांतांगर्गःप्राहरसातले॥ उपकारःसखीभर्त्रोःकृतोयमितिदुःकरः॥ इत्युक्तातेसमागम्यनंदाशीघ्र
गतिःपुरीं॥ ततोराज्ञींपरिष्वज्यतांसखीसुरगात्मजा॥ तंचसंस्तूयभूपालंकल्याणोक्तापुनःपुनः॥ उवाचमधु
रंनागीकृतामनपरिग्रह॥ उपकारःकृतोवीरभवतायाममाधुना॥ तेनास्याकृष्टहृदयायद्ब्रवीमिश्रृणुष्वतत्॥

॥मा॰ पु॰॥
॥९८॥

तवपुत्रोमहावीर्योभविष्यतिनराधिप॥ तस्याप्रतिहतंचक्रमस्यांभुविभविष्यति॥ सर्वास्त्रशस्त्रशास्त्रज्ञाधर्मानुष्ठानत
त्परः॥ मन्वंतरेश्वरोधीमानभविष्यतिसवैमनुः॥ मार्कंडेयउ॰॥ इतिरुक्त्वावरंतस्मैनागराजसुताततः॥ सखीचतां
परिष्वज्यपातालमगमन्मुने॥ तत्रतस्यतयासार्द्धंरमतःपृथिवीपतेः॥ जगामकालःसुमहान्प्रजाःपालयतस्त
था॥ ततःसतस्यांतनयोजज्ञेराज्ञोमहात्मनः॥ पौर्णमास्यांयथाकांतश्चंद्रसंपूर्णमंडलः॥ तस्मिन्जातेमुदं
प्रापुःप्रजाःसर्वाःसहामराः॥ देवदुंदुभयोनेदुःपुष्पवृष्टिःपपातह॥ तस्यदृष्ट्वावपुःकांतंभविष्यद्धीरुमेवच
उत्तमस्यैवमुनयोनामचक्रुःसमागताः॥ जातोयमुत्तमेवंशेवालःकालेत्रयोत्तमे॥ उत्तमावयवस्तेनऔत्तमो
यंभविष्यति॥ मार्कंडेयउवाच॥ उत्तमस्यसुतःसोथनाम्नाख्यातस्ततोत्तमः॥ मनुरासीत्तत्प्रभावोभागुरेश्रूयतांम
म॥ उत्तमाख्यानमखिलंजन्मचैवोत्तमस्ययः॥ नित्यंशृणोतिविद्वेषंनकदाचित्सगच्छति॥ इष्टैर्दारैस्तथापुत्रैःबं
धुभिर्वाकदाचन॥ वियोगोनास्यभवतिशृण्वतःपठतोपिवा॥ तस्यमन्वंतरंब्रह्मन्वदतोममविस्तरात्॥ श्रूयतां
तत्रयश्चेंद्रोयेदेवायेमहर्षयः॥ इतिमार्कंडेयपुराणेउत्तममन्वंतरे॥ ६५॥ मार्कंडेयउवाच॥ मन्वंतरेतृतीये
स्मिन्उत्तमस्यप्रजापतेः॥ देवानिंद्रंऋषीन्भूपान्निबोधगदतोमम॥ सुधामानस्तथादेवायथानामार्थधारि
णः॥ सत्याख्यश्चद्वितीयोन्यस्त्रिदशानांयोतेगणः॥ तृतीयेतुगणेदेवाःशिवाख्यावैमहामुने॥ शिवस्वरूपतस्ते
तुश्रुताःपापप्रणाशनाः॥ प्रतर्दनाख्यश्चगणोदेवानांमुनिसत्तम॥ चतुर्थस्तत्रकथितंऔत्तमस्यांतरेमनोः॥ वश ॥राम॥
वर्तिनःपंचमेपिदेवास्तत्रगणोद्विज॥ यथाख्यातस्वरूपास्तुसर्वएतेमहामते॥ एतेदेवगणाःपंचस्मृतायज्ञभु ॥९८॥

98A

जस्तदा॥ मन्वंतरे मुनिश्रेष्ठ संर्वे द्वादशकागणाः॥ तेषां मिंद्रो महावीर्य्यस्त्रैलोक्यस्येश्वरो भवत्॥ शतं क्रतूनामाहृत्य
सुशांतिर्नाम नामतः॥ यस्योपसर्गनाशाय नामाक्षरविभूषिता॥ अद्यापि मानवैर्गाथा गीयते वसुधातले॥ सुशां
तिर्देवराट् शांतिः सुशांतिं नः प्रयच्छतु॥ सहितः शिवसत्याद्यैस्तथैव वशवर्त्तिभिः॥ अजेयाः परिदिव्याद्या महाब
लपराक्रमाः॥ पुत्रस्तस्य मनो रासन् प्रख्यातास्त्रिदशोपमाः॥ तत्सूतिसंभवैर्भूमिः पालिता भून्नरेश्वरैः॥ याव
न्मन्वंतरं तस्य मनोरुत्तमतेजसः॥ चतुर्युगानां संख्याता साधिका ह्येकसप्ततिः॥ कृतत्रेतादिसंज्ञा तिया न्यु
क्तानि पुरा मया॥ स्वतेजसः स्वतपसो वशिष्ठस्य महात्मनः॥ तनया स्त्वांतरे तस्मिन् सप्त सप्तर्षयो भवत्॥ तृ
तीयमेतत्कथितं तव मन्वंतरं मया॥ तामसस्य चतुर्थं च मनोरंतरमुच्यते॥ वियोनिजन्मनो यस्य यशसा द्योति
तं जगत्॥ जन्म तस्य तथा ब्रह्मन् शृणुष्व गदतो मम॥ अतींद्रियमशेषाणां मनूनां चरितं यथा॥ तथा जन्मापि वि
ज्ञेयं प्रभावश्च महात्मनां॥ इति मार्कंडेयपुराणे उत्तममन्वंतरं समाप्तम॥ ६६॥ मार्कंडेय उवाच॥ राजाभूत्सुविविख्या
तः स्वराष्ट्रो नाम वीर्यवान्॥ अनेकयज्ञकृत्प्राज्ञः संग्रामेष्वपराजितः॥ तस्यायुः सुमहद्दत्तं मंत्रिणाराधितेन वै॥
पत्नीनां च शतं तस्य वंध्यानामभवद्द्विज॥ तस्य दीर्घायुषः पत्न्यो नातिदीर्घायुषो मुने॥ कालेन जग्मुर्निधनं वं
धुर्भृत्यजनास्तथा॥ सभार्यो मित्रस्तदा मुक्तो भृत्यैश्च सहजन्मभिः॥ उद्विग्नचेताः संप्राप्तो वीर्यहानिमहर्निशं॥ तं वीर्य
भृत्यै हीनं निभृतैर्हीनं सुदुःखितं॥ अनंतरं विमर्दोख्यो राज्याच्च्यावितवांस्तदा॥ राज्याच्च्युतः सोपि वनं गत्वा निर्विण्णचेत
नः॥ तपस्तेपे महाभाग वितस्तापुलिने स्थितः॥ ग्रीष्मे पंचतपा भूत्वा वर्षास्वभ्रावकाशकः॥ जलशायी च शिशि
रे निराहारो यतव्रतः॥ ततस्तपस्यतस्तस्य प्रावृट्काले महाप्लवः॥ बभूवानुदिनं मेघैर्वर्षद्भिरनुसंततं॥ न दिग्वि

॥मा०पु०॥ ज्ञायते सर्वा दक्षिणां वा नयाश्विमा॥ नोत्तरा तमसा सर्वेमनुलिप्तमिवाभवत्॥ ततोतिदूरेण नृपः सन घाः प्रेरितस्तुरं
गमेयन्नपि नावापहियमाणोतिवेगिना॥ अथ दूरं जलौघेन ह्रियमाणो महीपतिः॥ आससाद जले रोहीं सयुक्तेज
॥९९॥ गृहे च तां॥ तेन स्नेवेन सपया बुध्यमाणो नदीजले॥ इतश्चेतश्चांधकारे आससाद तरं ततः॥ विस्तारियं कमस्यर्थंदु
स्तरं न्ना पतिस्तरन्॥ तथैव कृष्यमाणो न्यद्रम्यं वनमवापच॥ तत्रांधकारे सा रोही च कर्षवसुधाधिपं॥ पुच्छे लग्नं
99 महाभागं कृशं धमनिसंततं॥ तस्याश्च स्पर्शसंभूतामवाप सुदमुत्तमां॥ सोंधकारे भ्रमन्नूर्ध्वं येयायदनाक्लिष्टमान
सः॥ विज्ञाय सानुरागं तं पृष्टस्पर्शेन तत्परं॥ नरेंद्रं तद्वनस्यांतः साम्रगीतमुवाच ह॥ किं पृष्ठं वेपथुमता करेणस्य
ष्टासे मम॥ अन्यथैवास्य कार्यस्य संयातान्नृपते गतिः॥ नास्थाने वे मनो जातं नागम्याहं नरेश्वर॥ किंतु मे संगमे वि
घ्नमेव लोलः करोति ते॥ मार्कंडेय उवाच॥ इति श्रुत्वा वचस्तस्या मृग्याः स जगतीपतिः॥ जातकौतूहलो रोहीमि
दं वचनमब्रवीत्॥ का त्वं ब्रूहि मृगी वाक्यं कथं मानुषवद्वदेः॥ कश्चैष लोलो यो विघ्नं त्वत्संगे कुरुते मम॥ मृग्यु
वाच॥ अहं ते दयिता भूप याग्रा सा समुत्पलावती॥ भामी शताग्रमहिषी दुहिता दृढधन्वनः॥ राजोवाच॥ किं त्वया तत्कृ
तं कर्म येने मां योनिमागता॥ पतिव्रता धर्मपरा सा चेत्वं कथमीदृशी॥ मृग्युवाच॥ अहं पितुर्गृहे बाला सखी
भिः सहिता वनं॥ रंतुं गता ददर्शेकं मृगं मृग्या समागतं॥ ततः समीपवर्त्तिन्या ताडिता सा मृगी मया॥ ततस्त्रस्ता
गतान्यत्र क्रुद्धः प्राह ततो मृगः॥ मूढे किमेवं मत्तासि धिक्ते दौःशील्यमीदृशं॥ आधानकालो येनायं त्वया मेवि
फलीकृतः॥ वाचं श्रुत्वा ततस्तस्य मानुष्यस्येव भाषतः॥ भीताहमब्रुवं कोसी सेतां योनिमुपागतः॥ ततः स प्रा ॥रामः॥
ह पुत्रोहं मुनेर्निर्वृतचक्षुषः॥ सुतपा नाम मृग्यां तु साभिलाषो मृगोभवं॥ इमां चानुगतः प्रेम्णा वांछितश्चानया ॥९९॥

११A

वने त्वयो वियोजितो दुष्टे तस्माच्छापं ददामि ते ॥ मयाचोक्तं तवाज्ञानादपराद्धं महामुने ॥ प्रसादं कुरु शापं मेन
भवान् दातुमर्हसि ॥ इत्युक्तः प्राह मां सोपि मुनिरित्थं महीपते ॥ न प्रयच्छामि ते शापं ययामानं ददासि मे ॥ मया
चोक्तं मृगी नाहं मृगरूपधरो वने ॥ लस्यसेन्यां मृगीं तां च मयि भावो निवर्त्यतां ॥ इत्युक्तः कोपरक्ताक्षः स
प्राह स्फुरिताधरः ॥ नाहं मृगी त्वयेत्युक्तं मृगी मूढे भविष्यसि ॥ ततो भृशं प्रव्यथिता प्रणम्य मुनिमब्रुवं ॥ स्वरू
पस्थं मयि संक्रुद्धं प्रसीदेति पुनः पुनः ॥ बालानभिज्ञा वाक्यानां ततः प्रोक्तमिदं मया ॥ पितर्येसति नारीभिः क्रियते
हि पतिः स्वयं ॥ सति तात कथं त्वाहं वृणोमि मुनिसत्तम ॥ सापराधा प्रसीदेश यायादोते प्रणमाम्यहं ॥ प्रसीदेति प्रसी
देति प्रणतायां महामते ॥ इत्थं लालप्यमानायां स प्राह मुनिपुंगवः ॥ न भवत्यन्यथा प्रोक्तं मम वाक्यं कदाचन
मृगी भविष्यसि मृता बाले नैवात्र जन्मनि ॥ मृगत्वे च महाबाहुस्तव गर्भमुपैष्यति ॥ लोलो नाम मुनेः पुत्रः सिद्ध
वीर्यस्य भामिनि ॥ जातिस्मरा भवित्री त्वं तस्मिन् गर्भमुपागते ॥ स्मृतिं प्राप्यातदा वाचं मानुषीमीरयिष्यसि ॥ तस्मि
न् जाते मृगत्वात्त्वं विमुक्ता यतिनार्जितान् ॥ लोकानवाप्स्यसि प्राप्याये न दुःकृतिकर्मभिः ॥ सोपि लोलो महावी
र्यो पितृशत्रून्निपात्य वै ॥ जित्वा वसुंधरां कृत्स्नां भविष्यति ततो मनुः ॥ एवं शापमहं लब्ध्वा मृता तिर्यक्त्वमागता ॥
त्वत्संस्पर्शाच्च गर्भो सौ संभूतो जठरे मम ॥ अतो ब्रवीमि मा स्थाने तव जातं मनो मयि ॥ न चाप्यगम्या गर्भस्थो लो
लो विघ्नकरोस्य सौ ॥ मार्कंडेय उ० ॥ एवमुक्तस्ततः सोपि राजा प्राप्य परां मुदं ॥ सुतो मम अरीन् जित्वा तु पृथिव्यां भ
विता मनुः ॥ ततस्तं स सुषुवे पुत्रं सा मृगी लक्षणान्वितं ॥ तस्मिन् जाते च भूतानि सर्वाणि प्रययुर्मुदं ॥ विशेषतस्तु रा
जा सौ पुत्रे जाते महाबले ॥ सापि मुक्ता मृगी शापात् प्राप्य लोकानभीप्सितान् ॥ ततस्तमृषयः सर्वे समेत्य मुनि

॥मा० पु०॥ सत्तम ॥ स्वन्वितस्यभाविनीं रुष्टिं नाम चक्रुर्महात्मनः ॥ तामसीं भजमानायां योनिं मातर्यजायत ॥ तमसा चावृते लोके
तामसोयं भवत्विति ॥ ततः स तामसस्तेन पित्रा संवर्द्धितो वने ॥ जातबुद्धिरुवाचेदं पितरं मुनिसत्तम ॥ कस्त्वं तात कथं
॥१००॥ चाहं पुत्रो माता च का मम ॥ किमर्थमागतश्चत्वमेतन्सर्वं प्रबोधि मे ॥ मार्कंडेय उ० ॥ ततः पिता यथावृत्तं स्वराज्याच्चाव
नादिकं ॥ तस्याचचष्ट महाबाहोः पुत्रस्य जगतीपतिः ॥ श्रुत्वा तत्सकलं सोपि समाराध्य च भास्करं ॥ अपापदिव्या
100 न्यस्त्राणि ससंहाराण्यशेषतः ॥ कृतास्त्रस्तानरीन् जित्वा पितुरानीय चांतिकं ॥ अनुज्ञातो मुमोचाथ स च स्वंध
र्म्ममास्थितः ॥ पित्यापि तस्य स्वान् लोकांस्तपो यज्ञसमर्ज्जितान् ॥ विसृष्टदेहः संप्राप्ताद् दृष्टा पुत्रमुखं स्वकं ॥ जि
त्वाशमस्तां पृथिवीं तामसाख्यः स पार्थिवः ॥ तामसाख्यो मनुरभूत् तस्य मन्वंतरं शृणु ॥ ये देवास्तत्र यति येस्तु दे
वेंद्रो ये महर्षयः ॥ ये च पुत्रा मनोस्तस्य पृथिवीपरिपालकाः ॥ सत्यास्तथान्ये सुधियः सुरूपा हरयस्तथा ॥ ए
ते देवगणास्तत्र सप्तविंशतिका गणाः ॥ महाबलो महावीर्यः शतयज्ञोपलक्षणः ॥ शिविरिंद्रस्तथा तेषां देवाना
मभवद्विभुः ॥ ज्योतिर्द्धामः पृथुः काव्यश्चैत्रोग्निर्वनकस्तथा ॥ पीवरश्च तथा चान्ये सप्त सप्तर्षयोभवन् ॥ ख्यातिर्न
तिः शांतिभयो जानुजंघादयस्तथा ॥ पुत्रास्तु तामसस्यासन्राजानस्तु महाबलाः ॥ इति श्रीमार्कंडेयपुराणे ता
मसमन्वंतरं समाप्तं ॥ ६७ ॥ मार्कंडेय उ० ॥ पंचमोपि मनुर्ब्रह्मन्रैवतो नाम विश्रुतः ॥ तस्योत्पत्तिं विस्तरं च शृणु
ष्व कथयामि ते ॥ ऋषिरासीन्महाभागो सत्यवागिति विश्रुतः ॥ तस्य पुत्रस्य पुत्रोभूद्रेवत्यंते महात्मनः ॥ स तस्य वि ॥राम॥
धिवच्चक्रे जातकर्मादिकाः क्रियाः ॥ तथोपनयनादींश्च स चासीनो भवन्मुने ॥ यतः प्रभृति जातोसौ ततः प्र ॥१००॥
भृति सोप्यृषिः ॥ दीर्घरोगमहामर्षमवाप मुनिपुंगवः ॥ माता तस्य परामार्त्तिं कुष्ठरोगादिपीडिता ॥ जगाम स

100A

पिताचास्य चिंतयामास दुःखितः ॥ किमेतदिति सोप्यस्य पुत्रोत्यंतं सुदुर्मतिः ॥ जग्राह भार्यामन्यस्य मुनिपुत्रस्य मंदधी
ः ॥ ततो विषण्णमनसा ऋतवागिदमब्रवीत् ॥ अपुत्रता मनुष्याणां श्रेयसी न कुपुत्रता ॥ कुपुत्रो हृदयायासं सर्वदा कु
रुते पितुः ॥ मातुश्च स्वर्गसंस्थांश्च पितॄन्पातयत्यधः ॥ सुहृदां नोपकाराय पितॄणां नैव तृप्तये ॥ पित्रोर्दुःखाय धिग्जन्म
तस्य दुःकृतकर्मणः ॥ धन्यास्ते तनया येषां सर्वलोकाभिसंमताः ॥ परोपकारिणः शांताः साधुकर्मण्यतंद्रिताः ॥ अनि
र्वृतं तथानर्थं परलोकपराङ्मुखं ॥ नरकाय न सद्बुद्ध्यै कुपुत्रालिंबि जन्मनः ॥ करोति सुहृदां दैन्यं अहितानां तथा सुदं ॥
अकाले पि जरां पित्रोः कुपुत्रः कुरुते हि वै ॥ मार्कंडेय उ० ॥ एवं सोत्यंतदुःष्टस्य पुत्रस्याचरणैर्मुनिः ॥ दह्यमानमनो
वृत्तिर्वृद्धं गर्गमपृच्छत ॥ ऋ॰षिरु० ॥ सुव्रतेन पुरा वेदा गृहीता विधिवन्मया ॥ समाप्य वेदान्विधिवत्कृतो दारप
रिग्रहः ॥ सदारेण यथा कार्याः क्रियास्तद्वत्कृता मया ॥ न मे न्यूनाः कृताः काश्चिद्यावद्यामहामुने ॥ गर्भाधानवि
धीनेन न काममनुरुध्यता ॥ पुत्रार्थे विहितश्चायं पुन्नाम्नो बिभ्यता मुने ॥ सोयं किं मातृदोषेण मम दोषेण वा मुने ॥
अस्मद्दुःखावहो जातो दौःशील्याद्बंधुशोकदः ॥ गर्ग उवाच ॥ रेवत्यंते मुनिश्रेष्ठ जातोयं तनयस्तव ॥ तेन दुःखाय
ते दुष्टे काले यस्मादजायत ॥ न ते पचारो नैवास्य मनुर्नायं कुलस्य ते ॥ तस्य दौःशील्यहेतुस्त्वं रेवत्यंतमुपागतं ॥ ऋ॰
षिरु० ॥ यस्मान्ममैकपुत्रस्य रेवत्यंतसमुद्भवं ॥ दौःशील्यमेतत्साप्तस्मात्पततामाशु रेवती ॥ मार्कंडेय उ० ॥ तेनैवं
व्याहृते शापे रेवत्यृक्षं पपात ह ॥ पश्यतः सर्वलोकस्य विस्मयाविष्टचेतसः ॥ रेवत्यृक्षं च पतितं कुमुदाद्रौ समंत
तः ॥ भासयामास सहसा वनं कंदरनिर्झरं ॥ कुमुदाद्रिश्च तत्पातात्ख्यातो रेवतको भवत् ॥ अतीव रम्यः सर्वस्यां पृ
थिव्यां पृथिवीधरः ॥ तस्यर्क्षस्य तु या कांतिर्जाता पंकजनी सरः ॥ ततो जज्ञे तदा कन्या रूपेणातीव शोभना ॥ रेव

तीकांतिसंभृतांतांदृष्ट्वाप्रमुचोमुनिः॥तस्यानामचकारार्थरेवतीनामतिभास्वरां॥पोषयामासचैवैनांस्वश्रमाभ्या
॥मा०पु०॥ शसंभवां॥प्रमुचुःसमहाभागस्तस्मिन्नेवमहाचले॥तांयौवनवतींदृष्ट्वाकन्यकांरूपशालिनीं॥समुनिश्चिंतयामा
॥१०१॥ सकोस्याभर्ताभवेदिति॥एवंचिंतयतःकालोजगामसुमहात्मनः॥नचाससादसदृशंवरंतस्यामहामुनिः॥तत
स्तस्यावरंप्रष्टुमग्निंसप्रमुचोमुनिः॥विवेशवह्निशालांवैपृष्टस्तंप्राहहव्यवाहमहाबलोमहावीर्यःप्रियव्रता
101 कधर्मवत्सलः॥दुर्दमोनामभविताभर्ताचास्यामहीपतिः॥मार्कंडेयउ०॥अनंतरंचमृगयाप्रसंगेनागतोमुने॥
तस्याश्रमपदंधीमान्दुर्दमोसनराधिपः॥प्रियव्रतान्वयभवोमहाबलपराक्रमः॥पुत्रोविक्रमशीलस्यकालिं
दीजठरोद्भवः॥सप्रविश्याश्रमपदंतांतन्वींजगतीपतिः॥अपश्यमानस्तमृषिंप्रियांमत्वापृष्टवान्॥राजोवाच॥ये
क्वगतोभगवानस्मादाश्रमान्मुनिपुंगवः॥तंप्रणन्तुमिहेच्छामितत्वंब्रूहिशोभने॥मार्कंडेयउ०॥अग्निशालां
गतोविप्रःतच्छ्रुत्वातस्यभाषितं॥प्रियेत्यामंत्रणंचैवनिश्चक्रामत्वरान्विता॥सददर्शमहात्मानंराजानंदुर्दमंमुनिः॥न
रेंद्रचिह्नसहितंप्रश्रयावनतंपुरः॥तस्मिन्दृष्टेततःशिष्यमुवाचसतुगौतमं॥गौतमानीयतांशीघ्रमर्घोस्यजगा
तीपतेः॥एकस्तावदयंभूपश्चिरकालादुपागतः॥जामाताचविशेषेणयोग्योयोस्यविधीयते॥मार्कंडेयउ०॥ततः
सचिंतयामाससराजाजामातृकारणं॥विवेदनचतंमौनीजगृहेऽर्घंचतंन्नृपः॥तमर्घसनगतंविप्रोगृहीतार्घ्यंमहामुनिः
प्रस्वतंप्राहराजेंद्रअपितेकुशलंपुरे॥कोषेबलेथमित्रेषुभृत्यामात्येषुचेश्वर॥तथात्मनिमहाबाहोयत्रसर्वं ॥राम:॥
प्रतिष्ठितं॥पत्नीचतेकुशलिनीयतएवात्रतिष्ठति॥पृच्छाम्यस्यास्ततोनाहंकुशलिन्योपरास्तव॥राजोवाच॥त्वत्प्र ॥१०१
सादादकुशलंनकेचिन्मुनिसत्तम॥तातकौतूहलंत्वस्तिममभार्यात्रकामुने॥ऋषिरुवाच॥रेवतीतुमहाभागत्रै॥

101A

ञेवचस्यापिसुंदरी॥ तवभार्यावरारोहा वरार्हातां नवेत्सिकिं॥ राजोवाच॥ सुभद्रांशांततनयांकावेरीतनयांविभो॥
सुराष्ट्रजां सुजातां चकदंबां चवरूथजां॥ विपाठांनंदिनीं चैववेद्मिभार्यांगृहेस्त्रियम्॥ तिष्ठंतिमेभगवन्नैव
तींवेद्मिकात्वियं॥ ऋषिरुवाच॥ प्रियेतिसाप्रतंयेयंत्वयोक्तावरारोहिणी॥ किंविस्मृतं ततभद्र यालुश्लाघ्यंगृही
लीतव॥ राजोवाच॥ सत्यमुक्तंत्वयाकिंतुभावोदुष्टोनमेमुने॥ नात्रकोपंभवल्कर्तुमर्हस्यस्मासुयाचितः॥ ऋ
षिरुवाच॥ तत्वंब्रवीमिभूपालनभावस्तवदूषितः॥ व्याजहारभवानेतद्वह्निनान्नृपचोदितः॥ मयापृष्टोहुतव
हः कोस्याभर्त्तेतिपार्थिव॥ भवितातेनचाप्युक्तोभवानेवाद्यवैवरः॥ तद्गृह्यतांमयादत्तांतुभ्यंकन्यांनराधिप॥
प्रियेत्यामंत्रिताचेयंविचारंकुरुषेकथं॥ मार्कंडेयउवाच॥ ततस्त्वासौभवान्मौनीतेनोक्तःपृथिवीपतिः॥ ऋषिस्त
योद्यतःकर्त्तुंतस्यांवैवाहिकंविधिं॥ तमुद्यतंसापितरंविवाहायमहामुने॥ उवाचकन्यासाकिंचित्प्रश्रयावन
नाततदा॥ यदिमेप्रीतिमांस्तातप्रसादंकर्त्तुमर्हसि॥ रेवत्यर्क्षेविवाहंमेतत्करोतुप्रसादितः॥ ऋषिरुवाच॥ रेव
त्यृक्षंनवैभद्रेचंद्रयोगिदिविस्थितं॥ अन्यानिसंतिऋक्षाणिसुभ्रुवैवाहिकानिते॥ कन्योवाच॥ ताततेनविना
कालोविकलःप्रतिभातिमे॥ विवाहोविकालेमद्विधायाःकथंभवेत्॥ ऋषिरुवाच॥ ऋतवागितिविख्यात
स्तपस्वीरेवतींप्रति॥ चकारकोपंक्रुद्धेनतेनर्क्षंविनिपातितं॥ मयाचास्मैप्रतिज्ञाताभार्येतिमदिरेक्षणे॥ न
चेद्धसिविवाहंत्वंसंकटेनःसमागतं॥ कन्योवाच॥ ऋतवाक्समुनिस्तातकिमेकंतप्तवांस्तपः॥ नत्वयाम
ममतातेनब्रह्मबंधोःसुतास्मिकिं॥ ऋषिरुवाच॥ ब्रह्मबंधोःसुतानत्वंबालोनेवातपस्विनः॥ सुतात्वंममयोदे
वाल्कर्तुमन्यास्समुत्सहे॥ कन्योवाच॥ तपस्वीयदिमेतातस्तत्किंनर्क्षमिदंदिवि॥ समारोप्यविवाहोमेतत्रर्क्षेक्रि

यतांपितः॥ ऋषिरुवाच॥ एवं भवतु भद्रं ते भद्रे प्रीतिमती मम॥ आरोपयामी दुर्मार्गे रेवत्यस्यं कृते तव॥ मार्कंडे
॥मा०पु०॥ यउवाच॥ ततस्तु पः प्रभावेन रेवत्यक्षं महामुनिः॥ यथा पूर्वं तथा चक्रे सोमयोगि द्विजोत्तम॥ विवाहं चैव दुहि
॥१०२॥ तुर्विधिवन्मंत्रयोगिनं॥ निःपाद्य प्रीतिमान्भूयो जामातरमथाब्रवीत्॥ औद्वाहिकं ते भूपाल कथ्यतां किं द
त दाम्यहं॥ दुर्लभ्यमपि दास्यामि मम प्रतिहतं तपः॥ राजोवाच॥ मनोः स्वायंभुवस्याहमुत्पन्नः संततो मुने॥ मन्वंतरा
102 धिपं पुत्रं त्वत्प्रसादाद्वृणोम्यहं॥ मुनिरुवाच॥ भविष्यत्येष ते कामो मनुस्त्वत्तनयो महान्॥ सकलां भोक्ष्यते भू
मिं धर्मविच्च भविष्यति॥ मार्कंडेयउवाच॥ तामादाय ततो भूपस्वमेव नगरं ययौ॥ तस्मात्स्वजायत सुतो रेवत्यां
रैवतो मनुः॥ समेतः सकलैर्धर्मैर्मानवैरपराजितः॥ विज्ञाताखिलशास्त्रार्थो वेदविद्यार्थशास्त्रवित्॥ तस्य
मन्वंतरे देवान्मुनिदेवेंद्र पार्थिवान्॥ कथ्यमानान्मया ब्रह्मन् निबोध सुसमाहितः॥ सुमेधसस्तत्र देवास्तथाभू
तच्च या द्विज॥ वैकुंठाश्चामिताभासस्ते थांगलाश्चतुर्दश॥ तेषां देवगणानां तु चेतुर्णामपि चेश्वरः॥ नाम्ना वि
भुरभूदिंद्रः शतयज्ञोपलक्षणः॥ हिरण्यरोमा वेदश्रीरूर्द्ध्वबाहुस्तथापरः॥ वेदबाहुः सुधामा च पर्जन्यश्च म
हामुनिः॥ वशिष्टश्च महाभाग सर्वे वेदांगपारगाः॥ एते सप्तर्षयश्चासन् रैवतस्यांतरे मनोः॥ बलवंधुर्महावी
र्यः स्वयंभाव्यस्तथा परः॥ सत्यकाद्यास्तथैवासन् रैवतस्य मनोः सुताः॥ रैवतांतास्तु मनवः कथितास्ते मयात
व॥ स्वायंभुवास्त्वयात्वे ते स्वारोचिषमृते मनुं॥ इति मार्कंडेयपुराणे रैवतमन्वंतरे समाप्तं॥ ईच॥ मार्कंडेयउ०॥ ॥राम॥
इत्येतत्कथितं तुभ्यं पंचमस्यांतरं मनोः॥ चाक्षुषस्य मनोः षष्ठमथ तामिदमंतरं॥ अनमित्रो भवन्भूयो महा
कुलसमुद्भवः॥ तस्य भार्याभवच्छ्रेष्ठा गिरिभद्रेति विश्रुता॥ तस्यां स भूपति श्रेष्ठो जनयामास वै सुतं॥ राजलक्षणं ॥१०२॥

102A

संयुक्तंमहाबलपराक्रमं॥अन्यजन्मनिजातोसौचाक्षुषःपरमेष्ठिनः॥चाक्षुषत्वमतस्तस्यजन्मन्यस्मिन्नपि
द्विज॥जातंमातानिजोत्संगेस्थितमुल्लापयंत्पुनः॥परिष्वज्यातिहार्देनपुनरुल्लापयत्यथ॥जातिस्मरस्तुजा
तोद्मातुरुत्संगमास्थितः॥जहासतत्तदामातासंक्रुद्धावाक्यमब्रवीत्॥भीतास्मिकिमिदंवत्सहासोयंयद्व
नोतव॥अकालबोधःसंजातःकश्चित्स्मयतिशोभनः॥पुत्रउवाच॥मामत्तुमिच्छतिपुरोमार्जारीकिंनपश्य
सि॥अंतर्द्धानगताचेयंद्वितीयाजातहारिणी॥पुत्रप्रीत्याचभवतीसौहार्द्दामामवेक्षते॥उल्लाप्यबहुशःप ल्लाप्यो
रिष्वजसिमांयतः॥उद्भूतपुलकास्नेहसंभवास्राविलेक्षणा॥ततोयमागतोहासस्मरणाच्चाप्यत्रकारणं॥स्वा
र्थोपसक्तामार्जारीप्रहर्त्तुमामवेक्षते॥तथांतर्द्धानगाचेयंद्वितीयाजातहारिणी॥स्वार्थोपस्निग्धहृदया
यथैवत्वंममोपरि॥प्रवृत्तास्वार्थसंसर्गेयंतथैवप्रतिभातिमे॥किंतुमामुपभोगायमार्जारीजातहारिणी॥
त्वंतुक्रमेणोपभोग्यंमत्तःफलमभीप्ससि॥नमांजानासिकोप्येषनचैवोपकृतंमया॥संगतंनातिकाली
नंपंचसप्तदिनात्मकं॥तथापिस्निह्यसेसात्वंपरिष्वजसिचाप्यति॥तातेतिवत्सभद्रेतिकिमलीकंब्रवीषिमां॥
मातोवाच॥नत्वाहमुपकारार्थंवत्सप्रीत्यापरिष्वजे॥नचेदेतन्मद्वत्सप्रीत्यैवपरित्यक्तोस्यलंत्वया॥स्तथोमया
परित्यक्तोयस्त्वत्तोमेभविष्यसि॥इत्युक्त्वासातमुत्सृज्यनिःक्रांतासूतिकागृहात्॥जडालवाक्यकरणंमु
द्धातःकरणालकं॥जहारतंपरित्यक्तंसतदाजातहारिणी॥साहृत्वातंस्यतंबालंविक्रांतस्यमहीभृतः॥प्र
स्तनपल्लीशयनेन्यस्यतस्याददेसुतं॥तमप्यन्यगृहेनीत्वागृहीत्वातस्यचात्मजं॥ततोयंभक्षयामाससाक्रमा
ज्जातहारिणी॥साचहृत्वाततोयंतुभक्षयत्यतिनिर्घृणा॥करोत्यनुदिनंसातुपरिवर्त्तंततोन्ययोः॥विक्रांतो

पितततस्तस्यसुतस्यपरयामुदा॥ कारयामाससंस्कारान्‌जातकस्यभवंतिये॥ आनंदेतिचनामास्यपिताचक्रेवि
॥मा० पु०॥ धानतः॥ मुदापरमयायुक्तोविक्रांतःसनराधिपः॥ कृतोपनयनंतंतुगुरुराहकुमारकं॥ जनित्र्याःप्रागुपस्थानं।
॥१०३॥ क्रियतांचाभिवादनं॥ सगुरोस्तद्वचःश्रुत्वाविहस्येदमथाब्रवीत्‌॥ वंद्यासौकतमामाताजनित्रीपालिनीतुकिं॥ गु
रुरुवाच॥ तन्वियंतेमहाभागाजनित्रीजारुयालजा॥ विक्रांतस्याग्रमहिषीहैमिनीनामनामतः॥ आनंदउ०॥
103 इयंजनित्रीचैत्रस्यविशालग्रामवासिनः॥ विप्राग्र्यवेधपुत्रस्ययोस्याजातान्यतोवयं॥ गुरुरु॥ कुतस्त्वंकुत
यानंदचैत्रःकोवात्वयोच्यते॥ सकरंमहदाभातिजातोत्रत्वंब्रवीषिकिं॥ आनंदउ०॥ जातमामनमित्रस्यक्ष
त्रियस्यगृहेद्विज॥ तस्यत्न्यांगिरिभद्रायांआददेजातहारिणी॥ तयात्रमुक्तोजातंचगृहीत्वाथसुतंचसा॥ वो
धस्यद्विजमुख्यस्यगृहेनीतवतीपुनः॥ भक्षयामाससुतंतस्यवोधद्विजन्मनः॥ सतत्रद्विजसंस्कारैःसंस्कृ
तोहैमिनीसुतः॥ वयमत्रमहाभागसंस्कृतोगुरुणात्वया॥ मयातवैववचःकार्यमुपैमिकतमांगुरो॥ गुरुरु०
अतीवगहनंवत्ससंकटंमहदागतं॥ नवेद्मिकिंचिन्मोहेनभ्रमंतीचहिबुद्धयः॥ आनंदउ०॥ मोहस्यावसरः
कोत्रजगत्येवंव्यवस्थिते॥ कःकस्यपुत्रोविप्रर्षेकोवाकस्यनवांधवः॥ आरभ्यजन्मनोनृणांसंबंधित्व
मुपैतियः॥ अन्यसंबंधिनोविप्रन्खलुनासनिवर्तितः॥ तत्रापिजातस्यसुतःसंबंधोयोस्यवांधवैः॥ सोप्यस्तमेते
देहस्यप्रयात्येषोखिलःक्रमः॥ अतोब्रवीमिसंसारेसरतःकोनबांधवः॥ कोवापिसततंबंधुःकिंवाविभ्रा ॥राम॥
म्यतेमतिः॥ पितृद्वयंमयाप्राप्तमस्मिन्नेवहिजन्मनि॥ मातृद्वयंचकिंचित्रंयदन्यदेहसंभवे॥ साहंतपःकरि ॥१०३॥
ष्यामितवादिष्टंहिभूपते॥ विशालग्रामतःपुत्रश्चैत्रआनीयतामिह॥ मार्कंडेयउ०॥ ततःसविस्मितोराजास

103A

भार्यैः सह वंधुभिः ॥ तस्मिन्निवर्त्से मम तामनुमेने वनायतं ॥ चैत्रमानीय तनयं राज्ययोग्यं चकार सः ॥ संमान्य ब्राह्मणं येन गु
त्रबुध्यानुपालितः ॥ सोप्यानंदस्तपस्तेपे वाल एव महावने ॥ कर्मणां क्षपणार्थाय विमुक्तेः परिपंथिनां ॥ तपस्विनं ततस्तं
च प्राह देवः प्रजापतिः ॥ किमर्थं तप्यसे वत्स तपस्तीव्रं वदस्व तत् ॥ आनंद उ० ॥ आत्मनः शुद्धिकामोहं करोमि भग
वंस्तपः ॥ वंधाय मम कर्माणि यानि तत्क्षपणोन्मुखः ॥ ब्रह्मोवाच ॥ क्षीणाधिकारो भवति मुक्तो योग्यो न कर्मवान् ॥
नन्वाधिकारवान्मुक्तिमवाप्स्यति कथं भवान् ॥ मनुना भवता भाव्यं षष्ठेन तत्कुरु ॥ अलं ते तपसा तस्मिन्कृते मुक्तिमवा
प्स्यसि ॥ मार्कंडेय उ० ॥ इत्युक्तो ब्रह्मणा सोपि तथेत्युक्त्वा महामतिः ॥ तत्कर्माभिमुखो जातस्तपसो विरराम ह ॥ चाक्षुषे
त्याह तं ब्रह्मा तपसो विनिवर्त्तयन् ॥ पूर्वनाम्नावबद्धातः प्रख्यातश्चाक्षुषो मनुः ॥ उपयेमे विदर्भां स सुतामुग्रस्य भूभृ
तः ॥ तस्यां चोत्पादयामास सुतान्प्रख्यातविक्रमान् ॥ तस्य मन्वंतरे ग्रस्य येंतरे त्रिदशाधिपाः ॥ ये चर्षयस्तथैवेंद्रो
सुतास्तानुस्तृणुष्व मे ॥ आप्या नामसुरास्तत्र तेषामेकोष्टको गणः ॥ प्रख्यातकर्मणां विप्र यज्ञे हव्यभुजामयं ॥ प्र
ख्यातबलवीर्याणां प्रभामंडलदुर्दृशां ॥ द्वितीयश्च प्रसूताख्यो देवानामष्टको गणः ॥ तथैवाष्टक एवान्यो भव्या
ख्यदेवतागणः ॥ चतुर्थश्च गणस्तत्र यूथगाख्यस्तथाष्टकः ॥ लेखासंज्ञास्तथैवान्ये तत्र मन्वंतरे द्विज ॥ पंचमेव ग
णाः देवास्ते संख्या ह्यमृताशनाः ॥ शतं क्रतूनामाहृत्य यस्तेषामधिपोभवत् ॥ मनोजवस्तथैवेंद्रः संख्यातो यज्ञ
भागभुक् ॥ सुमेधा विरजाश्चैव हविष्मानुन्नतो मधुः ॥ अतिनामा सहिष्णुश्च सप्तासंस्त्वमहर्षयः ॥ ऊरुः पूरुः श
तद्युम्नप्रमुखास्तु महाबलाः ॥ चाक्षुषस्य मनोः पुत्राः पृथिवीपतयो भवन् ॥ एतत्ते कथितं षष्ठं मया मन्वंतरं द्विज ॥
चाक्षुषस्य तथा जन्म चरितं च महात्मनः ॥ सांप्रतं वर्त्तते योयं नाम्ना वैवस्वतो मनुः ॥ सप्तमायां तरे तस्य देवाद्यास्ता

तं२

॥मा० पु०॥ नुस्मृतञ्चमे॥ इति श्रीमार्कंडेयपुराणे चाक्षुषमन्वंतरं समाप्तं॥ मार्कंडेय उ०॥ मार्त्तंडस्य भवद्भार्या तनया विश्वक
र्मणः॥ संज्ञा नाम महाभागा तस्यां भानुरजीजनत्॥ मनुं प्रख्यातयशसामनेकज्ञानपारगं॥ विवस्वतः सुतो यस्मात्
॥१०४॥ त् तस्माद्वैवस्वतस्तु सः॥ संज्ञा च रविणा दृष्ट्वा निमीलयति लोचने॥ यतस्ततः सरोषोर्कः संज्ञां वचनमब्रवीत॥
मयि दृष्टे सदा यस्मात् कुरुषे नेत्रसंयमं॥ तस्माज्जनिष्यसे मूढे प्रजासंयमनं यमं॥ मार्कंडेय उवाच॥ ततः
104 सा चपलां दृष्टिं देवी चक्रे भयाकुला॥ विलोलितदृशं दृष्ट्वा पुनराह च तां रविः॥ यस्माद्विलोलिता दृष्टिर्मयि दृ
ष्टे त्वयाधुना॥ तस्माद्विलोलां तनयां नदीं त्वं प्रसविष्यसि॥ मार्कंडेय उ०॥ ततस्तस्यां तु संजज्ञे भर्तृशापेन तेन वै॥
यमश्च यमुना चेयं प्रख्याता सुमहानदी॥ सा च संज्ञा रवेस्तेजः सहे दुःखेन भामिनी॥ असहंती च सा तेजस्त्वि
चिंतयामास वै तदा॥ किं करोमि क्व गच्छामि क्व गतायाश्च निर्वृतिः॥ भवेन्मम कथं भर्त्ता कोपमर्कश्च नेष्यति॥ इति सं
चिंत्य बहुधा प्रजापतिसुता तदा॥ बहु मेने महाभागा पितृसंश्रयमेव सा॥ ततः पितृगृहं गंतुं कृतबुद्धिर्यशस्विनी
छायामयीमात्मतनुं निर्ममे दयितां रवेः॥ तां चोवाच त्वया वेश्मन्यत्र भानोर्यथा मया॥ तथा सम्यगपत्येषु वर्तितव्यं
तथा रवौ॥ पृष्टयापि न वाच्यं ते तथैतद्गमनं मम॥ सैवास्मि नाम संज्ञेति वाच्यमेतत्सदा त्वया॥ छायोवाच॥ आके
शग्रहणाद्देवी आशापाच्च वचस्तव॥ करिष्ये कथयिष्यामि शापके शापकर्षणात्॥ इत्युक्ता सा तदा देवी जगाम
भवनं पितुः॥ ददर्श तत्र त्वष्टारं तपसा धूतकल्मषं॥ बहुमानाच्च तेनापि पूजिता विश्वकर्मणा॥ तस्थौ पितुर्गृहे सा ॥राम॥
तु कंचित्कालमनिंदिता॥ ततः प्राह स चार्वंगीं पिता नातिचिरोषितां॥ स्तुत्वा च तनयां प्रेम्णा बहुमानपुरस्सरं॥ ॥१०४॥
त्वां तु मे पश्यतो वत्से दिनान्यसु बहून्यपि॥ मुहूर्तेन समानि स्युः किंतु धर्मो विलुप्यते॥ बांधवे सुचिरं वासो न

104A

नारीणांयशस्करः॥मनोरथोवांधवानांभार्यापितृगृहेस्थितिः॥सात्वंत्रैलोक्यनाथेनभर्त्रासूर्येणसंगता॥पितुर्गृहे
चिरंकालंवस्तुंनार्हसिपुत्रिके॥तत्वंभर्तृगृहंगच्छदृष्टाहंपूजितासिमे॥पुनरागमनंकार्यंदर्शनायशुभेक्षणे॥मार्कं
डेयउ०॥इत्युक्तासातदापित्रातथेत्युक्त्वाचवैमुने॥पूजयित्वातुपितरंजगामाथोत्तरान्कुरून्॥सूर्यतापमनिं
च्छंतीतेजसस्तस्यविभ्यती॥तपश्चचारतत्रापिवडवारूपधारिणी॥संज्ञांतामितिमन्वानोद्वितीयायांदिवस्पति
ः॥जनयामासतनयौकन्यांचैवमनोरमां॥छायासंज्ञात्वपत्येषुयथास्वेष्वतिलालसा॥तथानसंज्ञाकन्यायांपुत्र
योश्चान्ववर्त्तत॥लालनाद्युपभोगेषुविशेषमनुवासरं॥मनुस्तत्क्षान्तवांस्तस्यायमस्तस्यानचाक्षमत्॥ताडना
यततःकोपात्पादस्तेनसमुद्यतः॥तस्याःपुनःक्षान्तिमतानतुदेहेनिपातितः॥ततःशशापतंकोपात्छायासं
ज्ञायमंद्विज॥किंचित्प्रस्फुरमाणौष्ठीविचलत्पाणिपल्लवा॥पितुःपत्नीममर्यादायन्मांतर्जयसेयदा॥भुवित
स्मादयंपादस्तवाद्यैवपतिष्यति॥मार्कंडेयउ०॥इत्याकर्ण्ययमःशापंमात्रादत्तंभयातुरः॥अभ्येत्यपितरंप्रा
हप्रणिपातपुरस्सरं॥तातैतन्महदाश्चर्यंनदृष्टंकेनचित्क्वचित्॥मातावात्सल्यमुत्सृज्यशापंपुत्रेप्रयच्छति॥य
थामनुर्ममाचष्टेनेयंमातातथामम॥विगुणेष्वपिपुत्रेषुनमाताविगुणाभवेत्॥मार्कंडेयउ०॥यमस्यैतद्वचः
श्रुत्वाभगवांस्तिमिरापहः॥छायासंज्ञांसमाहूयपप्रच्छक्वगतेतिसा॥साचहतनयात्वष्टुरहंसंज्ञाविभावसो
पत्नीतवत्वयापत्यान्यमूनिजनितानिये॥इत्थंविवस्वतःसापिबहुशःपृच्छतोयदा॥नाचचक्षेतदाक्रुद्धोभा
स्वान्तांशप्तुमुद्यतः॥ततःसाकथयामासयथावृत्तंविवस्वतः॥विदितार्थश्चभगवान्जगामत्वष्टुरालयं॥
ततस्तंपूजयामाससत्वष्टात्रैलोक्यपूजितं॥भास्वंतंपरयाभक्त्यानिजंगेहमुपागतं॥संज्ञांपृष्टस्ततस्तस्मैकथ

॥मा॰पु॰॥ यामासविश्वकृत॥ आगतेवेहमेवेश्मभवतःपेषिताप्रभो॥ दिवाकरःसमाधिस्तोवडवारूपरूपधारिणीं॥ तपश्चरं
तींददृशेउत्तरेषुकुरुषुच॥ सौम्यमूर्त्तिःशुभाकारोभर्त्तोममभवेदिति॥ अभिसंधिंचतपसोवुधोधास्यादिवाकरः
॥१०५॥ शातनंतेजसोमेघक्रियतामितिभास्करः॥ तंचाहविश्वकर्माणंसंज्ञायाःपितरंद्विज॥ संवत्सरंभ्रमिस्यस्यविश्व
105 कर्मारवेस्ततः॥ तेजसःशातनंचक्रेस्तूयमानस्यदैवतैः॥ इतिमार्कंडेयपुराणेनाम॥ ७७॥ मार्कंडेयउ॰॥ ततस्तंतु
ष्टुवुर्देवास्तथादेवर्षयोरविं॥ वाग्भिरीड्यंसमस्तस्यत्रैलोक्यस्यसमागताः॥ देवाऊचुः॥ नमस्तेऋक्स्वरूपायसाम
रूप रूपायतेनमः॥ यजुःस्वरूपायधाम्नांधामवतेनमः॥ ज्ञानैकधामरूपायनिर्द्धूततमसेनमः॥ शुद्धज्योतिःस्व
रूपायविशुद्धायामलात्मने॥ वरिष्ठायवरेण्यायपरस्मैपरमात्मने॥ नमोखिलजगद्व्यापिस्वरूपायात्ममूर्त्ते
ये॥ सर्वकारणभूतायनिष्ठायज्ञानचेतसां॥ नमःसूर्यस्वरूपायप्रकाशात्मस्वमूर्त्तये॥ भास्करायनमस्तुभ्य
तथादिनकृतेनमः॥ शर्वरीहेतवेचैवज्योत्स्नासंध्याकृतेनमः॥ त्वंसर्वमेतद्भगवन्जगदाभ्रमतात्वया॥ भ्रम
त्याविश्वमखिलंब्रह्मांडंसचराचरं॥ त्वदंशुभिरिदंसर्वंसंस्पृष्टंजायतेशुचि॥ क्रियतेत्वत्करस्पर्शाज्जलादी
नांपवित्रता॥ होमदानादिकंधर्मोनोपकारायजायते॥ तावद्यावन्नसंयोगिजगदेतत्त्वदंशुभिः॥ ऋचस्ते
सकलाएतायजूंष्येतानिचान्यतः॥ सकलानिचसामानिनिपतंतित्वदंगतः॥ ऋङ्मयस्त्वंजगन्नाथःत्वमेव
चयजुर्मयः॥ यतःसाममयश्चैवततोनाथत्रयीमयः॥ त्वमेवब्रह्मणोरूपंपरंचापरमेवच॥ मूर्त्तामूर्त्तेतथासूक्ष्म ॥राम॥
स्थूलरूपेतथास्थितः॥ निमेषकाष्ठादिमयंकालरूपोक्षयात्मकः॥ प्रसीदस्वेछयारूपंस्वतेजसमयाकुरु॥ मा ॥१०५॥
र्कंडेयउ॰॥ एवंसंस्तूयमानस्तुदेवैर्देवर्षिभिस्तथा॥ मुमोचस्वंतदातेजस्तेजसांराशिरव्ययः॥ यत्तस्यऋग्मयंतेजो

105A

भावितातेनमेदिनी॥यजुर्मयेनापिदिव्यंस्वस्वसाममयेनवै॥शातितास्तेजसोभागाःयेत्वष्टादशपंचच॥त्वष्ट्रैवतेनशर्वो
स्यकृतंशूलंमहात्मनः॥चक्रंविष्णोर्वसूनांचशंकवोथसुदारुणः॥पावकस्यतथाशक्तिःशिबिकाधनदस्यच॥अ
न्येषांचासुरारीणांशस्त्राण्युग्राणियानिवै॥यक्षविद्याधराणांचतानिचक्रेसविश्वकृत्॥ततश्चषोडशंभागंवि
भर्त्तिभगवान्हरिः॥स्वतेजसःपंचदशधाशातितंविश्वकर्मणा॥ततौरूपधृग्भानुरुत्तराननममत्कुरून् स्व
ददृशेतत्रसंज्ञांतुवडवारूपधारिणीं॥साचदृष्ट्वातमायांतंपरमंसोविशंकया॥जगामसम्मुखंतस्यपृष्ठर
क्षणतत्परा॥ततश्चनासिकायोगंतयोस्तत्रसमेतयोः॥नासत्यदस्रौतनयावश्ववक्त्राद्विनिर्गतौ॥रेतसोतेच
रेवतःखड्गीधन्वीतनुत्रधृक्॥अश्वारूढःसमुत्पन्नोबाणतूणसमन्वितः॥ततःस्वरूपमतुलंदर्शयामासभानु
मान्॥तस्यैसौम्यंचसमालोक्यस्वरूपंपुनराददे॥स्वरूपधारिणींचेमामानिनायनिजाश्रमं॥संज्ञाभार्यांप्रीतिम
तींभास्करोवारितस्करः॥ततःपूर्वसुतोयोस्यामभूद्वैवस्वतोमनुः॥द्वितीयश्चयमःशापाद्धर्मदृष्टिरभूत्सुतः
कृमयोमांसमादायपादतस्तेमहीतले॥पतिष्यंतीतिशापांतंतस्यचक्रेस्वयंपिता॥धर्मदृष्टिर्यतश्चासौसमोमि
त्रेतयाहिते॥ततोनियोगेतंयाम्येचकारतिमिरापहः॥यमुनांचनदींचक्रेकालिंदितरुवाहिनीं॥अश्विनौदेव
भिषजौकृतौपित्रामहात्मना॥गुह्यकाधिपतित्वेचरेवतोविनियोजितः॥छायासंज्ञासुतानांचनियोगश्चय
तोममा॥पूर्वजस्यमनोस्तुल्यःछायासंज्ञासुतोग्रजः॥ततःसावर्णिकींसंज्ञामवापतनयोरवेः॥भविष्यति
मनुःसोपिवलिरिंद्रोयदातदा॥शनैश्चरोग्रहाणांतुमध्येपित्रानियोजितः॥तयोस्तृतीयायाकन्यातपतीमा
मसाकुलं॥नृपात्संवरणात्सुत्रमवापमनुजेश्वरात्॥तस्यैववस्वतस्याहंमनोःसप्तममंतरं॥कथयामिसुतान्भू

॥मा०पु०॥ पान् ऋषीन् देवान् सुराधिपान्॥ इति श्रीमार्कंडेयपुराणे वैवस्वतमन्वंतरे ७९॥ मार्कंडेय उवाच॥ आदित्या व
सवो रुद्राः साध्या विश्वे मरुद्गणाः॥ भृगवोंगिरसश्चाष्टौ यत्र देवगणाः स्मृताः॥ आदित्या वसवो रुद्रा विज्ञेयाः क
॥१०६॥ श्यपात्मजाः॥ साध्याश्च मरुतो विश्वे धर्मपुत्रागणाः स्मृताः॥ भृगोस्तु भगवः पुत्रा ह्यंगिरसोंगिरसः सुताः॥ ए
ष सर्गस्तु मारीचो विज्ञेयः सांप्रतं हि यः॥ ओजस्वी नाम देवेंद्रो महात्मा यज्ञभागभुक्॥ अतीतानागता ये च वर्त्तंते
106 सांप्रतं च ये॥ सर्वे ते त्रिदशेंद्रास्तु विज्ञेयास्तुल्यलक्षणाः॥ सहस्राक्षाः कुलिशिनः सर्व एव पुरंदराः॥ मघवंतो
वृषाः सर्वे शृंगिणो गजगामिनः॥ ते शतक्रतवः सर्वे भूताभिभवतेजसः॥ धर्माद्यैः कारणैः शुद्धैराधिपत्यगुणा
न्विताः॥ भूतभव्यभवन्नाथाः शृणु चैतत्त्रयं द्विज॥ भूर्लोकोयं स्मृता भूमिरंतरिक्षं स्मृतं भुवः॥ दिव्याख्यातः
तथा स्वर्गस्त्रैलोक्यमिति गद्यते॥ अत्रिश्चैव वसिष्ठश्च कश्यपश्च महानृषिः॥ गौतमश्च भरद्वाजो विश्वामित्र
श्च कौशिकः॥ तथैव पुत्रो भगवान् ऋचीकस्य महात्मनः॥ जमदग्निश्च सप्तैते मुनयोत्र तथांतरे॥ इक्ष्वाकुनौ
भगश्चैव धृष्टः शर्यातिरेव च॥ नरिष्यंतश्च विख्यातो नाभागो दिष्ट एव च॥ करूषश्च पृषध्रश्च सुवसुमां लोक
विश्रुतः॥ मनोर्वैवस्वतस्यैते नव पुत्राः प्रकीर्त्तिताः॥ वैवस्वतमिदं विप्र कथितं मे मयांतरं॥ अस्मिन् श्रुते नरः सद्यः पठि
ते चैव सत्तम॥ मुच्यते पातकैः सर्वैः पुण्यं च महदश्नुते॥ इति श्रीमार्कंडेयपुराणे वैवस्वतमन्वंतरं समाप्तं नाम
८०॥ क्रौष्टुकिरुवाच॥ स्वायंभुवाद्याः कथिताः सप्तैते मनवो मम॥ तदंतरे च ये देवा राजानो मुनयस्तथा॥ अस्मिन्
कल्ये सप्त येन्ये भविष्यंति महामुने॥ समस्तान् तान्समाचक्ष्व ये च देवादयश्च वै॥ मार्कंडेय उ०॥ कथितस्ते वसाव ॥रामः॥
र्णिश्छायासंज्ञासुतश्च यः॥ पूर्वजस्य मनोस्तुल्यः स मनुर्भविताष्टमः॥ रामो व्यासो गालवश्च दीप्तिमान् कृप एव च॥ द्रौ ॥१०६॥

106A

ष्यशृंगस्तथा द्रौणिस्तत्र सप्तर्षयोभवत्॥ सुतपाश्चामिताभाश्च मुख्याश्चैव त्रिधा सुराः॥ विंशकः कथितश्चैषां त्रया
णां त्रिगुणो गणः॥ तपस्तपस्वी शुक्रश्च द्युतिर्ज्योतिः प्रभाकरः॥ प्रभासो दयितो धर्मस्तेजोरश्मिश्च सक्रतुः॥ इत्या
दिकस्तु सुतपा देवानां विंशको गणः॥ प्रभुर्विभुर्विशालाख्यस्तथान्यो विंशको गणः॥ सुराणामपि चान्येषां तृतीय
मपि मे शृणु॥ दमो दान्तऋतः सोमः वित्राद्याश्चैव विंशतिः॥ मुख्या ह्येते समाख्याता देवा मन्वन्तराधिपाः॥ मारीचस्यैव
ते सुताः कश्यपस्य प्रजापतेः॥ भविष्यन्ति भविष्यन्ति सावर्ण्यान्तरे मनोः॥ तेषामिन्द्रो भविष्यस्तु बलिर्वैरोचनिर्मुने॥
आस्ते पाताल योद्यापि दैत्यः समयबन्धनः॥ विरजाश्चार्ववीरीवांश्च निर्मोहः सत्यवाक्कृतिः॥ विष्णाद्याश्चैव तनयाः सा
वर्णस्य मनोर्नृपाः॥ ४३॥ ॥ इति श्रीमार्कण्डेयपुराणे सावर्णिकमन्वन्तरसमाप्तं॥ ७२॥ मार्कण्डेय उवाच॥
॥ ॐ॥ सावर्णिः सूर्यतनयो यो मनुः कथ्यतेऽष्टमः॥ निशामय तदुत्पत्तिं विस्तराद्गदतो मम॥ महामायानुभा
वेन यथा मन्वन्तराधिपः॥ स बभूव महाभागः सावर्णिस्तनयो रवेः॥ स्वारोचिषेऽन्तरे पूर्वं चैत्रवंशसमुद्भवः॥ सुर
थो नाम राजाभूत्समस्ते क्षितिमण्डले॥ तस्य पालयतः सम्यक् प्रजाः पुत्रानिवौरसान्॥ बभूवुः शत्रवो भूपाः कोला
विध्वंसिनस्तदा॥ ४॥ तस्य तैरभवद्युद्धमतिप्रबलदण्डिनः॥ न्यूनैरपि स तैर्युद्धे कोलाविध्वंसिभिर्जितः॥ ५॥
ततः स्वपुरमायातो निजदेशाधिपोऽभवत्॥ आक्रान्तः स महाभागस्तैस्तदा प्रबलारिभिः॥ ६॥ अमात्यैर्बलिभि
र्दुष्टैर्दुर्बलस्य दुरात्मभिः॥ कोशो बलं चापहृतं तत्रापि स्वपुरे ततः॥ ७॥ ततो मृगयाव्याजेन हृतस्वाम्यः स भूपतिः॥
एकाकी हयमारुह्य जगाम गहनं वनं॥ ८॥ स तत्राश्रममद्राक्षीद्द्विजवर्यस्य मेधसः॥ प्रशान्तः श्वापदाकीर्णमु
निशिष्योपशोभितं॥ ९॥ तस्थौ कंचित्स कालं च मुनिना तेन सत्कृतः॥ इतश्चेतश्च विचरंस्तस्मिन्मुनिवराश्रमे॥

१०॥ सोचिंतयत्तदातत्रममत्वाकृष्टचेतनः॥ मत्पूर्वैःपालितंपूर्वंमयाहीनंपुरंहितत॥ ११॥ मद्भृत्यैस्तैरसद्वृत्तैर्धर्मतः
पाल्यतेनवा॥ नजानेसप्रधानोमेशूरोहस्तीसदामदः॥ १२॥ ममवैरिवशंयातःकान्भोगानुपलप्स्यते॥ येममानु
गतानित्यंप्रसादधनभोजनैः॥ अनुवृत्तिंध्रुवंतेद्यकुर्वंत्यन्यमहीभृतां॥ १३॥ असम्यग्व्ययशीलैस्तैःकुर्वद्भिः
॥१०७॥ सततंव्ययं॥ संचितःसोतिःदुःखेनक्षयंकोशोगमिष्यति॥ १४॥ एतच्चान्यच्चसततंचिंतयामासपार्थिवः॥ तत्रवि
प्राश्रमाभ्यासेवैश्यमेकंददर्शसः॥ १५॥ सपृष्टस्तेनकस्त्वंभोहेतुश्चागमनेत्रकः॥ सशोकइवकस्मात्त्वंदुर्मनाइ
च६ वलक्ष्यसे॥ १६॥ इत्याकर्ण्यवचस्तस्यभूपतेःप्रणयोदितं॥ प्रत्युवाचसतंवैश्यःप्रश्रयावनतोनृपं॥ १७॥ वैश्यउवा
च॥ समाधिर्नामवैश्योहमुत्पन्नोधनिनांकुले॥ पुत्रदारैर्निरस्तश्चधनलोभादसाधुभिः॥ १८॥ विहीनःस्वज
107 नैर्दारैःपुत्रैरादायमेधनं॥ वनमभ्यागतोदुःखीनिरस्तश्चाप्तबंधुभिः॥ १९॥ सोहंनवेद्मिपुत्राणांकुशलाकु
शलात्मिकां॥ प्रवृत्तिंस्वजनानांचदाराणांचात्रसंस्थितः॥ २०॥ किंनुतेषांगृहेक्षेममक्षेमंकिंनुसांप्रतं॥ कथंते
किंनुसद्वृत्तादुर्वृत्ताःकिंनुमेसुताः॥ २१॥ राजोवाच॥ यैर्निरस्तोभवांल्लुब्धैःपुत्रदारादिभिर्धनैः॥ तेषुकिंभवतः
स्नेहमनुबध्नातिमानसं॥ २२॥ वैश्यउवाच॥ एवमेतद्यथाप्राहभवानस्मद्गतंवचः॥ किंकरोमिनबध्नातिममनिष्ठुर
तांमनः॥ २३॥ यैःसंत्यज्यपितृस्नेहंधनलुब्धैर्निराकृतः॥ पतिस्वजनहार्दंचहार्दितेष्वेवमेमनः॥ २४॥ किमेतन्नाभि
जानामिजानन्नपिमहामते॥ यत्प्रेमप्रवणंचित्तंविगुणेष्वपिबंधुषु॥ २५॥ तेषांकृतेमेनिःश्वासोदौर्मनस्यंचजा
यते॥ करोमिकिंयन्नमनस्तेष्वप्रीतिषुनिष्ठुरं॥ २६॥ मार्कंडेयउ०॥ ततस्तौसहितौविप्रतंमुनिंसमुपस्थितौ॥ समाधि ॥रामः॥
र्नामवैश्योसौसचपार्थिवसत्तमः॥ २७॥ कृत्वातुतौयथान्यायंयथार्हंतेनसंविदं॥ उपविष्टौकथाःकाश्चिच्चक्र ॥१०७॥

107A

तुर्वैश्यपार्थिवौ ॥२८॥ राजोवाच ॥ भगवंस्त्वामहं प्रष्टुमिच्छाम्येकं वदस्वतत ॥ दुःखाय यन्मे मनसः स्वचित्तायत्ततां विना
॥२९॥ ममत्वं गतराज्यस्य राज्यांगेष्वखिलेष्वपि ॥ जानतोपि यथाज्ञस्य किमेतन्मुनिसत्तम ॥३०॥ अयं च निःकृतः पुत्रै
र्दारैर्भृत्यैस्तथोज्झितः ॥ स्वजनेन च संत्यक्तस्तेषु हार्दी तथाप्यति ॥३१॥ एवमेष तथाहं च द्वावप्यत्यंतदुःखितौ ॥
४ दृष्टदोषेपि विषये ममत्वाकृष्टमानसौ ॥३२॥ तत्किमेतन्महाभाग यन्मोहो ज्ञानिनोरपि ॥ ममास्य च भवत्येषा विवे
कांधस्य मूढता ॥३३॥ ऋषिरुवाच ॥ ज्ञानमस्ति समस्तस्य जंतोर्विषयगोचरे ॥ विषयश्च महाभाग याति चैवं पृ
थक्पृथक् ॥३४॥ दिवांधाः प्राणिनः केचिद्रात्रावंधास्तथापरे ॥ केचिद्दिवा तथा रात्रौ प्राणिनस्तुल्यदृष्टयः ॥३५॥ ज्ञा
निनो मनुजाः सत्यं किं नु ते न हि केवलं ॥ यतो हि ज्ञानिनः सर्वे पशुपक्षिमृगादयः ॥३६॥ ज्ञानं च तन्मनुष्याणां यत्ते
षां मृगपक्षिणां ॥ मनुष्याणां च यत्तेषां तुल्यमन्यत्तथोभयोः ॥३७॥ ज्ञानेपि सति पश्यैतान् पतंगाञ्छावचंचुषु ॥ क
णमोक्षादृतान्मोहात्पीड्यमानानपि क्षुधा ॥३८॥ मानुषा मनुजव्याघ्र साभिलाषाः सुतान्प्रति ॥ लोभात्प्रत्युपका
राय नन्वेतान्किं न पश्यसि ॥३९॥ तथापि ममतावर्त्ते मोहगर्त्ते निपातिताः ॥ महामायाप्रभावेन संसारस्थिति
कारिणा ॥४०॥ तन्नात्र विस्मयः कार्यो योगनिद्रा जगत्पतेः ॥ महामाया हरेश्चैषा तया संमोह्यते जगत ॥४१॥ ज्ञानि
नामपि चेतांसि देवी भगवती हि सा ॥ बलादाकृष्य मोहाय महामाया प्रयच्छति ॥४२॥ तया विसृज्यते विश्वं जगदेतच्च
राचरं ॥ सैषा प्रसन्ना वरदा नृणां भवति मुक्तये ॥४३॥ सा विद्या परमा मुक्तेर्हेतुभूता सनातनी ॥ संसारबंधहेतुश्च
सैव सर्वेश्वरेश्वरी ॥४४॥ राजोवाच ॥ भगवन्का हि सा देवी महामायेति यां भवान् ॥ ब्रवीति कथमुत्पन्ना सा कर्मा
स्याश्च किं द्विज ॥४५॥ यत्प्रभावा च सा देवी यत्स्वरूपा यदुद्भवा ॥ तत्सर्वं श्रोतुमिच्छामि त्वत्तो ब्रह्मविदां वर ॥४६॥

द्वा

॥मा॰ पु॰॥ ऋषिरुवाच॥ नित्यैव सा जगन्मूर्त्तिस्तया सर्वमिदं ततं॥ तथापि तत्समुत्पत्तिर्बहुधा श्रूयतां मम॥४७॥ देवानां कार्यसिद्ध्य
र्थमाविर्भवति सा यदा॥ उत्पन्नेति तदा लोके सा नित्याप्यभिधीयते॥४८॥ योगनिद्रां यदा विष्णुर्जगत्येकार्णवीकृ
॥१०८॥ ते॥ आस्तीर्य शेषमभजत्कल्पांते भगवान्प्रभुः॥४९॥ तदा द्वावसुरौ घोरौ विख्यातौ मधुकैटभौ॥ विष्णुकर्णम
लोद्भूतौ हंतुं ब्रह्माणमुद्यतौ॥५०॥ स नाभिकमले विष्णोः स्थितो ब्रह्मा प्रजापतिः॥ दृष्ट्वा तावसुरौ चोग्रौ प्रसुप्तं
108 च जनार्दनं॥५१॥ तुष्टाव योगनिद्रां तामेकाग्रहृदयस्थितः॥ विबोधनार्थाय हरेर्हरिनेत्रकृतालयां॥५२॥ ब्रह्मो
वाच॥ विश्वेश्वरीं जगद्धात्रीं स्थितिसंहारकारिणीं॥ स्तौमि निद्रां भगवतीं विष्णोरतुलतेजसः॥५३॥ त्वं स्वाहा त्वं स्व
धा त्वं हि वषट्कारस्वरात्मिका॥ सुधा त्वमक्षरे नित्ये त्रिधामात्रात्मिका स्थिता॥५४॥ अर्द्धमात्रास्थिता नित्याया
नुच्चार्या विशेषतः॥ त्वमेव संध्या सावित्री त्वं देवि जननी परा॥५५॥ त्वयैतद्धार्यते त्वयैतत्सृज्यते जगत॥ त्वयैतत्सा विश्वं
ल्यते देवि त्वमत्स्यते च सर्वदा॥५६॥ विसृष्टौ सृष्टिरूपा त्वं स्थितिरूपा च पालने॥ तथा संहृतिरूपांते जगतोस्य जगन्म चपा
ये॥५७॥ महाविद्या महामाया महामेधा महास्मृतिः॥ महामोहा च भवती महादेवी महासुरी॥५८॥ प्रकृतिस्त्वं च
सर्वस्य गुणत्रयविभाविनि॥ कालरात्रिर्महारात्रिर्मोहरात्रिश्च दारुणा॥५९॥ त्वं श्रीस्त्वमीश्वरी त्वं ह्रीस्त्वं बु
द्धिर्बोधलक्षणा॥ लज्जा पुष्टिस्तथा तुष्टिस्त्वं शांतिः क्षांतिरेव च॥६०॥ खड्गिनी शूलिनी घोरा गदिनी चक्रिणी
तथा॥ शंखिनी चापिनी बाणभुशुंडीपरिघायुधा॥६१॥ सौम्या सौम्यतराशेषसौम्येभ्यस्त्वतिसुंदरी॥ प ॥रामः॥
रापराणां परमा त्वमेव परमेश्वरी॥६२॥ यच्च किंचित्क्वचिद्वस्तु सदसद्वाखिलात्मिके॥ तस्य सर्वस्य या श ॥१०८॥
क्तिः सा त्वं किं स्तूयसे तदा॥ यया त्वया जगत्स्रष्टा जगत्पात्यत्ति यो जगत॥ सोपि निद्रावशं नीतः कस्त्वां स्तोतु

108A

मिहेश्वरः॥ ६४॥ विस्नुःशरीरग्रहणमहमीशानएवच॥ कारितास्तेयतोतस्त्वांकःस्तोतुंशक्तिमान्भवेत्॥ ६५॥ सात्वमित्थं
प्रभावैःस्वैरुदारैर्देविसंस्तुता॥ मोहयैतौदुराधर्षावसुरौमधुकैटभौ॥ ६६॥ प्रबोधंचजगत्स्वामीनीयतामच्युतोलघु
बोधश्चक्रियतामस्यहंतुमेतौमहासुरौ॥ ६७॥ ऋषिरुवाच॥ एवंस्तुतातदादेवीतामसीतत्रवेधसा॥ विस्नोःप्रबोध
नार्थायनिहंतुंमधुकैटभौ॥ ६८॥ नेत्रास्यनासिकाबाहुहृदयेभ्यस्तथोरसः॥ निर्गम्यदर्शनेतस्थौब्रह्मणोव्यक्त
जन्मनः॥ ६९॥ उत्तस्थौचजगन्नाथस्तयामुक्तोजनार्दनः॥ एकार्णवेहिशयनात्ततःसददृशेचतौ॥ ७०॥ मधुकैट
भौदुरात्मानावतिवीर्यपराक्रमौ॥ क्रोधरक्तेक्षणावत्तुंब्रह्माणंजनितोद्यमौ॥ ७१॥ समुत्थायततस्ताभ्यांयुयु
धेभगवान्हरिः॥ पंचवर्षसहस्राणिबाहुप्रहरणोविभुः॥ ७२॥ तावप्यतिबलोन्मत्तौमहामायाविमोहितौ॥ उक्तवं
तौवरोस्मत्तोव्रियतामितिकेशवं॥ ७३॥ श्रीभगवानुवाच॥ भवेतामद्यमेतुष्टौममवध्यावुभावपि॥ किमन्येनव
रेणात्रएतावद्धिवृतंमया॥ ७४॥ ऋषिरुवाच॥ वंचिताभ्यामितितदासर्वमापोमयंजगत्॥ विलोक्यताभ्यांगदि
तोभगवान्कमलेक्षणः॥ ७५॥ प्रीतौस्वस्तवयुद्धेनश्लाघ्यस्त्वंमृत्युरावयोः॥ आवांजहिनयत्रोर्वीसलिलेनप
रिप्लुता॥ ७६॥ ऋषिरुः॥ तथेत्युक्त्वाभगवताशंखचक्रगदाभृता॥ कृत्वाचक्रेणवैछिन्नेजघनेशिरसीतयोः॥
७७॥ एवमेषासमुत्पन्नाब्रह्मणासंस्तुतास्वयं॥ प्रभावमस्यादेव्यास्तुभूयःशृणुवदामिते॥ ७८॥ इतिश्रीमार्कं
डेयपुराणेसावर्णिकेमन्वंतरेदेवीमाहात्म्येमधुकैटभवधः॥ ७९॥ ऋषिरुवाच॥ देवासुरमभूद्युद्धंपूर्ण
मब्दशतंपुरा॥ महिषेसुराणामधिपेदेवानांचपुरंदरे॥ १॥ तत्रासुरैर्महावीर्यैर्देवसैन्यंपराजितं॥ जित्वाच
सकलान्देवानिंद्रोभून्महिषासुरः॥ २॥ ततःपराजितादेवाःपद्मयोनिंप्रजापतिं॥ पुरस्कृत्यगतास्तत्रयत्रेशगरुड

निं त्य

॥मा०पु०॥ ध्वजौ ॥३॥ यथावृत्तं तयोस्तद्वन्महिषासुरचेष्टितं ॥ त्रिदशाः कथयामासुर्देवाभिभवविस्तरं ॥४॥ सूर्येंद्राग्न्यनिलें
दूनां यमस्य वरुणस्य च ॥ अन्येषां चाधिकारान्स स्वयमेवाधितिष्ठति ॥५॥ स्वर्गान्निराकृताः सर्वे तेन देवगणा
॥१०९॥ भुवि विचरंति यथा मर्त्या महिषेण दुरात्मना ॥६॥ एतद्वः कथितं सर्वममरारिविचेष्टितं ॥ शरणं वः प्रपन्नाः स्मो
वधस्तस्य विचिंत्यतां ॥७॥ इत्थं निशम्य देवानां वचांसि मधुसूदनः ॥ चकार कोपं शंभुश्च भ्रुकुटीकुटिला
109 ननौ ॥८॥ ततोतिकोपपूर्णस्य चक्रिणो वदनात्ततः ॥ निश्चक्राम महत्तेजो ब्रह्मणः शंकरस्य च ॥९॥ अन्येषां
चैव देवानां शक्रादीनां शरीरतः ॥ निर्गतं सुमहत्तेजस्तच्चैक्यं समगच्छत ॥१०॥ अतीव तेजसः कूटं ज्वलंत
मिव पर्वतं ॥ ददृशुस्ते सुरास्तत्र ज्वालाव्याप्तदिगंतरं ॥११॥ अतुलं तत्र तत्तेजः सर्वदेवशरीरजं ॥ एकस्थं तद
भून्नारी व्याप्तलोकत्रयं त्विषा ॥१२॥ यदभूच्छांभवं तेजस्तेनाजायत तन्मुखं ॥ याम्येन चाभवन्केशा बाहवो वि
ष्णुतेजसा ॥१३॥ सौम्येन स्तनयोर्युग्मं मध्यं चैंद्रेण चाभवत् ॥ वारुणेन च जंघोरू नितंबस्तेजसा भुवः ॥१४॥
ब्रह्मणस्तेजसा पादौ तदंगुल्योर्कतेजसा ॥ वसूनां च करांगुल्यः कौबेरेण च नासिका ॥ तस्यास्तु दंताः संभू
ताः प्राजापत्येन तेजसा ॥ नयनत्रितयं जज्ञे तथा पावकतेजसा ॥१६॥ भ्रुवौ च संध्ययोस्तेजः श्रवणावनि
लस्य च ॥ अन्येषां चैव देवानां संभवस्तेजसां शिवा ॥१७॥ ततः समस्तदेवानां तेजोराशिसमुद्भवां ॥ तां विलो
क्य मुदं प्रापुरमरा महिषार्दिताः ॥१८॥ शूलं शूलाद्विनिःकृष्य ददौ तस्यै पिनाकधृक् ॥ चक्रं च दत्तवान्कृ ॥रामः॥
ष्णः समुत्पाद्य स्वचक्रतः ॥१९॥ शंखं च वरुणः शक्तिं ददौ तस्यै हुताशनः ॥ मारुतो दत्तवांश्चापं बाणपूर्णे तथे
षुधी ॥२०॥ वज्रमिंद्रः समुत्पाद्य कुलिशादमराधिपः ॥ ददौ तस्यै सहस्राक्षो घंटामैरावताद्गजात् ॥२१॥ ॥१०९॥

109A

कालदंडाद्यमो दंडं पाशं चांबुपतिर्ददौ॥ प्रजापतिश्चाक्षमालां ददौ ब्रह्मा कमंडलुं॥२२॥ समस्तरोमकूपेषु निजर
श्मीन्दिवाकरः॥ कालश्च दत्तवान् खड्गं तस्यै चर्म च निर्मलं॥२३॥ क्षीरोदश्चामलं हारमजरे च तथांबरे॥ चूडा
मणिं तथा दिव्यं कुंडले कटकानि च॥२४॥ अर्द्धचंद्रं तथा शुभ्रं केयूरान्सर्वबाहुषु॥ नूपुरौ विमलौ तद्वद्ग्रैवेय
कमनुत्तमम्॥२५॥ अंगुलीयकरत्नानि समस्तास्वंगुलीषु च॥ विश्वकर्मा ददौ तस्यै परशुं चातिनिर्मलं॥२६॥
अस्त्राण्यनेकरूपाणि तथाभेद्यं च दंशनं॥ अम्लानपंकजां मालां शिरस्युरसि चापरां॥२७॥ अददज्जलधि
स्तस्यै पंकजं चातिशोभनं॥ हिमवान्वाहनं सिंहं रत्नानि विविधानि च॥२८॥ ददावशून्यं सुरया पानपात्रं धन
नाधिपः॥ शेषश्च सर्वनागेशो महामणिविभूषितं॥२९॥ नागहारं ददौ तस्यै धत्ते यः पृथिवीमिमां॥ अन्यै
रपि सुरैर्देवी भूषणैरायुधैस्तथा॥३०॥ सम्मानिता ननादोच्चैः साट्टहासं मुहुर्मुहुः॥ तस्या नादेन घोरेण कृत्स्न
मापूरितं नभः॥३१॥ अमायतातिमहता प्रतिशब्दो महानभूत्॥ चुक्षुभुः सकला लोकाः समुद्राश्च चकंपिरे
॥३२॥ चचाल वसुधा चेलुः सकलाश्च महीधराः॥ जयेति देवाश्च मुदा तामूचुः सिंहवाहिनीं॥३३॥ तुष्टुवुर्मु
नयश्चैनां भक्तिनम्रात्ममूर्त्तयः॥ दृष्ट्वा समस्तं संक्षुब्धं त्रैलोक्यममरारयः॥३४॥ सन्नद्धाखिलसैन्या
स्ते समुत्तस्थुरुदायुधाः॥ आः किमेतदिति क्रोधादाभाष्य महिषासुरः॥३५॥ अभ्यधावत तं शब्दमशे
षैरसुरैर्वृतः॥ स ददर्श ततो देवीं व्याप्तलोकत्रयां त्विषा॥३६॥ पादाक्रांत्या नतभुवं किरीटोल्लिखितांबरां॥
क्षोभिताशेषपातालां धनुर्ज्यानिःस्वनेन तां॥३७॥ दिशो भुजसहस्रेण समंताद्व्याप्य संस्थितां॥ ततः प्रववृ
ते युद्धं तया देव्या सुरद्विषां॥३८॥ शस्त्रास्त्रैर्बहुधा मुक्तैरादीपितदिगंतरं॥ महिषासुरसेनानीश्चिक्षुराख्यो

॥मा०पु०॥ महासुरः ॥३९॥ युयुधे चामरश्चान्यैश्चतुरंगबलान्वितः ॥ रथानामयुतैः षड्भिरुदग्राख्यो महासुरः ॥४०॥ अयुध्यतायु
तानां च सहस्रेण महाहनुः ॥ पंचाशद्भिश्च नियुतैरसिलोमा महासुरः ॥४१॥ अयुतानां शतैः षड्भिर्बाष्कलो युयुधे रणे ॥ गज
॥२२०॥ वाजिसहस्रौघैरनेकैः परिवारितः ॥४२॥ वृतो रथानां कोट्या च युद्धे तस्मिन्नयुध्यत ॥ विडौडाख्योयुतानां च पंचाशद्भि
रथायुतैः ॥४३॥ युयुधे संयुगे तत्र रथानां परिवारितः ॥ अन्ये च तत्रायुतशो रथनागहयैर्वृताः ॥४४॥ युयुधुः सं
110 युगे देव्या सह तत्र महासुराः ॥ कोटिकोटिसहस्रैस्तु रथानां दंतिनां तथा ॥४५॥ हयानां च वृतो युद्धे तत्राभून्महि
षासुरः ॥ तोमरैर्भिंडिपालैश्च शक्तिभिर्मुसलैस्तथा ॥४६॥ युयुधुः संयुगे देव्या खड्गैः परशुपट्टिशैः ॥ केचिच्च चि
क्षिपुः शक्तीः केचित्पाशांस्तथापरे ॥४७॥ देवीं खड्गप्रहारैस्तु ते तां हंतुं प्रचक्रमुः ॥ सापि देवी ततस्तानि शस्त्राण्य
स्त्राणि चंडिका ॥४८॥ लीलयैव प्रचिच्छेद निजशस्त्रास्त्रवर्षिणी ॥ अनायस्तानना देवी स्तूयमाना सुरर्षिभिः
॥४९॥ मुमोचासुरदेहेषु शस्त्राण्यस्त्राणि चेश्वरी ॥ सोपि क्रुद्धो धुतसटो देव्या वाहनकेसरी ॥५०॥ चचारासुर
सैन्येषु वनेष्विव हुताशनः ॥ निःश्वासान्मुमुचे यांश्च युध्यमाना रणेंबिका ॥५१॥ त एव सद्यः संभूता गणाः शतसहस्र
सु शः ॥ युयुधुस्ते परशुभिर्भिंडिपालासिपट्टिशैः ॥५२॥ नाशयंतोऽसुरगणान्देवीशक्त्युपबृंहिताः ॥ अवादयंत पटहा
न्गणाः शंखांस्तथापरे ॥५३॥ मृदंगांश्च तथैवान्ये तस्मिन्युद्धमहोत्सवे ॥ ततो देवी त्रिशूलेन गदया शरवृष्टिभिः
॥५४॥ खड्गादिभिश्च शतशो निजघान महासुरान् ॥ पातयामास चैवान्यान् घंटास्वनविमोहितान् ॥५५॥ असु ॥राम॥
रान्भुवि पाशेन बध्वा चान्यानकर्षत ॥ केचिद्द्विधाकृतास्तीक्ष्णैः खड्गपातैस्तथापरे ॥५६॥ विपोथिता निपाते ॥२२०॥
तेन गदया भुवि शेरते ॥ वेमुश्च केचिद्रुधिरं मुसलेन भृशं हताः ॥५७॥ केचिन्निपतिता भूमौ भिन्नाः शूलेन वक्ष

ना प

110A

सि॥ निरंतराः शरौघेण कृताः केचिद्रणाजिरे॥ ५८॥ सेनानुकारिणः प्राणान्मुमुचुस्त्रिदशार्दनाः॥ केषांचिद्बाहवश्छिन्ना
श्छिन्नग्रीवास्तथापरे॥ ६०॥ शिरांसि पेतुरन्येषामन्ये मध्ये विदारिताः॥ विच्छिन्नजंघास्त्वपरे पेतुरुर्व्यां महासुराः॥ ६१
कृ एकबाह्वक्षिचरणाः केचिद्देव्या द्विधा कृताः॥ छिन्नेपि चान्ये शिरसि पतिताः पुनरुत्थिताः॥ ६२॥ कबंधा युयुधुर्देव्या गृही
तपरमायुधाः॥ ननृतुश्चापरे तत्र युद्धे तूर्यलयाश्रिताः॥ ६३॥ कबंधाश्छिन्नशिरसः खड्गशक्त्यृष्टिपाणयः॥ तिष्ठ
तिष्ठेति भाषंतो देवीमन्ये महासुराः॥ ६४॥ पातितै रथनागाश्वैरसुरैश्च वसुंधरा॥ अगम्या साभवत्तत्र यत्राभूत्स महा
रणः॥ ६५॥ शोणितौघा महानद्यः सद्यस्तत्र विसुस्रुवुः॥ मध्ये चासुरसैन्यस्य वारणासुरवाजिनां॥ ६६॥ क्षणेन तन्म
हासैन्यमसुराणां तथांबिका॥ निन्ये क्षयं यथा वह्निस्तृणदारुमहाचयं॥ ६७॥ स च सिंहो महानादमुत्सृजन्धुतकेस
रः॥ शरीरेभ्योमरारीणामसूनिव विचिन्वति॥ ६८॥ देव्या गणैश्च तैस्तत्र कृतं युद्धं महासुरैः॥ यथैषां तुतुषुर्देवाः पुष्पवृष्टि
मुचो दिवि॥ ६९॥ इति मार्कंडेयपुराणे सावर्णिके मन्वंतरे देवीमाहात्म्ये महिषासुरसैन्यवधः॥ ऋषिरुवाच॥ निहन्य
मानं तत्सैन्यमवलोक्य महासुरः॥ सेनानीश्चिक्षुरः कोपाद्ययौ योद्धुमथांबिकां॥ १॥ स देवीं शरवर्षेण ववर्ष समरे
सुरः॥ यथा मेरुगिरेः शृंगं तोयवर्षेण तोयदः॥ २॥ तस्य छित्वा ततो देवी लीलयैव शरोत्करान्॥ जघान तुरगान्बाणैर्यं
तारं चैव वाजिनां॥ ३॥ चिच्छेद च धनुः सद्यो ध्वजं चातिसमुच्छ्रितं॥ विव्याध चैव गात्रेषु छिन्नधन्वानमाशुगैः॥ ४॥
सच्छिन्नधन्वा विरथो हताश्वो हतसारथिः॥ अभ्यधावत तां देवीं खड्गचर्मधरोसुरः॥ ५॥ सिंहमाहत्य खड्गेन तीक्ष्णधा
रेण मूर्द्धनि॥ आजघान भुजे सव्ये देवीमप्यतिवेगवान्॥ ६॥ तस्याः खड्गो भुजं प्राप्य पफाल नृपनंदन॥ ततो ज
ग्राह शूलं स कोपादरुणलोचनः॥ ७॥ चिक्षेप च ततस्तत्तु भद्रकाल्यां महासुरः॥ जाज्वल्यमानं तेजोभी रविबिंब

मिवांबरात् ॥ ८ ॥ दृष्ट्वा तदापतच्छूलं देवी शूलममुंचत । तच्छूलं शतधा तेन नीतं स च महासुरः ॥ ९ ॥ हते तस्मिन्महावीर्ये म
॥ मा॰ पु॰ ॥ हिषस्य चमूपतौ । आजगाम गजारूढश्चामरस्त्रिदशार्दनः ॥ १० ॥ सोपि शक्तिं मुमोचाथ देव्यास्तामंबिका द्रुतं । हुं
॥ २२३ ॥ काराभिहतां भूमौ पातयामास निःप्रभां ॥ ११ ॥ भग्नां शक्तिं निपतितां दृष्ट्वा क्रोधसमन्वितः । चिक्षेप चामरः शूलं
बाणैस्तदपि साच्छिनत् ॥ १२ ॥ ततः सिंहः समुत्पत्य गजकुंभांतरे स्थितः । बाहुयुद्धेन युयुधे तेनोच्चैस्त्रिदशारिणा ॥ १३ ॥ युध्य
।।। मानौ ततस्तौ तु तस्मान्नागान्महीं गतौ । युयुधातेतिसंरब्धौ प्रहारैरतिदारुणैः ॥ १४ ॥ ततो वेगात्खमुत्पत्य निपत्य च मृगा
रिणा । करप्रहारेण शिरश्चामरस्य पृथक्कृतं ॥ १५ ॥ उदग्रश्च रणे देव्या शिलावृक्षादिभिर्हतः । दंतमुष्टितलैश्चैव करा
लश्च निपातितः ॥ १६ ॥ देवी क्रुद्धा गदापातैश्चूर्णयामास चोद्धतं । वाष्कलं भिंडिपालेन बाणैस्ताम्रं तथांधकं ॥ १७ ॥
उग्रास्यमुग्रवीर्यं च तथैव च महाहनुं । त्रिनेत्रा च त्रिशूलेन जघान परमेश्वरी ॥ १८ ॥ बिडालस्यासिना कायात्पा
तयामास वै शिरः । दुर्धरं दुर्मुखं चोभौ शरैर्निन्ये यमक्षयं ॥ १९ ॥ एवं संक्षीयमाणे तु स्वसैन्ये महिषासुरः । माहिषेण
स्वरूपेण त्रासयामास तान्गणान् ॥ २० ॥ कांश्चित्तुंडप्रहारेण खुरक्षेपैस्तथापरान् । लांगूलताडितांश्चान्यान्शृं
गाभ्यां च विदारितान् ॥ २१ ॥ वेगेन कांश्चिदपरान्नादेन भ्रमणेन च । निःश्वासपवनेनान्यान्पातयामास भूतले ॥ २२ ॥
निपात्य प्रमथानीकमभ्यधावत सोसुरः । सिंहं हंतुं महादेव्याः कोपं चक्रे ततोंबिका ॥ २३ ॥ सोपि कोपान्महावीर्यः खु
रक्षुण्णमहीतलः । शृंगाभ्यां पर्वतानुच्चांश्चिक्षेप च ननाद च ॥ २४ ॥ वेगभ्रमणविक्षुण्णा मही तस्य व्यशीर्यत । लांगूले ॥ राम ॥
नाहतश्चाब्धिः प्लावयामास सर्वतः ॥ २५ ॥ धुतशृंगविभिन्नाश्च खंडखंडं ययुर्घनाः । श्वासानिलास्ताः शतशो
निपेतुर्नभसोचलाः ॥ इति क्रोधसमाध्मातमापतंतं महासुरं । दृष्ट्वा सा चंडिका कोपं तद्वधाय तदाकरोत् ॥ २७ ॥ साक्षि ॥ २२३ ॥

111A

ह्वा तस्य वेयाशं तं ववंध महासुरं॥ तत्याज माहिषं रूपं सोपि वद्धो महामृधे॥२८॥ ततः सिंहोभवेत्सद्यो यावत्तस्यांविकाशि-
रः॥ छिनत्ति तावत्पुरुषः खड्गपाणिरदृश्यत॥२९॥ तत एवाशु पुरुषं देवि चिच्छेद सायकैः॥ तं खड्गचर्मणा सार्द्धं ततः सोभू-
न्महागजः॥३०॥ करेण च महासिंहं तं चकर्ष जगर्ज्ज च॥ कर्षतस्तु करं देवी खड्गेन निरकृंतत॥३१॥ ततो महासुरो भूयो
मा माहिषं वपुरास्थितः॥ तथैव क्षोभयामास त्रैलोक्यं सचराचरं॥३२॥ ततः क्रुद्धा जगन्माता चंडिका पानमुत्तमं॥ पपौ पुनः
पुनश्चैव जहासारुणलोचना॥३३॥ ननर्द्द चासुरः सोपि बलवीर्यमदोद्धतः॥ विषाणाभ्यां च चिक्षेप चंडिकां प्रति भूध-
रान्॥३४॥ सा च तान्प्रहितांस्तेन चूर्णयंती शरोत्करैः॥ उवाच तं मदोद्धूतमुखरागाकुलाक्षरं॥३५॥ देव्युवाच॥ गर्ज्ज गर्ज्ज
क्षणं मूढ मधु यावत्पिवाम्यहं॥ मया त्वयि हतेत्रैव गर्जिष्यंत्याशु देवताः॥३६॥ ऋषिरुवाच॥ एवमुक्त्वा समुत्पत्य सारूढा
तं महासुरं॥ पादेनाक्रम्य कंठे च शूलेनैनमताडयत॥३७॥ ततः सोपि पदाक्रांतस्तया निजमुखात्ततः॥ अर्द्धनिःक्रां-
त एवाति देव्या वीर्येण संवृतः॥३८॥ अर्द्धनिःक्रांत एवासौ युध्यमानो महासुरः॥ तया महासिना देव्या शिरश्छित्वा
मे निपातितः॥३९॥ ततो हाहाकृतं सर्वं दैत्यसैन्यं ननाश तत्॥ प्रहर्षं च परं जग्मुः सकला देवतागणाः॥४०॥ तुष्टुवुस्तां
सुरा देवीं सह दिव्यैर्महर्षिभिः॥ जगुर्गंधर्वपतयो ननृतुश्चाप्सरोगणाः॥४१॥ इति मार्कंडेयपुराणे सावर्णिके मन्वं-
तरे देवीमाहात्म्ये महिषासुरवधः॥ ऋषिरुवाच॥ ततः सुरगणाः सर्वे देव्या इंद्रपुरोगमाः॥ स्तुतिमारेभिरे कर्त्तुं नि-
हते महिषासुरे॥१॥ शक्रादयः सुरगणा निहतेतिवीर्ये तस्मिन्दुरात्मनि सुरारिबले च॥ देव्या तां तुष्टुवुः प्रणतिनम्र-
शिरोधरांसा वाग्भिः प्रहर्षपुलकोद्गमचारुदेहाः॥२॥ देवा ऊचुः॥ देव्या यया ततमिदं जगदात्मशक्त्या निःशेषदेव-
गणशक्तिसमूहमूर्त्या॥ तामंबिकामखिलदेवमहर्षिपूज्यां भक्त्या नताः स्म विदधातु शुभानि सा नः॥३॥ यस्याः

प्रभावमतुलंभगवाननंतोब्रह्माहरश्चनहिवक्तुमलंबलंच॥साचंडिकाखिलजगत्परिपालनायनाशायचाशुभभ
॥मा०पु०॥ यस्यमतिंकरोतु॥४॥याश्रीःस्वयंसुकृतिनांभवनेष्वलक्ष्मीःपापात्मनांकृतधियांहृदयेषुबुद्धिः॥श्रद्धासतांकुल
॥११२॥ जनप्रभवस्यलज्जातांत्वांनताःस्मपरिपालयदेविविश्वं॥४॥किंवर्णयामतवरूपमचिंत्यमेतत्किंचातिवीर्यम
सुरक्षयकारिभूरि॥किंचाहवेषुचरितानितवाद्भुतानिसर्वेषुदेव्यसुरदेवगणादिकेषु॥५॥हेतुःसमस्तजग
112 तांत्रिगुणापिदोषैर्नज्ञायसेहरिहरादिभिरप्यपारा॥सर्वाश्रयाखिलमिदंजगदंशभूतमव्याकृताहिपरमाप्र
कृतिस्त्वमाद्या॥६॥यस्याःसमस्तसुरतासमुदीरणेनतृप्तिंप्रयातिसकलेषुमखेषुदेवि॥स्वाहासिवैपितृग
णस्यचतृप्तिहेतुरुच्चार्यसेत्वमतएवजनैःस्वधाच॥७॥यामुक्तिहेतुरविचिंत्यमहाव्रताचमभ्यस्यसेसुनि
यतेंद्रियतत्वसारैः॥मोक्षार्थिभिर्मुनिभिरस्तसमस्तदोषैर्विद्यासिसाभगवतीपरमाहिदेवि॥८॥शब्दात्मिकासु
चं विमलर्ग्यजुषांनिधानमुद्गीथरम्यपदपाठवतांसाम्नां॥देवीत्रयीभगवतीभवभावनायवार्त्ताचसर्वजगतांप
रमार्त्तिहंत्री॥९॥मेधासिदेविविदिताखिलशास्त्रसारादुर्गासिदुर्गभवसागरनौरसंगा॥श्रीःकैटभारिहृदयैक
कृताधिवासागौरीत्वमेवशशिमौलिकृतप्रतिष्ठा॥१०॥ईषत्सहासममलंपरिपूर्णचंद्रबिंबानुकारिकनकोत्त
मकांतिकांतं॥अत्यद्भुतंप्रहृतमात्तरुषातथापिवक्त्रंविलोक्यसहसामहिषासुरेण॥११॥दृष्ट्वातुदेविकुपि
तंभ्रुकुटीकरालमुद्यच्छशांकसदृशच्छवियन्नसद्यः॥प्राणान्मुमोचमहिषस्तदतीवचित्रंकैर्जीव्यतेहिकु
पितांतकदर्शनेन॥१२॥देविप्रसीदपरमाभवतीभवायसद्योविनाशयसिकोपवतीकुलानि॥विज्ञातमेतद ॥राम॥
धुनैवयदस्तमेतन्नीतंबलंसुविपुलंमहिषासुरस्य॥१३॥तेसम्मताजनपदेषुधनानितेषांतेषांयशांसिन ॥११२॥

112A

चसौ दृति बंधुवर्गो ॥ धन्यास्त एव निभृतात्मजभृत्यदारा येषां सदाभ्युदयदा भवती प्रसन्ना ॥१४॥ धर्म्याणि देवि सकला
नि सदैव कर्माण्यत्यादृतः प्रतिदिनं सुकृती करोति ॥ स्वर्गं प्रयाति च ततो भवती प्रसादाल्लोकत्रयेपि फलदा ननु दे
वि तेन ॥१५॥ दुर्गे स्मृता हरसि भीतिमशेषजंतोः स्वस्थैः स्मृता मतिमतीव शुभां ददासि ॥ दारिद्र्यदुःखभयहारिणि का
त्वदन्या सर्वोपकारकरणाय सदार्द्रचित्ता ॥१६॥ एभिर्हतैर्जगदुपैति सुखं तथैते कुर्वंतु नाम नरकाय चिराय पापं ॥
संग्राममृत्युमधिगम्य सुखं प्रयांतु मत्वेति नूनमहितान्विनिहंसि देवि ॥१७॥ दृष्ट्वैव किं न भवती प्रकरोति भस्म सर्वा
सुरानरिषु यत्प्रहिणोषि शस्त्रं ॥ लोकान्प्रयांतु रिपवोपि हि शस्त्रपूता इत्थं मतिर्भवति तेष्वहितेषु साध्वी ॥१८॥ ख
ड्गप्रभानिकरविस्फुरणैस्तथोग्रैः शूलाग्रकांतिनिवहेन दृशोसुराणां ॥ यन्नागता विलयमंशुमदिंदुखंडयोग्या
ननं तव विलोकयतां तदेतत् ॥१९॥ दुर्वृत्तवृत्तशमनं तव देवि शीलं रूपं तथैतदविचिंत्यमतुल्यमन्यैः ॥ वीर्यं च हं
तृ हृतदेवपराक्रमाणां वैरिष्वपि प्रकटितैव दया त्वयेत्थं ॥२०॥ केनोपमा भवतु तेस्य पराक्रमस्य रूपं च शत्रुभयका
र्यतिहारि कुत्र ॥ चित्ते कृपा समरनिष्ठुरता च दृष्टा त्वय्येव देवि वरदे भुवनत्रयेपि ॥२१॥ त्रैलोक्यमेतदखिलं रिपुना
शनेन त्रातं त्वया समरमूर्द्धनि तेपि हत्वा ॥ नीता दिवं रिपुगणा भयमप्यपास्तमस्माकमुन्मदसुरारिभवं नमस्ते ॥२२॥ शू
लेन पाहि नो देवि पाहि खड्गेन चांबिके ॥ घंटास्वनेन नः पाहि चापज्यानिःस्वनेन च ॥२३॥ प्राच्यां रक्ष प्रतीच्यां च
चंडिके रक्ष दक्षिणे ॥ भ्रामणेनात्मशूलस्य उत्तरस्यां तथेश्वरि ॥२४॥ सौम्यानि यानि रूपाणि त्रैलोक्ये विचरंति ते ॥ यानि
चात्यंतघोराणि ते रक्षास्मांस्तथा भुवि ॥२५॥ खड्गशूलगदादीनि यानि चास्त्राणि तेंबिके ॥ करपल्लवसंगीनि तैर
स्मान् रक्ष सर्वतः ॥२६॥ ऋषिरुवाच ॥ एवं स्तुता सुरैर्दिव्यैः कुसुमैर्नंदनोद्भवैः ॥ अर्चिता जगतां धात्री तथा गंधानुले

धैनैः॥२९॥ भक्त्या समस्तैस्त्रिदशैर्दिव्यैर्धूपैस्तु धूपिता॥ प्राह प्रसादसुमुखी समस्तान् प्रणतान्सुरान्॥३०॥ देव्युवाच॥ व्रिय
॥मा०पु०॥ तां त्रिदशाः सर्वे यदस्मत्तोभिवांछितं॥ ददाम्यहमतिप्रीत्यास्तवैरेभिः सुपूजिता॥३१॥ कर्त्तव्यमपरं यच्चापि दुष्करं तन्नि
वेद्यतां॥ देवा ऊचुः॥ भगवत्या कृतं सर्वं न किंचिदवशिष्यते॥३२॥ यदयं निहतः शत्रुरस्माकं महिषासुरः॥ यदि चा
॥११२॥ संस्मृता पि वरो देयस्त्वयास्माकं महेश्वरि॥ संस्मृता त्वं नो हिंसेथाः परमापदः॥ यश्च मर्त्यः स्तवैरेभिस्त्वां स्तोष्यत्यमला
नने॥३३॥ तस्य वित्तर्द्धिविभवैर्धनदारादिसंपदां॥ वृद्धये स्मत्प्रसन्ना त्वं भवेथाः सर्वदांबिके॥३४॥ ऋषिरुवाच॥
113 इति प्रसादिता देवैर्जगतोर्थे तथात्मनः॥ तथेत्युक्त्वा भद्रकाली बभूवांतर्हितान्नृप॥३५॥ इत्येतत्कथितं भूप सं
भूता सा यथा पुरा॥ देवी देवशरीरेभ्यो जगत्त्रयहितैषिणी॥३६॥ पुनश्च गौरीदेहात्सा समुद्भूता यथाभवत्
वधाय दुष्टदैत्यानां तथा शुंभनिशुंभयोः॥३७॥ रक्षणाय च लोकानां देवानामुपकारिणी॥ तच्छृणुष्व मयाख्या
तं यथावत्कथयामि ते॥३८॥ इति श्रीमार्कंडेयपुराणे सावर्णिके मन्वंतरे देवीमाहात्म्ये शक्रादिस्तुतिः॥
ऋषिरुवाच॥ पुरा शुंभनिशुंभाभ्यामसुराभ्यां शचीपतेः॥ त्रैलोक्यं यज्ञभागाश्च हृता मदबलाश्रयात्॥१॥ तावेव
सूर्यतां तद्वदधिकारं तथैंदवम्॥ कौबेरमथ याम्यं च चक्राते वरुणस्य च॥२॥ तावेव पवनर्द्धिं च चक्रतुर्वह्निक
र्म च॥ ततो देवा विनिर्द्धूता भ्रष्टराज्याः पराजिताः॥३॥ हृताधिकारास्त्रिदशास्ताभ्यां सर्वे निराकृताः॥ महासुराभ्यां
तां देवीं संस्मरंत्यपराजिताम्॥४॥ तयास्माकं वरो दत्तो यथापत्सु स्मृताखिलाः॥ भवतां नाशयिष्यामि तत्क्षणा
त्परमापदः॥५॥ इति कृत्वा मतिं देवा हिमवंतं नगेश्वरम्॥ जग्मुस्तत्र ततो देवीं विष्णुमायां प्रतिष्टुवुः॥६॥ देवा ऊचुः॥ ॥राम॥
नमो देव्यै महादेव्यै शिवायै सततं नमः॥ नमः प्रकृत्यै भद्रायै नियताः प्रणताः स्म तां॥७॥ रौद्रायै नमो नित्यायै गौर्यै ॥११२॥

113A

धात्र्यैनमोनमः॥ज्योत्स्नायैचेंदुरूपिण्यैसुखायैसततंनमः॥कल्याण्यैप्रणतांवृद्ध्यैसिद्ध्यैकुर्मोनमोनमः॥९॥नैरृ
त्यैभूभृतांलक्ष्म्यैशर्वाण्यैतेनमोनमः॥दुर्गायैदुर्गपारायैसारायैसर्वकारिण्यै॥ख्यात्यैतथैवकृष्णायैधूम्रायै
सततंनमः॥१०॥अतिसौम्यातिरौद्रायैनतास्तस्यैनमोनमः॥नमोजगत्प्रतिष्ठायैदेव्यैकृत्यैनमोनमः॥११॥या
देवीसर्वभूतेषुविष्णुमायेतिशब्दिता॥नमस्तस्यैनमस्तस्यैनमस्तस्यैनमोनमः॥१२॥यादेविसर्वभूतेषुचेतनेत्य
भिधीयते॥नमस्तस्यैनमस्तस्यैनमस्तस्यैनमोनमः॥१३॥यादेवीसर्वभूतेषुबुद्धिरूपेणसंस्थिता॥नमस्तस्यै०
॥१४॥यादेवीसर्वभूतेषुनिद्रारूपेणसंस्थिता॥नमस्तस्यै०॥१५॥यादेवीसर्वभूतेषुक्षुधारूपेणसंस्थिता॥नम
स्तस्यै०॥१६॥यादेवीसर्वभूतेषुच्छायारूपेणसंस्थिता॥नमस्तस्यै०॥१७॥यादेवीसर्वभूतेषुशक्तिरूपेणसंस्थिता॥
नमस्तस्यै०॥१८॥यादेवीसर्वभूतेषुतृष्णारूपेणसंस्थिता॥नमस्तस्यै०॥१९॥यादेवीसर्वभूतेषुक्षांतिरूपेणसंस्थि
ता॥नमस्तस्यै०॥२०॥यादेवीसर्वभूतेषुजातिरूपेणसंस्थिता॥नमस्तस्यै०॥२१॥यादेवीसर्वभूतेषुलज्जारूपेणसंस्थि
ता॥नमस्तस्यै०॥२२॥यादेवीसर्वभूतेषुशांतिरूपेणसंस्थिता॥नमस्तस्यै०॥२३॥यादेवीसर्वभूतेषुश्रद्धारूपेणसंस्थि
ता॥नमस्तस्यै०॥२४॥यादेवीसर्वभूतेषुकांतिरूपेणसंस्थिता॥नमस्तस्यै०॥२५॥यादेवीसर्वभूतेषुलक्ष्मीरूपेणसंस्थि
ता॥नमस्तस्यै०॥२६॥यादेवीसर्वभूतेषुवृत्तिरूपेणसंस्थिता॥नमस्तस्यै॥२७॥यादेवीसर्वभूतेषुधृतिरूपेणसंस्थिता॥
नमस्तस्यै०॥२८॥यादेवीसर्वभूतेषुस्मृतिरूपेणसंस्थिता॥नमस्तस्यै०॥२९॥यादेवीसर्वभूतेषुदयारूपेणसंस्थिता॥
नमस्तस्यै०॥३०॥यादेवीसर्वभूतेषुतुष्टिरूपेणसंस्थिता॥नमस्तस्यै०॥३१॥यादेवीसर्वभूतेषुपुष्टिरूपेणसंस्थिता॥
नमस्तस्यै०॥३२॥यादेवीसर्वभूतेषुमातृरूपेणसंस्थिता॥नमस्तस्यै०॥३३॥यादेवीसर्वभूतेषुभ्रांतिरूपेणसंस्थिता॥

॥मा०पु०॥ नमस्तस्यै०॥७४॥ इंद्रियाणामधिष्ठात्री भूतानामखिलेषु या॥ भूतेषु सततं तस्यै व्याप्त्यै देव्यै नमो नमः॥७५॥ चितिरूपे
ण या कृत्स्नमेतद्व्याप्य स्थिता जगत॥ नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः॥७६॥ स्तुता सुरैः पूर्वमभीष्टसंश्रयात्त
॥११४॥ था सुरेंद्रेण दिनेषु सेविता॥ करोतु सा नः शुभहेतुरीश्वरी शुभानि भद्राण्यभिहंतु चापदः॥७७॥ या सांप्रतं चोद्ध
त दैत्यतापितैरस्माभिरीशा च सुरैर्नमस्यते॥ या च स्मृता तत्क्षणमेव हंति नः सर्वापदो भक्तिविनम्रमूर्तिभिः॥७८॥
114 ऋषिरुवाच॥ एवं स्तवाभियुक्तानां देवानां तत्र पार्वती॥ स्नातुमभ्याययौ तोये जाह्नव्या नृपनंदन॥७९॥ साब्रवीत्ता
न्सुरान्सुभ्रूर्भवद्भिः स्तूयतेत्र का॥ शरीरकोशातश्चास्याः समुद्भूताब्रवीच्छिवा॥८०॥ स्तोत्रं ममैतत्क्रियते शुंभदै
त्यनिराकृतैः॥ देवैः समस्तैः समरे निशुंभेन पराजितैः॥८१॥ शरीरकोशाद्यत्तस्याः पार्वत्या निःसृतांबिका॥ कौ
शिकीति समस्तेषु ततो लोकेषु गीयते॥८२॥ तस्यां विनिर्गतायां तु कृष्णाभूत्सापि पार्वती॥ कालीकेति समा-
ख्याता हिमाचलकृताश्रया॥८३॥ ततोंबिकां परं रूपं बिभ्राणां सुमनोहरम॥ ददर्श चंडो मुंडश्च भृत्यौ शुंभनि
शुंभयोः॥८४॥ ताभ्यां शुंभाय चाख्याता अतीव सुमनोहरा॥ काप्यास्ते स्त्री महाराज भासयंती हिमाचलं॥
८५॥ नैव तादृक्क्वचिद्रूपं दृष्टं केनचिदुत्तमं॥ ज्ञायतां काप्यसौ देवी गृह्यतां चासुरेश्वर॥८६॥ स्त्रीरत्नम
ति चार्वंगी द्योतयंती दिशस्त्विषा॥ सा तु तिष्ठति दैत्येंद्र तां भवान्द्रष्टुमर्हति॥८७॥ यानि रत्नानि मणयो गजाश्वा
दीनि वै प्रभो॥ त्रैलोक्ये तु समस्तानि सांप्रतं तानि ते गृहे॥८८॥ ऐरावतः समानीतो गजरत्नं पुरंदरात॥ पारिजात ॥रामः॥
तरुश्चायं तथैवोच्चैःश्रवा हयः॥८९॥ विमानं हंससंयुक्तमेतत्तिष्ठति तेंगणे॥ रत्नभूतमिहानीतं यदासीद्वेधसो ॥११४॥
द्भुतं॥९०॥ निधिरेष महापद्मः समानीतो धनेश्वरात॥ किंजल्किनीं ददौ चाब्धिर्मालामम्लानपंकजां॥९१॥

114A

छत्रं ते वारुणं गेहे कांचनस्रावि तिष्ठति । तथायं स्यंदनवरो यः पुरासीत्प्रजापतेः ॥ ५२ ॥ मृत्योरुत्क्रांतिदा नाम शक्तिरी
शास्त्वया हृता ॥ पाशः सलिलराजस्य भ्रातुस्तव परिग्रहे ॥ ५३ ॥ निशुंभस्याब्धिजाताश्च समस्ता रत्नजातयः ॥ वह्निर
पि ददौ तुभ्यमग्निशौचे च वाससी ॥ ५४ ॥ एवं दैत्येंद्र रत्नानि समस्तान्याहृतानि ते ॥ स्त्रीरत्नमेषा कल्याणी त्वया क
स्मान्न गृह्यते ॥ ५५ ॥ ऋषिरुवाच ॥ निशम्येति वचः शुंभः स तदा चंडमुंडयोः ॥ प्रेषयामास सुग्रीवं दूतं देव्या महासु
र ॥ ५६ ॥ इति चेति च वक्तव्या सा गत्वा वचनान्मम ॥ यथा चाभ्येति संप्रीत्या तथा कार्यं त्वया लघु ॥ ५७ ॥ स तत्र गत्वा
यत्रास्ते शैलोद्देशेऽतिशोभने ॥ तां च देवीं ततः प्राह श्लक्ष्णं मधुरया गिरा ॥ ५८ ॥ दूत उवाच ॥ देवि दैत्येश्वरः शुंभस्त्रै
लोक्ये परमेश्वरः ॥ दूतोऽहं प्रेषितस्तेन त्वत्सकाशमिहागतः ॥ ५९ ॥ अव्याहताज्ञः सर्वासु यः सदा देवयोनिषु ॥
निर्जिताखिलदैत्यारिः स यदाह शृणुष्व तत् ॥ ६० ॥ मम त्रैलोक्यमखिलं मम देवा वशानुगाः ॥ यज्ञभागानहं स
र्वानुपाश्नामि पृथक्पृथक् ॥ ६१ ॥ त्रैलोक्ये वररत्नानि मम वश्यान्यशेषतः ॥ तथैव गजरत्नं च हृतं देवेंद्रवाह
नं ॥ ६२ ॥ क्षीरोदमथनोद्भूतमश्वरत्नं ममामरैः ॥ उच्चैःश्रवससंज्ञं तु प्रणिपत्य समर्पितं ॥ ६३ ॥ यानि चान्यानि देवे
षु गंधर्वेषूरगेषु च ॥ रत्नभूतानि भूतानि तानि मय्येव शोभने ॥ ६४ ॥ स्त्रीरत्नभूतां त्वां देवि लोके मन्यामहे वयं ॥ सा
त्वमस्मानुपागच्छ यतो रत्नभुजो वयं ॥ ६५ ॥ मां वा ममानुजं वापि निशुंभमुरुविक्रमं ॥ भज त्वं चंचलापांगि रत्नभू
तासि वै यतः ॥ ६६ ॥ परमैश्वर्यमतुलं प्राप्स्यसे मत्परिग्रहात् ॥ एतद्बुद्ध्या समालोच्य मत्परिग्रहतां व्रज ॥ ६७ ॥ ऋषि
रुवाच ॥ इत्युक्ता सा तदा देवी गंभीरांतःस्मिता जगौ ॥ दुर्गा भगवती भद्रा ययेदं धार्यते जगत् ॥ ६८ ॥ श्रीदेव्युवाच ॥
सत्यमुक्तं त्वया नात्र मिथ्या किंचित्त्वयोदितं ॥ त्रैलोक्याधिपतिः शुंभो निशुंभश्चापि तादृशः ॥ ६९ ॥ किं त्वत्र यत्प्रति

॥मा०पु०॥ ज्ञातं मिथ्यात तत्क्रियते कथं ॥ श्रूयतामल्पवुद्धित्वात्प्रतिज्ञा या कृता पुरा ॥७०॥ यो मां जयति संग्रामे यो मे दर्पं व्यपो
हति ॥ यो मे प्रतिवलो लोके स मे भर्त्ता भविष्यति ॥७१॥ तदागच्छतु शुंभोत्र निशुंभो वा महासुरः ॥ मां जित्वा किं चिरेण
॥११५॥ त्र पाणिं गृह्णातु मे लघु ॥७२॥ दूत उवाच ॥ अवलिप्तासि मैवं त्वं देवि ब्रूहि ममाग्रतः ॥ त्रैलोक्ये कः पुमांस्तिष्ठेदग्रे
शुंभनिशुंभयोः ॥७३॥ अन्येषामपि दैत्यानां सर्वे देवा नवै युधि ॥ तिष्ठंति संमुखे देवि किं पुनः स्त्री त्वमेकिका ॥
115 ॥७४॥ इंद्राद्याः सकला देवास्तस्थुर्येषां न संयुगे ॥ शुंभादीनां कथं तेषां स्त्री प्रयास्यसि संमुखं ॥७५॥ सा त्वं गच्छ
मयैवोक्ता पार्श्वं शुंभनिशुंभयोः ॥ केशाकर्षणनिर्द्धूतगौरवा मा गमिष्यसि ॥७६॥ श्री देव्युवाच ॥ एवमेतद्वली
शुंभो निशुंभश्चातिवीर्यवान् ॥ किं करोमि प्रतिज्ञा मे यदनालोचिता पुरा ॥ स त्वं गच्छ मयैवोक्तं यदेतत्सर्वमा
दृतः ॥ तदाचक्ष्वासुरेंद्राय स च युक्तं करोतु यत् ॥७७॥ इति मार्कंडेयपुराणे सावर्णिके मन्वंतरे देवीमाहात्म्ये
दूतसंवादः ॥ ऋषिरुवाच ॥ इत्याकर्ण्य वचो देव्याः स दूतोऽमर्षपूरितः ॥ समाचष्ट समागम्य दैत्यराजाय विस्त
रात् ॥१॥ तस्य दूतस्य तद्वाक्यमाकर्ण्यासुरराट् ततः ॥ सक्रोधः प्राह दैत्यानामधिपं धूम्रलोचनं ॥ हे धूम्रलोचना
शु त्वं स्वसैन्यपरिवारितः ॥ तामानय वलाद्दुष्टां केशाकर्षणविह्वलां ॥२॥ तत्परित्राणदः कश्चिद्यदि चोत्तिष्ठते प
रः ॥ स हंतव्योऽमरो वापि यक्षो गंधर्व एव च ॥३॥ ऋषिरुवाच ॥ तेनाज्ञप्तस्ततः शीघ्रं स दैत्यो धूम्रलोचनः ॥ वृतः
षष्ट्या सहस्राणामसुराणां द्रुतं ययौ ॥४॥ स दृष्ट्वा तां ततो देवीं तुहिनाचलसंस्थितां ॥ जगादोच्चैः प्रयाहीति मूलं शुं
भनिशुंभयोः ॥५॥ न चेत्प्रीत्याद्य भवती मद्भर्त्तारमुपैष्यति ॥ ततो वलान्नयाम्येष केशाकर्षणविह्वलां ॥६॥ देव्यु ॥राम॥
वाच ॥ दैत्येश्वरेण प्रहितो वलवान्वलसंवृतः ॥ वलान्नयसि मामेवं ततः किं ते करोम्यहं ॥७॥ ऋषिरुवाच ॥ ॥ ॥११५॥

115A

इत्युक्तः सोभ्यधावत्तामसुरो धूम्रलोचनः॥ हूंकारेणैव तं भस्म सा चकारांबिका ततः॥९॥ अथ क्रुद्धं महासैन्यमसुराणां त
थांबिका॥ ववर्ष सायकैस्तीक्ष्णैस्तथा शक्तिपरश्वधैः॥१०॥ ततो धुतसटः कोपात्कृत्वा नादं सुभैरवं॥ पपातासुरसेना
यां सिंहो देव्याः स्ववाहनः॥११॥ कांश्चित्करप्रहारेण दैत्यानास्येन चापरान्॥ आक्रांत्या चाधरेणान्यान्स जघान महा
सुरान्॥१२॥ केषांचित्पाटयामास नखैः कोष्ठानि केसरी॥ तथा तलप्रहारेण शिरांसि कृतवान्पृथक्॥१३॥ विच्छिन्न
बाहुशिरसः कृतास्तेन तथापरे॥ पपौ च रुधिरं कोष्ठादन्येषां धुतकेसरः॥१४॥ क्षणेन तद्बलं सर्वं क्षयं नीतं म
हात्मना॥ तेन केसरिणा देव्या वाहनेनातिकोपिना॥१५॥ श्रुत्वा तमसुरं देव्या निहतं धूम्रलोचनं॥ बलं च क्षयितं कृ
त्स्नं देवीकेसरिणा ततः॥१६॥ चुकोप दैत्याधिपतिः शुंभः प्रस्फुरिताधरः॥ आज्ञापयामास च तौ चंडमुंडौ महासुरौ
॥१७॥ हे चंड हे मुंड बलैर्बहुभिः परिवारितौ॥ तत्र गच्छत गत्वा च सा समानीयतां लघु॥१८॥ केशेष्वाकृष्य बध्वा वा
यदि वः संशयो युधि॥ तदाशेषायुधैः सर्वैरसुरैर्विनिहन्यतां॥१९॥ तस्यां हतायां दुष्टायां सिंहे च विनिपातिते॥
शीघ्रमागम्यतां बध्वा गृहीत्वा तामथांबिकां॥२०॥ इति मार्कंडेयपुराणे सावर्णिके मन्वंतरे देवीमाहात्म्ये धू
म्रलोचनवधः॥ ऋषिरुवाच॥ आज्ञप्तास्ते ततो दैत्याश्चंडमुंडपुरोगमाः॥ चतुरंगबलोपेता ययुरभ्युद्यतायुधाः॥
॥१॥ ददृशुस्ते ततो देवीमीषद्धासां व्यवस्थितां॥ सिंहस्योपरि शैलेंद्रशृंगे महति कांचने॥२॥ ते दृष्ट्वा तां समादातु
मुद्यमं चक्रुरुद्यताः॥ आकृष्टचापासिधरास्तथान्ये तत्समीपगाः॥३॥ ततः कोपं चकारोच्चैरंबिका तानरीन्प्र
ति॥ कोपेन चास्या वदनं मषीवर्णमभूत्तदा॥४॥ भ्रुकुटीकुटिलात्तस्या ललाटफलकाद्द्रुतं॥ काली कराल
वदना विनिःक्रांतासिपाशिनी॥५॥ विचित्रखट्वांगधरा नरमालाविभूषणा॥ द्वीपिचर्मपरीधाना शुष्कमांसा

॥मा०पु०॥ तिमैरवा॥ ६॥ अतिविस्तारवदनाजिह्वाललनभीषणा॥ निमग्नारक्तनयनानादापूरितदिङ्मुखा॥ ७॥ सावेगेना
भिपतिताघातयंतीमहासुरान्॥ सैन्येतत्रसुरारीणामभक्षयततद्बलं॥ ८॥ पार्ष्णिग्राहांकुशग्राहियोधघंटासम
॥१२६॥ न्वितान्॥ समादायैकहस्तेनमुखेचिक्षेपवारणान्॥ ९॥ तथैवयोधंतुरगैरथंसारथिनासह॥ निक्षिप्यवक्त्रेद
शनैश्चर्वयंत्यतिभैरवं॥ १०॥ एकंजग्राहकेशेषुग्रीवायामथचापरं॥ पादेनाक्रम्यचैवान्यान्सुरसान्यमपोथय म ४
116 त॥ ११॥ तैर्मुक्तानिचशस्त्राणितथास्त्राणिमहासुरैः॥ मुखेनजग्राहरुषादशनैर्मथितान्यपि॥ १२॥ बलिनां
तद्बलंसर्वमसुराणांमहात्मनां॥ ममर्दाभक्षयच्चान्यानन्यांश्चाताडयत्तथा॥ १३॥ असिनानिहताःकेचित्के
चित्खट्वांगताडिताः॥ जग्मुर्विनाशमसुरादंताग्राभिहतास्तथा॥ १४॥ क्षणेनतद्बलंसर्वमसुराणांनिपातितं
दृष्ट्वाचंडोभिदुद्रावतांकालीमतिभीषणां॥ १५॥ शरवर्षैर्महाभीमैर्भीमाक्षींतांमहासुरः॥ छादयामाससचक्रै
श्चमुंडःक्षिप्तैःसहस्रशः॥ १६॥ तानिचक्राण्यनेकानिविशमानानितन्मुखं॥ बभुर्यथार्कबिंबानिसुबहूनि
घनोदरं॥ १७॥ ततोजहासातिरुषाभीमंभैरवनादिनी॥ कालीकरालवदनादुर्दर्शदशनोज्ज्वला॥ १८॥ उत्थाय
चमहासिंहंदेवीचंडमधावत॥ गृहीत्वाचास्यकेशेषुशिरस्तेनासिनाछिनत्॥ १९॥ अथमुंडोभ्यधावत्तांदृ
ष्ट्वाचंडंनिपातितं॥ तमप्यपातयद्भूमौखड्गाभिहतंरुषा॥ २०॥ हतशेषंततःसैन्यंदृष्ट्वाचंडंनिपातितं॥
मुंडंचसुमहावीर्यंदिशोभेजेभयातुरं॥ २१॥ शिरश्चंडस्यकालीचगृहीत्वामुंडमेवच॥ प्राहप्रचंडाट्टहा ॥राम॥
समिश्रमभ्येत्यचंडिकां॥ २२॥ मयातवात्रोपहृतौचंडमुंडौमहापशू॥ युद्धयज्ञेस्वयंशुंभंनिशुंभंचहनिष्य ॥१२६॥
सि॥ २३॥ ऋषिरुवाच॥ तावानीतौततोदृष्ट्वाचंडमुंडौमहासुरौ॥ उवाचकालीकल्याणीललितंचंडिकावचः॥ २४॥

116A

यस्माच्चंडं च मुंडं च गृहीत्वा त्वमुपागता॥ चामुंडेति ततो लोके ख्याता देवी भविष्यसि॥२७॥ इति मार्कंडेयपुराणे साव
र्णिके मन्वंतरे देवीमाहात्म्ये चंडमुंडवधः॥ ऋषिरुवाच॥ चंडे च निहते दैत्ये मुंडे च विनिपातिते॥ बहुलेषु च सै
न्येषु क्षयितेष्वसुरेश्वरः॥१॥ ततः कोपपराधीनचेताः शुंभः प्रतापवान्॥ उद्योगं सर्वसैन्यानां दैत्यानामादिदेश
ह॥२॥ अद्य सर्वबलैर्दैत्याः षडशीतिरुदायुधाः॥ कंबूनां चतुराशीतिर्निर्यांतु स्वबलैर्वृताः॥
३॥ कोटिवीर्याणि पंचाशदसुराणां कुलानि वै॥ शतं कुलानि धौम्राणां निर्गच्छंतु ममाज्ञया॥४॥ कालिका दौर्हृदा मौर्याः
कालकेयास्तथासुराः॥ युद्धाय सज्जा निर्यांतु आज्ञया त्वरिता मम॥५॥ इत्याज्ञाप्यासुरपतिः शुंभो भैरवशासनः
निर्जगाम महासैन्यसहस्रैर्बहुभिर्वृतः॥६॥ आयांतं चंडिका दृष्ट्वा तत्सैन्यमतिभीषणं॥ ज्यास्वनैः पूरयामास धरणीगग
नांतरं॥७॥ ततः सिंहो महानादमतीव कृतवान्नृप॥ घंटास्वनेन तन्नादमंबिका चोपबृंहयत॥८॥ धनुर्ज्यासिंहघंटा
नां नादापूरितदिङ्मुखः॥ निनादैर्भीषणैः काली जिग्ये विस्तारितानना॥९॥ तन्निनादमुपश्रुत्य दैत्यसैन्यैश्चतुर्दि
शं॥ देवी सिंहस्तथा काली सरोषैः परिवारिता॥१०॥ एतस्मिन्नंतरे भूप विनाशाय सुरद्विषां॥ भवायामरसिंहा
नामतिवीर्यबलान्विताः॥११॥ ब्रह्मेशगुहविष्णूनां तथेंद्रस्य च शक्तयः॥ शरीरेभ्यो विनिष्क्रम्य तद्रूपैश्चंडिकां
ययुः॥१२॥ यस्य देवस्य यद्रूपं यथाभूषणवाहनं॥ तद्वदेव हि तच्छक्तिरसुरान्योद्धुमाययौ॥१३॥ हंसयुक्तविमाना
ग्रे साक्षसूत्रकमंडलुः॥ आयाता ब्रह्मणः शक्तिर्ब्रह्माणी साभिधीयते॥१४॥ माहेश्वरी वृषारूढा त्रिशूलवरधा
रिणी॥ महाहिवलया प्राप्ता चंद्ररेखाविभूषणा॥१५॥ कौमारी शक्तिहस्ता च मयूरवरवाहना॥ योद्धुमभ्याययौ
दैत्यानंबिका गुहरूपिणी॥ तथैव वैष्णवी शक्तिर्गरुडोपरि संस्थिता॥ शंखचक्रगदाशार्ङ्गखड्गहस्ताभ्युपाय

॥मा॰पु॰॥ यै॥१७॥ यज्ञवाराहमतुलं रूपं याविभ्रतोहरेः॥ शक्तिःसाप्याययौतत्रवाराहींविभ्रतीतनुं॥१८॥ नारसिंहीनृसिंहस्यवि
॥११७॥ भ्रतीसदृशंवपुः॥ प्राप्तातत्रसटाक्षेपक्षिप्तनक्षत्रसंहतिः॥१९॥ वज्रहस्तातथैवैंद्रीगजराजोपरिस्थिता॥ प्राप्तासह
स्रनयनायथाशक्रस्तथैवसा॥२०॥ ततःपरिवृतस्ताभिरीशानोदेवशक्तिभिः॥ हन्यंतामसुराःशीघ्रंममप्रीत्याहचं
117 डिका॥२१॥ ततोदेवीशरीरात्तुविनिष्क्रांतातिभीषणा॥ चंडिकाशक्तिरत्युग्राशिवाशतनिनादिनी॥२२॥ साचाहधूम्रज शिवा
टिलमीशानमपराजिता॥ दूतत्वंगच्छभगवन्पार्श्वंशुंभनिशुंभयोः॥२३॥ ब्रूहिशुंभंनिशुंभंचदानवावतिगर्वि
तौ॥ येचान्येदानवास्तत्रयुद्धायसमुपस्थिताः॥२४॥ त्रैलोक्यमिंद्रोलभतांदेवाःसंतुहविर्भुजः॥ यूयंप्रयातपात
लंयदिजीवितुमिच्छत॥२५॥ बलावलेपादथचेद्भवंतोयुद्धकांक्षिणः॥ तदागच्छततृप्यंतुमच्छिवाःपिशितेनवः॥
२६॥ यतोनियुक्तोदौत्येनतयादेव्याशिवःस्वयं॥ शिवदूतीतिलोकेस्मिंस्ततःसाख्यातिमागता॥२७॥ तेपिश्रुत्वाव
चोदेव्याःशर्वाख्यातंमहासुराः॥ अमर्षापूरिताजग्मुर्यत्रकात्यायनीस्थिताः॥२८॥ ततःप्रथममेवाग्रेशरशक्त्यृष्टि
वृष्टिभिः॥ ववर्षुरुद्धतामर्षास्तांदेवीममरारयः॥२९॥ साचतान्प्रहितान्बाणान्शूलचक्रपरश्वधान्॥ चिच्छेदली
लयाध्मातधनुर्मुक्तैर्महेषुभिः॥३०॥ तस्याग्रतस्तथाकालीशूलपातविदारितान्॥ खट्वांगपोथितांश्चारीन्कु
र्वतीव्यचरत्तदा॥३१॥ कमंडलुजलाक्षेपहतवीर्यान्हतौजसः॥ ब्रह्माणीचाकरोच्छत्रून्येनयेनस्मधावति॥३२॥
माहेश्वरीत्रिशूलेनतथाचक्रेणवैष्णवी॥ दैत्यान्जघानकौमारीतथाशक्त्यातिकोपिना॥३३॥ ऐंद्रीकुलिशपा
तेनशतशोदैत्यदानवाः॥ पेतुर्विदारिताःपृथ्व्यांरुधिरौघप्रवर्षिणः॥३४॥ तुंडप्रहारविध्वस्तादंष्ट्राग्रक्षतव ॥रामः॥
क्षसः॥ वाराहमूर्त्यान्यपतंश्चक्रेणचविदारिताः॥३५॥ नखैर्विदारितांश्चान्यान्भक्षयंतीमहासुरान्॥ नारसिं ॥११७॥

117A

हीचचाराजौनादापूर्णदिगंतरा॥३६॥चंडाट्टहासैरसुराःशिवदूत्यभिदूषिताः॥पेतुःपृथिव्यांपतितांस्तांश्चखादाथ
सातदा॥३७॥इतिमातृगणंक्रुद्धंमर्दयंतंमहासुरान्॥दृष्ट्वाभ्युपायैर्विविधैर्नेशुर्देवारिसैनिकाः॥३८॥पलायनपरा
न्दृष्ट्वादैत्यान्मातृगणार्दितान्॥योद्धुमभ्याययौक्रुद्धोरक्तबीजोमहासुरः॥३८॥रक्तबिंदुर्यदाभूमौपतत्यस्य
शरीरतः॥समुत्पततिमेदिन्यांतत्प्रमाणोमहासुरः॥४०॥युयुधेसगदापाणिरिंद्रशक्त्यामहासुरः॥ततश्चैंद्रीस्व
वज्रेणरक्तबीजमताडयत्॥४१॥कुलिशेनाहतस्याशुबहुसुस्राव शोणितं॥समुत्तस्थुस्ततोयोधास्तद्रूपास्तत्
पराक्रमाः॥४२॥यावंतःपतितास्तस्यशरीराद्रक्तबिंदवः॥तावंतःपुरुषाजातास्तद्वीर्यबलविक्रमाः॥४३॥तेचा
पियुयुधुस्तत्रपुरुषाःरक्तसंभवाः॥समंमातृभिरत्युग्रंशस्त्रपातातिभीषणं॥४४॥पुनश्चवज्रपातेनक्षतमस्य
शिरोयदा॥ववाहरक्तंपुरुषास्ततोजाताःसहस्रशः॥४५॥वैष्णवीसमरेचैनंचक्रेणाभिजघानह॥गदयाताडया
मासऐंद्रीतमसुरेश्वरं॥४६॥वैष्णवीचक्रभिन्नस्यरुधिरस्रावसंभवैः॥सहस्रशोजगद्व्याप्तंतत्प्रमाणैर्महासु
रैः॥४७॥शक्त्याजघानकौमारीवाराहीचतथासिना॥माहेश्वरीत्रिशूलेनरक्तबीजंमहासुरं॥४८॥सचापिग
दयादैत्यःसर्वाएवाहनत्पृथक्॥मातॄःकोपसमाविष्टोरक्तबीजोमहासुरः॥४९॥तस्याहतस्यबहुधाशक्तिशूल
लादिभिर्भुवि॥पपातयोवैरक्तौघस्तेनासन्शतशोसुराः॥५०॥तैश्चासुरासृक्संभूतैःरसुरैःसकलंजगत्॥व्या
प्तमासीत्ततोदेवाभयमाजग्मुरुत्तमं॥५१॥तान्विषण्णान्सुरान्दृष्ट्वाचंडिकाप्राहसत्वरा॥उवाचकालींचामुंडेवि
स्तीर्णंवदनंकुरु॥५२॥मच्छस्त्रपातसंभूतान्रक्तबिंदून्महासुरान्॥रक्तबिंदोःप्रतीच्छत्वंवक्त्रेणानेनवेगिना॥५३॥
भक्षयंतीचररणेतदुत्पन्नान्महासुरान्॥एवमेषक्षयंदैत्यःक्षीणरक्तोभविष्यति॥५४॥भक्ष्यमाणास्त्वयाचो।

स्थानेचास्यस्रवंतिच्चापरे॥५४॥ ऋषिरुवाच॥ इत्युक्त्वातांततोदेवीशूलेनाजघानतं॥ मुखेनकालीजगृहेरक्तबीजस्यशो
॥मा०पु०॥ णितं॥५५॥ ततोसावाजघानाथगदयातत्रचंडिकां॥ नचास्यावेदनांचक्रेगदापातोल्पिकामपि॥५६॥ तस्याहतस्यदेहा
॥११८॥ त्तुबहुसुस्रावशोणितं॥ यतस्ततस्तद्वक्त्रेणचामुंडासंप्रतिछति॥५७॥ मुखेसमुद्गतायेस्यारक्तपातान्महासुराः॥ तांश्च
खादाथचामुंडापपौतस्यचशोणितं॥५८॥ देविशूलेनवज्रेणबाणैरसिभिऋष्टिभिः॥ जघानरक्तबीजंतंचामुंडापी
118 तशोणितं॥५९॥ सपपातमहीपृष्टेशस्त्रसंघसमाहितः॥ नीरक्तश्चमहीपालरक्तबीजोमहासुरः॥६०॥ ततस्तेह
र्षमतुलमवापुस्त्रिदशानृप॥ तेषांमातृगणोजातोननर्त्तासृङ्मदोद्धतः॥६१॥ इतिश्रीमार्कंडेयपुराणेसाव
र्णिकेमन्वंतरेदेवीमाहात्म्येरक्तबीजवधःनामः॥८१॥ राजोवाच॥ विचित्रमिदमाख्यातंभगवन्भवताममा॥ दे
व्याश्चरितमाहात्म्यंरक्तबीजवधाश्रितं॥१॥ भूय श्चेछाम्यहंश्रोतुंरक्तबीजेनिपातिते॥ चकारशुंभोयत्कर्म
निशुंभश्चातिकोपनः॥२॥ ऋषिरुवाच॥ चकारकोपमतुलंरक्तबीजेनिपातिते॥ शुंभासुरोनिशुंभश्चहतेष्वन्ये
षुचाहवे॥३॥ हन्यमानंमहासैन्यंविलोक्यामर्षमुद्वहन्॥ अभ्यधावन्निशुंभोथमुख्ययासुरसेनया॥४॥ तस्या
ग्रतस्तथापृष्टेपार्श्वयोश्चमहासुराः॥ संदष्टौष्टपुटाःक्रुद्धाहंतुंदेवीमुपाययुः॥५॥ आजगाममहावीर्यःशुंभोपि
स्वबलैर्वृतः॥ निहंतुंचंडिकांकोपात्कृत्वायुद्धंतुमातृभिः॥६॥ ततोयुद्धमतीवासीद्देव्याशुंभनिशुंभयोः॥
शरवर्षमतीवोग्रंमेघयोरिववर्षतोः॥७॥ चिछेदास्तान्शरांस्ताभ्यांचंडिकास्वशरोत्करैः॥ ताडयामासचां ॥राम:॥
गेषुशस्त्रौघैरसुरेश्वरौ॥८॥ निशुंभोनिशितंखड्गंचर्म्मचादायसुप्रभं॥ अताडयन्मूर्द्धिसिंहंदेव्यावाहन
मुत्तमं॥९॥ ताडितेवाहनेदेवीक्षुरप्रेणासिमुत्तमं॥ निशुंभस्याशुचिछेदचर्मचाप्यष्टचंद्रकम॥१०॥ छिन्नेच ॥११८॥

र्म्मणि खङ्गे च शक्तिं चिक्षेप सोसुरः॥ तामप्यस्य द्विधा चक्रे चक्रेणाभिमुखागता॥ ११॥ कोपाध्मातो निशुंभोथ शू
लं जग्राह दानवः॥ आयांतं मुष्टिपातेन देवी तच्चाप्यचूर्णयत्॥ १२॥ आविध्याथ गदां सोपि चिक्षेप चंडिकां प्रति॥
सापि देव्या त्रिशूलेन भिन्ना भस्मत्वमागता॥ १३॥ ततः परशुहस्तं तमायांतं दैत्यपुंगवं॥ आहत्य देवी बाणौघैरपा
तयत भूतले॥ १४॥ तस्मिन्निपतिते भूमौ निशुंभे भीमविक्रमे॥ भ्रातर्यतीव संक्रुद्धः प्रययौ हंतुमंबिका॥ १५॥
स रथस्थस्तथात्युच्चैर्गृहीतपरमायुधैः॥ भुजैरष्टाभिरतुलैर्व्याप्याशेषं बभौ नभः॥ १६॥ तमायांतं समालोक्य दे
वी शंखमवादयत्॥ ज्याशब्दं चापि धनुषश्चकारातीव दुःसहं॥ १७॥ पूरयामास ककुभो निजघंटास्वनेन च॥
समस्तदैत्यसैन्यानां तेजोवधविधायिना॥ १८॥ ततः काली समुत्पत्य गगनं क्ष्मामताडयत्॥ कराभ्यां तन्निनादे
न प्राक्स्वनास्ते तिरोहिता॥ २०॥ =॥= ततः सिंहो महानादैस्त्याजितेभमहामदैः॥ पूरयामास गगनं गां तथैव दिशो
दश॥ १९॥ =॥= अट्टाट्टहासमशिवं शिवदूती चकार ह॥ तैः शब्दैरसुरास्त्रेसुः शुंभः कोपं परं ययौ॥ २१॥ दुरात्मंस्ति
ष्ठति ष्ठेति व्याजहारांबिका यदा॥ तदा जयेत्यभिहितं देवैराकाशसंस्थितैः॥ २२॥ शुंभेनागत्य या शक्तिर्मुक्ता
ज्वालातिभीषणा॥ आयांती वह्निकूटाभा सा निरस्ता महोल्कया॥ २३॥ सिंहनादेन शुंभस्य व्याप्तं लोकत्रयां
तरं॥ निर्घातनिस्वनो घोरो जितवानवनीपते॥ २४॥ शुंभमुक्तान् शरान्देवी शुंभस्तत्प्रहितान् शरान्॥ चिच्छे
द स्वशरैरुग्रैः शतशोथ सहस्रशः॥ २५॥ ततः सा चंडिका क्रुद्धा शूलेनाभिजघान तं॥ स तदाभिहतो भूमौ मूर्छितो
निपपात ह॥ २६॥ ततो निशुंभः संप्राप्य चेतनामात्तकार्मुकः॥ आजघान शरैर्देवीं कालीं केसरिणं तथा॥ २७॥
पुनश्च कृत्वा बाहूनामयुतं दनुजेश्वरः॥ चक्रायुतेन दितिजश्छादयामास चंडिकां॥ २८॥ ततो भगवती क्रु

मा० पु० यादुर्गा दुर्गार्त्तिनाशिनी ॥ चिच्छेद तानि चक्राणि स्वशरैः सायकांश्च तान् ॥ २९ ॥ ततो निशुंभो वेगेन गदामादाय चंडिकां ॥ अभ्यधा
वत वै हंतुं दैत्यसेनासमावृतः ॥ ३० ॥ तस्यापतत एवाशु गदां चिच्छेद चंडिका ॥ खड्गेन सितधारेण स च शूलं समाददे ॥ ३१ ॥
११९ शूलहस्तं समायांतं निशुंभममरार्दनं ॥ हृदि विव्याध शूलेन वेगाविद्धेन चंडिका ॥ ३२ ॥ भिन्नस्य तस्य शूलेन हृदयान्निःसृ
तोपरः ॥ महाबलो महावीर्यस्तिष्ठेति पुरुषो वदन् ॥ ३३ ॥ तस्य निष्क्रामतो देवी प्रहस्य स्वनवत्ततः ॥ शिरश्चिच्छेद खड्गेन त
119 तोसावपतद्भुवि ॥ ३४ ॥ ततः सिंहश्च खादोग्रदंष्ट्राक्षुण्णशिरोधरान् ॥ असुरांस्तांस्तथा काली शिवदूती तथा परान् ॥ ३५ ॥
कौमारीशक्तिनिर्भिन्नाः केचिन्नेशुर्महासुराः ॥ ब्रह्माणीमंत्रपूतेन तोयेनान्ये निराकृताः ॥ ३६ ॥ माहेश्वरीत्रिशूलेन भि
न्नाः पेतुस्तथापरे ॥ वाराहीतुंडघातेन केचिच्चूर्णीकृता भुवि ॥ ३७ ॥ खंडं खंडं च चक्रेण वैष्णव्या दानवाः कृताः ॥
वज्रेण चैंद्रीहस्ताग्रविमुक्तेन तथापरे ॥ ३८ ॥ केचिद्विनेशुरसुराः केचिन्नष्टा महाहवात् ॥ भक्षिताश्चापरे कालीशि
वदूतीमृगाधिपैः ॥ ३९ ॥ इति श्रीमार्कंडेयपुराणे सावर्णिके मन्वंतरे देवीमाहात्म्ये निशुंभवधः ॥ ऋषिरुवाच ॥
निशुंभं निहतं दृष्ट्वा भ्रातरं प्राणसम्मितं ॥ हन्यमानं बलं चैव शुंभः क्रुद्धोब्रवीद्वचः ॥ १ ॥ बलावलेपाद्दुष्टे त्वं मा दुर्गे
गर्वमावह ॥ अन्यासां बलमाश्रित्य युद्ध्यसे यातिमानिनी ॥ २ ॥ देव्युवाच ॥ एकैवाहं जगत्यत्र द्वितीया का ममाप
रा ॥ पश्यैता दुष्ट मय्येव विशंत्यो मद्विभूतयः ॥ ३ ॥ ऋषिरुवाच ॥ ततः समस्तास्ता देव्यो ब्रह्माणीप्रमुखा लयं ॥ तस्या
देव्यास्तनौ जग्मुरेकैवासीत्तदांबिका ॥ ४ ॥ देव्युवाच ॥ अहं विभूत्या बहुभिरिह रूपैर्यदास्थिता ॥ तत्संहृतं मयैकै राम:
व तिष्ठाम्याजौ स्थिरो भव ॥ ५ ॥ ऋषिरुवाच ॥ ततः प्रववृते युद्धं देव्याः शुंभस्य चोभयोः ॥ पश्यतां सर्वदेवानामसुरा
णां च दारुणं ॥ ६ ॥ शरवर्षैः सितैः शस्त्रैस्तथास्त्रैश्चैव दारुणैः ॥ तयोर्युद्धमभूद्भूयः सर्वलोकभयंकरं ॥ ७ ॥ दिव्यान्य ११९

119A

स्त्राणि शतशो मुमुचे यान्यथांबिका॥ बभंज तानि दैत्येंद्रस्तत्प्रतीघातकर्तृभिः॥५॥ मुक्तानि तेन चास्त्राणि दिव्या
नि परमेश्वरी॥ बभंज लीलयैवोग्रहुंकारोच्चारणादिभिः॥९॥ ततः शरशतैर्देवीमाच्छादयत सोऽसुरः॥ सापि तत्कु
पिता देवी धनुश्चिच्छेद चेषुभिः॥१०॥ छिन्ने धनुषि दैत्येंद्रस्तथा शक्तिमथाददे॥ चिच्छेद देवी चक्रेण तामप्यस्य क
रे स्थितां॥११॥ ततः खड्गमुपादाय शतचंद्रं च भानुमत्॥ अभ्यधावत्तदा देवीं दैत्यानामधिपेश्वरः॥१२॥ तस्यापततत
एवाशु खड्गं चिच्छेद चंडिका॥ धनुर्मुक्तैः शितैर्बाणैश्चर्म चार्ककरामलं॥१३॥ अश्वांश्च पातयामास रथं सारथि
ना सह॥ हताश्वः स तदा दैत्यश्छिन्नधन्वा विसारथिः॥१४॥ जग्राह मुद्गरं घोरमंबिकानिधनोद्यतः॥ चिच्छेदाप
ततस्तस्य मुद्गरं निशितैः शरैः॥१५॥ तथापि सोऽभ्यधावत्तां मुष्टिमुद्यम्य वेगवान्॥ स मुष्टिं पातयामास हृदये दैत्य
पुंगवः॥ देव्यास्तं चापि सा देवी तलेनोरस्यताडयत्॥१६॥ तलप्रहाराभिहतो निपपात महीतले॥ स दैत्यराजः सहसा
पुनरेव तथोत्थितः॥१८॥ उत्पत्य च प्रगृह्योच्चैर्देवीं गगनमास्थितः॥ तत्रापि सा निराधारा युयुधे तेन चंडिका॥१९॥
नियुद्धं खे तदा दैत्यश्चंडिका च परस्परं॥ चक्रतुः प्रथमं सिद्धमुनिविस्मयकारकं॥२०॥ ततो नियुद्धं सुचिरं कृत्वा
तेनांबिका सह॥ उत्पात्य भ्रामयामास चिक्षेप धरणीतले॥२१॥ स क्षिप्तो धरणीं प्राप्य मुष्टिमुद्यम्य वेगितः॥ अभ्यधा
वत दुष्टात्मा चंडिकानिधनेच्छया॥२२॥ तमायांतं ततो देवी सर्वदैत्यजनेश्वरं॥ जगत्यां पातयामास भित्वा शूलेन
वक्षसि॥२३॥ स गतासुः पपातोर्व्यां देवीशूलाग्रविक्षतः॥ चालयन् सकलां पृथ्वीं साब्धिद्वीपां सपर्वतां॥२४॥ ततः
प्रसन्नमखिलं हते तस्मिन् दुरात्मनि॥ जगत्स्वास्थ्यमतीवाप निर्मलं चाभवन्नभः॥२५॥ उत्पातमेघाः सोल्का ये
प्रागासंस्ते शमं ययुः॥ सरितो मार्गवाहिन्यस्तथासंस्तत्र पातिते॥२६॥ ततो देवगणाः सर्वे हर्षनिर्भरमानसाः॥ बभूवु

निहते तस्मिन् गंधर्वा ललितं जगुः ॥ २४ ॥ अवादयंस्तथैवान्ये ननृतुश्चाप्सरोगणाः ॥ ववुः पुण्यास्तथा वाताः सुप्रभो
मा॰पु॰ ऽभूद्दिवाकरः ॥ जज्वलुश्चाग्नयः शांताः शांता दिग्जनितस्वनाः ॥ इति श्रीमार्कंडेयपुराणे सावर्णिके मन्वंतरे देवी
१२० माहात्म्ये शुंभवधः ॥ १० ॥ ऋषिरुवाच ॥ देव्या हते तत्र महासुरेंद्रे सेंद्राः सुरा वह्निपुरोगमास्तां ॥ कात्यायनीं तुष्टुवु
रिष्टलाभाद्विकाशिवक्त्राब्जविकाशिताशाः ॥ १ ॥ देवा ऊचुः ॥ देवि प्रपन्नार्तिहरे प्रसीद प्रसीद मातर्जगतोऽखिलस्य
120 प्रसीद विश्वेश्वरि पाहि विश्वं त्वमीश्वरी देवि चराचरस्य ॥ २ ॥ आधारभूता जगतस्त्वमेका महीस्वरूपेण यतः स्थि
तासि ॥ अपां स्वरूपस्थितया त्वयैतदाप्यायते कृत्स्नमलंघ्यवीर्ये ॥ ३ ॥ त्वं वैष्णवीशक्तिरनंतवीर्या विश्वस्य बीजं
परमासि माया ॥ संमोहितं देवि समस्तमेतत्त्वं वै प्रसन्ना भुवि मुक्तिहेतुः ॥ ४ ॥ विद्याः समस्तास्तव देवि भेदाः स्त्रियः स
मस्ताः सकला जगत्सु ॥ त्वयैकया पूरितमंबयैतत्का ते स्तुतिः स्तव्यपरापरोक्तिः ॥ ५ ॥ सर्वभूता यदा देवी स्वर्गमुक्ति
प्रदायिनी ॥ त्वं स्तुता स्तुतये का वा भवंतु परमोक्तयः ॥ ६ ॥ सर्वस्य बुद्धिरूपेण जनस्य हृदि संस्थिते ॥ स्वर्गापवर्गदे
देवी नारायणी नमोस्तुते ॥ ॥ कलाकाष्ठादिरूपेण परिणामप्रदायिनी ॥ विश्वस्योपरतौ शक्ते नारायणि न
मोस्तुते ॥ ८ ॥ सर्वमंगलमांगल्ये शिवे सर्वार्थसाधिके ॥ शरण्ये त्र्यंबके गौरी नारायणि नमोस्तुते ॥ ९ ॥ सृष्टिस्थि
तिविनाशानां शक्तिभूते सनातनी ॥ गुणाश्रये गुणमये नारायणी नमोस्तुते ॥ १० ॥ शरणागतदीनार्त्तपरित्राणप
रायणे ॥ सर्वस्यार्त्तिहरे देवि नारायणी नमोस्तुते ॥ ११ ॥ हंसयुक्तविमानस्थे ब्रह्माणीरूपधारिणी ॥ कौशांभःक्षरि
के देवि नारायणि नमोस्तुते ॥ १२ ॥ त्रिशूलचंद्राहिधरे महावृषभवाहिनि ॥ माहेश्वरीस्वरूपेण नारायणि नमोस्तु स॰म॰
ते ॥ १३ ॥ मयूरकुक्कुटवृत्ते महाशक्तिधरेऽनघे ॥ कौमारीरूपसंस्थाने नारायणि नमोस्तुते ॥ १४ ॥ शंखचक्रगदाशार्ङ्ग १२०

121A

त्वासंख्येयगणद्रूपदं ॥ त्रैलोक्यस्यहितार्थायवधिष्यामिमहासुरं ॥ ५० ॥ भ्रामरीतिचमांलोकास्तदास्तोष्यंतिसर्वतः
इत्थंयदायदाबाधादानवोत्थाभविष्यति ॥ तदातदावतीर्याहंकरिष्याम्यरिसंक्षयं ॥ इतिश्रीमार्कंडेयपुराणेसाव
र्णिकेमन्वंतरेदेविमाहात्म्येनारायणीस्तुतिः ॥ ११ ॥ श्रीदेव्युवाच ॥ एभिस्तवैश्चमांनित्यंस्तोष्यतेयःसमाहितः ॥ त
स्याहंसकलांबाधांशमयिष्याम्यसंशयं ॥ १ ॥ मधुकैटभनाशंचमहिषासुरघातनं ॥ कीर्त्तयिष्यंतियेतद्वद्वधंशुंभ
निशुंभयोः ॥ २ ॥ अष्टम्यांचचतुर्दश्यांनवम्यांचैकचेतसः ॥ श्रोष्यंतिचैवयेभक्त्यामममाहात्म्यमुत्तमम् ॥ ३ ॥ नतेषां
दुःकृतंकिंचित्दुःकृतोत्थानचापदः ॥ भविष्यतिनदारिद्र्यंनचैवेष्टवियोजनं ॥ ४ ॥ शत्रुतोनभयंतस्यदस्युतोवान
राजतः ॥ नशस्त्रानलतोयौघात्कदाचित्संभविष्यति ॥ ५ ॥ तस्मान्ममैतन्माहात्म्यंपठितव्यंसमाहितैः ॥ श्रोतव्यंचस
दाभक्त्यापरंस्वस्त्ययनंमहत् ॥ ६ ॥ उपसर्गानशेषांस्तुमहामारीसमुद्भवान् ॥ तथात्रिविधमुत्पातंमहात्म्यंशमये
न्मम ॥ ७ ॥ यत्रैतत्पठ्यतेसम्यङ्नित्यमायतनेमम ॥ सदानतद्विमोक्ष्यामिसांनिध्यंतत्रमेस्थितं ॥ ८ ॥ वलिप्रदानेपू
जायामग्निकार्येमहोत्सवे ॥ सर्वंममैतच्चरितमुच्चार्यंश्राव्यमेवच ॥ ९ ॥ जानताजानतावापिवलिपूजांतथाकृ
तां ॥ प्रतीक्षिष्याम्यहंप्रीत्यावह्निहोमंतथाकृतं ॥ १० ॥ शरत्कालेमहापूजाक्रियतेयाचवार्षिकी ॥ तस्मान्ममैतन्मा
हात्म्यंश्रुत्वाभक्तिसमन्वितः ॥ ११ ॥ सर्वबाधाविनिर्मुक्तोधनधान्यसमन्वितः ॥ मनुष्योमत्प्रसादेनभविष्यनसं
शयः ॥ १२ ॥ श्रुत्वाममैतन्माहात्म्यंतथाचोत्पत्तयःशुभाः ॥ पराक्रमंचयुद्धेषुजायतेनिर्भयःपुमान् ॥ १३ ॥ रिपवःसं
क्षयंयांतिकल्याणंचोपपद्यते ॥ नंदतेचकुलंपुंसांमाहात्म्यंममशृण्वतां ॥ १४ ॥ शांतिकर्मणिसर्वत्रतथादुःस्वप्न
दर्शने ॥ ग्रहपीडासुचोग्रासुमाहात्म्यंशृणुयान्मम ॥ १५ ॥ उपसर्गाःशमंयांतिग्रहपीडाश्चदारुणाः ॥ दुःस्वप्नंच

न्नृभिर्दृष्टं सुस्वप्नमुपजायते॥१६॥ बालग्रहाभिभूतानां बालानां शांतिकारकं॥ संघातभेदे च नृणां मैत्रीकरणमु
॥मा० पु०॥ त्तमं॥१७॥ दुर्वृत्तानामशेषाणां बलहानिकरं परं॥ रक्षोभूतपिशाचानां पठनादेव नाशनं॥१८॥ सर्वं ममैतन्माहात्म्यं
मम संनिधिकारकं॥ पशुपुष्पार्घ्यधूपैश्च गंधदीपैस्तथोत्तमैः॥१९॥ विप्राणां भोजनैर्होमैः प्रोक्षणीयैरहर्निशं॥
॥१२२॥ अन्यैश्च विविधैर्भोगैः प्रदानैर्वत्सरेण या॥२०॥ प्रीतिर्मे क्रियते सास्मिन् सकृदुच्चरिते श्रुते॥ श्रुतं हरति पापा
122 नि तथारोग्यं प्रयच्छति॥२१॥ रक्षां करोति भूतेभ्यो जन्मनां कीर्त्तनं मम॥ युद्धेषु चरितं यन्मे दुष्टदैत्यनिबर्हणं॥
॥२२॥ तस्मिन् श्रुते वैरिकृतं भयं पुंसां न जायते॥ युष्माभिस्तुतयो याश्च याश्च ब्रह्मर्षिभिः कृताः॥२३॥ ब्रह्मणा च कृता
स्तास्तु प्रयच्छंति शुभां मतिं॥ अरण्ये प्रांतरे वापि दावाग्निपरिवारितः॥२४॥ दस्युभिर्वा वृतः शून्ये गृहीतो वापि शत्रु
भिः॥२४॥ सिंहव्याघ्रानुजातो वा वने वा वनहस्तिभिः॥ राज्ञा क्रुद्धेन चाज्ञप्तो वध्यो वंधगतोपि वा॥२५॥ आघूर्णि
तो वा वातेन स्थितः पोते महार्णवे॥ पतत्सु चापि शस्त्रेषु संग्रामे भृशदारुणे॥२६॥ सर्वबाधासु घोरासु वेदनाभ्य
र्दितोपि वा॥ स्मरन्ममैतच्चरितं नरो मुच्येत संकटात्॥२७॥ मम प्रभावात्सिंहाद्या दस्यवो वैरिणस्तथा॥ दूरादेव
पलायंते स्मरतश्चरितं मम॥२८॥ ऋषिरुवाच॥ इत्युक्त्वा सा भगवती चंडिका चंडविक्रमा॥ पश्यतामेव देवानां
तत्रैवांतरधीयत॥२९॥ तेपि देवा निरातंकाः स्वाधिकारान्यथा पुरा॥ यज्ञभागभुजः सर्वे चक्रुर्विनिहतारयः॥३०॥
दैत्याश्च देव्या निहते शुंभे देवरिपौ युधि॥ जगद्विध्वंसके तस्मिन्महोग्रेतुलविक्रमे॥३१॥ निशुंभे च महावीर्ये
शेषाः पातालमाययुः॥ एवं भगवती देवी सा नित्यापि पुनः पुनः॥३२॥ संभूय कुरुते भूप जगतः परिपालनं॥ ॥रामः॥
तयैतन्मोह्यते विश्वं सैव विश्वं प्रसूयते॥ सा याचिता च विज्ञानं तुष्टा ऋद्धिं प्रयच्छति॥३३॥ व्याप्तं तयैतत्सकलं ॥१२२॥

122A

ब्रह्मांडं मनुजेश्वर ॥ महाकाल्या महाकाले महामारीस्वरूपया ॥ सैव काले महामारी सैव सृष्टिर्भवत्यजा ॥ स्थितिं क
रोति भूतानां सैव काले सनातनी ॥ ३५ ॥ भवकाले नृणां सैव लक्ष्मीर्वृद्धिप्रदा गृहे ॥ सैवाभावे तथालक्ष्मीर्विनाशा
योपजायते ॥ ३६ ॥ स्तुता संपूजिता पुष्पैर्धूपगंधादिभिस्तथा ॥ ददाति वित्तं पुत्रांश्च मतिं धर्मे तथा शुभां ॥ ३७ ॥
इति श्रीमार्कंडेयपुराणे सावर्णिके मन्वंतरे देवीमाहात्म्ये फलस्तुतिः ॥ १२ ॥ ऋषिरुवाच ॥ एतत्ते कथितं भूप
देवीमाहात्म्यमुत्तमं ॥ एवंप्रभावा सा देवी ययेदं धार्यते जगत् ॥ विद्या तथैव क्रियते भगवद्विष्णुमायया ॥ २ ॥ तया त्वमे
ष वैश्यश्च तथैवान्ये विवेकिनः ॥ मोह्यंते मोहिताश्चैव मोहमेष्यंति चापरे ॥ ३ ॥ तामुपैहि महाराज शरणं प
रमेश्वरीं ॥ आराधिता सैव नृणां भोगस्वर्गापवर्गदा ॥ ४ ॥ मार्कंडेय उवाच ॥ इति तस्य वचः श्रुत्वा सुरथः स
नराधिपः ॥ प्रणिपत्य महाभागं तमृषिं संशितव्रतं ॥ ५ ॥ निर्विण्णोतिममत्वेन राज्यापहरणेन च ॥ जगाम सद्यस्त
पसे स च वैश्यो महामुने ॥ ६ ॥ संदर्शनार्थमंबाया नदीपुलिनसंस्थितः ॥ स च वैश्यस्तपस्तेपे देवीसूक्तं परं जप
न् ॥ ७ ॥ तौ तस्मिन्पुलिने देव्याः कृत्वा मूर्त्तिं महीमयीं ॥ अर्हणां चक्रतुस्तस्याः पुष्पधूपाग्नितर्पणैः ॥ ८ ॥ निराहा
रौ यतात्मानौ तन्मनस्कौ समाहितौ ॥ ददतुस्तौ बलिं चैव निजगात्रासृगुक्षितं ॥ ९ ॥ एवं समाराधयतोस्त्रिभिर्वर्षै
र्यतात्मनोः ॥ परितुष्टा जगद्धात्री प्रत्यक्षं प्राह चंडिका ॥ १० ॥ देव्युवाच ॥ यत्प्रार्थ्यते त्वया भूप त्वया च कुल
नंदन ॥ मत्तस्तत्प्राप्यतां सर्वं परितुष्टा ददामि वां ॥ ११ ॥ मार्कंडेय उवाच ॥ ततो वव्रे नृपो राज्यमविभ्रंश्यन्यजन्म
नि ॥ अत्रैव च निजं राज्यं हतशत्रुबलं बलात् ॥ १२ ॥ सोपि वैश्यस्ततो ज्ञानं वव्रे निर्विण्णमानसः ॥ ममेत्यहमिति प्राज्ञः
संगविच्युतिकारकं ॥ १३ ॥ देव्युवाच ॥ स्वल्पैरहोभिर्नृपते स्वं राज्यं प्राप्स्यते भवान् ॥ हत्वा रिपूनस्खलितं तव तत्र भ

२

मा० पु० विष्यति ॥ १४ ॥ मृतश्च भूयः संप्राप्य जन्म देवाद्विवस्वतः ॥ सावर्णिको मनुर्नाम भवान्भुवि भविष्यति ॥ १५ ॥ वैश्यवर्य त्व
यायश्च वरोस्मत्तोभिवांछितः ॥ तं प्रयच्छामि संसिद्ध्यै तव ज्ञानं भविष्यति ॥ १६ ॥ मार्कंडेय उवाच ॥ इति दत्वा तयोर्देवी ।
१२३ यथाभिलषितं वरं ॥ बभूवांतर्हिता सद्यो भक्त्या ताभ्यामभिष्टुता ॥ १७ ॥ एवं देव्या वरं लब्ध्वा सुरथः क्षत्रियर्षभः ॥
123 सूर्याज्जन्म समासाद्य सावर्णिर्भविता मनुः ॥ १८ ॥ इति श्रीमार्कंडेयपुराणे सावर्णिके मन्वंतरे देवीमाहात्म्ये सु
रथवैश्ययोर्वरप्रदानं ॥ इति सप्तशतिका समाप्तः ॥ ८६ ॥ ॥ ॥ मार्कंडेय उवाच ॥ सावर्णिकमिदं सम्यक् प्रोक्तं म
न्वंतरं मया ॥ तथैव देवीमाहात्म्यं महिषासुरनाशनं ॥ उत्पत्तिश्च यथा देव्या माहात्म्यं च महाहवे ॥ तथैव संस्लवो दे
व्याश्चामुंडाया स्तथाहवः ॥ शिवदूत्याश्च माहात्म्यं वधः शुंभनिशुंभयोः ॥ रक्तबीजवधश्चैव सर्वमेतत्तवोदितं ॥ श्रू
यतां मुनिशार्दूल सावर्णिकमथापरं ॥ दक्षपुत्रश्च सावर्णो भावी यो नवमो मनुः ॥ कथयामि मनोस्तस्य ये देवा
मुनयो नृपाः ॥ पारा मरीचिगर्भाश्च सुधर्माणस्तथा सुराः ॥ एते त्रयो भविष्यंति सर्वे द्वादशका गणाः ॥ तेषामिं
द्रो भविष्यस्तु सहस्राक्षो महाबलः ॥ अद्भुतो नाम कुलिशी गजेंद्रवरवाहनः ॥ सांप्रतं कार्त्तिकेयो यो वह्निसु
तः षडाननः ॥ अद्भुतो नाम शक्रोसौ भावी तस्यांतरे मनोः ॥ मेधातिथिर्वसुः सत्यो ज्योतिष्मान् द्युतिमांस्तथा ॥
सप्तर्षयोन्यः सवनस्तथान्यो हव्यवाहनः ॥ धृतकेतुर्दीप्तिकेतुः पंचहस्तो निरामयः ॥ पृथुश्रवास्तथार्चि ।
ष्मान्भूरिद्युम्नो बृहद्भयः ॥ एते नव सुतास्तस्य दक्षपुत्रस्य वै नृपाः ॥ मनोस्तु दशमस्यान्यत् शृणु मन्वंतरं राम
द्विज ॥ मन्वंतरे तु दशमे ब्रह्मपुत्रस्य धीमतः ॥ सुखासीना विरुद्धाश्च द्विप्रकाराः सुरास्तथा ॥ शतसंख्याहिते
देवा भविष्यं[illegible] स्तत्र वै मनोः ॥ यस्तु त्वाणां शतं भावि तद्देवानां तदा शतं ॥ शांतिरिंद्रस्तथा भावी सर्वे हि तु गुणैर्यु १२३
ति

123A

तः॥ सप्तर्षींस्तु निबोध त्वं ये भविष्यंति वै तदा॥ आपोमूर्त्तिर्हविष्मांश्च सुकृती सत्य एव च॥ नाभागो प्रतिमश्चै
व वसिष्ठश्चैव सप्तमः॥ सुक्षेत्रश्चोत्तमौजाश्च भूरिषेनश्च वीर्यवान्॥ शतानीको वृषसेनो निरमित्रो जय
द्रथः॥ भूरिद्युम्नः सुवर्चाश्च तस्यैते तनया मनोः॥ भविष्य धर्मपुत्रस्य सावर्णोनंतरं शृणु॥ विहंगमाः काम
गाश्च निर्माणरतयस्तथा॥ त्रिप्रकारा भविष्यंति एकैकस्त्रिंशको गणः॥ मासर्त्तुदिवसा ये तु निर्माणरत
यस्तु ते॥ विहंगमा रात्रयो यमी मुहूर्त्तः कामगा गणः॥ इंद्रो वृषाख्यो भविता तेषां प्रख्यातविक्रमः॥ हविष्मां
श्च तथा विप्रः कृषिरन्यस्तथारुणिः॥ निश्चरश्चानघश्चैव वरवश्चान्यो महामुनिः॥ सप्तर्षयोंतरे तस्मिन्नग्नि
तेजाश्च सप्तमः॥ सर्वत्रगः सुधर्मा च देवानीकः पुरूद्वहः॥ हिमधन्वा दृढायश्च विजनस्तत्सुतान्वयाः॥ द्वादशो
रुद्रपुत्रस्य प्राप्ते मन्वंतरे मनोः॥ सावर्णाख्यस्य ये देवा मुनयश्च शृणुष्व तान्॥ सुधर्माणः सुमनसो हरितारो
हितास्तथा॥ सुपाराश्च सुरास्तत्र पंचैते दशका गणाः॥ तेषामिंद्रस्तु विज्ञेयः शतधामा महाबलः॥ सर्वैरिंद्रगु
णैर्युक्तः सप्तर्षीन् पि मे शृणु॥ द्युतिस्तपस्वी सुतपास्तपोमूर्त्तिस्तपोनिधिः॥ तपोधनस्तथैवान्यः सप्तमस्तु
तपोद्युतिः॥ देववानुपदेवश्च देवश्रेष्ठो विदूरथः॥ मित्रवान्मित्रदृतश्च भाविनस्तत्सुतान्वयाः॥ त्रयोदशस्य
पर्यायो रोच्याख्यस्य मनोः सुताः॥ सप्तर्षींश्च सुरांश्चैव गदतो मे निशामय॥ सुधर्माणः सुरास्तत्र सुकर्मा
णस्तथापरे॥ सुशर्माणः सुताश्चैते समस्ता मुनिसत्तम॥ महाबलो महावीर्यस्तेषामिंद्रो दिवस्पतिः॥ भविष्य
स्य यस सप्तर्षीन् गदतो मे निशामय॥ धृतिमानव्ययश्चैव तत्त्वदर्शी निरुत्सुकः॥ निर्मोहः सुतपाश्चान्यो निःप्र
कंपश्च सप्तमः॥ चित्रसेनो विचित्रश्च नयभून्निर्भयो दृढः॥ सुनेत्रः क्षत्रवृद्धश्च सुरथश्चैव तत्सुताः॥ ४

॥मा०पु०॥ इतिश्रीमार्कंडेयपुराणेरौच्यंमन्वंतरेनाम ॥ ९७ ॥ मार्कंडेयउवाच ॥ रुचिःप्रजापतिःपूर्वंनिर्ममोनिरहंकृतिः ॥
यत्रास्तमितिशायीचचचारपृथिवीमिमां ॥ अनग्निमनिकेतंतमेकाहारमनाश्रयं ॥ विमुक्तसंगंतंदृष्ट्वाप्रोचुः
॥१२४॥ स्वपितरोमुनिं ॥ पितरऊचुः ॥ वत्सकस्मात्त्वयापुण्योनकृतोदारसंग्रहः ॥ स्वर्गापवर्गहेतुत्वाद्बंधस्तेनानिशंवि
ना ॥ गृहीसमस्तदेवानांपितृणांचतथार्हणं ॥ ऋषिणामतिथीनांचकुर्वंल्लोकानुपाश्नुते ॥ स्वाहोच्चारणतो
124 देवान्स्वधोच्चारणतःपितॄन् ॥ विभजत्यन्नदानेनभूताद्यानतिथीनपि ॥ सत्वंदैवादृणाद्बंधंबंधमस्मदृ
णादपि ॥ अवाप्नोषिमनुष्यर्षिभूतेभ्यश्चदिनेदिने ॥ अनुत्पाद्यसुतान्देवानसंतर्प्यपितॄंस्तथा ॥ भूतादींश्च →
कथंमोघात्सुगतिंगंतुमिच्छसि ॥ क्लेशमैहिकंपुत्रमन्यामोत्रभवेत्तव ॥ मृतस्यनरकंतद्वत्क्लेशमेवान्यजन्म
नि ॥ रुचिरुवाच ॥ परिग्रहोतिदुःखायपापायाधोगतिस्तथा ॥ भवत्यतोमयापूर्वंनकृतोदारसंग्रहः ॥ आत्मनःसंय
मोयोयंक्रियतेऽक्षानियंत्रणात् ॥ समुक्तिहेतुर्नभवत्यसावपिपरिग्रहात् ॥ प्रक्षाल्यतेनुदिवसंयदात्मानिःप
रिग्रहैः ॥ ममत्वपंकदिग्धोपिविमलांभोभिरीहितः ॥ अनेकभवसंभूतकर्मपंकांकितोबुधैः ॥ आत्मासद्धास
नातोयैःप्रक्षाल्योनियतेंद्रियैः ॥ पितरऊचुः ॥ युक्तंप्रक्षालनंकर्तुमात्मनोनियतेंद्रियैः ॥ किंतुलेयायमार्गोयं
यत्रत्वंपुत्रवर्त्तसे ॥ यंच [illegible] र्णोदानैरशुभंनुद्यतेनभिसंधितैः ॥ फलैस्तथोपभोगैश्चपूर्वकर्मशुभाशुभैः ॥ एवं
नबंधोभवतिकुर्वतःकारणंविना ॥ नचबंधायतत्कर्मभवत्यनभिसंधितं ॥ पूर्वकर्मकृतंभोगैःक्षीयतेहानि
शंतथा ॥ सुखदुःखात्मकैर्वत्सपुण्यापुण्यात्मकैर्नृणां ॥ एवंप्रक्षाल्यतेप्राज्ञैरात्मचित्याचरक्ष्यते ॥ नत्वेवम ॥राम०॥
विवेकेनपापपंकेनलिप्यते ॥ रुचिरुवाच ॥ अविद्यापठ्यतेवेदेकर्ममार्गःपितामहाः ॥ तत्कथंकर्मणोमार्गेभ ॥१२४॥

बंधाद्ध

सोद्या यवि षव ज्जी

र 124A

वंतो योऽत्र यंति च पितर ऊचुः ॥ अविद्यासत्यमेवैतत्कर्मनैतन्मृषावचः ॥ किंतु विद्यापरिप्राप्तौ हेतुः कर्म न संशयः
विहिताकरणात्सम्यक्सद्भिः क्रियते तु यः ॥ संयमो मुक्तये नासौ प्रत्युताधोगतिप्रदः ॥ प्रक्षालयामीति भवान्यत्सात्मानं तु म
न्यते ॥ विहिताकरणोद्भूतैः पापैस्त्वं तु विलिप्यसे ॥ अविद्याप्युपकारायं ते [illegible]न्नृणां ॥ अनुष्ठिता स्युर्या येन बंधा
याभ्यासतो हि सः ॥ तस्माद्वत्स कुरु यत्नं विधिवद्दारसंग्रहं ॥ माजन्म विफलं तेस्तु असंप्राप्यान्यलौकिकम् ॥ रु
चिरुवाच ॥ वृद्धोहं सांप्रतं को मे पितरः संप्रदास्यति ॥ भार्यां तथा दरिद्राय दुःकरो दारसंग्रहः ॥ पितर ऊचुः ॥ अ
स्माकं पतनं वत्स भवतश्चाप्यधोगतिः ॥ नूनं भावि भवित्री च नाभिनंदसि नो वचः ॥ श्रीमार्कं० ॥ इत्युक्त्वा पित
रस्तस्य पश्यतो मुनिसत्तम ॥ बभूवुः सहसादृश्या दीपा वातहता इव ॥ इति श्रीमार्कंडेयपुराणे रौच्यमन्वं
तरे चतुरशीतितमः ॥ श्रीमार्कं० ॥ स तेन पितृवाक्येन भृशमुद्विग्नमानसः ॥ कन्यामलभमानोसौ पितृवा
क्याग्निदीपितः ॥ चिंतामवाप महतीं मतोवोद्विग्नमानसः ॥ किं करोमि क्व गच्छामि कथं मे दारसंग्रहः ॥ क्षि
प्रं भवेत्पितृणां यो ममाभ्युदयकारकः ॥ इति चिंतयतस्तस्य मतिर्जाता महात्मनः ॥ तपसाराधयाम्येनं ब्रह्मा
णं कमलोद्भवं ॥ ततो वर्षशतं दिव्यं तपस्तेपे स वेधसं ॥ दिदृक्षुः सुचिरं कालं महर्षिर्नियमस्थितः ॥ ततस्त
दर्शयामास ब्रह्मा लोकपितामहः ॥ उवाच च प्रसन्नोस्मि ब्रूहि यत्तेभिवांछितं ॥ ततो प्रणिपत्याह ब्रह्मा सौ
णं जगतः पतिं ॥ पितॄणां वचनात्तेन यत्कर्तुमभिवांछितं ॥ ब्रह्मा चाह रुचिं विप्र श्रुत्वा तस्याभिवांछितं ॥ प्र
जापतिस्त्वं भविता स्रष्टव्या भवता प्रजाः ॥ सृष्ट्वा प्रजाः सुतान्विप्र समुत्पाद्य क्रियास्तथा ॥ ततः कृताधिका
रस्त्वं वत्स सिद्धिमवाप्स्यसि ॥ स त्वं यथोक्तं पितृभिः कुरु दारपरिग्रहं ॥ कामं चेममभिध्याय क्रियतां पितृपू

र कन्याभिलाषी विप्रर्षिः परिवमामनोदुर्गां

जनं॥ तएवतुष्टाः पितरः प्रदास्यंतितथेप्सितं॥ पत्नीसुतांश्चसंतुष्टाः किंनदद्युः पितामहाः॥ मार्कंडेय उ०॥ इत्यर्षिर्वि
॥मा० पु०॥ नंश्रुत्वाब्रह्मणोव्यक्तजन्मनः॥ नद्याविविक्तेपुलिनेचकारपितृतर्प्पणं॥ तुष्टावचपितॄन्विप्रस्तवैरेभिरथा
॥१२५॥ दृतः॥ एकाग्रप्रयतोभूत्वाभक्तिनम्रात्मकोरुचिः॥ रुचिरुवाच॥ नमस्येहंपितॄन्भक्त्यायेवसंत्यधिदेवतं॥ देवै
रपितर्प्यंतेयेश्राद्धेषुस्वधोत्तरं॥ नमस्येहंपितॄन्श्राद्धेसंतर्प्यंतेमहर्षिभिः॥ श्राद्धेर्मनोमयैर्भक्त्याभुक्तिमुक्तिम
125 भीप्सुभिः॥ नमस्येहंपितॄन्स्वर्गेसिद्धाःसंतर्पयंतियान्॥ श्राद्धेषुदिव्यैःसकलैरुपहारैरनुत्तमैः॥ नमस्येहंपितॄन्भ
क्त्यायेर्च्यंतेगुह्यकैर्दिवि॥ तन्मयत्वेनवांछद्भिर्ऋद्धिमात्यंतिकींपरां॥ नमस्येहंपितॄन्मर्त्यैरर्च्यंतेभुवियेसदा॥ श्राद्धेषु
श्रद्धयाभीष्टलोकेपुष्टिप्रदायिनः॥ नमस्येहंपितॄन्विप्रैरर्च्यंतेभुवियेसदा॥ वांछिताभीष्टलाभायप्राजापत्य
प्रदायिनः॥ नमस्येहंपितॄन्वैवैतर्प्यंतेरण्यवासिभिः॥ वन्यैःश्राद्धेर्यताहारैस्तपोनिर्द्धूतकल्मषैः॥ नमस्येहंपि
तॄन्विप्रैर्नैष्ठिकब्रह्मचारिभिः॥ येसंयतात्मभिर्नित्यंसंतर्प्यंतेसमाधिभिः॥ नमस्येहंपितॄन्श्राद्धेराजन्यास्तर्प्पयं
तियान्॥ कव्यैरशेषैर्विविधैर्लोकद्वयफलप्रदान्॥ नमस्येहंपितॄन्वैश्यैरर्च्यंतेभुवियेसदा॥ स्वकर्माभिरतैर्नित्यं
पुष्पधूपान्नवारिभिः॥ नमस्येहंपितॄन्श्राद्धेयेशूद्रैरपिभक्तितः॥ संतर्प्यंतेजगत्यत्रनाम्नाख्याताःसुकालि
नः॥ नमस्येहंपितॄन्श्राद्धेपातालेयेमहासुरैः॥ संतर्प्यंतेसुधाहारास्त्यक्तदंभमदैःसदा॥ नमस्येहंपितॄन्श्रा
द्धेस्वर्च्यंतेयेरसातले॥ भोगैरशेषैर्विविधैर्नागैःकामानभीप्सुभिः॥ नमस्येहंपितॄन्श्राद्धेसर्प्पैःसंतर्प्पितान् ॥रामः॥
सदा॥ तत्रैवविधिवन्मंत्रैर्भोगैःसंपत्समन्वितैः॥ पितॄन्नमस्येनिवसंतिसाक्षाद्येदेवलोकेथमहीतलेवा॥ येच्यं
तरिक्षेचसुरादिपूज्यास्तेसंतीक्षंतुनयोपनीतं॥ पितॄन्नमस्येपरमानुभूतायेवैविमानेविवसंत्सम[illegible]ः ॥१२५॥

प्र

125A

यजंति यानस्तमलैर्मनोभिर्योगीश्वराः क्लेशविमुक्तहेतून् ॥ पितॄन्नमस्ये दिवि ये च मूर्त्ताः सुधाभुजः काम्यफलानुसं-
धौ ॥ प्रदानसक्ताः सकलेप्सितानां विमुक्तिदा ये ऽनभिसंधितेषु ॥ तृप्यंतु तेस्मिन्पितरः समस्ता इच्छावतां संप्रदिशंतु का-
मान् सुरत्वमिंद्रत्वमतोधिकं वा गजाश्वरत्नानि महागृहाणि ॥ सोमस्य ये रश्मिषु येर्कविंबे शुक्ले विमाने च सदा वसं-
ति ॥ तृप्यंतु तेस्मिन्पितरोन्नतोयैर्गंधादिना पुष्टिमितो व्रजंतु ॥ येषां हुतेग्नौ हविषापि तृप्तिर्ये भुंजते विप्रशरीरसं-
स्थाः ॥ ये पिंडदानेन मुदं प्रयांति तृप्यंतु तेस्मिन्पितरोन्नतोयैः ॥ ये खड्गमांसेन सुरैरभीष्टैः कृष्णैस्तिलैर्दिव्यमहोर-
गैश्च ॥ कालेन शाकेन महर्षिवर्यैः संप्रीणितास्ते मुदमत्र यांतु ॥ कव्यान्यशेषाणि च यान्यभीष्टान्यतीव तेषाममर-
र्चितानां ॥ तेषां च सान्निध्यमिहास्तु गंधपुष्पादिभोज्येषु मया हृतेषु ॥ दिने दिने ये प्रतिगृह्णतेर्च्चां मासांतपूज्या
भुवि येष्टकासु ॥ ये वत्सरांतेभ्युदये च पूज्याः प्रयांतु ते मे पितरोत्र तृप्तिं ॥ ये ब्राह्मणानां कुमुदेंदुभासो ये क्षत्रियाणां
च नवार्कवर्णाः ॥ तथा विशां ये कनकावदाता नीलीनिभाः शूद्रजनस्य ये च ॥ तेस्मिन्समस्ता मम पुष्पगंधधूपा-
न्नतोयादिनिवेदितेन ॥ तथाग्निहोमेन च यांतु तृप्तिं सदा पितृभ्यः प्रणतोस्मि तेभ्यः ॥ ये देवपूर्वाणि च तृप्ति-
हेतोरश्नंति कव्यानि शुभाहृतानि ॥ तृप्ताश्च ये भूतिसृजो भवंति तृप्यंतु तेस्मिन्प्रणतोस्मि तेभ्यः ॥ रक्षांसि भूता-
न्यसुरांस्तथोग्रान्निर्नाशयंत्वस्तु शिवं प्रजानां ॥ आद्याः सुराणाममरेशपूज्यास्तृप्यंतु तेस्मिन्प्रणतोस्मि तेभ्यः ॥ अ-
ग्निष्वात्ता बर्हिषदः आज्यपाः सोमपास्तथा ॥ प्रयांतु तृप्तिं श्राद्धेस्मिन्पितरस्तर्पिता मया ॥ अग्निष्वात्ताः पितृगणाः
प्राचीं रक्षंतु मे दिशं ॥ तथा बर्हिषदः पांतु याम्यां ये पितरः स्थिताः ॥ प्रतीचीमाज्यपास्तद्वदुदीचीमपि सोमपाः ॥ वि-
श्वेदेवा अधः पातु ऊर्द्ध्वं पातु मरुद्गणाः ॥ रक्षोभूतपिशाचेभ्यः तथैवासुरदोषतः ॥ सर्वतश्चाधिपस्तेषां यमो

रक्षां करोतु मे ॥ विश्वे विश्वभुगाराध्यो धर्मो धन्यः शुभाननः ॥ भूतिदो भूतिकृद्भूतिः पितृणां ये गणा न ॥ कल्याणः कल्य
मा०पु० ॥ दः कर्त्ता कल्यः कल्यतराश्रयः ॥ कल्यताहेतुरनघः षडिमे ते गणाः स्मृताः ॥ वरो वरेण्यो वरदस्तुष्टिदः पुष्टिदस्त
॥१२६॥ था ॥ विश्वपाता तथा धाता सप्त चैते गणाः स्मृताः ॥ महान्महात्मा महितो महिमाच महाफलः ॥ गणाः पंच तथैवै
ते पितृणां पापनाशनाः ॥ सुखदो धनदश्चान्यो धर्मदोन्यश्च भूतिदः ॥ पितृणां कथ्यते चैव तथा गणचतुष्ट
126 यं ॥ एकत्रिंशत्पितृगणा यैर्व्याप्तमखिलं जगत् ॥ ते मेत्र तृप्तास्तुष्यंतु यच्छंतु च सदा हितं ॥ मार्कंडेय उवाच ॥
एवं तु स्तुवतस्तस्य तेजसो राशिरुच्छ्रितः ॥ प्रादुर्बभूव सहसा गगनव्याप्तिकारकः ॥ तं दृष्ट्वा तु महत्तेजः समासाद्य
स्थितं जगत् ॥ जानुभ्यामवनिं गत्वा रुचिः स्तोत्रमिदं जगौ ॥ अमूर्त्तानां च मूर्त्तानां पितृणां दीप्ततेजसां ॥ न
मस्यामि सदा तेषां ध्यानिनां दिव्यचक्षुषां ॥ इंद्रादीनां जनेतारो दक्षमारीचयोस्तथा ॥ सप्तर्षीणां तथान्येषां
तान्नमस्यामि कामदान् ॥ मन्वादीनां जनेतारः सूर्याचंद्रमसोस्तथा ॥ तान्नमस्याम्यहं सर्वान्पितृन्नप्स्वर्णवे
षु च ॥ नक्षत्राणां ग्रहाणां च वाय्वग्न्योर्नभसस्तथा ॥ द्यावापृथिव्योश्च तथा नमस्यामि कृतांजलिः ॥ प्रजापतेः
कश्यपाय मायवरुणाय च ॥ योगेश्वरेभ्यश्च तथा नमस्यामि कृतांजलिः ॥ नमो गणेभ्यः सप्तेभ्यस्तथा
लोकेषु सप्तसु ॥ स्वयंभुवे नमस्यामि ब्रह्मणे योगचक्षुषे ॥ सोमाधाराः पितृगणा योगमूर्त्तिधरा हिते ॥ न
मस्यामि ततः सोमं पितरं जगतामहं ॥ अग्निरूपास्तथैवान्यान्नमस्यामि पितृनहं ॥ अग्निषोममयं विश्वं ॥रामः॥
यत एतदशेषतः ॥ ये तु तेजसि ये चैते सोमसूर्याग्निमूर्त्तयः ॥ जगत्स्वरूपिणश्चैव तथा ब्रह्मस्वरूपिणः ॥
तेभ्योखिलेभ्यो योगिभ्यो योगिभ्यः यतमानसः ॥ नमो नमो नमस्ते मे प्रसीदंतु स्वधाभुजः ॥ श्रीमार्कंडेउ० ॥१२६॥

126A

एवं स्तुतास्ततस्तेन तेजसो मुनिसत्तम॥ निश्चक्रमुस्ते पितरो भासयंतो दिशो दश॥ निवेदितं तु यत्तेन पुष्पगंधानुलेपनं
तद्भूषितानथ स तान्ददृशे पुरतः स्थितान्॥ प्रणिपत्य रुचिर्भक्त्या पुनरेव कृतांजलिः॥ नमस्तुभ्यं नमस्तुभ्यमि
त्याह पृथगादृतः॥ ततः प्रसन्नाः पितरस्तमूचुर्मुनिसत्तमं॥ वरं वृणीष्वेति स तानुवाचानतकंधरः॥ सांप्रतं सर्गकर्तृत्व
मादिष्टं ब्रह्मणा मम॥ सोहं पत्नीमभीप्सामि धन्यां दिव्यां प्रजावतीं॥ पितर ऊचुः॥ अद्यैव सद्यः पत्नी ते भविष्यति म
नोरमा॥ तस्यां च पुत्रो भविता भवतो मुनिसत्तम॥ मन्वंतराधिपो धीमांस्त्वन्नाम्नैवोपलक्षितः॥ रुचेरौच्य इति ख्या
तिं प्रयास्यति जगत्त्रये॥ तस्यापि बहवः पुत्रा महाबलपराक्रमाः॥ भविष्यंति महात्मानः पृथिवीपरिपालकाः॥ त्वं च
प्रजापतिर्भूत्वा प्रजाः सृष्ट्वा चतुर्विधाः॥ क्षीणाधिकारो धर्मज्ञ ततः सिद्धिमवाप्स्यसि॥ स्तोत्रेणानेन च नरो यो स्मां
स्तोष्यति भक्तितः॥ तस्य तुष्टा वयं भोगान्दास्यामो ज्ञानमुत्तमं॥ शरीरारोग्यमैश्वर्यं पुत्रपौत्रादिसंततिं॥ प्रदास्यामो
न संदेहो यच्चान्यदपि वांछितं॥ तस्मात्पुण्यफलं लोके वांछद्भिः सततं नरैः॥ पितॄणां चाक्षयां तृप्तिं स्तव्याः स्तोत्रेण
मानवैः॥ श्राद्धे च य इमं भक्त्यास्मत्प्रीतिकरं स्तवं॥ पठिष्यति द्विजाग्र्याणां भुंजतां पुरतः स्थितः॥ स्तोत्रश्रवण
संप्रीत्यास्संनिधाने परे कृते॥ अस्माभिरक्षयं श्राद्धं तद्भविष्यत्यसंशयं॥ यद्यप्यश्रोत्रियं श्राद्धं यद्यप्युपहतं भवे
त्॥ अश्रद्धया वा सुरुषेदंभमाश्रित्य वा कृतम्॥ अस्माकं प्रीतये श्राद्धं तथाप्येतदुदीरणात्॥ यत्रैतत्पठते श्राद्धे
स्तोत्रमस्मत्सुखावहम्॥ अस्माकं जायते तृप्तिस्तत्र द्वादशवार्षिकी॥ हेमंते द्वादशाब्दानि तृप्तिमेतत्प्रयच्छति॥ शि
शिरे द्विगुणाब्दानि तृप्तिं स्तोत्रमिदं श्रुतम्॥ वसंते षोडशसमास्तृप्तये श्राद्धकर्मणि॥ ग्रीष्मे च षोडशैवेतत्पठितं तृ
प्तिकारकम्॥ विकाले च कृते श्राद्धे स्तोत्रेणानेन साधिते॥ वर्षासु तृप्तिरस्माकमक्षया जायते स्तवे॥ शरत्काले

मा० पु० पिपठितव्यं श्राद्धकाले प्रयच्छति ॥ अस्माकमेतत्सुरुचेस्तवं पंचदशाहिकीम् ॥ यस्मिन्नाहे पिलिखितमेतत्तिष्ठ
॥१२७॥ ति नित्यदा ॥ संनिधाने कृते श्राद्धे तत्रास्माकं भविष्यति ॥ तस्मादेतत्त्वया श्राद्धे विप्राणां भुंजतां पुरः ॥ श्रावणीयं म
हाभाग अस्माकं तुष्टिकारकम् ॥ इति श्रीमार्कं० रौच्यमन्वंतरे पितृस्तवे पंचाशीतितमोऽध्यायः ॥ श्रीमार्कंडेय
उवाच ॥ ततस्मान्नदीमध्यात्समुत्तस्थौ मनोरमा ॥ प्रम्लोचा नाम तन्वंगी तत्समीपे वराप्सराः ॥ सा चोवाच म
127 हात्मानं रुचिं सुमधुराक्षरम् ॥ प्रसादयावन्तास्तु भः प्रम्लोचाख्या वराप्सराः ॥ अतीव रूपिणी कन्या मत्सु
तात पतां वर ॥ जाता वरुणपुत्रेण पुष्करेण महात्मना ॥ तां गृहाण मया दत्तां भार्यार्थे वरवर्णिनीम् ॥ मनुर्महाम
तिस्तस्यां समुत्पत्स्यति ते सुतः ॥ मार्कंडेय० ॥ तथेति तेन चाप्युक्ता तस्मात्तोयाद्वपुष्मती ॥ उज्जहार ततः का
न्यां मालिनी नाम नामतः ॥ तथाश्च पुलिने तस्मिन्समुत्तिर्मुनिसत्तम ॥ जग्राह पाणिं विधिवत्समानाय्य महामुनी
न् ॥ तस्यां तस्य सुतो जज्ञे महावीर्यो महामतिः ॥ रौच्यो भवत्पितुर्नाम्ना ख्यातोत्र वसुधातले ॥ तस्य मन्वंतरे
देवास्तथा सप्तर्षयश्च ये ॥ तनयाश्च नृपाश्चैव ते सम्यक् कीर्तितास्तव ॥ धर्मवृद्धिस्तथारोग्यं धनधान्यसुतोद्भ
वः ॥ नृणां भवत्यसंदिग्धमस्मिन्मन्वंतरे श्रुते ॥ पितृस्तवं तथा श्रुत्वापि हृणां च तथा गणान् ॥ सर्वकामानवा
प्नोति तत्प्रसादान्नरो मुने ॥ इति श्रीमार्कंडेयपुराणे रौच्यमन्वंतरं नाम षडशीतितमोऽध्यायः ॥ श्रीमार्कंडेय उ
अतः परं तु भौत्यस्य तस्य सुरुत्पत्तिर्निशामय ॥ देवानृषींस्तथा पुत्रांस्तथैव वसुधाधिपान् ॥ वभूवांगिरसः पुत्रो भू ॥रामः॥
तिर्नामाति कोपनः ॥ चंडः शाप प्रदोल्पेपि मुनिरागस्य सौम्यवाक् ॥ तस्याश्रमे मृतरिश्वा तनस्मवाति सुनि ॥१२७॥
ष्ठुरम् ॥ नातिसायं रविश्चक्रो पर्जन्योनाकर्दमम् ॥ नातिशीतं च शीतांशुः परिपूर्णोपि रश्मिभिः ॥ चकार भीत्या

यतस्य क्रोधनस्यातितेजसः ॥ ऋतवश्च क्रमं हित्वाहस्याश्रमजन्मसु ॥ तस्य पुष्पफलं चक्रुराज्ञया सर्वकालि
कम् ॥ ऊहुर्यत्यश्च छंदेन तस्याश्रमसमीपतः ॥ कमंडलुगतांश्चैव तस्य भीतामहात्मनः ॥ नातिक्लेशसहो विप्रः सो
भवः न्दूरकोपनः ॥ अपुत्रश्च महाभागः सततपस्यकरोन्मनः ॥ पुत्रकामो निराहारः शीतवातानलाहतः ॥ तपस्ता
मीति चिंत्यायतपस्येवमनोदधे ॥ तस्यैदुर्नातिशीतायनातितापाय भास्करः ॥ अभवन्मातरिश्वापि न ववौ च म
हामुने ॥ न पीड्यमानो द्वंद्वैश्च स महर्षिर्मुनिसत्तमः ॥ अनवाप्याभिलषितं तपसः भ्रातासुवर्चा भूद्यज्ञे तेन निमं
त्रितः ॥ यियासुः शांतिनामानं शिष्यं स महामुनिः ॥ प्रशांतमसुद्रतमं विनीतं गुरुकर्मणि ॥ सदोद्युक्तं सदाचारं मु
दारं मुनिसत्तमा ॥ भूतिः अहं मिष्यामि भ्रातुः शांते सुवर्चसः ॥ तेनाहूतस्त्वया चेह यत्कर्त्तव्यं शृणुष्व तत ॥ प्रतिजा
गरणं वह्नेस्त्वया कार्यं ममाश्रमे ॥ तथा तथा भ्रम तेन यथाग्निर्न शमं ब्रजेत ॥ इत्याज्ञाप्यतथेत्युक्तः स तु शिष्येन शांतिना ॥
जगाम यज्ञं तं भ्रातुराहूतः सयवीयसः ॥ सच शांतिर्वनाद्यावत्समित्पुष्पफलादिकं ॥ उपानयति हृत्सर्वं गुरोस्तस्य
महात्मनः ॥ अन्यच्च कुरुते कर्म गुरुभक्तिवशानुगः ॥ प्रशांतस्तावदनलो यो सो भूति परिग्रहः ॥ तं दृष्ट्वा सोनलं शांतं
शांतिरत्यंतदुःखितः ॥ भीतश्च भूतेर्बहुधा चिंतयत्स महामतिः ॥ किं करोमि कथं चात्र महत्यागसि मे गुरोः ॥ म
याद्य प्रतिपत्तव्यं किं कृतं सुकृतं भवेत् ॥ प्रशांताग्निमिमं धिष्ण्ये यदि द्रक्ष्यति मे गुरुः ॥ ततो मामविवेघे सव्यसनेस
नियोक्ष्यति ॥ यद्यन्यमग्निमत्राहमग्निस्थाने करोमि तत् ॥ सर्वप्रत्यक्षदृक्स सोवश्यं मां करिष्यति ॥ सोहं पापो
गुरोस्तस्य निमित्तं कोपशापयोः ॥ तथात्मानं न शोचामि यथाचायकृतं गुरोः ॥ दृष्ट्वा प्रशांतमनलं नूनं शप्स्यति मे गु
रुः ॥ अथवा यावनकं तदुस्तयाचोर्योहसांदिर्जः ॥ यस्य कोपाद्धत्रस्यंते देवास्तिष्ठंति शासने ॥ कृतागसं स मां गु

॥ मा० पु० ॥ तथा कथा नो घ्रशपिष्यति ॥ मार्कंडेय उवाच ॥ बहुधैवं विचिंत्यासौ भीतस्तस्य तदा गुरोः ॥ प्रययौ मतिमतां श्रेष्ठः शरणं
जातवेदसं ॥ स चकार तदा स्तोत्रं स मार्कंडेयतमानसः ॥ सत्त्वैकचित्तो मेदिन्यां न्यस्तजानुः कृतांजलिः ॥ प्रांतिरुवा
॥ १२८ ॥ च ॥ ॐ नमः सर्वभूतानामाधाराय महात्मने ॥ एकत्रिपंचधिष्ण्याय नमस्ते च षडात्मने ॥ नमः समस्तदेवानां वृत्तिदा
य सुवर्चसे ॥ शुक्ररूपाय जगतामशेषाणां स्थितिप्रदः ॥ त्वं मुखं सर्वदेवानां त्वयात्तं भगवान्हविः ॥ प्रीणयत्यखिला
128 न्देवान्त्वत्प्राणाः सर्वदेवताः ॥ हुतं हविस्त्वय्यनलमेघत्वमुपगच्छति ॥ ततश्च जलरूपेण परिणाममुपैति त
त् ॥ ततोखिलौषधीजन्म भवत्यनिलसारथे ॥ ओषधीभिरशेषाभिः सुखं जीवंति जंतवः ॥ वितन्वते नरा यज्ञा न
सतीषु= न्स्त्वत्सृष्टास्वौषधीषु च ॥ यज्ञैर्देवास्तथा दैत्यास्त्वद्भूतरसांसि पावक ॥ आप्याय्यंते ते ततो यज्ञास्त्वदाधारा हुताशन ॥
अतः सर्वस्य योनिस्त्वं सर्वमयस्तथा ॥ देवता दानवा यक्षा दैत्या गंधर्वराक्षसाः ॥ मानवाः पशवो वृक्षा मृगपक्षि
सरीसृपाः ॥ आप्याय्यंते त्वया सर्वे संवर्ध्यंते च पावक ॥ त्वत्त एवोद्भवं यांति त्वय्यंते च तथा लयं ॥ अपः सृज
सि देव त्वं त्वमत्सि पुनरेव ताः ॥ पच्यमानास्त्वया जाताः प्राणिनां तुष्टिकारकैः ॥ देवेषु तेजोरूपेण कांत्या सिद्धेष्व
वस्थितः ॥ विषरूपेण नागेषु वायुरूपेण पक्षिषु ॥ मनुजेषु भवान्क्रोधो मोहः पश्वादिषु ॥ अवतिष्ठसि ष्टभो
तरुषु काठिन्यं त्वं मही भूतः ॥ जलेद्रवत्वेन भवान्जवरूपी तथानिलैः ॥ व्यापित्वेन तथैवाग्ने नभसि त्वं व्यवस्थि
तः ॥ त्वमग्ने सर्वभूतानामंतश्चरसि पावक ॥ त्वामेकमाहुः कवयस्त्वामाहुस्त्रिविधं पुनः ॥ त्वामष्टधा कल्पाय वास्तवं=
अष्टमूर्तिं= त्वा यज्ञवाहमकल्पयन् ॥ त्वया सृष्टमिदं विश्वं वदंति परमर्षयः ॥ त्वदृते हि जगत्सर्वं सद्यो नश्याद्धुताशन ॥ तुभ्यं कृ ॥ राम ॥
शिवं= त्वा द्विजाः पूजां स्वकर्मविहितां गतिं ॥ प्रयांति हव्यकव्याद्यैः स्वाहा स्वधासुदीरणात् ॥ परिणामात्मवीर्योसि ॥ १२८ ॥
वक्ष्यमाणना
मष्टकमूर्तिं=

128A

प्राणिनाममरार्चितः ॥ दहंतिसर्वभूतानित्वत्तोनिष्क्रम्यहायनाः ॥ जातवेदस्त्वयैवेदंविश्वंसृष्टंमहाद्युते ॥ तथैववैदिकं
कर्मसर्वभूतात्मकंजगत् ॥ नमस्तेनलपिंगायनमस्तेस्तुहुताशन ॥ पावकायनमस्तेस्तुनमस्तेहव्यवाहन ॥ त्व
मेवभुक्तपीतानांपाचनाद्विश्वपालकः ॥ सस्यानांपाककर्तात्वंपोष्टात्वंजगतस्तथा ॥ त्वमेवमेघस्त्वंवायुस्त्वंवीज पो=
सस्यहेतुकं ॥ पोषायसर्वभूतानांभूतभव्यस्तथाप्यसि त्वंज्योतिःसर्वभूतेषुत्वमादित्योविभावसुः ॥ त्वमहस्त्वंतथारात्रिरुभेसंध्ये
संध्ये तथाभवान् हिरण्यरेतास्त्वं वह्नेहिरण्योद्भवकारणं ॥ हिरण्यगर्भश्चभवान्हिरण्यसदृशप्रभः ॥ त्वंमुहूर्तःक्षणश्चत्वंत्रुटिस्त्वंचतथानल ॥ गालयो वनादि
कलाकाष्ठानिमेषादिरूपेणासिजगत्प्रभो ॥ त्वमेतदखिलंकालःपरिणामात्मकोभवान् ॥ याजिह्वाभवतःकाली
कालनिष्ठाकरीप्रभो ॥ तयानःपाहिपापेभ्यःऐहिकाच्चमहाभयात् ॥ करालीनामयाजिह्वामहाप्रलयकारि
णी ॥ तयानःपाहिपापेभ्यःऐहिकाच्चमहाभयात् मनोजवाचयाजिह्वालघिमाव्यक्तलक्षणा ॥ तयानःपाहिपा
पेभ्यःऐहिकाच्चमहाभयात् ॥ कपोतरागांभूतेभ्योयातेजिह्वासुलोहिता ॥ तयानःपाहिपापेभ्यःऐहिकाच्चमहा
रोति= भयात् ॥ धूम्रवर्णाचयाजिह्वाप्राणिनांरोगदायिनी ॥ तयानःपाहिपापेभ्यऐहिकाच्चमहाभयात् ॥ स्फुलिंगिनीचया
जिह्वामनश्चंचलपिंगला ॥ तयानःपाहिपापेभ्यऐहिकाच्चमहाभयात् ॥ यातेविश्वसृजाजिह्वाप्राणिनांशर्मदा
यिनी ॥ तयानःपाहिपापेभ्यऐहिकाच्चमहाभयात् ॥ पिंगाक्षलोहितग्रीवकृष्णवर्त्मन्हुताशन ॥ पाहिमांस
र्वपापेभ्यःसंसाराद्दुद्धरेहमां ॥ प्रसीदवह्नेसप्तार्चिःकृशानोहव्यवाहन ॥ अग्नेपावकशुक्रादेनमोनामाष्टकस्तु
त ॥ अग्नेग्रेसर्वभूतानांसमुद्भूतविभावसो ॥ प्रसीदहव्यवाहाख्यअभिष्टुतमयाव्यय ॥ त्वमक्षयःकोप्यविचिं र:
[illegible]ःसमृद्धिमान्दुःप्रसहोतितीव्र ॥ तवाव्ययंभीममशेषलोकसंवर्त्तकंभाव्ययचातिवीर्यं ॥ त्वमुत्तमंत

अस्मिन् कुंडे=१ प्रलये=

॥मा० पु०॥ त्वमग्नेषसत्त्वहरसुंदरीकस्यमनंतमोऽयं॥ त्वयाततंसर्वमिदंचराचरंहुताशनैकोबहुधात्वमत्र॥ त्वमस्तयासग्नि
रिवनावसुंधरात्वमंबरंसरविनिस्माकरादिकं॥ महोदधेज्जठरगतश्चवाडवोभवान्विभुःपिवतिपयांसिया
॥१२६॥ वकः॥ हुताशनस्त्वमितिचपठ्यतेसदाक्रतोनियमपरैर्महात्मभिः॥ अभिष्टुतःपिवसिचसोममध्वरेवषट्कृता
न्यपिचहवींषिभूतये॥ त्वंविप्रैःसततमिहेज्यसेफलार्थंवेदांगेष्वपिसकलेषुगीयसेच॥ त्वद्धेतोर्यजनप म
129 रायणाद्विजेंद्रावेदांगान्यधिगमयंतिसर्वकाले॥ त्वंब्रह्मायजनपरास्तथैवविष्णुर्भूतेशःसुरपतिरर्यमाज
ऽसुरा लेशः॥ सूर्येंदूसकलसुराश्चहव्यैःसंतोष्याभिमतफलान्यवाप्नुवंति॥ अर्चिर्भिःपरममहोपघातदुष्टंसंस्पृष्टंतवशु
चिजायतेसमस्तं॥ स्नानानांपरममतीवभस्मनायत्संसिद्धैर्मुनिभिरतीवसेव्यतेतत्॥ प्रसीदवह्नेशुचिनामधे प्र
यप्रसीदवायोरमलातिदीप्त॥ प्रसीदमेपावकवैहुताशप्रसीदहव्याशनपाहिमांत्वं॥ यत्तेवह्नेशिवंरूपंयाश्च वैद्युताख्य=
तेसप्तहेतयः॥ तैःपाहिनस्तुतोदेवपितापुत्रमिवात्मजं॥ मार्कंडेयउवाच॥ एवंस्तुतस्ततस्तेनभगवान्हव्यवा
हनः॥ ज्वालामालावृतस्तस्यासीदग्रतोमुनेः॥ देवोविभावसुःप्रीतःस्तोत्रेणानेनवैद्विज॥ तंशांतिमाहाप्र
णतंमेघगंभीरयागिरा॥ परितुष्टोस्मितेविप्रभक्त्यायातेस्तुतिःकृता॥ वरंदास्यामिभवतेततःप्रार्थ्यतायत्तवेप्सितं॥ द
मांतिरुवाच॥ भगवन्कृतकृत्योस्मियत्त्वांपश्यामिरूपिणं॥ तथापिभक्तिनम्रस्यभगवान्श्रूयतांमम॥
भ्रातायद्ग्रंगतोदेवममाचार्योनिजाश्रमात्॥ आगतःस्वाश्रमेधिष्ण्यंत्वत्सनाथंसपश्यतु॥ ममापराधात्संस्य
क्तंषतेधिष्ण्यंविभावसो॥ तत्त्वयाधिष्ठितंसोद्यपूर्ववत्पश्यतांद्विजः॥ तथान्यदपिमेदेवप्रसादंकुरुषेयदि॥ पुत्रो ॥राम॥
विशिष्टोभवतुनिरपत्यस्यमेगुरोः॥ यथाचमेत्रीतनयेसकरिष्यतिमेगुरुः॥ तथासमस्तसत्त्वेषुभवत्वस्यम ॥१२६॥

×४ मन्वंतराधिपश्चायं भौत्यो नाम भविष्यति ४×

129A

नोमस्तु॥ यश्च त्वां स्तोष्यते तेन प्रीतिं यातोस्मि येन मे॥ स्तोत्रेणांतस्य वरदो भवेयामल्पसादितः॥ मार्कंडेय उवाच॥
एतच्छ्रुत्वा वचस्तस्य तमाह द्विजसत्तमं॥ स्तोत्रेणाराधितो नेन गुरुभक्त्या च पावकः॥ अग्निरुवाच॥ गुरोरर्थाय
तोऽस्मन्न याचितं ते वरद्वयं॥ नात्मार्थे तेन मे प्रीतिस्त्वय्यवतीव महामुने॥ भविष्यसे तदखिलं गुरोर्यत्प्रार्थितं त्व
या मे त्रीसमस्तभृतेसु पुत्रश्चास्य भविष्यति॥ महाबलो महावीर्यो महाप्राज्ञो गुरोस्तव॥ अनेन यश्च स्तोत्रेण स्तो
ष्यते मां समाहितः॥ तस्याभिलषितं सर्वं पुण्यं चाग्र्यं भविष्यति॥ यज्ञेषु सर्वकालेषु तीर्थेज्याहोमकर्मसु॥ धर्मा
य पठतामेतन्मम तुष्टिकरं परं॥ अहोरात्रकृतं पापं श्रुतमेतत्सकृद्द्विज॥ नाशयिष्यत्यसंदिग्धं मम तुष्टिकरं परं॥
अहोमकाले देशाद्वयोग्यैरयवाहुतैः॥ येचे पास्तानिदं सद्यः शमयिष्यति संश्रुतं॥ यो र्णमास्याममावास्यां सर्वे
ष्वन्येषु वै द्विज॥ ममैव विश्रुतो मर्त्यैर्भविता पापनाशनः॥ मार्कंडेय उवा॥ इत्युक्त्वा भगवानग्निः पश्यतस्तस्य वै मुनेः
वभूवादर्शनं सद्यः प्रदीपोग्निरिवानिले॥ स च शांतिं गते वह्नौ परितुष्टेन चेतसा॥ जातशांतिर्महातेजाः प्रविवेशा
श्रमं गुरोः॥ जाज्वल्यमानं ददृशे गुरुधिष्ण्ये हुताशनं॥ स एवं चंद्रमिव प्राप ततः स परमां मुदं॥ एतस्मिन्नंतरे सो
पि गुरुस्तस्य महात्मनः॥ भ्रातुर्यवीयसो यज्ञादाजगाम स्वमाश्रमं॥ तस्यागतस्य शिष्योसौ चक्रे पादाभिवंदनं॥
गृहीतासन पूजश्च तमाह स तदा गुरुः॥ वत्सातिहार्दं त्वयि मे तथान्येषु च जंतुषु॥ न वेद्मि किमिदं त्वं चेद्वेत्सि मे
तत्कथय यथाशुभं॥ ततः स शांतिः तत्सर्वमाचार्याय महात्मने॥ अग्निनाशादिकं विप्र समाचष्टे यथातो॥ तच्छ्रुत्वा
संपरिष ~~ध्रुवेरोच्य श्रुत्वानरोत्तरं॥ देवप्रसादमाप्नोति भौत्यस्य मन्वंतरे श्रुते~~ ज्य स्नेहार्द्रनयनो गुरुः॥ शिष्याय प्रद
दौ वेदान्ससांगोपांगान्महामुने॥ भौत्यो नाम्ना मुनेस्तस्य पुत्रो भूत्तेरजायत॥ तस्य मन्वंतरे देवान्नाषीन्नृपांश्च

स्तवः

पवस्तव =

॥ मा०पु० ॥ मेष्य एव ॥ भविष्यस्य मनविष्यांश्चरा द्वतो मम विस्तरात् ॥ देवेंद्रो यश्च भविता तस्य विख्यात कर्म्मणः ॥ चाक्षुषाश्च क
निष्ठाश्च पवित्रा भ्राजिनस्तथा ॥ वाचावृद्धाश्च इत्येते पंच देवगणाः स्मृताः ॥ शुचिरिंद्रस्तथा तेषां त्रिदशानां भ
॥ १३७ ॥ विष्यति ॥ महाबलो महावीर्यः सर्वैरिंद्रगुणैर्युतः ॥ अग्निध्रश्चाग्निबाहुश्च शुचिर्युक्तोऽथ माधवः ॥ शुक्रोऽजित
श्च सप्तैते तदा सप्तर्षयः स्मृताः ॥ गुरुर्गभीरो बुधश्च तरस्वीन्नय एव च ॥ प्रतिमांश्च प्रवीरश्च विष्णुः संक्रंदनस्त
था ॥ तेजस्वी च बलश्चैव भौत्यस्यैते मनोः सुताः ॥ चतुर्दशं मयैतत्ते मन्वंतरमुदाहृतं ॥ श्रुत्वा मन्वंतराण्येवं क्र
130 मेण मुनिसत्तम ॥ पुण्यमाप्नोति च तथा शीलपापश्च संतति ॥ श्रुते मन्वंतरे पूर्वे धर्ममाप्नोति मानवः ॥ १
स्वारोचिषस्य श्रवणात्सर्वान्कामानवाप्नुयात् ॥ औत्तमे धनमाप्नोति ज्ञानमाप्नोति तामसे ॥ रैवते च श्रुते बुद्धिं
नूस्वरूपां विंदते स्त्रियं ॥ आरोग्यं चाक्षुषे पुंसां श्रुते वैवस्वते बलं ॥ गुणवत्पुत्रपौत्रं च सूर्यसावर्णिके श्रुते ॥ मा
हात्म्यं ब्रह्मसावर्णे धर्मसावर्णिके शुभां ॥ मतिमाप्नोति मनुजो रुद्रसावर्णिके शुभां ॥ मतिमाप्नोति मनुजो रुद्र जयं
सावर्णिके जयं ॥ ज्ञातिश्रेष्ठो गुणैर्युक्तो दक्षसावर्णिके श्रुते ॥ विशान्तयस्य रिबलैरो च्चंश्रुत्वा नरोत्तमः ॥ देवप्रसा
दमाप्नोति भौत्ये मन्वंतरे श्रुते ॥ तथाग्निदीप्तिपुत्रांश्च गुणयुक्तानवाप्नुयात् ॥ सर्वाण्यनुक्रमाद्यस्तु शृणोति मु
निसत्तम ॥ मन्वंतराणि तस्यापि श्रूयतां फलमुत्तमं ॥ तत्र देवानृषींन्विप्रान्मनून्तत्तनयान्नृपान् ॥ इंद्रांश्च श्रुत्वा
सर्वेभ्यः पापेभ्यो विप्रमुच्यते ॥ देवेंद्रर्षिनृपाश्चान्ये ये च मन्वंतराधिपाः ॥ प्रीयंते तथा प्रीताः प्रयच्छंति शुभां ॥ राम ॥
मतिं ॥ ततः शुभां मतिं प्राप्य कृत्वा कर्म तथा शुभं ॥ शुभां मतिमवाप्नोति यावदिंद्राश्चतुर्दश ॥ सर्वे स्युऋतवः क्षेमाः
सर्वे सौम्यास्तथा ग्रहाः ॥ भवंत्य संशयं श्रुत्वा क्रमान्मन्वंतरस्थितिं ॥ इति श्रीमार्कंडेयपुराणे मन्वंतरकथा समाप्त ॥ ॥ १३७ ॥

क्रोष्टुकिरुवाच ॥ भगवन्कथितासम्यक्ममममन्वंतरस्थितिं । क्रमाद्विस्तरतस्त्वत्तोमयाचैवावधारिता ॥ ब्रह्माद्यमखिलंव
वंशंमनुजांद्विजसत्तम ॥ श्रोतुमिच्छाम्यहंसम्यक्भगवन्प्रब्रवीहिमे ॥ मार्कंडेयउवाच ॥ शृणुवत्सन्नृपाणांत्वमशेषाणां
समुद्भवं ॥ चरितंचजगन्मूलमादौकृत्वाप्रजापतिं ॥ अयंवंशोहिभूपालैरनेकक्रतुकर्तृभिः ॥ संग्रामोद्भिर्द्धर्मज्ञैःशत जि
संख्यैरलंकृतः ॥ श्रुत्वाचैषांनरेंद्राणांचरितानिमहात्मनां ॥ समुत्पत्तीश्चपुरुषःसर्वपापैःप्रमुच्यते ॥ मनुर्यत्रमहेक्ष्वाकु तथे
रनरण्योभगीरथः ॥ अन्येचशतशोभूपाःसम्यक्पालितभूमयः ॥ धर्मज्ञायज्विनःशूराःसम्यक्परमवेदिनः ॥ श्रुत्वाचै
प्र नंपुमान्वंशंपापौघाद्विमुच्यते ॥ तदयंश्रूयतांवंशोयतोवंशाःसहस्रशः ॥ भिद्यंतेमनुजेंद्राणांअवरोहायथावटात् ॥ ब्र
ह्माप्रजापतिःपूर्वंसिसृक्षुर्विविधाःप्रजाः ॥ अंगुष्ठाद्दक्षिणाद्दक्षमसृजद्द्विजसत्तम ॥ वामांगुष्ठाच्चतत्पत्नीजगत्सूतिकरीप्रभुः ॥
ससृजेभगवान्ब्रह्माजगतांकारणंपरं ॥ अदितिस्तस्यदक्षस्यकन्याजायतशोभना ॥ तस्यांचकश्यपोधीमान्मार्त्तंडंसम
जीजनत् ॥ ब्रह्मरूपंजगतामशेषाणांपरायणं ॥ आदिमध्यांतभूतंचसर्गस्थित्यंतकर्मसु ॥ यतोखिलमिदंयस्मिन्नशे
स्व षंचस्थितंद्विज ॥ यत्स्वरूपंजगच्चेदंसदेवासुरमानुषं ॥ यःसर्वभूतःसर्वात्मापरमात्मासनातनः ॥ अदित्यांभगवान्भास्वान्
पूर्वमाराधितस्तया ॥ क्रोष्टुकिरु० ॥ भगवन्श्रोतुमिच्छामिस्वरूपंविवस्वतः ॥ यत्कारणाच्चादिदेवःसोभवत्कश्यपात्मजः ॥ य
कथंचाराधितोदेव्यासौऽदित्याकश्यपेनच ॥ आराधितेनचोक्तंयत्तेनदेवेनभास्वता ॥ प्रभावंचावतीर्णस्ययथावन्मु
निसत्तम ॥ भवताकथितंसम्यक्श्रोतुमिच्छाम्यशेषतः ॥ मार्कंडेयउवा० ॥ विसृष्टेपरमाविद्याज्योतिर्भोःशाश्वतीस्फुटा ॥ कै
वल्यंज्ञानमाविर्भूःप्राकाश्यंसंविदेवतु ॥ बोधकश्चगतिश्चैवस्मृतिर्विज्ञानमेवच ॥ एवमादीनिरूपाणितस्यारूपस्यभा
स्वतः ॥ श्रूयतांचमहाभागगदतोममविस्तरात् ॥ यस्यश्ववान्नसिरवेराविर्भावोयथाभवत् ॥ निष्प्रभेस्मिन्निरालोकेसर्वे

मा०पु० तस्मिन्समावृते॥ बृहदंडमभूदेकमक्षरंकारणंपरं॥ तद्भिदेदतदंतस्थोभगवान्प्रपितामहः॥ प्रयोनिःस्वयंब्रह्मायःसृष्टाजग
१३२ तांप्रभुः॥ तन्मुखादोमितिमहानभूच्छब्दोमहामुने॥ अभवद्भूर्भुवस्तस्मात्तश्चस्वरनंतरं॥ एताव्याहृतयस्तिस्रःस्वरूपं
तद्विवस्वतः॥ ॐमित्यस्मात्स्वरूपात्तुसूक्ष्मरूपंरवेःकृतं॥ ततोमहरितिस्थूलंजनस्थूलतरंततः॥ ततस्तपःसत्यमितिमूर्त्तो
न्येतानिसप्तधानिस्थितस्यस्वरूपाणिभवंतिनभवंतिच॥ अभावभावयेद्वाचयतोगच्छत्यसंश्रयं॥ आद्यंतपरमंसूक्ष्ममरू
131 रूपंरूपसंश्रयं॥ ॐमित्युक्तंमयाविप्रतत्परंब्रह्मतद्वपुः॥ इतिश्रीमार्कंडेयपुराणेवंशकथायापक्रमे॥४१॥ मार्कंडेयउवाच॥
तस्माद्ब्रह्मांडाद्भिन्नात्तुब्रह्मणोऽव्यक्तजन्मनः॥ ऋचोबभूवुःप्रथमंप्रथमाद्वदनान्मुने॥ जपापुष्पनिभाःसद्यस्तेजोरूपा मा
ह्यसंहता॥ पृथक्पृथक्विभिन्नाश्चरजोरूपामहात्मनः॥ यजूंषिदक्षिणाद्वक्त्रादनिबद्धानिकानिचित्॥ यादृग्वर्णं
तथावर्णान्यसंहतिधराणिवै॥ पश्चिमंयद्विभोर्वक्त्रंब्रह्मणःपरमेष्ठिनः॥ आविर्भूतानिसामानिततःकुंदसितान्य
पि॥ अथर्वाणमशेषेणभिन्नांजनसमप्रभं॥ घोराघोरस्वरूपंतदाभिचारिकशांतिमत्॥ उत्तरात्प्रकटीभूतंवदनात्त
स्यवेधसः॥ सुखंसत्वतमःप्रायंसौम्यासौम्यस्वरूपवत्॥ ऋचोरजोगुणासत्वंयजुषांवगुणोमुने॥ तमोगुणानिसामानि
तमःसत्वमथर्वसु॥ एतानिज्वलमानानितेजसाप्रतिमेनवै॥ पृथक्पृथगवस्थानमभ्यांडिपूर्वमिवाभवत्॥ ततस्तदाद्यंय
श्री त्तेजओंमित्युक्ताभिधंततं॥ तस्यस्वभावाद्यत्तेजस्तत्समावृत्यसंस्थितं॥ तथायजुर्मयंतेजोयच्चसाम्नांमहामुने॥ एकत्व
मुपयातानिपरेतेजसिसंश्रयं॥ शांतिकंपौष्टिकंचैवतथाचैवाभिचारिकं॥ ऋगादिषुलयंब्रह्मन्नत्रितयंत्रिषुयोगमत॥ त राम:
तोविश्वमिदंसद्यस्तमोपायाहतंनिर्मलं॥ बभावतीवविप्रर्षेतिर्यगूर्ध्वमधस्तथा॥ ततस्तन्मंडलीभूतंछांदसंतेजउत्त १३२
मं॥ परेणतेजसाब्रह्मन्नेकत्वमुपगम्यतत्॥ आदित्यसंज्ञामगमदादावेवयतोभवत्॥ विश्वस्योंमहाभागकारणं

स्य

131A

चाव्ययात्मकं ॥ प्रातर्मध्यंदिने चैव तथा चैवापराह्णिके ॥ त्रयी तपति सा काले ऋग्यजुःसामसंज्ञिता ॥ ऋचस्तपं
ति पूर्वाह्णे मध्याह्ने च यजूंषि च ॥ सामानि चापराह्णे तु तपंति मुनिसत्तम ॥ शांतिकं वर्द्धपूर्वाह्णे यजुः पौंतश्च पौष्टिकं ॥ अप
राह्णे स्थितं नित्यं साम स्वेभाभिचारिकं ॥ सृष्टौ च ऋग्मयो ब्रह्मा स्थितौ विष्णुर्यजुर्मयः ॥ रुद्रः साममयो ते च तस्मान्नस्या
शुचिर्ध्वनिः ॥ तदेवं भगवान्भास्वान्वेदात्मा वेदसंस्थितः ॥ वेदविद्यात्मकश्चैव परः पुरुष उच्यते ॥ सर्गस्थित्यंतहेतुः स
रजःसत्वादिकान्गुणान् ॥ आश्रित्य ब्रह्मविष्ण्वादिसंज्ञामभ्येति शाश्वतः ॥ देवैः स वेद्यः स तु वेदमूर्त्तिरमूर्त्तिराद्यो
खिलमूर्त्तिमूर्त्तिः ॥ विश्वाश्रयं ज्योतिरवेद्यधर्मो धर्मो वदातः परमः परेभ्यः ॥ इति श्रीमार्कंडेयपुराणे ॥ १०२ ॥ मार्कंडे
य उवाच ॥ तस्य संतप्यमानस्य तेजसोर्ध्वमधस्तथा ॥ सिसृक्षुश्चिंतयामास यश्च योनिः पितामहः ॥ सृष्टिः कृतापि मे नाशं
प्रयास्यत्यतितेजसा ॥ भास्वतः सृष्टिसंहारस्थितिहेतोर्महात्मनः ॥ अप्राणाः प्राणिनः सर्वे आपः शुष्यंति तेजसा ॥ न
चांभसा विना सृष्टिर्विश्वस्यास्य भविष्यति ॥ इति संचिंत्य भगवान्स्तोत्रं भगवतो रवेः ॥ चकार तन्मयो भूत्वा ब्रह्मा
लोकपितामहः ॥ ब्रह्मोवाच ॥ नमामि यन्मयं सर्वमेतत्सर्वमयश्च यः ॥ विश्वमूर्त्तिः परंज्योतिः यत्तध्यायंति योगिनः ॥
यस्त्वृङ्मयो यो यजुषां निधानं साम्नां च यो योनिरचिंत्यशक्तिः ॥ त्रयीमयः स्थूलतयार्द्धमात्रापरस्वरूपो गुणतया
च योग्यः ॥ तं सर्वहेतुं परमं च वेद्यमाद्यं परं ज्योतिरवाच्यरूपं ॥ स्थूलं च वेदात्मतया नमस्ये भास्वंतमाद्यं परमं
परेभ्यः ॥ सृष्टिं करोमि यदहं तव शक्तिराद्यात्तत्प्रेरितं जलमहीपवनाग्निरूपं ॥ देहादिकं सकलदेवतामये
यमात्मा स्वकृत्या स्थितिलयावपि तद्वदेव ॥ वह्निस्त्वमेव जलशोषणतः पृथिव्याः सृष्टिं करोषि जगतां च तथा विपा
कं ॥ व्यापी त्वमेव गगनं पवनस्वरूपस्त्वं पंचधा जगदिदं परिपासि सृष्टं ॥ यज्ञैर्यजंति परमार्थविदो भवंतं वि

मध्याह्ने =

वेदैः

सूक्ष्मरूपमखिलेष्टिमयं विवस्वन् ॥ ध्यायंति चापि यतयो नियतात्मचित्ताः सर्वेश्वरं परममात्मविमुक्तिकामाः ॥
॥ मा० पु० ॥ नमस्ते वेदरूपाय यज्ञरूपाय ते नमः ॥ परब्रह्मस्वरूपाय चिंत्यमानाय योगिभिः ॥ उपसंहर तेजस्त्वं तेजसः संहति
॥ १३२ ॥ स्तव ॥ सृष्टेर्विघाताय विभो सृष्टौ चाहं समुद्यतः ॥ मार्कंडेय उ० ॥ इत्येवं संस्तुतो भास्वान् ब्रह्मणा सृष्टिकारिणा ॥ उ
पसंहृतवांस्तेजः परं स्वल्पमधारयत् ॥ चकार च ततः सृष्टिं जगतः पद्मसंभवः ॥ यथान्येषु महाभाग पूर्वकल्पा
132 तरेषु वै ॥ देवासुरादिमर्त्यांश्च पश्वादीन्वृक्षवीरुधः ॥ ससर्ज पूर्ववद्ब्रह्मा नरकांश्च महामुने ॥ इति श्रीमार्कंडेय
पुराणे ब्रह्मकृतसूर्यस्तवः ॥ ९८ ॥ मार्कंडेय उवाच ॥ सृष्ट्वा जगदिदं ब्रह्मा प्रविभागमथाकरोत् ॥ वर्णाश्रमसमुद्रा
यथा दिद्वीपानां पूर्ववत् ॥ विदेभ्य एव भगवान् करोत्कमलोद्भवः ॥ ब्रह्मणस्तनयो योऽभून्मरीचिरिति विश्रुतः ॥ कश्यपस्त
स्य पुत्रोऽभूत्काश्यपानांपि काश्यपः ॥ दक्षस्य तनुया ब्रह्मंस्तस्य भार्याः त्रयोदश ॥ बहवस्तत्सुताश्चासन् देवदैत्योर
गादयः ॥ अदितिर्जनयामास देवांस्त्रिभुवनेश्वरान् ॥ दैत्यान्दितिर्दनुश्चोग्रान्दानवान्भूरिविक्रमान् ॥ गरुडारुणौ
च विनता यक्षरक्षांसि वै खसा ॥ कद्रूस्तु सुषुवे नागान् गंधर्वान्सुषुवे मुनिः ॥ क्रोधायाजज्ञिरे कन्या रिष्टायाश्चा
प्सरोगणाः ॥ ऐरावतादीन्मातंगानिरा च सुषुवे द्विज ॥ सुकी च सुषुवे श्येनीप्रमुखाः कन्यका द्विज ॥ यासां प्रसूतः ख
गमाः श्येनभासशुकादयः ॥ इलायाः पादपा जाताः प्रधायाश्चाप्सरोगणाः ॥ दितौ यावै समुत्पन्ना कश्यपस्य तिसं
ततिः ॥ तस्याश्च पुत्रदौहित्रपौत्रदौहित्रिकादिभिः ॥ व्याप्तमेतज्जगत्सर्वं सा तेषां तासां च वै मुने ॥ तेषां कश्यपपुत्राणां
प्रधाना देवतागणाः ॥ सात्विका राजसास्त्वन्ये तामसाश्च मुनेगणाः ॥ देवान्यज्ञभुजश्चक्रे तथा त्रिभुवनेश्वरान् ॥ ब्र ॥ रामः ॥
ह्मा ब्रह्मविदां श्रेष्ठः परमेष्ठी प्रजापतिः ॥ ततस्ते सहिताः सर्वे सपत्न्या दैत्यदानवाः ॥ राक्षसाश्च तदा युद्धं ते यामासी ॥ १३२ ॥

स्तुदारुणं ॥ दिव्यवर्षसहस्राणि तत्राजीयंत देवताः ॥ जयिनश्चाभवन्बलिप्रबलिनो दैत्यदानवा ॥ ततो निराकृतान्पु
त्रान्दैतेयैर्दानवैस्तथा ॥ हृतत्रिभुवनान्दृष्ट्वा अदितिर्मुनिसत्तम ॥ आछिन्नयज्ञभागांश्च क्षुधासंपीडितान्भृशं ॥
आराधनाय सवितुः परं यत्नं प्रचक्रमे ॥ एकाग्रनियताहारा परं नियममास्थिता ॥ तुष्टाव तेजसां राशिं गगनस्थं
दिवाकरं ॥ अदितिरुवाच ॥ नमस्तुभ्यं परं सूक्ष्मं सौवर्णं बिभ्रते तुलं ॥ धाम धामवतामीश धाम्नामाधार शाश्वतः
जगतामुपकाराय तस्यायस्तव गोपते ॥ आददानस्य यद्रूपं तीव्रं तस्मै नमाम्यहं ॥ गृहीतमष्टमासेन कालेनेंदुमयं र
सं ॥ बिभ्रतस्तव यद्रूपमतितीव्रं नमामि तत् ॥ तमेव मुंचतः सर्वरसं वै वर्षणाश्रयं ॥ रूपमाप्यायकं भास्वस्तस्मै मेघाय
ते नमः ॥ वायसर्गे विनिष्पन्नमशेषं चौषधीगणं ॥ पचतस्तव यद्रूपं भास्करं तं नमाम्यहं ॥ यच्च रूपं तवातीव हिमो
त्सर्गो हिमशीतलं ॥ कालेस्यांसदियोषायतरणे तन्नमाम्यहं ॥ नातितीव्रं च यद्रूपं नातिशीतं च यत्तव ॥ वसंततौ रवे
सौम्यं तस्मै देव नमोस्तु ते ॥ आप्यायकमशेषाणां देवानाममलात्मकं ॥ पितॄणां च नमस्तस्मै सम्यक्यज्ञैकहेतु
वे ॥ यद्रूपं धारणायैकं वीरुधाममृतात्मकं ॥ पीयते देवपितृभिस्तस्मै सोमाय ते नमः ॥ आप्यायदाहरूपाभ्यां रूपं
विश्वमिदं तव ॥ समेतमग्नीषोमाभ्यां नमस्तस्मै गुणात्मने ॥ यद्रूपमृग्यजुःसाम्नामैक्येन तपते तव ॥ विश्वमेतत्त्रयीसं
ज्ञं नमस्तस्मै विभावसो ॥ यत्तु तस्मात्परं रूपं ॐमित्युक्त्वाभिशब्दितं ॥ अस्थूलं स्थूलमात्रं च नमस्तस्मै सनातन ॥ मार्क
ण्डेय उवाच ॥ एवं सा नियता देवी चक्रे स्तोत्रमहर्निशं ॥ निराधारा विवस्वंतमाराधयितुमुने ॥ ततः कालेन महता
भगवान्तपनो मुने ॥ प्रत्यक्षतामगात्तस्या दाक्षायिण्या द्विजोत्तम ॥ सा ददर्श महाकूटं तेजसोंबरसंस्थितं ॥ भूमौ
च संस्थितं भास्वन्तं ज्वालामालातिदुर्दृशं ॥ तं च दृष्ट्वा ततो देवी संत्रासं परमागता ॥ जगदाद्य प्रसीदेति न त्वां पश्या

मिगोपते॥ यथाहश्शवती पूर्वमेंबरस्यंसुदुर्दृशं॥ संघातं तेजसस्तात इह पश्यामि भूतले॥ प्रसादं कुरु पश्येयं यं यद्रू
मा०पु० पं ते प्रभाकर॥ भक्तानुकंपक विभो भक्ताहं पाहि मे सुतान्॥ त्वं धाता विसृजसि विश्वमेतदेकस्त्वं पाता स्थितिक
१३३ रणाय संप्रवृत्तः॥ त्वय्यंते लयमखिलं प्रयाति वै तत्त्वत्तोऽन्यो नहि तपनास्ति सर्वभूतात्॥ त्वं ब्रह्मा हरिहरसंज्ञितस्त्व
मिंद्रो वित्तेशः पितृपतिरंबुपः समीरः॥ सोमोऽग्निर्गगनमहीधरस्वरूपः किं स्तव्यं तव सकलात्मकरूप धाम्नाः॥
133 यज्ञे स्त्वामनुदिनमात्मकर्मसक्तास्तुन्वंतो विविधपदैर्द्विजा यजंति॥ ध्यायंतो विनियतचेतसो भवंतं योगस्थाः
परमपदं प्रयांति मर्त्याः॥ तपसि पचसि विश्वं यासि विश्वं भस्मीकरोषि प्रकटयसि मयूखैर्ह्लादयस्यंबुगर्भैः॥ सृजसि
कमलजन्मा पालयस्यच्युताख्यः क्षपयसि च युगांते रुद्ररूपी त्वमेकः॥ इति श्रीमार्कंडेयपुराणे सूर्यस्तुतिः॥ ९४ मार्कं
डेय उ०॥ ततः स तेजसस्तस्मात् आविर्भूतो विभावसुः॥ अदृश्यत तदा दिव्यस्तप्ताम्रोपम प्रभुः॥ अथ तां प्रणतां देवीं
तस्य संदर्शनान्मुने॥ प्राह भास्वान् वृणुष्वेष्टं वरं मत्तो यमिच्छसि॥ प्रणता शिरसा चैव जानुपीडितमेदिनी॥ मुस्युवाच
विवस्वंतं वरदं समुपस्थितं॥ देव प्रसीद पुत्राणां हृतं त्रिभुवनं मम॥ यज्ञभागाश्च दैतेयैर्दानवैश्च बलाधिकैः॥ तन्नि
मित्तं प्रसादं त्वं कुरुष्व मम गोपते॥ अंशेन तेषां भ्राता त्वं गत्वा नाशय तद्रिपून्॥ यथा मे तनया भूयो यज्ञभागभुजः प्र
भो॥ भवेयुरधिपाश्चैव त्रैलोक्यस्य दिवाकर॥ तथानुकंपां पुत्राणां सुप्रसन्नो रवे मम॥ कुरु प्रपन्नार्तिहर स्थितिक
र्त्ता त्वमुच्यसे॥ मार्कंडेय उ०॥ ततस्तामाह भगवान् भास्करो वारितस्करः॥ प्रणतामदितिं विप्र प्रसादसुमुखो विभुः॥ राम:
सहस्रांशेन ते गर्भे संभूयाहमशेषतः॥ त्वत्पुत्रशत्रून् दिते नाशयाम्याशु निर्वृता॥ इत्युक्त्वा भगवान् भास्वान् अंतर्द्धा १३३
नमुपागमत्॥ निवृत्ता सापि तपसः संप्राप्ताखिलवांछिता॥ ततो रश्मिसहस्रांशे तु सहस्रांशो रवेः करः॥ विश्वावतार

133A

संच क्रे देवमातुर योदरे ॥ कृछ्रचांद्रायणादीनि सा चक्रे तु समाहिता ॥ शुचिः संधारयाम्येनं दिव्यं गर्भमिति द्विज ॥ ततस्तां क
श्यपः प्राह किंचित्कोपप्लुताक्षरं ॥ किं मारयसि गर्भांडमिति नित्योपवासिनी ॥ सा च तं प्राह गर्भांडमेतत्पश्येति कोपन
न मारितो विपक्षाणां मृत्युरेव भविष्यति ॥ इत्युक्त्वा सा तदा गर्भमुत्ससर्ज सुरारणिः ॥ जाज्वल्यमानं तेजोभिः पत्युर्व
चन कोपिता ॥ तं दृष्ट्वा कश्यपो गर्भमुद्यदादित्यवर्चसं ॥ तुष्टाव प्रणतो भूत्वा ऋग्भिराद्याभिरादरात् ॥ संस्तूयमानः स
तदा गर्भांडात्प्रकटो भवत् ॥ पद्मपत्रसवर्णाभस्तेजसा व्याप्तदिङ्मुखः ॥ अथांतरिक्षादाभाष्य कश्यपं मुनिसत्तमं ॥ स
तोयमेघगंभीरा वागुवाचाशरीरिणी ॥ मारितं च यतः प्रोक्तमेतदंडं त्वयादिते ॥ तस्मान्मुने सुतस्तेयं मार्तंडाख्यो
भविष्यति ॥ सूर्योधिकारं च विभुर्जगत्येष करिष्यति ॥ हनिष्यत्यसुरांश्चायं यज्ञभागहरानरीन् ॥ देवा निशम्ये
ति वचो गगनात्समुपागतं ॥ प्रहर्षमतुलं याता दानवाश्च हतौजसः ॥ ततो युद्धाय दैतेयानाजुहाव शतक्रतुः ॥ सह दे
वैर्मुदा युक्तो दानवाश्च तदाभ्ययुः ॥ तेषां युद्धमभूत् घोरं देवानामसुरैः सह ॥ शस्त्रास्त्रदीप्तसंदीप्तसमस्तभुव
नांतरं ॥ तस्मिन्युद्धे भगवता मार्तंडेन निरीक्षिताः ॥ तेजसा दह्यमानास्ते भस्मीभूता महासुराः ॥ ततः प्रहर्षमतुलं
प्राप्ताः सर्वे दिवौकसः ॥ तुष्टुवुस्तेजसां योनिं मार्तंडमदितिं तथा ॥ स्वाधिकारांस्ततः प्रापुर्यज्ञभागांश्च पूर्ववत्
भगवानपि मार्तंडः स्वाधिकारं यथाकरोत् ॥ कदंबपुष्पवद्भास्वानधश्चोर्ध्वं च रश्मिभिः ॥ वृतोग्निपिंडसदृशो
दध्रे नातिस्फुटं वपुः ॥ इति मार्कंडेयपुराणे मार्तंडोत्पत्तिः ॥ ततस्तस्मै ददौ कन्यां संज्ञां नाम विवस्वते ॥ ॥ मार्कंडेय उ०
प्रसाद्य प्रणतो भूत्वा विश्वकर्मा प्रजापतिः ॥ विवस्वतस्य संभूतो मनोरिद्धिं परां गतिं ॥ पूर्वमेव तवाख्यातं मयैतद
खिलं द्विज ॥ त्रीण्यपत्यान्यसौ तस्यां जनयामास गोपतिः ॥ द्वौ पुत्रौ सुमहाभागौ कन्यां च यमुनां मुने ॥ मनुर्वैवस्व

॥मा० पु०॥ तोऽस्यश्चःश्राद्धदेवःप्रजापतिः॥तेषांयमोयमीचैवमार्त्तंडस्यविवस्वतः॥तेनातितापयामासत्रैलोक्यंसचराचरं॥गोला
कारंचतंदृष्ट्वासंज्ञारूपंविवस्वतः॥असहंतीचतत्तेजःस्वांछायांवीक्ष्यसाब्रवीत्॥संज्ञोवाच॥अहंयास्यामिभद्रंते
॥१३४॥ स्वकंचभवनंपितुः॥निर्विकारंत्वयात्वत्रस्थेयंमच्छासनात्शुभे॥छायोवाच॥आकेशग्रहणाद्देविआशापान्नैवकं
हिंचित्॥आख्यास्यामिगच्छतुभ्यंगम्यतांयत्रवांछितं॥इत्युक्ताछाययासंज्ञाजगामपितृमंदिरं॥तत्रावसत्पितुर्गृ
134 हेकंचित्कालंशुभेक्षणा॥भर्त्तुःसमीपंयाहीतिपित्रोक्तासापुनःपुनः॥अगच्छद्वडवाभूत्वाकुरूनथोत्तरांस्ततः॥त
त्रैतेपेतपःसातुनिराहारामहामुने॥पितुःसमीपंयातायांसंज्ञायांवाक्यतत्परा॥तद्रूपधारिणीछायाभास्करंस
मुपस्थिता॥तस्यांचभगवान्सूर्यःसंज्ञेयमितिचिंतयन्॥तथैवजनयामासद्वौपुत्रौकन्यकांतथा॥पूर्वजस्य
मनोस्तुल्यःसावर्णस्तेनसोऽभवत्॥यस्तयोःप्रथमंजातःपुत्रयोर्द्विजसत्तम॥द्वितीयोयोभवच्चान्यःसग्रहोयःश
नैश्चरः॥कन्यायाभवत्तयातीतांतुवव्रेसंवरणोनृपः॥संज्ञातुपार्थिवीतेषांआत्मजानांयथाकरोत्॥स्नेहनस्वकेजाता
नांतथाकृतवतीसती॥मनुस्तुक्षांतवांस्तस्यायमस्त्वस्यानचक्षमे॥बहुशोवाच्यमानस्तुपितुःपत्न्यासुदुःखितः॥सवैको
पाच्चबाल्याच्चभाविनोर्थस्यवैबलात्॥पादासंतर्ज्जयामासछायासंज्ञांततोयमः॥तंशशापततःक्रुद्धासंज्ञायापा
र्थिवीभृशं॥छायोवाच॥यदासंतर्ज्जसेयन्मांपितृभार्यांगरीयसीं॥तस्मात्तवैषचरणःपतिष्यतिनसंशयः॥यमस्तुतेन
शापेनभृशंपीडितमानसः॥मनुनासहधर्म्मात्मासर्वंपित्रेन्यवेदयत्॥यमउ॰॥स्नेहेनतुल्यमस्मासुमातादेवनवर्त्तते
विसृज्यज्यायसोप्यस्मात्कनीयांसोबुभूषिति॥तस्यामयोद्यतःपादोनतुदेहेनिपातितः॥बाल्याद्वायदिवामोहात् ॥राम॥
तद्भवान्क्षंतुमर्हति॥शप्तोहंतातकोपेनजनन्यातनयोयतः॥ततोनमन्येजननीममैषातपतांवर॥विगुणेष्वपिपुत्रे ॥१३४॥

134A

पुनमाताविगुणापितः॥ शापस्तेपततांपुत्रकथमेतत्सचक्षते॥ तवप्रसादाच्चरणौनपतेत्भगवान्यथा॥ मातृशापा
दयंमेद्यतयाचिंतयगोपते॥ रविरुवाच॥ असंशयमिदंपुत्रभविष्यत्यत्रकारणं॥ येनत्वामविशत्क्रोधोधर्मज्ञंसत्य
वादिनं॥ सर्वेषामेवशापानांप्रतिघातोहिविद्यते॥ नतुमात्राभिशप्तानांक्वचिच्छापनिवर्त्तनं॥ नशक्यमेतन्मिथ्या
तुकर्त्तुंमातुर्वचस्तव॥ किंचित्तेसंविधास्यामिपुत्रस्नेहादनुग्रहं॥ कृमयोमांसमादायप्रयास्यंतिमहीतलं॥ कृतंत
स्यावचःसत्यंत्वंचत्रातोभविष्यसि॥ मार्कंडेयउ०॥ आदित्यस्त्वब्रवीच्छायांकिमर्थंतनयेषुच॥ तुल्येष्वभ्यधिकःस्नेह
एकत्रक्रियतेत्वया॥ नूनंनैषांत्वंजननीसंज्ञाकापित्वमागता॥ विगुणेष्वप्यपत्येषुमाताशापंनदास्यति॥ सातत्परिहरं
तीद्वंद्वंनवाचक्षेविवस्वते॥ सचात्मानंसमाधाययुक्तस्तत्त्वमवैक्षत॥ तांशप्तुमुद्यतंदृष्ट्वाछायासंज्ञादिवस्पतिं॥ भयेन
कंपिताब्रह्मन्यथावृत्तंन्यवेदयत्॥ विवस्वांस्तुततःक्रुद्धःश्रुत्वाश्वशुरमभ्यगात्॥ सचापितंयथान्यायमर्चयित्वा
दिवाकरं॥ निर्दग्धुकामंरोषेणशांतयामाससुव्रतः॥ विश्वकर्मोवाच॥ तवातितेजसाव्याप्तमिदंरूपंसुदुःसहं॥ असह
सहंतीतुतत्संज्ञावनेचरतिवैतपः॥ द्रक्ष्यतेतांभवानद्यस्वांभार्यांशुभचारिणीं॥ रूपार्थंभवतोरण्येचरंतींसुमहत्तपः॥
मतंमेब्रह्मणोवाक्यंयदितेदेवरोचते॥ रूपंनिर्वर्त्तयाम्यद्यतवकांतंदिवस्पते॥ मार्कंडेयउ०॥ यतोहिभास्वतोरूपं
प्रागासीत्परिमंडलं॥ ततस्तेथेप्सितंप्राहत्वष्टारंभगवान्रविः॥ विश्वकर्मात्वनुज्ञातःशाकद्वीपेविवस्वता॥ भ्रमिमा
रोप्यतत्तेजःशातनायोपचक्रमे॥ भ्रमतातोषजगतांनाभिस्तेनभास्वता॥ ससमुद्राद्रिवनोपेताआरुरोहमहीनभः॥
गगनंचाखिलंविप्रसचंद्रग्रहतारकं॥ अधोगतंमहाभागबभूवाक्षिप्तमाकुलं॥ विक्षिप्तसलिलाःसर्वेबभूवुश्च
तथाब्धयः॥ व्यभिद्यंतमहाशैलाःशीर्णसानुनिबंधनाः॥ ध्रुवाधाराण्यनेकानिधिष्ण्यानिमुनिसत्तम॥ भ्राम्यद्रश्मि

॥भा०पु०॥ निबंधानिश्चघोरान्मुमुचुः सहस्रशः ॥ वेगभ्रमणसंजातवायुक्षिप्ताः समंततः ॥ व्यशीर्यंत महामेघा घोरारावविराविणः ॥
भास्वतो भ्रमणाद्विभ्रांतमभ्याकाशमहीतलं ॥ जगदासीत्कुलमस्यर्थं तदासीन्मुनिसत्तम ॥ त्रैलोक्ये च सकले विभ्रममभ्रमाणेम
॥१३५॥ हर्षयः ॥ देवाश्च ब्रह्मणासार्द्धं भास्वंतमभितुष्टुवुः ॥ आदिदेवोसि देवानां जातमेतत्त्वयंतव ॥ सर्गस्थित्यंतकाले तु त्रिधाभे
135 देनतिष्ठसि ॥ स्वस्तितेस्तु जगन्नाथ धर्मरश्मे हिमाकर ॥ इषस्व शांतिं लोकानां देवदेव दिवाकर ॥ इंद्रश्चागस्य तं देवं लिख्य
मानमथास्तुवत ॥ जयदेव जगद्व्यापिन्नराश्चज्ज्ञय जगस्यते ॥ ऋषयश्च ततः सप्त वसिष्ठर्षिपुरोगमाः ॥ तुष्टुवुर्विविधैस्तो
त्रैः स्वस्ति स्वस्तीति वादिनः ॥ वेदोक्ताभिरथाग्याभिर्बालखिल्याश्च तुष्टुवुः ॥ ऋग्भिराद्याभिभोस्वंतं लिख्यमानं मुदायुताः
त्वं नाथ मोक्षिणां मोक्षो ध्येयस्त्वं ध्यानिनां वरः ॥ त्वं गतिः सर्वभूतानां कर्मकांडनिवर्त्तिनां ॥ शं प्रजाभ्योस्तु देवेश न
मोस्तु जगतां पते ॥ शन्नोस्तु द्विपदे नित्यं शन्नश्चास्तु चतुष्पदे ॥ ततो विद्याधरगणा यक्षराक्षसपन्नगाः ॥ कृतांजलि
पुटाः सर्वे शिरोभिः प्रणतारविं ॥ ऊचुरेवंविधा वाचो मनःश्रोत्रसुखावहाः ॥ सह्यं भवतु ते तेजो भूतानां भूतपालन
ततो हाहा हूहूश्चैव नारदस्तुंबुरुस्तथा ॥ उपगातुं समारब्धा गांधर्वकुशला रविं ॥ षड्जर्षभगांधारग्राममत्रयविशा
रदाः ॥ मूर्छनाभिश्च तानैश्च सुप्रयोगैः सुखप्रदं ॥ विश्वाची च घृताची च उर्वशी च तिलोत्तमा ॥ मेनका सहजन्या च रंभा
चाप्सरसां वराः ॥ ननृतुर्जगतामीशं लिख्यमाने विभावसौ ॥ हावभावविलासाढ्यान्कुर्वत्योभिनयान्बहून् ॥ प्रवा
द्यंत ततस्तत्र वीणावेणवादिमर्द्दलाः ॥ पणवाः पुष्कराश्चैव मृदंगाः पटहानकाः ॥ देवदुंदुभयः शंखाः शतशोथ स
हस्रशः ॥ गायद्भिश्चैव गंधर्वैर्नृत्यद्भिश्चाप्सरोगणैः ॥ तूर्यवादित्रघोषैश्च सर्वं कोलाहलीकृतं ॥ ततः कृतांजलिपु ॥रामः॥
टा भक्तिनम्रासमस्तेयः ॥ लिख्यमानं सहस्रांशुं प्रणेमुः सर्वदेवताः ॥ ततः कोलाहले तस्मिन्सर्वदेवसमागमे ॥ ॥१३५॥

135A

तेजसः शातनं चक्रे विश्वकर्म्मा शनैः शनैः ॥ इति हिमजघर्म्मकालहेतो हे रकमलासनविष्णुसंस्तुतस्य ॥ तनु परि
लिखनं निशम्य कुप्रजति दिवाकरलोकमायुयांते ॥ इति श्रीमार्कंडेयपुराणे रवितेजसः शातनं ॥ १०६ ॥ मार्कंडेय
उ० ॥ लिखमानस्तु तो भानुं विश्वकर्म्मा प्रजापतिः ॥ उद्भूतपुलकस्तोत्रमिदं चक्रे विवस्वतः ॥ विवस्वते प्रणतजन
नानुकंपिने महात्मने सप्तजवसप्तसप्तये ॥ स्वतेजसा कमलकुलावबोधने नमस्तमः पटलपलाववाहिने ॥
पावनातिशयगुणाय कर्मणे नैककामविषयप्रदायिने ॥ भासुरामलमयूखमालिने सर्वभूतहितकारिणे नमः ॥
अजाय लोकत्रयभावनाय भूतात्मने गोपतये वृषाय ॥ नमो महाकारुणिकोत्तमाय रव्यो यचक्षुः प्र
भावाय वेनमः ॥ विवस्वते प्राणभृतां तथात्मने जगत्प्रतिष्ठाय जगद्धितैषिणे ॥ स्वयंभुवे निर्म्मललोकचक्षुषे
सुरोत्तमायामिततेजसे नमः ॥ सुसमुदयाचलमौलिमणिः सुरगणगीतगरीष्टगुणः ॥ त्वमुनुमयूषसह
स्रवपुर्जगति विभासितमासि तुदन् ॥ तव तिमिरासवपानमदांध्वति विलोहितविग्रहता मिहिर विभासित
यास्ततरां त्रिभुवनभावनभानि करैः ॥ रथमधिरुह्य समावयवं रुचिरविकल्पितदिव्यहयं ॥ सततमखिन्नतया
भगवन्नचरसि जगद्धितवद्धरसः ॥ अमृतमयेन रसेन समं विबुधपितृनपितर्प्यसे ॥ अरिगणसूदन ते
नतव प्रणतिमुपेत्य लिखामि वपुः ॥ शुकसमवर्णहयप्रचितं तव यदपांशु पवित्रतमं ॥ प्रणतजनवत्सल मां
प्रणतं त्रिभुवनपावन पाहि रवे ॥ इति सकलजगत्प्रसूतिभूतं त्रिभुवनभावनधामहेतुभूतमेकं ॥ रविमखि
लजगत्प्रदीपभूतं त्रिदशवरं प्रणतोस्मि सर्वदा त्वां ॥ मार्कंडेय उ० ॥ एवं तस्य स्तवं कुर्वन् विश्वकर्मा दिवस्पतेः ॥
तेजसः षोडशं भागं मंडलस्थमधारयत् ॥ शातितेस्तेजसो भागे दशभिः पंचभिस्तथा ॥ अतीवकांतिमच्चारु

भानोरासीत्तदावपुः॥शातितंचास्ययत्तेजस्तेनचक्रंविनिर्मितं॥विष्णोःशूलंचशर्वस्यशिविकाधनदस्यच॥दं
डःप्रेतपतेःशक्तिर्देवसेनापतेस्तथा॥अन्येषांचैवदेवानामायुधानिसविश्वकृत्॥चकारतेजसाभानोर्भास्व
राण्यविशातये॥इतिशातिततत्तेजाःस्वश्सुरेणातिशोभनं॥वपुर्दधारमार्त्तण्डःसुष्यचापमनोरमं॥सददर्शसमा
धिस्थःस्वांभार्यांवडवाकृतिं॥अधृष्यांसर्वभूतानांतपसासंयमेनच॥उत्तरांश्चकुरून्गत्वाभस्त्वाश्वोभानुरा
त्मना॥साचदृष्ट्वातमायांतंपरपुंसोनिशंकया॥जगामसम्मुखंतस्यपृष्ठरक्षणतत्परा॥ततश्चनासिकायोगात्तयो
स्तत्रसमेतयोः॥नासत्यदस्रौतनयावश्ववक्त्रात्विनिर्गतौ॥रेतसोंतेचरेवंतःखड्गीधन्वीतनुत्रधृक्॥अश्वा
रूढःसमुत्पन्नोबाणतूणसमन्वितः॥ततःस्वरूपमखिलंदर्शयामासभानुमान्॥तस्याप्यसौसमालोक्यस्वरूप
मुदमाददे॥स्वरूपधारिणींचैनांसानिनायनिजालयं॥संज्ञाभार्यांप्रीतिमतींभास्करोवारितस्करः॥ततोपू
र्वसुतोयोस्याःसोभूद्वैवस्वतोमनुः॥द्वितीयस्तुयमःशापात्धर्मदृष्टिरभूत्सुतः॥कृमयोमांसमादाययथा
दत्तस्तेमहीतलं॥यतिष्यतीतिशापांतंतस्यचक्रेपितास्वयं॥धर्मदृष्टिर्यतस्त्वासौसमोमित्रेतथाहिते॥ततो
नियोगेतयाम्येचकारतिमिरापहः॥यमुनाचनदीचक्रेकलिंदांतरवाहिनीं॥अश्विनौदेवभिषजौकृतौ
पित्रामहात्मना॥भवितारौभवंतौचदेवानांभिषजाविति॥गुह्यकानामाधिपत्येचरेवंतोविनियोजितः॥रे
वंतमव्याहृततोभगवान्लोकभावनः॥त्वमप्यशेषलोकस्यपूज्योवत्सभविष्यसि॥अरण्येवाब्धौमहादावेवै
रिदस्युभयेपुंच॥त्वांस्मरिष्यंतियेमर्त्याःमोक्ष्यंतेतेमहापदः॥क्षेमंबुद्धिंसुखंराज्यंआरोग्यंकीर्त्तिमुन्नतिं॥न
राणांपतितुष्टस्त्वंपूजितःसंप्रदास्यसि॥छायासंज्ञासुतश्चापिसावर्णिःसुमहायशाः॥भाव्योसोनागतेकालेमनु

136A

सावर्णिकोऽष्टमः ॥ मेरुपृष्ठे तपो घोरं अद्यापि चरते प्रभुः ॥ भ्राता शनैश्चरस्तस्य ग्रहो भूत्वा सनातनः ॥ यवीयसी तु
या कन्या यमस्यासौ द्विजोत्तम ॥ अभवत्सा सरिच्छ्रेष्ठा यमुना लोकपावनी ॥ यस्तु ज्येष्ठो महाभागः स गौर्यस्य हसांप्र
तं ॥ विस्तरं तस्य वक्ष्यामि मनोर्वैवस्वतस्य हि ॥ य इदं जन्म देवानां शृणुयाद्वा पठेच्च वा ॥ विवस्वतस्तु जातानां रवेर्मा
हात्म्यमेव च ॥ आपदं प्राप्य मुच्येत प्राप्नुयाच्च महायशः ॥ अहोरात्रकृतं पापं एतत् शमयति श्रुतं ॥ महात्म्यमा
दिदेवस्य मार्त्तंडस्य महात्मनः ॥ इति श्रीमार्कंडेयपुराणे मार्त्तंडमाहात्म्यं समाप्तं ॥ क्रोष्टुकिरु ॥ भगवन्कथितः
सम्यक् भानोः संततिसंभवः ॥ माहात्म्यं चादिदेवस्य स्वरूपं चातिविस्तरात् ॥ भूयोऽपि भास्वतः सम्यक् माहात्म्यं चादिदे
वस्य स्वरूपं चातिविस्तरात् ॥ भूयोऽपि भास्वतः सम्यक् माहात्म्यं मुनिसत्तम ॥ श्रोतुमिच्छाम्यहं तन्मे प्रसन्नो वक्तुमर्हसि ॥
मार्कंडेय उ० ॥ श्रूयतामादिदेवस्य माहात्म्यं कथयामि ते ॥ विवस्वतो यच्चकार पूर्वमाराधितो जनैः ॥ दमस्य पुत्रो विख्या
तो राजाभूद्राज्यवर्द्धनः ॥ स सम्यक् पालनं चक्रे पृथिव्याः पृथिवीपतिः ॥ धर्मतः पाल्यमानं तु तेन राष्ट्रं महात्मना ॥ ववृ
धेऽनुदिनं विप्र जनेन च धनेन च ॥ हृष्टपुष्टमतीवासीत्तस्मिन् राजन्यशेषतः ॥ निर्भयः सकलो व्योर्व्यां यो रजानपद्ये
जनः ॥ नोपसर्गो न चाव्याधिर्न च व्यालोऽन्दवो भयं ॥ नानावृष्टिरभूत्तत्र दमपुत्रे महीपतौ ॥ स इयाज महायज्ञैर्द
दौ दानानि चार्थिनां ॥ स्वधर्मस्याविरोधेन बुभुजे विषयानपि ॥ तस्यैवं कुर्वतो राज्यं सम्यक् पालयतः प्रजाः ॥ स
प्त वर्षसहस्राणि जग्मुरेकमहर्यथा ॥ विदूरथस्य तनया दक्षिण्यात्य स्य भूपतेः ॥ तस्य पत्नी बभूवाथ मानिनी
नाम नामतः ॥ कदाचित्तस्य सा सुभ्रूः शिरस्याभ्यंजना दत्ता ॥ पश्यतो राज्ञलोकस्य मुमोचाश्रूणि मानिनी ॥ तद
श्रुपतितं गात्रे यदा चास्य महीपतेः ॥ तदोन्नमय्य वदनं तामपृच्छत्स मानिनीं ॥ निःशब्दमश्रु मोसेण रुदंती तां विलो

सु२

क्यवै॥ किमेतदिति पप्रच्छ मानिनी राज्यवर्द्धनः॥ पृष्टा सा तु ततस्तेन भर्त्त्रा प्राह मनस्विनी॥ न किंचिदिति तां भूपः प
मा०पु० प्रच्छ स महीपतिः॥ बहुशः पृच्छतस्तस्य भूभृतः सा सुमध्यमा॥ कथयामास पलितं केशभारांतरोद्भवं॥ एतस्य
सिन् पाल किमल्पमश्रुकारणं॥ ममातिमंदभाग्याया जहासाथ नृपस्ततः॥ स विहस्याथ तां पत्नीमेव तांस
॥१३७॥ वेन्भुजा॥ यो राज्ञां च महीपाला ये तत्रासन् समागताः॥ शोकेनालं विशालाक्षि रोदितव्यं न ते शुभे॥ जन्मर्द्धि
परिणामाद्याः॥ विकाराः सर्वजंतुषु॥ अधीताः सकला वेदा इष्टा यज्ञाः सहस्रशः॥ दत्तं द्विजानां पित्र्याणि मेऽ
137 स्माभिः कृतानि च॥ भुक्ता भोगास्त्वया सार्द्धं ये मर्त्येष्वपि दुर्लभाः॥ सुसम्यक् पालिता पृथ्वी साधु युद्धेष्वनु
ष्ठितं॥ मित्रैः सह ष्टं हे सितं विहृतं च वरानने॥ किमन्यन्न कृतं भद्रे पलितेभ्यो बिभेषि यत्॥ भवंतु केशाः पलि
ता वलयः संतु मे शुभे॥ शैथिल्यमेतु कायोयं कृतकृत्योस्मि मानिनि॥ मर्द्धि यद्दर्शितं भद्रे भवत्या पलितं मम॥
चिकित्सामेव तस्याहं करोमि च न संशयः॥ वाल्ये बालक्रिया पूर्वं तद्वत्कौमारके तथा॥ यौवने यस्य या योग्या वा
र्द्धके च मे संश्रया॥ एवं मत्सर्वकै भद्रे कृतसर्वकैश्यपत॥ अतो न ते अश्रुपातस्य किंचित्पश्यामि कारणं॥ अलं मन्यु
ना भद्रे न त्वभ्युदयकारि मे॥ दर्शनं पलितस्यैतन्मा रोदीर्निष्प्रयोजनं॥ मार्कंडेय उ० ततः प्रणम्य तं भूपाः पौराश्चै
व समीपगाः॥ सा त्वाः प्रोचुर्महीपालं महर्षे राज्यवर्द्धनं॥ न रोदितव्यमनया तव पत्न्या नराधिप॥ रोदितव्यमि
हास्माभिरन्यावा सर्वजंतुभिः॥ त्वं ब्रवीषि यतो नाथ वनवासाश्रितां मतिं॥ तपंति तेन नः प्राणा लालितानां त्व
या विभो॥ सर्वे यास्यामहे भूप यदि यास्यति भवाचनं॥ ततोऽशेषक्रियाहानिः सर्वपृथ्वीनिवासिनां॥ भविष्यति राम॰
न संदेह त्वयि नाथ वनाश्रये॥ सा च सर्वोपघाताय तत्स्वयं प्रविमृश्यतां॥ सप्तवर्षसहस्राणि त्वयेयं पालि ॥१३७॥
ता

॥मा० पु०॥ चिन्महीपालश्चिंताकुलमनास्थितः॥ सा पुनः प्राह भर्त्तारं चिंतयानमधोमुखं॥ कस्मान्न हर्षमभ्येषि परमाभ्यु
दयेन्नृप॥ दशवर्षसहस्राणि नीरुजः स्थिरयौवनः॥ भावी त्वमद्यप्रभृति किं तथापि न हृष्यसि॥ किं तु तत्कारणं।
॥१४१॥ ब्रूहि यच्चिंताक्रांतमानसः॥ परमाभ्युदये पित्वं संप्राप्ते पृथिवीपते॥ राज्यवर्द्धन उ०॥ कथमभ्युदयो भद्रे किं सभा
१ जयसे च मां॥ प्राप्तो दुःखसहस्राणां किं समाजनमिष्यते॥ दशवर्षसहस्राणि जीविष्याम्यहमेककः॥ न
ति त्वं तद्विपत्तौ मे किं सैन दुःखं भविष्यति॥ सुतान्पौत्रान्प्रपौत्रांश्च तथान्यानिष्टबांधवान्॥ पश्यतो मे मृतान्
दुःखं किमल्पं हि भविष्यति॥ भृत्येषु चातिभक्तेषु मित्रवर्गे तथा मृते॥ भद्रे दुःखमुपात्तं मे भविष्यत्यनुसंततं॥ त्य
१५१ ये मे दर्यंतपस्तप्तुं क्लेशेद्धमनिसंततेः॥ ते मरिष्यंत्यहं भोगी जीविष्यामीति क्षंथं॥ सेयमापद्वरारोहे प्राप्ताना धि
भ्युदयो मम॥ कथं वा मन्यसे त्वं च यासभाजयसे च मां॥ मानिन्युवाच॥ महाराज यथात्थ त्वं तथैतन्नात्र संशयः
मया पौरैश्च दोषोयं प्रीत्या नालोचितस्तव॥ एवं गते तु किं कार्यं महाराज विचिंत्यतां॥ नान्यथाभूविय स्माहं प्र
सन्नस्ति मिरापहः॥ राजोवाच॥ उपकारः कृतः पौरैः प्रीत्या भृत्यैश्च यो मम॥ कथं भोक्ष्याम्यहं भोगान्न कृत्वा
तेषामनिष्कृतं॥ सोहमद्यप्रभृत्यद्रिं गत्वा प्रयतमानसः॥ तपस्तप्स्ये निराहारो भानोराराधनोद्यतः॥ दश
वर्षसहस्राणि यथाहं स्थिरयौवनः॥ तस्य प्रसादाद्देवस्य जीविष्यामि निरामयः॥ तथा यदि प्रजाः सर्वाः भृ
त्यास्त्वं च सुताश्च ये॥ पौत्राः प्रपौत्राः सुहृदस्तस्मूतिष्ठवरानने॥ जीवं त्वेवं प्रसादं नः करोति भगवान्रविः
ततोहं भविता राज्ये भोक्ष्ये भोगांस्त्वया मुदा॥ न चेद्देवं करोत्यर्कः स्तत्सोदाद्रौ तत्र सा तुनि॥ तपस्तप्स्ये निराहारो या ॥रामः॥
वज्जीवितसंक्षयः॥ मार्कंडेय उ०॥ इत्युक्ता सा तदा तेन तथेत्याह नराधिपं॥ जगाम च स मं तेन सापितं धरणी ॥१४१॥

140A

यश्च पृथ्वी सगिरिकानना। ग्रहनक्षत्रताराद्यावानस्पत्यंतथौषधं॥ व्यक्ताव्यक्तेषु भूतेषु धर्माधर्मप्रवर्त्तकः॥
ब्राह्मी माहेश्वरी चैव वैष्णवी यापि वा तनुः॥ त्रिधा यस्य स्वरूपं च स नो भास्वान्प्रसीदतु॥ यस्य सर्वमजस्येदं मंग
मं तं जगत्प्रभो॥ स नः प्रसीदतात् भास्वान् जगतां यस्तु जीवनं॥ यस्यैकं भास्वरं रूपं प्रभामंडलदुर्द्दृशं॥ द्वितीयमैद
वं सौम्यं स नो भास्वान्प्रसीदतु॥ द्वाभ्यां यस्य स्वरूपाभ्यां इदं विश्वं विनिर्मितं॥ अग्नीषोममयं भास्वान्स नो देवः प्र
सीदतु॥ मार्कंडेय उ०॥ इत्थं स्तुत्वा तथा भक्त्या सम्यक् प्रजयता तथा॥ तुतोष भगवांस्तेषां त्रिभिर्मासैर्द्विजोत्त
म॥ ततः स्वमंडलाद् युद्धविविंबसमप्रभः॥ अवतीर्य ददौ तेभ्यो दुर्द्दृशो दर्शनं रविः॥ ततस्ते स्पष्टं सवितारम रूप
जं जनाः॥ पुलकोत्कंपिता विप्रभक्तिनम्राः प्रणेमिरे॥ नमो नमस्तेऽस्तु सहस्ररश्मे सर्वस्य हेतुस्त्वमशेषहेतुः॥
योगिभिरीश्यो खिलयज्ञधामा ध्येयस्तदा योगविदां प्रसीद॥ इति श्रीमार्कंडेयपुराणे मार्त्तंडमहिमनि॥ ९८॥
मार्कंडेय उवाच॥ ततः प्रसन्नो भगवान्भानुराहाखिलं जनं॥ व्रियतां यदभिप्रेतं मत्तः प्राप्तुं द्विजास्तयः॥ तत
स्तं प्रणिपत्योचुर्विप्रविप्रादयो जनाः॥ स सप्तध्वसमशीतांशो शुमवलोक्य पुरस्थितं॥ भगवन्यदि नो भक्त्या प्र
सन्नस्तिमिरापहः॥ दशवर्षसहस्राणि ततो नो जीवतां न्वयः॥ निरामया जितारातिः सुवेषः स्थिरयौवनः॥ दश कोषः
वर्षसहस्राणि जीवतांद्यावर्द्धनः॥ मार्कंडेय उ०॥ ते येसुत्काजनं भास्वान् अदृश्यो भून्महामुने॥ ते पि लब्धवरा
हृष्टाः समाजग्मुर्जनाः पुरं॥ यथा दृत्तं च ते तस्मै नरेंद्राय न्यवेदयन्॥ वरं लब्धं सहस्रांशोः सकाशाद खिलं जगत्॥
तच्छ्रुत्वाजहृषे तस्य सा पत्नी मानिनी द्विज॥ स च राजा चिरं दध्यौ नाह किंचिद्व्रतं जनं॥ ततः समानिनी भूयो हर्ष
पूरितमानसा॥ दिष्ट्याय षामहीपाल वर्द्धसे त्याह तं पतिं॥ तथा तथा मुदा सम्तौ मानिन्या स समाजितः॥ नाह किं

मही॥ तत्सर्वं सुखं महापुण्यमालोकय नराधिप॥ वने वसन्महीपाल त्वं करिष्यसि यत्तपः॥ तन्महीपाल न
स्यास्य कलांनार्हति षोडशीं॥ राजोवाच॥ सप्तवर्षसहस्राणि मयेयं पालिता मही॥ इदानीं वनवासस्य मम
कालोयमागतः॥ ममापत्यानि जानीहि ह्यमेपत्य संततिः॥ स्वस्यैरेव ममाहोभिरं तको न सहिष्यति॥ यदेतत्स
लितं मर्द्धितं द्विजानीत नागराः॥ दूतभ्रतं यमस्यास्य मत्योरस्य गतकर्मणः॥ साहं राज्ये सुतं कृत्वा हित्वा भोगा
न्वनाश्रयः॥ तपस्तप्स्ये समायांति न यावद्यमसैनिकाः॥ मार्कंडेय उ०॥ ततो यियासुः स वनं दैवज्ञानवनीय
ति॥ पुत्रराज्याभिषेकाय दिनलग्नाद्यपृच्छत॥ श्रुत्वा च ते ततस्तस्य पतेर्वचो व्याकुलचेतसः॥ दिनं लग्नं होरां च
न विदुः शास्त्रदृष्टयः॥ ऊचुश्च तं महीपालं दैवज्ञा वाष्पगद्गदं॥ ज्ञानानि नः प्रनष्टानि श्रुत्वेतद्भो वचोन्नृप॥
ततोन्यनगराद्राजा अन्यराष्ट्रेभ्य एव च॥ ततस्तस्माच्च नगरात्प्राप्तचतुर्थेनाभ्युपागता॥ समुपेत्य महीपालं
तं जियासं मुनेर्वचः॥ प्रकंपिशिरसो भूत्वा प्रोचुर्ब्राह्मणसत्तमः॥ प्रसीद पाहि नो राजन् पालितास्म यथा
पुरा॥ मा सीद त्वखिलो लोकः त्वयि भूपवनाश्रये॥ तत्कुरुष्व महाराज यथा नो सीदते जगत्॥ यावज्जीवाम
हे वीर स्वस्थ्यं कालमिमं वयं॥ नेच्छामस्त्वावलत्वं न्यद्रक्षं सिंहासनं प्रभो॥ मार्कंडेय उवाच॥ इत्येवं तैस्तथा
न्यैश्च द्विजैः पौरपुरस्सरैः॥ भूपेभ्रत्यैरमात्यैश्च प्रोक्तः प्रोक्तः पुनः पुनः॥ वनवासविनिर्बंधं नाप संहरते
यदा॥ ततो मात्याश्च भृत्याश्च पौरा — — स्तथा द्विजाः॥ समेत्य मंत्रयामासुः किं मंत्र क्रियतामिति॥ तेषां मंत्र
यतां विप्र तिष्ठ योयमजायत॥ अनुरागवतां तत्र महीपालेति धार्मिके॥ सम्यक् ध्यानपरा भूत्वा प्रार्थ
यामः समाहिताः॥ तपसाराध्यमास्वंतमायुरस्य महीपतेः॥ तत्रैकनिश्चयाः कार्यैः केचिद्देह शुभास्करं॥

सम्यगर्घोपहाराद्यैरुपहारैरपूजयन् ॥ अपरे मौनिनो भूत्वा कृच्छ्रजपेन तथापरे ॥ यजुषामथ साम्नां च ते जपं
॥मा॰ पु॰॥ चक्रिरे रविं ॥ अपरे च निराहाराः नदीपुलिनशायिनः ॥ तपः संचक्रुरिछंतो भास्कराराधनं द्विजाः ॥ अग्निहोत्र
१० पराश्चैव रविसक्तान्यहर्निशं ॥ जेपुः स्तवान्यसंततस्तु भास्करे दत्तदृष्टयः ॥ इत्येवमतिनिर्बंधं भास्कराराधनं प्रति
॥३८॥ बहुप्रकारं चक्रुस्ते तं तं विधिमुपाश्रिताः ॥ तथा तु यततां तेषां भास्कराराधनं प्रति ॥ सुदामा नाम गंधर्वेडुप
॥३९॥ गम्येममब्रवीत् ॥ यद्याराधनमिष्टं वो भास्करस्य द्विजातयः ॥ तदेतत् क्रियतां तेन भानुः प्रीतिमुपेष्यति ॥ अस्ति गु
॥४०॥ रुविशालाख्यं वनं सिद्धनिषेवितं ॥ कामरूपे महाशैले गम्यतां तत्र वै लघु ॥ तस्मिन्नाराधनं भानोः क्रियतां सुस
माहितैः ॥ सिद्धिक्षेत्रं हि तत्तत्र सर्वान्कामानवाप्स्यथ ॥ मार्कंडेय उ॰ ॥ इति ते तद्वचः श्रुत्वा गत्वा तत्काननं द्विजा ॥ ददृ
138 शुर्भास्वतस्तत्र पुण्यमायतनं शुभं ॥ तत्र ते नियताहारा वणीविप्रादयो द्विजाः ॥ धूपपुष्पोपहाराद्यैः पूजां चक्रुर
तंद्रिताः ॥ पुष्पानुलेपनाद्यैश्च धूपगंधादिकैस्तथा ॥ जपहोमान्नदीयादिवर्णोः पूजां समाहिताः ॥ कुर्वंतस्तुष्टुवु
र्ब्रह्मन् विवस्वंतं द्विजातयः ॥ प्रजा ऊचुः ॥ देवदानवयक्षाणां ग्रहाणां ज्योतिषामपि ॥ तेजसाभ्यधिकं देवं प्रयामः श
रणं रविं ॥ दिविस्थितं च देवेशं द्योतयंतं समंततः ॥ वसुधामंतरिक्षं च ग्राम्नुवंतं मरीचिभिः ॥ आदित्यं भास्करं भानुं स
वितारं दिवाकरं ॥ पूषाणमर्यमाणं स्वर्भानुं दीप्तदीधितिं ॥ चतुर्युगांतकालाग्निं दुःप्रेक्षं प्रलयांतकं ॥ योगीश्वरम गे
नंतं च रक्तपीतसितासितं ॥ ऋषीणामग्निहोत्रेषु यजुर्वेदेष्ववस्थितं ॥ अक्षरं परमं गुह्यं मोक्षद्वारमनुत्तमं ॥ छंदो ॥राम॥
भिरश्वरूपैर्यः सकृद्युक्तैर्विहंगमैः ॥ उदयास्तमने युक्तः सदा मेरोः प्रदक्षिणं ॥ अमृतं चैव सत्यं च पुण्यतीर्थं पृथ ॥४१॥
विधं ॥ विश्वस्थितिमचिंत्यं च प्रपन्नाः स्म दिवाकरं ॥ यो ब्रह्मा यो महादेवो यो विष्णुः सूर्यः प्रजापतिः ॥ वायुराकाशमा

धरं ॥ स तदायतनं गत्वा भार्यया सह पार्थिवः ॥ भानोराराधनं चक्रे शुश्रूषानिरतो द्विज ॥ निराहारः कृशो मासांश्चय
यासौ पृथिवीपतिः ॥ तिथे तपस्तथैवोग्रं शीतवातातपक्षमं ॥ तस्य पूजयतो भानुं तपश्चरयतो महत् ॥ साग्रः संवत्सरो
जातस्ततः प्रीतो दिवाकरः ॥ समस्तपुत्रभृत्यादिपौराणां च कृते विभुः ॥ यथाभिलषितं सर्वं वरं प्राप्तः सुदुर्लभं
स च लब्ध्वा वरं राजा समागम्य पुरं ततः ॥ चकार मुदितो राज्यं प्रजाधर्मेण पालयन् ॥ इयाज च महायज्ञैर्ददौ दा
नान्यहर्निशं ॥ मानिन्या सहितो भोगान्बुभुजे च स्वधर्मवित् ॥ दशवर्षसहस्राणि पुत्रपौत्रादिभिर्नृपः ॥ भृत्यै
श्च सहितः पौरैः सोभवत्स्थिरयौवनः ॥ तस्यैतच्चरितं दृष्ट्वा प्रमतिर्नाम भार्गवः ॥ विस्मयाकृष्टहृदयो गाथामेताम
गायत ॥ भानुभक्तेरहो शक्तिर्यद्राजा राज्यवर्द्धनः ॥ आयुष्यवर्द्धनो जातः स्वजनस्य च पालनः ॥ इति ते कथितं वि
प्र यत्पृष्टोहं त्वयादितः ॥ आदिदेवस्य माहात्म्यमादित्यस्य विवस्वतः ॥ विप्रैतदखिलं श्रुत्वा भानोर्माहात्म्यमु
त्तमं ॥ पठन्प्रमुच्यते पापैः सप्तरात्रकृतैर्नरः ॥ आरोगो धनधान्याढ्यः कुले महति धीमतां ॥ जायते च महाप्राज्ञ
यश्चैतद्धारयेद्धृदि ॥ मंत्राश्च ये त्राभिहिता भास्वतो मुनिसत्तम ॥ जपन्प्रत्येकमेतेषां त्रिसंध्यं पातकापहः ॥ स
मस्तमेतन्महात्म्यं यत्र चायतने रवेः ॥ पठ्यते तत्र भगवान्सान्निध्यं न विमुंचति ॥ तस्मादेतत्त्वया ब्रह्मन्भानो
र्माहात्म्यमुत्तमं ॥ धार्यं मनसि जप्यं च महत्पुण्यमभीप्सता ॥ सुवर्णशृंगां गोमतिं शोभनांगीं पयस्विनीं गां प्रददा
ति यो हि ॥ शृणोति चैतत्सह सालवान्नरः ॥ समं तयोः पुण्यफलं द्विजाग्र्यः ॥ इति श्रीमार्कंडेयपुराणे राज्यवर्द्ध
नोपाख्यानं ॥ १६१ ॥ मार्कंडेय उ० ॥ एवं प्रभावो भगवाननादिनिधनो रविः ॥ यस्य त्वं क्रौष्टुके भक्त्या माहात्म्यं परि
पृच्छसि ॥ परमात्मा स योगानां युंजतां चेतसो लयः ॥ स ज्ञाक्षेत्रज्ञसंख्यानां यज्ञेशो यज्विनामपि ॥ स्वर्योधिकारं

॥मा०पु०॥ बृहतोविस्तारोशास्यवेधसः॥मनुस्तस्याभवत्सुतःछिन्नधर्मार्थसंशयः॥मन्वंतराधिपोविप्रयस्यसप्तममंतरं॥इक्ष्वाकु
नामगादिष्टःशर्यातिश्चकरूषकः॥नरिष्यंतोथनाभागःपृषध्रोधृष्ट एव च॥एतेपुत्रामनोस्तस्यपृथग्ग्रामैरस्यपालकाः
॥१४१॥ विख्यातकीर्त्तयःसर्वेसर्वेशास्त्रार्थपारगाः॥विशिष्टतरमन्विच्छन्मनुःपुत्रंतथासनः॥मित्रावरुणयोरिष्टिंचकारक
२ तिनावरः॥तत्राचापहृतेहोतुरपचारान्महामुने॥इलानामसमुत्पन्नामनोःकन्यासुमध्यमा॥तांदृष्ट्वाकन्यकांतत्रस
मुत्पन्नांततोमनुः॥तुष्टावमित्रावरुणौवाक्यंचेदमुवाचह॥भवत्प्रसादात्तनयोविशिष्टोमेभवेदिति॥कृतेयमिष्टिंच
रुत्पन्नातनयामम॥यदिप्रसन्नौवरदौतदियंतनयामम॥प्रसादाद्भवतःपुत्रोभविष्यतिगुणान्वितः॥तथेतिताभ्यामु
क्तेसुतदेवाभ्यांसैवकन्यका॥इलाइलःसपुत्रोभूत्सुद्युम्नइतिविश्रुतः॥पुनश्चेश्वरकोपेनमृगयामटतावने॥स्त्रीत्वमासा
दितंतेनमनुपुत्रेणधीमता॥पुरूरवसानामानंचक्रवर्त्तिनमूर्जितं॥जनयामासतनयंतत्रसोमसुतोबुधः॥जाते
पुत्रेततःकृत्वासोश्वमेधंमहाक्रतुं॥पुरुषत्वंततःप्राप्तःसुद्युम्नःपार्थिवोभवत्॥सुद्युम्नस्यत्रयःपुत्राःउत्कलोविनतो
गयः॥पुरुषत्वेमहावीर्यायज्विनःपृथुलौजसः॥पुरुषत्वेतुयेजातास्तस्यराजस्त्रयःसुताः॥बुभुजुस्तेमहीमेतांध
र्मनियतचेतसः॥स्त्रीभूतस्यतुयोजातास्तस्यराज्ञःपुरूरवाः॥नसलेभेमहीभागंयतोबुधसुतोहिसः॥ततोवसिष्ठव
चनात्प्रतिष्ठानंपुरोत्तमं॥तस्मैदत्तंसराज्ञाभूत्तत्रातीवमनोहरः॥ ॥इतिश्रीमार्कंडेयपुराणेसौवर्णिकेमनुक्र
मणे॥१०७॥मार्कंडेयउवाच॥एषध्राख्योमनोःपुत्रोमृगयामृगमर्द्दनं॥तत्रचंक्रममाणोसौविपिनेनिर्जने॥ ॥रामः॥
नासासादमृगंकंचिन्दानुद्दीधितितापितः॥क्षुत्क्षामस्तुपरीतांगइतश्चेतश्चसंभ्रमन्॥सददर्शतदातत्रहोमधेनुं ॥१४१॥
वनोदरे॥स्वाध्यायिनोवनांतस्थब्राह्मणस्याग्निशालिनः॥समन्यमानोगवयमिषुणातामताडयत्॥पपाता

141A

साचतद्बाणविभिन्नहृदयासुवि॥ ततोग्निश्शूलिनः पुत्रो ब्रह्मचारी तपोरतिः॥ सप्तवर्षः पितुर्दृष्ट्वा होमधेनुं निपातितां॥
गोपालः प्रेषितोपि त्वां नाम्ना ख्यातो नामनामतः॥ कोपामर्षपराधीनचित्तश्चित्तस्ततो मुने॥ चुकोप विगलत्स्वेदजललोला
विलेक्षणः॥ तं क्रुद्धं प्रेक्ष्य स नृपः प्रबद्धो मुनिदारकं॥ प्रसीदेति जगौ कस्मात्क्रुद्धवत्कुरुषे रुषं॥ न क्षत्त्रियान वा वैश्य
एवं क्रोधमुपैति वै॥ यथा त्वंस्मृद्धवज्जातो विशिष्टे ब्राह्मणे कुले॥ मार्कंडेय उवाच॥ इति निर्भर्त्सितं स्तेन स राज्ञः शूलिनः
सुतः॥ शशाप तं दुरात्मानं स्मृद्ध एव भविष्यसि॥ अयास्य सिशिक्षदृष्टं यं ब्रह्मयत्तेऽधीतं गुरोर्मुखात्॥ होमधेनुर्मम गुरोर्येदियं
हंसिता त्वया॥ एवं शप्तो नृपः क्रुद्धस्तच्छापपरिपीडितः॥ प्रतिशाप परो विप्रतायजग्राह पाणिना॥ भयो राज्ञो॥
विनाशाय कोपं चक्रे द्विजन्मवान्॥ तमभ्येत्य पिता तस्य शूली वचनमब्रवीत्॥ वत्सालमलमत्यर्थ कोपेन यति वै
रिणा॥ ऐहिकामुष्मिकहितः शम एव द्विजन्मना॥ कोपस्तपो नाशयति क्रोधान्धः शत्रुथायुषः॥ क्रुद्धस्य गल
ति ज्ञानं क्रुद्धः स्वर्गं न महीयते॥ न धर्मः क्रोधशीलस्य नार्थमाप्नोति रोषवान्॥ नालं सुखाय कामाप्तिः कोपिना
विष्टचेतसां॥ यदि राज्ञा हता धेनुरियं विज्ञानिमासता॥ युक्तमत्र दया कर्त्तुमात्मनोऽहितकारिणि॥ अथवा
ऽज्ञानता धेनुरियं व्यापादिता मम॥ तत्कथं शापयोग्योयं दुष्टं नास्य मनो यतः॥ आत्मनो हितमन्विच्छन्न बा
धतेयः परं नरः॥ कर्त्तुं व्यामूढविज्ञाने दया तत्र दयालुभिः॥ अज्ञानतः कृते दंडं पातयंति बुधा यदि॥ बुधेभ्यस्त
दहं मन्ये वरमज्ञानिनो नराः॥ नायं शापस्त्वया देयः पार्थिवस्यास्य पुत्रक॥ स्वकर्मणो च विहिता गोरेषा दुःख
मस्तु ना॥ मार्कंडेय उ॥ एवमुक्तोपि मुनेः पुत्रं प्रणामानतकंधरः॥ प्रसीदेति जगादोच्चैः अज्ञानात् घातितेति
च॥ मया गवयबुध्या गौरवध्या घातिता मुने॥ न ज्ञानाद्धोमधेनुस्ते प्रसीदे त्वं च नो मुने॥ ऋषिरुवा॥ आज्ञा

॥मा०पु०॥ [redacted] न्मतो महीपालनमया व्याहृतं मया॥ क्रोधश्चा महाभाग न त्वया मे कदाचन॥ तन्नाहमेनं
शप्तोऽस्मि शापं कर्तुं न यान्यथा॥ यस्तु स सुघतः शापो द्वितीयः स निवर्त्तितः॥ इत्युक्तवंतं तं बालमादाय स पिता तत
॥१४२॥ तः॥ जगाम स्वाश्रमं सोपि पृषध्रः शूद्रतामगात्॥ इति मार्कंडेयपुराणे वंशानुकथने॥१०१॥ मार्कंडेय उवा०॥ कारू
142 षाः क्षत्रियाः शूराः करूषस्याभवन् सुताः॥ तत्र सप्त सुता वीरास्तेभ्यश्चान्ये सहस्रशः॥ दिष्टपुत्रस्तु नाभागः स्थितः
प्रथमयौवने॥ ददर्श वैश्यतनयामतीव सुमनोहरां॥ तस्यां सदृष्टमात्रायां मदनाक्षिप्तमानसः॥ बभूव भूपतनयो
निश्वासाक्षेपतत्परः॥ तस्याः सगत्वा जनकं ववेत्रे तां वैश्यकन्यकां॥ ततो नंग पराधीनमनोवृत्तिर्द्विजोत्तम
तं चाह तस्याः स पिता राजपुत्रं कृतांजलिः॥ बिभ्यत्तस्य पितुर्विप्र प्रश्रयावनतं वचः॥ भवंतो भूभुजो भृत्याः व
यं वः करदायकाः॥ कथं संबंधमस्माभिरभिवांछसि॥ राजपुत्र उ०॥ साम्यं मानुषदेहस्य संसारैर्लोहादिभिः
कृतः॥ तथापि कालेऽतैरेव योऽन्यतेमानुषं वपुः॥ तथैव चोपकाराय जायंते तस्य तान्यपि॥ अन्यानि चान्यजा
तीनि भिन्नजाति मतां सतां॥ तथा स्वन्यान्ययोग्यानि योग्यतां याति कालतः॥ योग्यान्ययोग्यतां याति कालव
शाद्धि योग्यता॥ आप्यायते यच्छरीरमहारादिभिरीप्सितैः॥ कालं ज्ञात्वा तथा भूतं तदेव परिशोष्यते॥ इत्थं म
मैषाभिमता तनया दीयतां त्वया॥ अन्यथा मच्छरीरस्य विपत्तिरुपपद्यते॥ वैश्य उ०॥ परतंत्रा वयं त्वं च परतं
त्रो महीभुजः॥ पित्रा तेनाभ्यनुज्ञातस्त्वं गृहाणाददाम्यहं॥ राजपुत्र उ०॥ प्रष्टव्याः सर्वकार्येषु गुरवो गुरुवर्त्ति ॥राम॥
भिः॥ न त्वीदृशेषु कार्येषु गुरूणां वाक्यगोचरः॥ क्व मन्मथे कथालापो गुरूणां श्रवणं क्व च॥ विरुद्धमेतदन्य
त्र प्रष्टव्या गुरवो नृभिः॥ वैश्य उवा०॥ एवमेतत्समालापस्तवायं प कुमार गुरुं॥ अहं प्रक्षामि नालापो मम का ॥१४२॥

142A

नकथाश्रयः ॥ मार्कंडेयउवाच ॥ इत्युक्तः सोभवन्मौनी राजपुत्रः स चापि तत् ॥ तत्पित्रे सर्वमाचष्ट राजपुत्रस्य
न्मतं ॥ ततस्तस्य पिता विप्रान्स्वीकादीन् द्विजोत्तमान् ॥ प्रवेश्य राजपुत्रं च यथाख्यातं न्यवेदयत् ॥ निवेद्य च ततः
प्राह मुनीनेवं व्यवस्थिते ॥ युष्माकं वक्तव्यं तदादेष्टुमर्हथ द्विजसत्तमाः ॥ ऋषयऊ ॥ राजपुत्रानुरागस्ते यद्यस्यां
वैश्यसंततौ ॥ तदस्तु धर्म एवैष किंतु न्यायक्रमेण सः ॥ मूर्द्धाभिषिक्ततनया पाणिग्रहो भवान्पुरः ॥ भ
वत्वनंतरं चैषा तव भार्या भविष्यति ॥ एवं न दोषो भविता तवेमामुपभुंजतः ॥ अन्यथान्येति ते जातिरुत्क
ष्टा वालकानयात् ॥ मार्कंडेयउ ॥ इत्युक्तस्तदपास्यैव वचस्तेषां महात्मनां ॥ विनिष्क्रम्य गृहीत्वा तां सुधृतासि
रथाब्रवीत् ॥ राक्षसेन विवाहेन मया वैश्यसुता हृता ॥ यस्य सामर्थ्यमत्रास्ति स एतां मोचयत्विति ॥ ततः स
वैश्यस्तां हृतां दृष्ट्वा गृहीतां तां तनयां द्रुतं ॥ त्राहीति पितरं तस्य प्रययौ शरणं द्विज ॥ ततस्तस्य पिता क्रुद्ध आदिदे
श बलं महत् ॥ हन्यतां हन्यतां दुष्टो नाभागो धर्मदूषकः ॥ ततस्तु युयुधे सैन्यं तेन भूपसुतेन वै ॥ हतास्त्रे
ण ततस्तेन तत्प्राचुर्येण पातितं ॥ स श्रुत्वा निहतं सैन्यं राजपुत्रेण भूपतिः ॥ स्वयमेव ययौ पुत्रं स्वसैन्यप
रिवारितः ॥ ततो युद्धमभूत्तस्य भूभुजः स्वसुतेन यत् ॥ राजपुत्रेण शस्त्रास्त्रैस्तत्रातिशायितः पिता ॥ ततोतु
रित्सादागत्य परिव्राजो महामुनिः ॥ प्रस्तुवाच महीपाल विरमेति संयुगात् ॥ त्वत्सुतस्य महाभाग विधर्मो
यं दुरात्मनः ॥ तवापि वैश्येन सह न युद्धं धर्मवन्नृप ॥ ब्राह्मणो ब्राह्मणीं पूर्वं कुर्वन्दारपरिग्रहं ॥ ब्राह्म
ण्याः सर्ववर्णेषु न हानिमुपगच्छति ॥ तथैव क्षत्रियसुतां क्षत्रियः पूर्वमुद्वहन् ॥ इतरे पितरो वर्णे च्यवते तेन स्व
वर्णतः ॥ पूर्वं वैश्यस्तयां वैश्यां पश्चाच्छूद्रकुलोद्भवां ॥ नहीयते वैश्यकुलाद्यं न्यायक्रमोदितः ॥ ब्राह्मणः क्षत्रि

॥मा०पु०॥ वैश्यः सर्व्वणोपाणिसंग्रहं॥ अकृत्वान्यभवा पाणेः पतंति न्पसंग्रहात्॥ यस्या हि हीनायाः कुरुते पाणिसंग्रहं॥ अकृ
त्वा वर्णसंयोगं सोपि तद्वल्लिभाग्भवेत्॥ सोयं वैश्यत्वमापन्नस्तव पुत्रः सुमंदधीः॥ नास्याधिकारो युद्धाय क्षत्रि
॥१४३॥ येण त्वयासह॥ वयमेवात्र ज्ञानीमः कारणं नृपनंदन॥ यथा भविष्यती दंच निवर्त्तरणकर्म्मणः॥ इतिश्री
मार्कंडेयपुराणे नाभागाख्याने॥१०२॥ मार्कंडेय उ०॥ ततो निवर्त्तितो भूपः संग्रामात्तस्तु तेन वै॥ उपयेमे च
143 तां वैश्यतनयां सोपि तत्सुतः॥ ततः स वैश्यतां प्राप्तः समुपेत्याह पार्थिवं॥ भूपाल यन्मया कार्य्यं तत्समादि
श्यतां मम॥ राज्ञो वाच॥ धर्म्माधिकारेण युक्ता वाभ्रव्याधास्तपस्विनः॥ यदस्य कर्म्म धर्म्मो वा तद्वदंतु तथा म
म॥ मार्कंडेय उ०॥ ततस्ते मुनयस्तस्य पांसुपाल्यं तथा कृषिं॥ वाणिज्यं परमं धर्मं कर्मो चरवुः सभासदः॥ तथा
चक्रे स सुतस्तस्य राज्ञो यथादितं॥ तेर्द्धर्मं वादिभिर्द्धर्मं च्युतस्य निजधर्म्मतः॥ तस्य पुत्रस्ततो जातो नाम्ना ख्या
तो भलंदनः॥ स्वमात्रा प्रहितो गच्छ गोपाल भव पुत्रक॥ मात्रा तथाभियुक्तोथ पणिपत्य च मातरं॥ राजर्षिम
गमन्नीयं हिमवत्पर्वताश्रयं॥ तं समेत्य स राजाह तस्य पादौ यथाविधि॥ प्रणिपत्याह चैवैनं राजर्षिं स भलं
दनः॥ आदिष्टो भगवान्मात्रा गोपाल स्त्वं भवेति वै॥ मया च पालनीया क्ष्मा तस्याः स्वीकरणं कथं॥ मया हि गोः
पालनीया सा यदा स्वीकृता भवेत्॥ आक्रांता बलवद्भिः सा दायादैः पृथिवी मम॥ तां यथा प्राप्नुयां पृथ्वीं त्व
त्प्रसादादहं विभो॥ तथादिश करिष्यामि तवाज्ञां प्रणतोस्मि ते॥ मार्कंडेय उ०॥ ततः स नीपो राजर्षिस्तस्मै निरव
शेषतः॥ भलंदाय ददौ ब्रह्मन्नस्त्रग्रामं महात्मने॥ प्राप्तास्त्रविद्यः स यदा पितृव्यतनयानिमान्॥ वसुरातादिका ॥रामः॥
न्पुत्रान् दिष्टस्य स महात्मनः॥ अयाचत स राज्यार्द्धं पितृपैतामहोचितं॥ तत्रोचुर्वैश्यपुत्रस्त्वं कथं भोक्ष्यसि ॥१४३॥

143A

मेदिनी ॥ ततस्तैर्युद्धमभवत् भलंदस्यात्मवंशजैः ॥ वसुरातादिभिः क्रुद्धैः कृतास्त्रस्यास्त्रवर्षिणः ॥ स हत्वतानशेषांस्तु श
स्त्रविक्षितसैनिकः ॥ जहार पृथिवीं तेषां धर्मयुद्धेन धर्मवित् ॥ स निर्जितारिः सकलां पृथ्वीं राज्यं ततः पितुः ॥ निवेदया
मास न तत्पिता जगृहे द्विज ॥ प्रत्युवाच ततः पुत्रं भार्यायाः पुरतस्तदा ॥ राजोवाच ॥ भलंद राज्यमेतत्ते क्रियतां पूर्व
जैः कृतं ॥ अहं न कृतवान्राज्यं असामर्थ्यं सुतः पुरा ॥ वैश्यतां तु पुरस्कृत्य तथैवाज्ञाकरः पितुः ॥ कृत्वा प्रीतिं पितुरहं
वैश्यकन्यापरिग्रहात् ॥ न सुण्यलोकमाप्नाज्ञन् यावदाभूतसंप्लवं ॥ उद्धंघ्याज्ञां पितुस्तस्य पालयामि महीय
दि ॥ नास्ति मोक्षस्ततो नूनं मम कल्पशतैरपि ॥ न चापि युक्तं त्वद्बाहुनिर्जितं मम मानिनः ॥ राज्यं भोतु मनीदृशस्य दु
र्बलस्य च कर्हिचित् ॥ राज्यं कुरुस्व यं यावत् तदा यादेभ्यो विमुंच वा ॥ ममाज्ञापालनं शस्तं पितुर्न क्षितिपालने ॥ मा
र्कंडेय उ० ॥ ततः प्रहस्य तन्माता सा सुप्रभा नाम मानिनी ॥ प्रत्युवाच पतिं भूपं गृह्यतां राज्यमर्जितं ॥ न त्वं वैश्यो
न चैवाहं जाता वैश्यकुले नृप ॥ क्षत्रियस्त्वं क्षत्रियाहं क्षत्रियाणां कुलोद्भवा ॥ पूर्वमासीन्महीपालः सुदेव
इति विश्रुतः ॥ तस्याभूच्च सखा राज्ञो धूम्राश्वस्य सुतो नलः ॥ स तेन सख्या सहितो ययाच्चाम्रवनं परं ॥ पत्नी
भिश्च समं रंतुं माधवे मासि पार्थिवः ॥ ततः पानान्यनेकानि भक्ष्याणि बुभुजे तदा ॥ भार्याभिः सहितस्ताभिस्ते
न सख्या समन्वितः ॥ ततः पुष्करिणीतीरे ददर्शाति मनोरमां ॥ पत्नीं च्यवनपुत्रस्य प्रमतेः पार्थिवात्मजां ॥
सख्या तस्य नलो मत्तो जगृहे तां च दुर्मतिः ॥ पश्यतस्तस्य राज्ञस्तु त्राता त्रातेति वादिनी ॥ आक्रंदितं निशम्यैत
स्ततस्याः प्रमतिः पतिः ॥ आजगाम त्वरायुक्तः किमेतदिति वै वदन् ॥ ततो ददर्श राजानं सुदेवं तत्र संस्थितं ॥ गृ
हीतां च तया पत्नीं नलेन सुदुरात्मना ॥ ततः सुदेवं प्रमतिः प्राहायं शास्यतामिति ॥ त्वं च शास्ता भवान्राजा दु

श्चश्रायं यतोनघ॥ मार्कंडेय उ०॥ तस्यास्तस्य वचः श्रुत्वा सुदेवो नलगौरवात्॥ प्राह वैश्यो ऽस्मि गच्छान्यं क्षत्रियं त्राण
कारणात्॥ तस्य सप्रमतिः क्रुद्धस्तेजसा प्रदहन्निव॥ प्रत्युवाचाथ राजानं वैश्योस्मीत्यभिभाषिणं॥ एवमस्तु भवा
न्वैश्यः क्षत्रियः क्षतरक्षणात्॥ क्षत्रिये द्यूयते शस्त्रं नार्त्तशब्दो भवेदिति॥ स त्वं न क्षत्रियो भावी वैश्य एकुलाध
म॥ इति श्रीमार्कंडेयपुराणे नाम ॥१३॥ सुप्रभोवाच॥ तस्मै दत्वा ततः शापं नलं क्रुद्धोऽब्रवीद्द्विजः॥ प्रमतिर्भार्ग
वः कोपात्रैलोक्यं निर्दहन्निव॥ मदोन्मत्तो यदा भार्यो भवानत्र ममाश्रमे॥ बलाद्गृह्णाति भस्म त्वं तस्माद्भूजत्तु माचि
रं॥ तेनोदाहृतमात्रे तु वाक्यस्मिन्स्तदानलः॥ देहजेनाग्निना सद्यो भस्मपुंजस्तदाभवत्॥ दृष्टा प्रभावं तु त
स्य सुदेवो विस्मयस्ततः॥ प्रणम्य तं च प्राहेदं क्षम्यतां क्षम्यतामिति॥ यदुक्तं वा स्त्व भगवन्सुरापानसमाकुलं॥
तत्क्षम्यतां प्रसीद त्वं शापोयं विनिवर्त्यतां॥ एवं प्रसादितस्तेन प्रमतिः प्राह भार्गवः॥ गतकोपानलोदग्धं तं
विनीते न चेतसैः सा॥ नान्यथा भावितद्वाक्यं यन्मया समुदीरितं॥ तथापि ते करिष्यामि प्रसन्नोनुग्रहं परं॥
भविता वैश्यजातीयो भवान्नास्त्यत्र संशयः॥ भविता क्षत्रियो भूयस्तस्मिन्नेवामुजन्मनि॥ ग्रहीष्यति च लोके
न्या यदा ते क्षत्रिसंभवः॥ तदा त्वं क्षत्रियो वैश्यः सुग्रहीतो भविष्यसि॥ एवं स वैश्यस्तु भूपालः सुदेवो स्मस्थितो भ
वत्॥ अहं चया महाभाग तस्सर्वं श्रूयतां त्वया॥ सुरथो नाम राजर्षिः प्रागासीद्धर्मार्दनो॥ तपस्वी नियताहा
रस्त्यक्तसंगो वनाश्रयः॥ तस्याश्रमे न मुखाद्भ्रष्टां दृष्ट्वा कामारिकां भुवि॥ कृपया मे उज्जनितामृच्छीतया तस्य महात्म
नः॥ ततो मृत्योवसाने ऽहं तस्याम्यन्तापरो रतः॥ समादृष्ट्वा च जगृहे स्निग्धमानेन चेतसा॥ यस्मात्कृपाभिभूत ॥राम:॥
स्य मम जातेयमात्मजा॥ तस्मात्कृपावती नाम्ना भविष्यत्याह सप्रभुः॥ ततोहमाश्रमे तस्य वर्द्धमाना दिवानिशं॥ ॥१४४॥

144A

सखीभिः सह तुल्याभिर्विचरामि रमामिव॥ ततो मुनेरगस्त्यस्य भ्राता भगभग इति श्रुतः॥ स चिन्वन् काननेवन्यं
सखीभिः कोपितो ऽस्यत॥ यस्मान्मां वैश्य इत्याह भगवतीतेन ते शमे॥ वैश्या भविष्यसी त्युक्ते स प्रसाद्योक्तो मया मु
निः॥ नापराधं कृतवती तवाहं द्विजसत्तम॥ अन्यासामपराधेन किमर्थं शप्तवानसि॥ ऋषिरुवाच॥ दुष्टत्वे दुष्टसंस
र्गो दद्दुष्टमपि गच्छति॥ सरा विंदुनिपातेन पंचगव्य घटो यथा॥ दुष्ट यप्रतिप्रणामेन यत्वयाहं प्रसादितः॥ तस्माद
नुग्रहं बाले मत्पुयत्ते करोम्यहं॥ वैश्ययोनौ यदा जाता त्वं पुत्रं बोधयिष्यसि॥ राज्याय जातिस्मरं तात तदा त्वं समवाप्स्य
सि॥ ततो ऽन्यः पूर्वजातिं प्राप्ता त्वं पतिना सह॥ दिव्यानवाप्स्यसे भोगानगच्छतीस मुपेतु ते॥ एवं शप्तास्मि राजेंद्र
तेन पूर्वं महर्षिणा॥ पितापि मे पूर्वतरं प्रप्रमतिनामवत॥ एवं वैश्या नराजेंद्र नं चैव स पिता मम॥ न चाहं मप्यदु
ष्टायामदुष्टो दूष्य से कथं॥ मार्कंडेय उवाच॥ इति तस्या वचः श्रुत्वा स पुत्रस्य च पार्थिवः॥ पुनः प्रोवाच धर्मज्ञ स्तां
पत्नीतनयं तया॥ युन्म यापितुरादेशात्स्वकं राज्यं न तत्पुनः॥ ग्रहीष्यामि दृष्टयोक्तेन किं मां त्वा क्लिश्यते त्वया॥ अहं
प्रदास्यामि करं तव वैश्यव्रते स्थितः॥ भुंक्ष्व राज्यमशेषं त्वमिच्छया वा परित्यज॥ इत्युक्तः स तदा पित्रा राजपुत्रो भ
लंदनः॥ चकार राज्यं धर्मेण तद्वदार परिग्रहं॥ अव्याहतं तस्य चक्रं पृथिव्याम भवद्द्विज॥ न चाधर्मे मनो ऽभूपा
स्तस्य सर्वे भवन्वरो॥ तेनेष्टं विधिवद्यज्ञैः सम्यक्पालाव संधरा॥ स एवं वैकोभवन्दत्तो पृथिव्यां व्यापि शासनः॥ प्र
जायत स्तत्स्तास्य वत्सप्रीनोमनामतः॥ पिता तिशयितो येन गुणौघेन महात्मना॥ तस्यापि भार्या सोनंदा विदू
रथसुता भवन्॥ पतिव्रता महाभागा सा प्राप्ता तेन वीर्यतः॥ हत्वासुरं दरिरिपुं कृतं भदितिजेश्वरं॥ क्रौष्टुकिरुवाच॥
भगवन् तेजसा प्राप्ताकुजंभनिधनात्कथं॥ एतदाख्यातुमिच्छामि प्रसन्नो नाल्प नात्वया॥ मार्कंडेय उवाच॥ विदू

॥मा० पु०॥ रथो नाम नृपः ख्यातकीर्त्तिरभूद्भुवि॥ तस्य पुत्रद्वयं जातं सुनीतिः सुमतिस्तथा॥ एकदा तु वनं यातो मृगयां स
विदूरथः॥ ददर्श गर्त्तं सुमहान्तं भूमेर्मुखमिवोद्गतं॥ तं दृष्ट्वा चिंतयामास किमेतदिति भैरवं॥ पातालविवरं म
॥१४५॥ न्ये नैतद्भूमेश्छिद्रं ततं॥ चिंतयन्निति तत्राथ ददर्श विजने वने॥ ब्राह्मणं सुव्रतं नाम तपस्विनमुपागतं स संपप्रच्छ
नृपतिः किमेतदिति विस्मितः॥ अतिगंभीरमवनेर्दृश्यतां तर्गतोदरम्॥ ऋषिरुवाच॥ किं न वेत्सि महीपा
145 ल त्वं चारात्सहि ममतः॥ ज्ञेयं सर्वं नरेंद्रेण वर्त्तते यन्महीतले॥ त्रिदिवे वा नरपते तं कथं वेत्ति नो भवान्॥ सुनंदना
म मुशलं त्वष्ट्रा यन्निर्मितं पुरा॥ तं जहार सुदुष्टात्मा तेन हंति रिपून्॥ पातालांतर्गतस्तेन भिनत्ति वसुधामिमां॥
ततो सुराणां सर्वेषां द्वाराणि कुरुते ऽसुरः॥ मोक्ष्यते वसुधां मे तात मज्जित्वा कथं भवान्॥ यज्ञान् विध्वंसयत्युग्रो
देवलोकस्य पीडकः॥ आप्याययति वै दैत्यान् सबलो मुशलायुधः॥ यदिमं घातयस्यारिं पातालांतरगोचरं॥ तत
स्समस्तवसुधाधिपतिः परमेश्वरः॥ मुशलस्तस्य बलिनः सौनंदः प्रोच्यते जनैः॥ तथा बलाबलं चैव विवदंति वि
चक्षणाः॥ तच्च निर्वीर्यतां याति संस्पृष्टं योषिता नृप॥ तस्मिन् दिने द्वितीयेह्नि वीर्यवत्तदुदीर्यते॥ न सेवेत दुराचारः
प्रभावं मुशलस्य तं॥ योषित्करात्संस्पर्शदोषवीर्यविनाशनं॥ एतत्तस्य बलं भूप दानवस्य दुरात्मनः॥ मुशलस्य च
ते प्रोक्तं यद्युक्तं तत्समाचर॥ आसन्नमेतद्भवतः पुरस्य पृथिवीपते॥ कृतं तेन महीरंध्रं निश्चिंतः किं भवान्नृप॥
इत्युक्त्वा स गते तस्मिन् सुनावय महीपतिः॥ मंत्रयामास मंत्रज्ञैः परमार्थं च मंत्रिभिः॥ यथाश्रुतमशेषं च कथया
मास मंत्रिणां॥ मुशलस्य प्रभावं च वीर्यशातनमेव च॥ तं मंत्रं क्रियमाणं तु मंत्रिभिः सह भूभृता॥ तत्पार्श्ववर्त्तिनी क ॥राम:॥
न्या सुश्रावायमुदावती॥ ततः कतिपयाहे तु तां कन्यां रममाणिकां॥ जहारोपवनाद्दैत्यः कुजंभः सखिसंवृतां॥ ॥१४५॥

145A

एतच्छ्रुत्वा महीपालः क्रोधपर्याकुलेक्षणः ॥ पुत्रावुवाच त्वरितं हतां श्रुत्वा तु कन्यकां ॥ तत्सुतौ प्राप्य तत्कृत्तं तस्य दानु
गो ॥ युयुधाते कुजंभेन ससैन्येनातिकोपितौ ॥ ततः परिघनिस्त्रिंशभल्लशक्तिपरश्वधैः ॥ बाणैश्चाविरतं युद्धं तेषा
मासीत्सुदारुणं ॥ ततो मायाबलवता तेन दैत्येन तावुभौ ॥ राजपुत्रौ रणे बद्धौ निहतः शेषसैनिकौ ॥ तच्छ्रुत्वा सम
हीपालः प्राह दं सहसैनिकः ॥ बद्धपुत्रः परामार्त्तिं सुपेत्य मुनिसत्तम ॥ यस्तं निहत्य दैतेयं मोचयिष्यति मे सु
तौ ॥ तस्याहं संप्रदास्यामि तस्मै वायतलोचनां ॥ इत्येवं घोषमाणं च कृतास्त्रः शौर्यसंवृतः ॥ स च गम्यासि वा दि
नं प्राह पार्थिवसत्तमं ॥ विनयावनतो भूत्वा पितुर्मित्रमनुत्तमं ॥ विनयावनतो भूत्वा पितुर्मित्रमनुत्तमं ॥ आज्ञा
पयामास मां येन तनयो मोचयामि ते ॥ तं चैव तेजसा हत्वा तं दैत्यं तनयां च तां ॥ मार्कंडेय उवाच ॥ स तं सुदा परिष्व
ज्य प्रियसख्युरथात्मजं ॥ गम्यतामिति संसिद्धो वत्स स्याहस पार्थिवः ॥ स्थाने स्थास्यति मे वत्सो यश्चैवं कुरुते विधिः ॥
वत्स तत्क्रियतामाशु यच्छुत्साहि मनस्तव ॥ ततः स खड्गी सधनुर्बद्धगोधांगुलित्रवान् ॥ जगाम वीरः पातालं ते
न गर्त्तेन सत्वरं ॥ ततो ज्यास्वनमाकर्ण्य कुजंभो दानवेश्वरः ॥ आजगामातिकोपेन स्वसैन्यपरिवारितः ॥ ततो
युद्धमभूत्तस्य तेन पार्थिवसूनुना ॥ ससैन्यस्य ससैन्येन वलिनो बलशालिना ॥ दिनानि त्रीणि स तदा योधितस्तेन
दानवः ॥ ततः कोपपरीतात्मा मुशलायाभ्यधावत ॥ गंधैर्माल्यैस्तथा धूपैः पूज्यमानः स तिष्ठति ॥ अंतःपुरे महा
भाग प्रजापतिविनिर्मितः ॥ ततो विज्ञातमुशलप्रभावा सा मुदावती ॥ पस्पर्श मुशलश्रेष्ठमभिनम्रशिरोधरा ॥ पुन
र्यावत्स गृह्णाति मुशलं तं महासुरः ॥ तावत्सा वदनव्याजैः पस्पर्शानेकशः शुभा ॥ ततः स गत्वा युधे मुशलेनासु
रेश्वरः ॥ व्यर्थीं मुशलपातास्ते संजग्मुस्तेषु शत्रुषु ॥ परमास्त्रे च निर्वीर्ये सौनंदे मुशले मुने ॥ अस्त्रेष्वशस्त्रैर्दैत्ये

यः सोऽपुष्यतरलेरिणा ॥ शस्त्रास्त्रैर्नेसमस्तस्य राजपुत्रस्य सोसुरः ॥ मुशलेनैव बलवांस्तत्र तन्या— निराकृतं ॥ ततः प
॥ मा० पु० ॥ राजिस्य सम्भ्रमस्तनुरस्त्राणि शस्त्राणि च दानवस्य ॥ चकार सद्योविरथं ततश्च स चर्मखड्गाग्रकरोभ्यधावत ॥ तमाप
॥ १४६ ॥ तं तं तरसान्युदीर्णं विस्पष्टकोपं त्रिदशेंद्रशत्रुं ॥ अस्त्रेण वह्नेर्भुवि राजपुत्रो जघान कालानलसप्रभेण ॥ स वह्नि
शस्त्रेण हृदि क्षतोग्नं ग्रंतत्याज देहं त्रिदशारिरात्मनः ॥ वभूव सद्यश्च महोरगाणां रसातले तेषु महामहोत्सवः ॥
146 ततोथ तस्योपच्छ्रिमिमिहीयालासुतोपरि ॥ जगुर्गंधर्वपतयो देववाद्यानि सस्वनुः ॥ स चापि राजपुत्रस्तं हत्वा
तोन्यतःसृतो ॥ मोचयामास तन्वंगीं तां च कन्यां मुदावतीं ॥ तच्चापि मुशलं तस्मिन्कुंजभे विनिपातितं ॥ जग्रा
ह नागाधिपतिरनंतः शेषसंज्ञितः ॥ तस्याश्चापरितुष्टो सौ शेषः सर्वोरगेश्वरः ॥ मुदाध्मातमनोवृत्तिस्तयोथ न
सुनंदं मुशलस्पर्शं यच्चकार पुनःपुनः ॥ योषित्करतलस्पर्शप्रभावज्ञापिशोभना ॥ मुदावत्यास्ततो नाम नागरा
राजस्ततोऽकरोत् ॥ सुनंदामिति सानंदः सोनंदमुशलं द्विज ॥ स चापि राजपुत्रस्तां भ्रातृभ्यां सहितां पितुः ॥ समी
पमानिनायाश्रुपाणिर्यस्याह तं नृपं ॥ आनीतौ तनयौ तात तथैवेयं मुदावती ॥ तवाज्ञया मयान्यद्यत्कर्तव्यं त
त्समादिश ॥ मार्कंडेय उवाच ॥ ततः प्रहर्षसंपूर्णहृदयः सर्वमहीपतिः ॥ साधु साध्विति सद्याहो द्वैः वत्स वत्सेति सोह
रात्मा ॥ सभाजितोस्मि त्रिदशैर्वत्साहंकारणैस्त्रिभिः ॥ त्वं जामाता च यस्मात्तोय सोरिर्विनिपातितः ॥ आगता न्यस्यता
न्यत्र यच्चापत्यानि मे पुनः ॥ तद्गृहाणाद्य शस्त्रे ह्रियाणिमस्याम्मयोदितं ॥ त्वं राजपुत्र चार्वंग्याः कन्याया दुहितुर्मम ॥ ॥ रामः
मुदावत्या मुदायुक्तः सत्यवाक्कुरु ख्यमं ॥ राजपुत्र उवाच ॥ तात तस्याज्ञा मया कार्या यद्ब्रवीषि करोमि तत ॥ त्वमेव ताततज्जानी ॥ १४६ ॥
षेनैवाज्ञाधिकृताव यं ॥ मार्कंडेय उवाच ॥ ततस्तयोः स राजेंद्रश्चक्रे चैव द्विकं क्रमं ॥ मुदावत्याश्च दुहितुर्भलंदनसुत

146A

स्यतु ॥ ततस्सह तयारेमे वत्सश्रीर्नववयोवनः ॥ रमणीयेषु देशेषु प्रासादशिखरेषु च ॥ कालेन गच्छता वृद्धः पिता तस्य भ
लंदनः ॥ वनं जगाम वत्सश्रीः स च भूमहीपतिः ॥ इयाज यज्ञैः सततं प्रजाः धर्मेण पालयन् ॥ पुत्रवत्पाल्यमानास्तु प्रजा
स्तेन महात्मना ॥ ववृधुर्विषये तस्य न चाभूद्दुर्गसंकरः ॥ न दस्युव्यालदुष्टेभ्यो भयमासीत्तु कस्यचित् ॥ नोपसर्गभयं चैव
तस्मिन् शासति भूपतौ ॥ इति श्रीमार्कंडेयपुराणे भलंदनवत्सश्रीचरितं समाप्तं ॥ मार्कंडेय उ० ॥ तस्य तस्यां सुनंदायां
पुत्रा द्वादश जज्ञिरे ॥ प्रांशुः प्रवीरः शूरिश्च सुचक्रो विक्रमः क्रमः ॥ वलिर्वलाकश्चंडश्च प्रचंडश्चंडविक्रमः ॥ सुनयश्च
महाभागाः सर्वे संग्रामजित्तमाः ॥ तेषां ज्येष्ठो महावीर्यः प्रांशुरासीन्नराधिपः ॥ इतरे भृत्यवत्तस्य बभूवुर्वशवर्त्तिनः ॥
तस्य यज्ञे द्विजस्यैके रनेके द्रव्यराशिभिः ॥ न्यूनवर्णा विसृष्टेश्च सस्यनामा वसुंधरा ॥ सम्यक्पालयतस्तस्य प्रजाः पुत्रानि
वौरसान् ॥ योभूदुन्नचयः कोशस्तेन निष्पादितास्तु ये ॥ क्रतवः शतसाहस्रास्तेषां संख्या न विद्यते ॥ प्रयुताद्येनेकोटिभि
नेचयस्यादिभिर्मुने ॥ प्रजानिस्तस्य पुत्रोभूद्यस्य यज्ञे शतक्रतुः ॥ अवाप्य तृप्तिमतुलां यज्ञभागैः सुरैः सह ॥ दानवानां मु
दीर्णानां जघान नवनीर्नव ॥ वलं च वलनां श्रेष्ठो जम्भं चासुरसत्तमं ॥ अन्यांश्च सुमहावीर्यान् यथानामरविद्विषः ॥ प्र
जानिस्तनयाः पंच खनित्रप्रमुखा मुने ॥ तेषां खनित्रो राजाभूत् ख्यातो निजविक्रमैः ॥ स शांतस्सत्यवाक् शूरः सर्वप्रा
णिहिते रतः ॥ स्वधर्मनिरतो नित्यं वृद्धसेवी बहुश्रुतः ॥ वाग्मी विनयसंपन्नः कृतास्त्रो प्यविकत्थनः ॥ सर्वलोकप्रियो
नित्यमुवाचैतदहर्निशं ॥ नंदंतु विषया भूतानि स्निह्यंत्वरितनेष्वपि ॥ स्वस्त्यस्तु सर्वभूतेषु निरातंकानि संतु च ॥ मा व्या
धिरस्तु भूतानामाधयो मा भवंतु वै ॥ मैत्री मशेषभूतानि पुष्यंतु सकले जने ॥ शिवमस्तु द्विजातीनां स्वस्त्यनां प्रीति
रस्तु च ॥ समृद्धिः सर्ववर्णानां सिद्धिरस्तु च कर्मणां ॥ भो लोकाः सर्वलोके षु शिवा वोस्तु सदा मतिः ॥ यथात्मनि तथा

मा॰ पु॰ ॥ पुत्रेहितमिच्छय सर्वदा ॥ तयासमस्तभूतेषुवर्त्तेधं हितवुद्धयः ॥ एतद्धोहितमत्यंतं कोवा कस्यापराध्यते ॥ यः करोस
हितं किंचित् कस्यचिन्मूढमानसः ॥ तं समभ्येति तन्मूनं कर्हगामिफलं च यत् ॥ इति मत्वा समस्तेषु हे लोका हितवुद्ध
॥१४७॥ यः ॥ मासे तु लौकिकालोकान् पापान् प्राप्स्यथ वै सुधा ॥ यो मेत्र स्निह्यते तस्य शिवमस्तु सदा भुवि ॥ यश्च मां द्वेष्टि लोके
स्मिन् सोपि भद्राणि पश्यतु ॥ एवं स्वरूपः पुत्रोभूत् खनित्रस्तस्य भूपतेः ॥ समस्तगुणसंपन्नः श्रीमानज्वदलेक्षणः ॥ ते
147 न ते भ्रातरः प्रीत्या पृथक्राज्येषु योजिताः ॥ स्वयं च पृथिवीमेतां वुभुजे सागरांवरां ॥ प्राच्यां तेन कृतः शौरिर्दक्षिणापां
मुदावसुः ॥ दिशि प्रतीच्यां सुनय उत्तरस्यां महारथः ॥ तेषां तस्य च भूपस्य पृथग्गोत्राः पुरोहिताः ॥ वभ्रुर्मैत्रिणश्चैव
नौरिवंशक्रमागताः ॥ शौरेरत्रकुलोद्भूतः सुहोत्रो नाम वै द्विजः ॥ उदावसोः कुशावर्त्तो गौतमान्वयजोभवत् ॥ को
श्यपोऽप्रमतिर्नाम सुनयस्य पुरोहितः ॥ महारथस्य वासिष्ठः पुरोधाभून्मनीषिणः ॥ वुभुजेस्ते स्वराज्यानि चत्वारो
नराधिपाः ॥ खनित्रश्चाधिपस्तेषामशेषस्य सुधाधिपः ॥ तेषुभ्रातृष्वशेषेषु खनित्रः समहीपतिः ॥ प्रजासु च समं
स्तासु पुत्रेष्विव सदा हितः ॥ एकदा मंत्रिणा शौरिः सप्रश्रो कोविश्ववेदिना ॥ विविक्ते पृथिवीपाल किंचिद्वक्तव्यमस्ति
मे ॥ यस्येयं पृथिवी कृत्स्ना यस्य भूपा वशानुगाः ॥ स राजा तस्य पुत्रस्य तत्पौत्रस्यान्वयास्ततः ॥ इतरे भ्रातरस्तस्य
प्राकृतस्वल्पविषयाधिपाः ॥ तत्पुत्रास्त्वल्पकास्तस्मात्तत्पौत्रास्त्वल्पकाल्पकाः ॥ कालेन ह्रासमासाद्य पुरुषास्तु
रुषं तरं ॥ कृष्यापजीविनो भूप भवंति पितुरन्वयाः ॥ नो द्वारं कुरुते भ्राता भ्रातुः स्नेहवलात्प्येणः ॥ स्नेहः कः पृथिवी
पालपरयोर्भ्रातृपुत्रयोः ॥ तत्पुत्रैपोः परतरा मतिर्भवति पार्थिव ॥ तत्सुतः केन कार्येण प्रीतिमुक्तो भविष्यति ॥ अथ ॥राम॥
चेद्येन तेनैव संतोषं कुरुते नृपः ॥ क्रियंते तत्किमर्थं तु भूपैर्मंत्रिपरिग्रहः ॥ भुज्यते सकलं राज्यं मया ते मंत्रिणा सता ॥ ॥१४७॥

तत्किंमुधाधारयसेसंतोषंकुरुतेयदि॥ कार्येनिष्यादिकंराज्यंकारणंकर्त्तुरिष्यते॥ राज्यलाभश्चतेकार्यंत्वंकर्त्ताका
रणंवयं॥ सोस्माभिःकारणैराज्यंपितृपैतामहंकुरु॥ फलप्रदाभविष्यामःपरलोकेनतावयं॥ राजोवाच॥ ज्येष्ठोवा
ज्ञामहीपालोयूयंतस्यनुज्ञायतः॥ ततःसमुंक्षेपृथिवींवयंचाल्यवसुंधरां॥ वयंतुभ्रातरःपंचपृथ्वीचैकामहामतो॥
अतोस्याःपृथगैश्वर्येकयंक्षस्तंभविष्यति॥ विश्वदेवउवाच॥ एवमेतन्द्देवास्तत्रपंचधावसुधानृप॥ तांत्वमेवाभिप
द्यस्वज्येष्ठश्रात्स्तुयथाभवान्॥ सर्वाधिपत्यःसर्वेभ्योभवत्वमखिलेश्वरः॥ यतंतेचयथार्हंतंतेषामपिहिमंत्रिणः॥
राजोवाच॥ ज्येष्ठाराज्ञायथाप्रीत्याभजेतस्मान्सुतानिव॥ कथमस्यकरिष्यामिममत्वंजगन्नीजगतीगतं॥ विश्वदेव
उवाच॥ राजस्थितःपृज्यंयेयाज्येष्ठभूपार्हणेवैरैः॥ कनिष्ठज्येष्ठताकेयंराज्यंप्राप्ययतान्नृणां॥ मार्कंडेयउवाच॥ तथे
तिचप्रतिज्ञातेभ्रमुजातेनसत्तम॥ विश्वदेवस्ततोमंत्रीतभ्रातरनयद्वशं॥ तेषांपुरोहितांश्चैवश्रासनःशांतिकादि
षु॥ नियोजयामासततःखनित्रस्याभिचारिके॥ विभेदतस्यनिभृतान्सामदानादिभिस्तथा॥ चक्रेचपरमोयोगं
निजदेहप्रवाधने॥ आभिचारिकमत्युग्रमहन्यहनिकुर्वता॥ पुरोधसांचतुर्णांतुजज्ञेकृत्याचतुष्टयं॥ विकरालं
वमहाभीषणादर्शनं॥ समुद्यतमहाशूलंप्रभृतिमतिदारुणं॥ ततस्तदागतंतत्रखनित्रोयत्रपार्थिवः॥ निरस्तंचा
प्यदुष्टस्यतस्यपुण्यचयेनतत्॥ कृत्याचतुष्टयंतेषुनिपपातदुरात्मसु॥ पुरोहितेषुभूतानांतथावैविश्ववेदिनि॥
ततोनिपेतुर्निर्दग्धाःकृत्याभिस्तेपुरोहिताः॥ विश्ववेदीतथामंत्रीयःशौरेदुष्टमेवदः॥ ॥इतिश्रीमार्कंडेयपुराणे
खनित्रचरिते॥ १२५॥ मार्कंडेयउवाच॥ ततःसमस्तलोकस्यविस्मयःसोभवन्महान्॥ यदेककालंनेशुस्तेपृथक्पु
रनिवासिनः॥ ततःसश्रावनिधनंयातान्भ्रातृपुरोहितान्॥ मंत्रिणंचतथाभ्रातुर्दग्धंतंविश्ववेदिनं॥ किमेतदिति

सोतीव विस्मितो मुनिसत्तम ॥ खनित्रोऽभून्महाराजो नाज्ञानात्तस्य कारणं ॥ ततो वसिष्ठं पप्रच्छ स राजा गृहमागतं ॥ य
॥ मा० पु० ॥ स्कारणं च नेशुस्ते भ्रातृमंत्रिपुरोहिताः ॥ तेन पृष्टस्तदा चाह यथावृत्तं तदा मुने ॥ यत् शौरे मंत्रिणा प्रोक्तं यच्च शौरिरुवा
॥ १४८ ॥ च तत् ॥ यथा चानुष्ठितं तेन भ्रातृणां मे दकारिवै ॥ मंत्रिणा तेन दुष्टेन चक्रुर्यच्च पुरोहिताः ॥ यन्निमित्तं विनेशुस्ते अपा
पे पापकारिणः ॥ पुरोहितास्तस्य राज्ञः शान्त्या वपिद्यावतः ॥ एतत् श्रुत्वा ततो राजा हा हतोस्मीति वै वदन् ॥ निनिंदात्मा
148 नमत्यर्थं वसिष्ठस्याग्रतो द्विज ॥ राजोवाच ॥ धिग्मामपुण्यसंस्थानमल्पभाग्यमशोभनं ॥ देवद्वो वहतं यापं सर्वलोक
विगर्हितं ॥ यन्निमित्तं विनष्टं तत् यद्ब्राह्मणचतुष्टयं ॥ मत्तः कोन्यः पापतरो भविष्यति पुमान् भुवि ॥ नाभविष्यं यदि
पुमानद्य मत्र महीतले ॥ ततस्तेन विनश्येयुर्मम भ्रातृपुरोहिताः ॥ धिग्मां जन्म धिक् च मे जन्म भूभुजां महतां कु
ले ॥ कारणत्वं गतो योहं विनाशस्य द्विजन्मनां ॥ कुर्वतः स्वामिनस्तेर्थे भ्रातॄणां मम याजकाः ॥ नाशं ययुर्नु दुष्टास्ते दु
ष्टोहं नाशकारणं ॥ किं करोमि क्व गच्छामि नान्यो मत्तो हि पापकृत् ॥ पृथिव्यामस्ति हेतुत्वं द्विजनाशस्य योगतः ॥ इ
त्यमुद्विग्नहृदयः खनित्रः पृथिवीपतिः ॥ वनं ययियासुः पुत्रस्य कृतवानभिषेचनं ॥ अभिषिच्य सुतं राज्ये स्वसुपसं
ज्ञं महीपतिः ॥ भार्याभिस्तिसृभिः सार्द्धं तपसे स वनं ययौ ॥ तत्र गत्वा तपस्तेपे वानप्रस्थविधानवित् ॥ सातानि त्री
णि वर्षाणां सार्द्धानि नृपसत्तमः ॥ तपसा क्षीणदेहस्तु राजर्षिर्द्विजोत्तम ॥ निगृह्य सर्वस्रोतांसि तत्याज स्वं कले
वरं ॥ ततः पुण्यान्ययौ लोकान् सर्वकामदुहोक्षयान् ॥ अश्वमेधादिभिर्यज्ञैरवाप्यायेन राधिपैः ॥ भार्याश्च तस्य तास्ति ॥ रामः ॥
स्रः समं तेनैव तत्यजुः ॥ प्राणान् वायुः सालोक्यं तेनैव सुमहात्मना ॥ एतत् खनित्रचरितं श्रुतं कल्मषनाशनं ॥ यः पठ
ठ तां च महाभाग स्तुयस्यांतानि नाशमय ॥ इति श्रीमार्कण्डेयपुराणे खनित्रचरितं समाप्तं नाम ॥ १२६ ॥ मार्कंडेयपु० ॥ ॥ १४८ ॥

148A

भूपः खनित्रपुत्रस्तु प्राप्य राज्यं यथा पिता ॥ तथैव पालयामास प्रजा धर्मेण रंजयन् ॥ स दानशीलो यष्टा च यज्ञानम
वनीपतिः ॥ समः शत्रौ च मित्रे च व्यवहारादिवर्त्तिनि ॥ एकदा स महीपालो निजस्यानगतो मुने ॥ सूतैस्तु कीयया
पूर्वस्तु यो राजा तथाभवत् ॥ ब्रह्मणस्तनयः पूर्वं दक्षो यो भूत्पृथिवीपतिः ॥ यादृक् चरितमस्याभूत् तादृक् तत्र विचेष्टि
तं ॥ राजोवाच ॥ श्रोतुमिच्छामि चरितं दक्षस्य सुमहात्मनः ॥ यदि तादृक् मया शक्यं चेष्टितुं तत्करोम्यहं ॥ सूता ऊचुः ॥
स चकाराकरान्भूप राज्ञां गोब्राह्मणान्पुरा ॥ शक्त्या द्वेषेण चैवोर्व्यामिष्टं तेन महात्मना ॥ राजोवाच ॥ तेषां महा
त्मनां यातं को नु यास्यति मद्विधः ॥ तथापि तु स्वचेष्टानां चेष्टा स्वद्यमवान्भवेत् ॥ तच्छ्रूयतां प्रतिज्ञा मे या सा प्राप्या
धिकमेण ॥ दक्षस्यानुकरिष्यामि महाराजस्य चेष्टितं ॥ त्रीस्त्रीन्यज्ञान्करिष्यामि शत्र्यामि शक्त्या यातिगते गते
पृथिव्यां चतुरन्तायां प्रतिज्ञेयं कृता मया ॥ यच्च गोब्राह्मणाः पूर्वं मदृदुर्भूभृते करं ॥ तमेव प्रतिदास्यामि ब्राह्म
णानां तथा गवां ॥ मार्कंडेय उवाच ॥ इति प्रतिज्ञाय वचः स्वपत्न्यालक्तवांस्तथा ॥ शक्त्या पाते स यज्ञांस्त्रीनियाजय
ज्जतांवरः ॥ गोब्राह्मणेभ्यः पुरा राज्ञा मदं दत्तं वयं करं ॥ तावत्संख्यमदाद्वित्तमन्यत्र ब्राह्मणाय सः ॥ तस्य पुत्रो भवद्धी
रः प्रथमायां मनोदितिः ॥ यस्य प्रतापशौर्याभ्यां कृता वश्या मही भृतः ॥ तस्यापि नन्दिनी नाम वैदर्भी दयिता भवत् ॥
विविंशं तनयं तस्यां जनयामास स प्रभुः ॥ विविंशो शास तिमहीं महीपाले महौजसि ॥ महीतलमभूद्व्याप्तं निरन्तरतया
नरैः ॥ ववर्ष काले पर्जन्यो मही सस्यवती तथा ॥ सफलानि च सस्यानि रसवंति फलानि च ॥ रसाः पुष्टिकराश्चान्न
पुष्टिर्नोन्मादकारिणी ॥ न वित्तेन च यानृर्णं प्रभूतमहहेतवः ॥ तस्य तापेन रिपवो भयमापुर्महामुने ॥ स्वास्थ्यं जन
ःस्तु हृद्गो मुदमाप सुपूजितः ॥ इष्ट्वा स यज्ञान्सुबहून्सम्यक् संपाल्य मेदिनीं ॥ संग्रामे निधनं प्राप्य शक्रलोकमितो

॥मा० पु०॥ गतः॥ इतिश्रीमार्कंडेयपुराणे विविंशाचरितं समाप्तं नाम ॥१२७॥ मार्कंडेय उ० ॥ तस्य पुत्रः खनीनेत्रो महाबलपराक्रमः ॥ य
॥२४९॥ स्य यज्ञे प्रगायंत गंधर्वा विस्मयान्विताः ॥ खनीनेत्रसमो नान्यो भुवि यज्वा भविष्यति ॥ येन यज्ञायुते पूर्णे दत्ता पृथ्वी ससा
गरा ॥ दत्वा च सकलां पृथ्वीं ब्राह्मणानां महात्मनां ॥ तपसा द्रव्यमासाद्य मोचयत्साधिकेन यः ॥ यतश्च प्राप्य वित्तर्द्धिमतु
159 लां दातृसत्तमात् ॥ जगृहुर्ब्राह्मणा विप्र नान्यद्राज्ञां प्रतिग्रहं ॥ सप्तषष्टिसहस्राणि षष्टिसप्तशतानि च ॥ सप्तषष्टिं चा
यायज्ञानयजन्भूरिदक्षिणान् ॥ अपुत्रः स महीपालो मृगयामुपचक्रमे ॥ पुत्रार्थं पितृयागाय मांसकामो महामुने ॥ अ
श्वारूढो विनासैन्यमेक एव महावने ॥ बद्धगोधांगुलित्राणो बाणखड्गधनुर्द्धरः ॥ तं वाहयंतं तुरगमन्यतो गहना
द्वनात् ॥ विनिष्क्रम्य मृगः प्राह मां हत्वाभिमतं कुरु ॥ राजोवाच ॥ अन्ये मृगाः पलायंते मृत्युभीता विलोक्य मां ॥ कथमा
त्मप्रदानं त्वं मृत्यवे कर्त्तुमिच्छसि ॥ मृग उवाच ॥ अपुत्रोऽहं महाराज वृथा जन्म प्रयोजनं ॥ विचारयन्न पश्यामि प्राणा
नामिह धारणं ॥ मार्कंडेय उ० ॥ अथान्यापि मृगः प्राह तमन्यो वसुधाधिपं ॥ मृगस्य तस्य प्रत्यक्षमलं मे तेन पार्थिव ॥
घातयस्वेति मां मांसेन निजकर्म समाचर ॥ यथा कृतार्थता ते स्यात्मम चाप्युपकारिता ॥ पुत्रार्थं तु महाराज स्वपिह
न्यष्टुमिच्छसि ॥ अपुत्रस्यास्य मांसेन लप्स्यसे वांछितं कथं ॥ यादृक्कर्म विनिष्पाद्यं तादृक्द्रव्यमुपाहरेत् ॥ दुर्गंधे नैस
गंधानां गंधानां भुवि निर्णयः ॥ राजोवाच ॥ वैराग्यकारणं प्रोक्तमनेनापुत्रता मम ॥ कथ्यतां प्राणसंत्यागे यत्ते वैरा
ग्यकारणं ॥ मृगया उवाच ॥ बहवो मे सुता भूप बह्व्यो दुहितरस्तथा ॥ तच्चिंतादुःखदावाग्निज्वालामध्ये वसाम्यहं ॥ सर्वेव ॥राम॥
ध्यानरेंद्रेयं मृगजातिः सुकातरा ॥ ते च पत्यष्वमे चातिममत्वेतेन दुःखितः ॥ मनुष्यसिंहशार्दूलवृकादिभ्यो बिभेम्य
हं ॥ विहीनात्सर्वसत्वेभ्यः श्वसृगालादपि प्रभो ॥ सोऽहं निमित्तं वंघनामिमाभ्यन्यां वसंधरा ॥ नृसिंहादिभयात्सर्वो ॥१४८॥

1499

मिच्छामि स्तुन्तशं सवतः॥ त्तः पंयेन्येपि रवादंति गजाविः तुरगादिकाः॥ तांस्तेषां पोषणायाहमिच्छामि निधनं गतान्॥ निष्कं
ते सुतत स्ते सुममापसे पुर्वेष्यक॥ भवंति चिंताशतशो मम त्वाह स्य चेतसः॥ किं कूटपाशं किं रज्जुं वागुरां किंस्तु तो मम
प्रा स्पश्च वंधनं किं वान्तसिंहादिवशं गतः॥ प्राणाय मे कः संप्राप्तास्तेव स्यां कीदृशी मम॥ सांप्रतं विलयं ते दिवसे क्षेमम
त्येषु के निशामपि॥ वांछाम्यहं कदा क्षेमं सर्वकालं भविष्यति॥ एतत्ते कथितं भूप मम मोद्वेगस्य कारणं॥ अतः प्रसादं कु
रु मे वाणेयं यात्यतां मयि॥ इति दुःखसमाविष्टः प्राणान्नाहं त्यजामि यत्॥ यत्कारणं निबोधत्वं ब्रुवतो मम पार्थिव
अमुष्यान्यमंतेलोकायानग छन्त्याल घातकाः॥ यज्ञोपयुक्ताः पशवः संप्रयात्युत्कृतीः प्रभो॥ अग्निः पशुर भूत्सुर्वंप
राती ज्ज्वलाधिपः॥ भास्वानयोछितीः प्राप्य यज्ञे निष्ठामुपागताः॥ तस्मात्यित्राक्रियां कृत्वा नयमामुक्ति तिं नृप॥ अ
सनस्थिंति तं कामं स्तुत्तलाभम मवाप्स्यसि॥ एवं मृग उवाच॥ राजेंद्र नेयहं तव्यो धन्यो यं स्तुहृति मृगः॥ वहवस्तनया यस्यहं
तव्योहमसंततिः॥ उत्तरमृगउवाच॥ एकं देहं भवं यस्य दुःखं धन्यः सवै भवान्॥ बहूनि यस्य देहाश्च नितस्य दुःखान्यनेकशः॥
एको यदाहमासं हि प्राकृ तदा देहं जं मम॥ दुःखमासीन्ममत्वेन भार्या यां तदभूद्द्विधा॥ यदा ज्ञातान्यपत्यानि तदा यावं
तितानि वै॥ तावन्तुरोरभूतानि मम दुःखान्यथाभवत्॥ सक्तता यो भवान्यत्र नातिदुःखाय संभवः॥ इहदुःखाय मे सक्तिः
परत्र च विरोधिनी॥ इतो रक्षणपोषार्थमपत्यानां करोम्यहं॥ चिंतयामि न संभूतिर्येन मे नरके ध्रुवं॥ राजोवाच॥ न वेद्मि
किं संततिमान् धन्यो पुत्रो नु किं मृगः॥ पुत्रार्थश्वायमारंभो मम दोलायते मनः॥ दुःखाय संततिः सत्यमेहि कामुष्मिका
ययंत॥ तथापि तनया धांति ऋणानीति श्रुतं मया॥ इति मार्कंडेयपुराणे खनीनेत्रचरिते नाम॥ १५॥ मार्कंडेय उवाच॥
ततः स नृपतिर्गत्वा गोमतिं पापनाशनीं॥ तत्र दुस्तावनिपतो भूत्वा देवं पुरंदरं॥ तप्यमानास्तपः सोयय तवाक्षायमा

नेस्तपः सोयमयतवाक्कायमानसः ॥ तुष्टाव प्रयतः शक्रमपत्यार्थं महीपतिः ॥ तस्य स्तोत्रेण तपसा भक्त्या च त्रिदशेश्वरः ॥
॥मा० पु०॥ तुतोष भगवानिंद्रः प्राह चेदं महामुने ॥ अनेन तपसा भक्त्या स्तोत्रस्योच्चारणेन च ॥ परितुष्टोस्मि ते भूप ब्रियतां भवता व
॥१५०॥ रः ॥ राजोवाच ॥ अपुत्रस्य सुतो मेस्तु सर्वशस्त्रभृतां वरः ॥ ससदा व्याहतैश्वर्यो धर्मविद्धर्मकृत्कृती ॥ मार्कंडेय उवाच ॥
तथेति चोक्त शक्रेण राजा प्राप्तमनोरथः ॥ प्रजाः पालयितुं भूय आजगाम निजं पुरं ॥ तत्रास्य कुर्वतो राज्यं सम्यक्पाल
150 यतः प्रजाः ॥ अजायत सुतो विप्र तदा शक्रप्रसादजः ॥ तस्य नाम पिता चक्रे बलाकाश्वेति भूपतिः ॥ अस्त्रग्रामविशेषांश्च ला
ग्राहयामास तं सुतं ॥ पितर्युपरते स्वर्गमधिराज्ये स्थितो नृपः ॥ बलाकाश्वो वशं निन्ये भुवि सर्वमहीक्षितः ॥ करं च दा
पयामास सारग्रहणपूर्वकं ॥ स सार्वभौमिको राजा पालयामास च प्रजाः ॥ अथाखिलनरेंद्रास्ते दायदास्तस्य
दुर्मेदाः ॥ न चाप्युत्थाय तत्तं ते तस्मै प्रददुः करं ॥ स्वभृत्या स्वपुराद्वैषुन संतोषपरास्ततः ॥ भुवं तस्य नरेंद्रस्य जगृहुस्ते
नराधिपाः ॥ गृहीतायां ततो भूम्यां बलाश्वः स बलो मुने ॥ तस्थौ स्वनगरे भूपैर्विरोधे बहुभिर्गतः ॥ समेत्य सुमहावीर्याः
ससाधनधनास्ततः ॥ रुरुधुस्तं महीपालं पुरे तत्र नरेश्वराः ॥ पुरस्यरोधनेनाथ क्षपितः स महीपतिः ॥ स्वल्पकोशोल्प
दंडश्च वैक्लव्यं परमं गतः ॥ अपश्यमानः शरणमबलो द्विजसत्तम ॥ करौ मुखाग्रतः कृत्वा निश्वासार्त्तमानसः ॥ त
तोस्य हस्तविवरात् मुखानिलसमाहिताः ॥ निर्जग्मुः शतशो योधाः रथनागतुरंगमाः ॥ ततः क्षणेन तत्सर्वं नगरं तस्य
भूपतेः ॥ व्याप्तमासीद्बलौघेन सारेणारिबलं मुने ॥ अथ सोतिबलौघेन महता तेन संवृतः ॥ निर्गम्य नगरात्तस्माद्ब ॥राम॥
जिग्ये नराधिपान् ॥ जित्वा वशमानीय चकार करदान् पुनः ॥ यथा पूर्वं महाभाग महाभाग्यो नरेश्वरः ॥ धुतयोः करयोः
यस्मा यतस्तस्यारिहानिदं ॥ बलं करंधमस्तस्मात्स बलाश्वाभिधीयते ॥ स धर्मात्मा महात्मा च समैत्रः सर्वजंतुषु ॥ ४ ॥१५०॥

150A

करंधमो भवन्नृपस्त्रिषु लोकेषु विश्रुतः॥ संग्रामस्य परामार्त्तिं ददावरिविनाशनं॥ बलं धर्मेण चाक्षिप्तमन्यैस्त्वस्वयं नृप
इति श्रीमार्कंडेयपुराणे करंधमचरिते॥ १२१॥ मार्कंडेय उ०॥ वीर्यचंद्रसुता सुभ्रू वीरानाम शुभव्रता॥ स्वयंवरे सा जग्रहे
महाराज करंधमं॥ तस्यां पुत्रं स राजेंद्रो जनयामास वीर्यवान॥ अविक्षितमिति ख्यातिमुपेतं जगतीतले॥ जाते तस्मि
न्सुते राजा सदैवज्ञानपृच्छत॥ कच्चित्प्रशस्तान्नक्षत्रे शस्ते लग्ने सुतो न च॥ कच्चिदालोकितं जन्म मम पुत्रस्य शोभने॥ ग्रहैः क
च्चिन्न दुष्टानां ग्रहाणां विक्रयं गतः॥ इत्युक्तास्तेन दैवज्ञास्तमूचुर्नृपतिं ततः॥ शस्ते मुहूर्ते नक्षत्रे लग्ने चैव सुतस्तव॥ समुत्प
न्नो महावीर्यो महाभागो महाबलः॥ भविष्यति महाराज महाराजस्तवात्मजः॥ अवेक्षते च देवानां गुरुस्तु ऋक्षसप्तमः॥ सोम
स्तु तुर्यसंस्थानं यतवैनं समवेक्ष्यते॥ उपांतसंस्थितश्चैव सोमपुत्रो व्यवेक्ष्यते॥ नावेक्षंते तु सविता न भौमेन शनैश्वरः॥ तव पु
त्रं महाराज धन्योयं तनयस्तव॥ सर्वकल्याणसंपत्तिसमवेतो भविष्यति॥ मार्कंडेय उ०॥ इति दैवज्ञवचनं निशम्य वसुधा
धिपः॥ हर्षपूरितमनाः प्राह निजस्थानगतस्तदा॥ अवेक्षते च देवानां गुरुः सोमसुतो बुधः॥ नावेक्षते नमादित्यो नादिर्क
स्तनुर्नेभमिजः॥ अवेक्षते तियस्तोक्तो भवद्भिर्वेदुहशोवचः॥ अविक्षितेति तेनास्य ख्यातं नाम भविष्यति॥ मार्कंडेय उवाच॥
अविक्षितस्सुतस्तस्य वेदवेदांगपारगः॥ अस्त्रग्राममशेषं स कण्वपुत्राद वाप्तवान्॥ स रूपेणातिमिषज्जो देवानां पार्थिवा
लजः॥ बुध्या वाचस्पतिः कांत्या शशांकः तेजसा रविः॥ धैर्येणाद्रिस्तथैवोर्वी सहिष्णुत्वेन वीर्यवान॥ शौर्येण न समस्तस्य
कश्चिदासीन्महात्मनः॥ स्वयंवरे तं जगृहे देवमोलनावरा॥ हेदेवतनया गौरी सुभद्रा बलिनः सुता॥ लीलावती वीरभद्रा
सुतां बिकां॥ भीमा सजा मान्यवती दंतपुत्रा कुमुद्वती॥ याश्चैनं नाभिनंदंति स्वयंवरकृते शुभा॥ तांश्चापि स बली वीरो जग्रा
ह नृपतेः सुतः॥ निराकृत्य नृपान्सर्वान्नते पापितत्कुलानि च॥ स्ववीर्यं समाश्रित्य बलमानमदोद्धतः॥ एकदा तु विशा

लस्यविदिशाधिपतेःसुतां॥विशालिनीसुसुदतीस्वयंवरकृतक्षणां॥परिभूयाखिलान्भूपान्स्वेछयानकृतस्तया॥व
॥मा०पु०॥ लाज्जग्राहविप्रपेथेयथान्यायबलगर्वितः॥ततस्तेभूभृतःसर्वेबहुशस्तेनमानिना॥निराकृताःसुनिर्विरणाप्रोचुश्चान्योन्य
॥१५२॥ माकुलाः॥समतांवंचनामेतांकस्माद्बलशालिनां॥बहूनामेकेबुणोनांजन्मधिग्वोमहीभृतां॥क्षत्रियायःक्षतत्राणांवध्य
151 मानस्यदुर्मदः॥करोतितस्यतन्नामसृष्टेवान्याहिबिभ्रति॥त्राणेनोपिक्षतत्राणंदुष्टादस्मादकुर्वतां॥भवेतांक्षत्रियकुले
जातानांकीदृशीमतिः॥उच्चार्यतेस्तुतिर्यावत्सूतमागधबंदिभिः॥सासस्माभिर्यथावीराभवत्वरिविनाशनात॥चरतां
मातृथैवेयतस्येसद्योदिगंतरे॥पौरुषाश्रियणाःसर्वेविशिष्टकुलसंभवाः॥बिभेतिकोनमरणात्कोयुद्धेनविनामरः॥वि
चिंत्येतन्महातव्यंपौरुषंशस्त्रपाणिभिः॥एतन्निशम्यतेभूपाःअस्यशामर्षपूरिताः॥ऊचुःपरस्परंसर्वेसमुत्तस्थुश्चायु
धाः॥केचिद्रथानारुरुहुःकेचिन्नागांस्तथाहयान्॥युद्धेमर्षपराधीनास्तमुपेतायदातयः॥इतिश्रीमार्कंडेयपु
राणेअविक्षितचरितेनाम॥१२०॥मार्कंडेयउवाच॥इतिसंग्रामसज्जास्तेभूपास्तुतास्तया॥निराकृतास्तेबहुशस्तेनका
लंचाप्यविक्षिता॥ततोबभूवसंग्रामस्तस्यतैःसहदारुणः॥एकस्यबहुभिर्भूपैर्भूपपुत्रस्यवैमुने॥तेसशक्तिगदा
बाणायस्तंसुदुर्मदाः॥अभिघ्नंतोयुयुधिरेतैःसमंसोपिसावधि॥सतान्शरशतैस्तेस्त्रविभेदनृपनंदनः॥कृतास्त्राब
लवान्बाणैस्तेचतंविभिदुःशितैः॥चिच्छेदकस्यचिद्बाहुंतथान्यस्यशिरोधरां॥हृदिविव्याधचैवान्यमन्यंवक्षस्यताड
यत॥करंचिच्छेदकरिणांस्करगास्यतथाशिरः॥रथस्येषांतथैवाश्वान्तथैवान्यस्यसारथीन्॥बाणानापततश्चके ॥राम॥
द्विधाबाणैस्तयान्पानां॥चिच्छेदान्यस्यखड्गंचधनुरस्यलघुवर्त॥तनुत्रंयदृतेचैवननाशान्योन्यालसज्ञः॥अविक्षि ॥१५२॥
ताडितश्चान्यःपदातिःप्रजहारण॥इत्याकुलीकृतेतस्मिन्समग्रेराजमंडले॥तस्थुःसप्तशतावीरामरणेकृतनिश्च

151A

अयाः॥ आभिजात्यवयःशौर्यवीर्यलज्जासमन्विताः॥ निर्जिते सकले सैन्ये पलायनपरायणे॥ तैः समेत्य महीपालैः स
तु पुत्रो महीभृताः॥ युयुधे धर्मयुद्धेन तैः सार्द्धं नातिकोपितः॥ विछिन्नपत्रकवचान् स तानपि महाबलः॥ कर्त्तुं व्यवसित
स्ते च ततः क्रुद्धा महामुने॥ धर्म्ममुत्सृज्य युयुधुर्युध्यमानेन धर्मतः॥ नरेंद्रपुत्राः प्रस्वेदजलक्लिन्नाननाः समं॥ विव्याध
कश्चिद्बाणौघैः कश्चिच्छिच्छेद कार्मुकं॥ ध्वजमस्यापराबाणैः छित्वा भूमावपातयत्॥ जघ्नुरन्ये तथैवाश्वानबभंजु
श्चापरे रथं॥ गदाघातैस्तथैवान्यैः पृष्ठमताडयत्॥ छिन्ने धनुषि सक्रोधः स तान्यतेः सुतः॥ जग्राहासिं तथा चर्म्मतद
प्यन्योन्यपातयत्॥ छिन्नासिचर्म्मो जग्राह स गदां गदिनां वरः॥ तामप्यन्यः क्षुरप्रेणाचिच्छेद कृतहस्तवत्॥ अन्ये श
रसहस्रेण शतेनान्ये नराधिपाः॥ विभिदुः कोपकीलस्य धर्मयुद्धे पराङ्मुखाः॥ स विह्वलः पपातोर्व्यामिकोवहुभि
र्दितः॥ राजपुत्रो महाभागो बबंधुस्ते च तं ततः॥ तमधर्म्मेण ते सर्वे गृहीत्वा नृपतेः सुतं॥ विशालेन समं राज्ञा वैदि
शं विविशुः पुरं॥ हृष्टाः प्रमुदिता बद्धमादाय च नृपात्मजं॥ स्वयं वराय सा कन्या न्यस्ता तेन ततः पुनः॥ पुनः पुनश्चापि
त्रोक्तं तथापि च पुरोधसा॥ आलंब्यतामिति वचो यस्ते राजसुरोचते॥ यदा सा मानिनी किंचिन्नजग्राह वरं मुने॥
नदा पप्रच्छ दैवज्ञं विवाहार्थं नरेश्वरः॥ विशिष्टतरमेतस्माद्विवाहाय दिनं वद॥ अद्यैतद्दौष्टकं संजाते युक्ते विघ्नाप
पादिकं॥ मार्कंडेय उ०॥ इति पृष्टो नरेंद्रेण स दैवज्ञो विमृश्य तत्॥ सुमेनाः प्राह विज्ञातपरमार्थो महीपतिं॥ भविष्यंस
परालीह दिनानि पृथिवीपते॥ प्रशस्तेलग्नयुक्तानि शोभनान्यचिरेण च॥ करिष्यसि विवाहं त्वं ते शुभ्रान्ते सुमानद॥
हम्मेतेन यत्रायं महाविघ्न उपस्थितः॥ इति श्रीमार्कंडेयपुराणे सावर्णिके मन्वन्तरे अवीक्षितचरिते॥ १२१॥ मार्कंडेय उवाच
ततः स्वस्थावतं वद्धं तनयं स करंधमः॥ तस्य पत्नी तथा वीरा तथा चान्ये महीभृतः॥ तमधर्मेण तनयं वद्धं श्रुत्वा मही

॥मा० पु०॥ प्रतिघ॥ समस्तैः पृथिवीपालैश्चिरं दध्यौ महामुने॥ केचिदूचुर्महीपाला वद्धाः सर्वे महीक्षितः॥ येरेकः संयुगे बद्धः सम
स्तैस्तैरधर्मतः॥ युज्यतां वाहिनी शीघ्रमूचुरन्ये किमास्यते॥ विशालो बध्यतां दुष्टस्तैश्चायैः न्येसमागताः॥ अन्ये तथो
॥१५२॥ चुर्धर्मोत्र त्यक्तः पूर्वमविक्षिता॥ अन्यायेन बलाद्येन गृहीता तमवांछती॥ स्वयंवरे ह्यशेषेषु तेन राजसुता यदा॥ ख
152 लीकृताः कृतः सर्वैः समेत्य स वशीकृतः॥ तेषां तद्वचनं श्रुत्वा वीरा वीरप्रजावती॥ वीरगोत्रसमुद्भूता वीरपत्नी प्र
हर्षिता॥ उवाच भर्तुः प्रत्यक्षमन्येषां च महीक्षितां॥ भद्रं कृतं भद्रभुजा मम पुत्रेण पार्थिवाः॥ गृहीता यद्बलात्कन्या जि
त्वा सर्वमहीक्षितः॥ तदर्थं युद्ध्यमानोयं बद्ध एकोनधर्मतः॥ तदप्यस्य सुतस्याज्ञो मन्ये नापचयप्रदं॥ एतदेव हि पौ
रुष्यं यदमर्षवशानुरः॥ नीतिं न गणयत्येव जिघांसुरिव केसरी॥ स्वयंवराय विन्यस्तां मम पुत्रेण कन्यकां॥ बलाद्गृ
हीतां भूपानां पश्यतामितिमानिनां॥ क्षत्रियकुले जन्म कृदयाहीनसेविता॥ बलादेव समादत्ते क्षत्रियो बलिनां
पुरः॥ लोहः स्वल्वं धानां नवशं याति कातराः॥ प्रसह्य कारिणो यांति महावाधानुशालिनः॥ तदलं दौर्मनस्येन।
श्लाघ्यमेवास्य बंधनं॥ युष्माकमपि ये सर्वे कृत्वारीणां निपातनं॥ अवाप्याखिलवित्तानि पृथ्वी पुत्रादिकं पुनः॥
भार्यो राज्यनिमित्तानि ततो जातास्तु गौरवं॥ युष्माकमायुधानां मरिभड्ड सुपातनं॥ तत्त्वर्ष्यतारणाया सुस्पंदना
न्याधिरोहत॥ सज्जी कुरुत नागाश्वान चिरेण सुसारथीन्॥ मन्यध्वं किं महीपालै बहुभिः सह विग्रहं॥ प्रभूताव
वंतो बाय सूरस्यात्स्य च लेक्रिया॥ कस्यनात्येषु सामर्थ्यं नरेंद्रादिषु जायते॥ येभ्यो न विद्यते भीतिः कातरस्यापि श
तुषु॥ व्याप्य लोकान्समर्थैः सन्निभिः स्याहितान्नरः॥ विराचते च भूरः स तमसीव दिवाकरः॥ मार्कंडेय उवाच॥ ॥राम॥
इत्युक्तः सुहर्षितो राजा तया पत्न्याकरं धमः॥ चकार सकलोद्योगं हंतु पुत्राहितान्मुने॥ ततस्तस्य समं भूपे विशाले ॥१५२॥

152A

नचसंगरः॥ बभूव बहुपुत्रस्यतेरशेषे महामुने॥ दिनत्रयमभूद्युद्धं तेन राज्ञा समं तदा॥ करंधमेन भूपानां विशालस्
स्यातु कुर्वता॥ यदा पराजितप्रायं तत्सैन्यं भूपमंडले॥ तदा विशालो द्विकरः करंधममुपस्थितः॥ करंधमोपि संप्री
त्या तेन राज्ञाभिपूजितः॥ विमोच्य तनयं तत्र निशां तां सुखमास्थिर्विशालम॥ तां च कन्यां समादाय विशालः समुपस्थि
तः॥ अविक्षित्प्राह विप्रर्षे विवाहार्थे पितुः पुरः॥ नाहमेतां ग्रहीष्यामि न चान्यां योषितं नृप॥ परैर्यस्यां निरीक्षंत्यां सं
ग्रामेहं पराजितः॥ अन्यस्मै संप्रयच्छैमामियं चान्यं वृणोतु ते॥ अखंडितयशोवीर्यो यः परैर्नो विमानितः॥ य
थैः पराजितोहं यत्कामतरीयं तदा बलात॥ किमत्र मानुषत्वं मे नेतस्या मम चांतरं॥ स्वतंत्रता मनुष्याणां परतंत्रैस
दाबला॥ नरोपि परतंत्रो यतस्य कीदृग्मनुष्यता॥ सोहमस्यामुखं भूयो धःक्षोदर्शयिता कथं॥ योहमस्याः पुरो भू
मौ परैर्भूपस्खलीकृतः॥ कथं पाणिं ग्रहिष्यामि पुरुषत्वविनाकृतः॥ इत्युक्ते तेन तनयासुवाच जगतोपतिः॥ श्रुतं
ते वचनं वत्से वदतोस्य महात्मनः॥ वरयान्यं पतिं यत्र मनस्ते रमते शुभे॥ वयं वा संप्रयच्छामो यस्मिंस्तस्मिंस्त्वनादृ
ता॥ एतयोरेकमातिष्ठ मार्गयोः रुचिरानने॥ कन्योवाच॥ पराजितोयं बहुभिरसम्यक सम्यगाचरन्॥ संग्रामे तद्य
शोवीर्येहानिः कापि न पार्थिव॥ एको बहूनां युद्धाय गजानामिव केसरी॥ यत्संस्थितः परं शौर्यं तेनास्य प्रकटीकृतं
न केवलमयं तस्यो युद्धे त्यखिला जिताः॥ बहुशोऽनेनयत्नेन विक्रमेपि प्रकाशितः॥ शौर्यविक्रमसंयुक्तमिमं स
र्वे महीक्षितः॥ धर्मयुद्धमधर्मेण जितवंतोऽत्र कात्रपा॥ न चापि रूपमात्रेहं लोभमस्य गतापितः॥ शौर्यविक्रमधै
र्यालिहृतंस्यमनो मम॥ तत्किमुक्तेन बहुना याच्यतां मत्कृते नृप॥ त्वया महानुभावोयं नान्यो मे भविता पतिः॥
विशाल उवाच॥ राजपुत्रसुतामत्समं मे तच्छोभनं वचः॥ एवमेव त्वया तुल्यः कुमारो न हि तलो॥ अविसंवादि ते शौर्य

॥मा०पु०॥ मतीव च पराक्रमः॥ मा च यास्मात्कुले वीर दुहितुर्मे परिग्रहात्॥ राजपुत्र उ०॥ नाहमेनां ग्रहीष्यामि न चान्यां योषितं नर
प॥ आलम्ब्यैव हि मे बुद्धिः स्त्रीमयी मनुजेश्वर॥ मार्कंडेय उ०॥ ततः करंधमः प्राह पुत्रेयं गच्छतां त्वया॥ विशाल तन
॥१५३॥ यासुनन्द त्वयि हार्दवती दृढं॥ राजपुत्र उ०॥ नाज्ञाभंगः कदाचित्ते कृतपूर्वो मया प्रभो॥ तथाज्ञापय मां तात यथाज्ञां
न भिनद्मि ते॥ मार्कंडेय उ०॥ अत्यंतनिश्चितमतौ तस्मिन्नृराजसुते सुता॥ तामुवाच विशालोपि व्याकुलीकृतमा
153 नसाः॥ निवर्त्यतां पुनः पुत्री एतस्माच्च प्रयोजनात्॥ अन्यं वरय भर्त्तारं सत्यनेकेनपालसज्ञाः॥ कन्योवाच॥ वरं
दृष्टोऽस्म्यहं तात मा मे षष्ठ यदि नेच्छति॥ तपसान्यो न मे भर्त्ता जन्मन्यस्मिन्भविष्यति॥ मार्कंडेय उ०॥ ततः करंधमो
राजा विशालेन समं मुदा॥ स्थित्वा दिनत्रयं तत्र निजमभ्याययौ पुरं॥ अविक्षिदपि तेनैव पित्राद्यैः सनराधिपैः॥
निदर्शनैः पुराद्वृत्तैः सांत्वितोऽभ्यागमत्पुरं॥ सापि कन्या वनं गत्वा निस्पृहा निजबांधवैः॥ तपस्तेपे निराहारा वैरा
ग्यं परमास्थिता॥ निराहारा यदा सा तु मासत्रयमवस्थिता॥ सप्राप परमामार्त्तिं कृशा धमनिसंतता॥ मंदोत्साहातित
न्वंगि सुमस्फुरति बालिका॥ देहत्यागाय सा चक्रे तदा बुद्धिं नृपात्मजा॥ आत्मत्यागायतां ज्ञात्वा कृतबुद्धिं सुरास्ततः
समस्य प्रेषयामासुर्देवदूतं तदंतिकं॥ समुपेत्य सुतां प्राह दूतोऽहं पार्थिवात्मजे॥ प्रेषितस्त्रिदशैस्तुभ्यं यत्कार्यं तत्
न्निशामय॥ न भवत्या परित्याज्यं शरीरमतिदुर्लभं॥ त्वं भविष्यसि कल्याणि जननी चक्रवर्त्तिनः॥ त्वत्पुत्रेण महा
भागे भोक्ष्या निहतारिणा॥ अव्याहताज्ञेन चिरं सप्तद्वीपावती मही॥ हंतव्यस्तेन दनुजो देवानां प्रवरो रिपुः॥ अ
यःशंकुस्तथा क्रूरो धर्म्मस्थाप्यास्तथा प्रजाः॥ परिपालनीयमखिलं चातुर्वर्ण्यं स्वधर्मतः॥ हंतव्या दस्यवो म्लेच्छा ये ॥रामः॥
चान्यदुष्टचेष्टिताः॥ यष्टव्यं विविधैर्यज्ञैः समाप्तवरदक्षिणैः॥ वाजिमेधादिभिः श्रेष्ठैः सहस्रशतसंख्यया॥ मार्कंडेय उ०॥ ॥१५३॥

तेदृष्ट्वा सांतरिक्षस्थं दिव्यगंधविलेपनं ॥ देवदूतमुवाचेदं राजपुत्री ततो मृदु ॥ राजपुत्र्युवाच ॥ सत्यं त्वमागतः स्वर्गाद्देवदूतो
न संशयः ॥ किंतु भर्त्रा विना पुत्रः स कथं मे भविष्यति ॥ अविक्षितमृते भर्त्ता मम नान्यो ऽत्र जन्मनि ॥ भवितेति प्रतिज्ञातं म
येतत्संनिधौ पितुः ॥ स च नेच्छति मां प्रोक्तो मत्पित्रा जनकेन च ॥ करंधमेन च तया याचितश्च मया तु सः ॥ देवदूत उवा
किमनेन महाभागे वहुनोक्तेन ते सुतः ॥ समुत्पत्स्यति मात्यासीस्त्वमात्मानमधमे तथा ॥ अत्रैव कानने तिष्ठ तनुं क्षीणां
च योषयः ॥ तपःप्रभावादेतत्ते सर्वं साधु भविष्यति ॥ मार्कंडेय उ ॥ इत्युक्त्वा देवदूतो सौ ययागतमगच्छत ॥ चकारानु
दिनं सुभ्रूः साध्व्या त्मतनुपोषणं ॥ इति श्रीमार्कंडेयपुराणे अविक्षितिचरिते ॥१२४॥ मार्कंडेय उ ॥ अथ सा विक्षितोर्मा
ता वीरा वीरप्रजावती ॥ सुतेऽयं हनि समाहूय प्राह पुत्रमविक्षितं ॥ पुत्राहमभ्यनुज्ञाता तव पित्रा महात्मना ॥ उपवासं क
रिष्यामि दुष्करोयं किमिच्छक ॥ स चायत्तस्तव पितस्त्वया साध्यो मयापि च ॥ प्रतिज्ञाते त्वया पुत्र ते तस्मात्प्रयताम्यहं
द्रव्यस्यार्द्धं महाकोशात्तव दास्याम्यहं पितुः ॥ ततस्ते पितुरायत्तमनुज्ञातास्मि तेन च ॥ क्लेशसाध्यं मम यत्नः स हि
ध्येयो भविष्यसि ॥ साध्योम्यायासयदि ते कश्चिद्बलपराक्रमैः ॥ स ते साध्यो न्यथा वापि यदसाध्यं भविष्यति ॥ तत्प्रति
ज्ञां प्रकुरु यदि पुत्रात्रैव व्रते ॥ तदेतदहमारप्स्ये कथ्यतां यन्मतं तव ॥ अविक्षिदुवाच ॥ वित्तं मे पितुरायत्तं ममेशित्वं
न तत्र वै ॥ यन्मच्छरीरनिष्पाद्यं तत्करिष्ये त्वयोदितं ॥ किमिच्छकं व्रतं मातर्निश्चिंता भव निर्वृता ॥ राज्ञा पित्राभ्यनुज्ञा
तं यदि ते चेश्वरेण मे ॥ मार्कंडेय उ ॥ ततः सा राजमहीषी तद्व्रतं समुपोषिता ॥ यथोक्तं सा करोत्पूजां राजराजस्य सं
मता ॥ निधीनामप्यशेषाणां निधिपालगणस्य च ॥ लक्ष्म्याश्च परया भक्त्या यतवाक्कायमानसा ॥ विविक्ते तु गृहे
सस्य अथ राजा करंधमः ॥ आसीन उक्तः सचिवैर्नीतिशास्त्रविशारदैः ॥ सचिवा ऊचुः ॥ राजन्वयः परिणतं तवे

॥मा० पु०॥ तथासता मही ॥ एकस्ते तनयो विक्षित्स्य क्तदारपरिग्रहः ॥ अपुत्रस्य वने निष्ठां यदायुश्चागमिष्यति ॥ तदायं परिशिष्यं पृथ्वी
निश्चितं तव यास्यति ॥ वंशक्षयस्ते भविता पितृपिंडोदकक्षयः ॥ एतन्महत्ते वैरं क्रियाहान्या भविष्यति ॥ तस्मात्कु
॥१५४॥ तयाम्भूप यथा ते तनयः पुनः ॥ करोति सततं बुद्धिं पितॄणामुपकारिणीं ॥ मार्कंडेय उ० ॥ एतस्मिन्नन्तरे राज्ञ्या शुश्राव ज्ञा
गति पतिः पुरोहितस्य वीरा यागदत्तोर्थिजनं प्रति ॥ कः किमिच्छति दुःसाध्यं कस्य चित्किं साध्यतामिति ॥ करंधम
154 स्य महिषी किमिच्छकमुपोषिता ॥ राजपुत्रोप्यविक्षित्तु श्रुत्वा पुरोहितवचः ॥ अस्तुवाचार्थिनः सर्वान्राजद्वारमु
पागतान् ॥ मया साध्यं शरीरेण यस्य किंचिद्ब्रवीतु मे ॥ मम माता महाभागा किमिच्छकमुपोषिता ॥ अ एवं तु मर्थिनः
सर्वे प्रतिज्ञातं मया वचः ॥ किमिच्छ यद्ददाम्येष क्रियमाणे किमिच्छके ॥ मार्कंडेय उ० ॥ ततो राज्ञा निशम्य तद्वाक्य
पुत्रमुखाच्च्युतं ॥ समुपेत्याब्रवीत्सुत्रमहमर्थी प्रयच्छ मे ॥ अविक्षिदुवाच ॥ दातव्यं ते मया तात भवते यद्ब्रवीहि
मा ॥ कर्तव्यं दुष्करं मात्रे साध्यं वासाध्यमेव च ॥ राजोवाच ॥ यदि सत्यप्रतिज्ञस्त्वं ददासि च किमिच्छकं ॥ पौत्रस्य
दर्शय सुखं ममोत्संगमतस्य तत ॥ अविक्षिदुवाच ॥ अहं तवैकस्तनयो ब्रह्मचर्यं च मे नृप ॥ न मे पुत्रोस्ति पौत्रस्य
दर्शयामी कथं मुखं ॥ राजोवाच ॥ पापाय ब्रह्मचर्यं ते यदिदं धार्यते त्वया ॥ तस्मात्त्वं मोचयात्मानं मम पौत्रं च दर्श
य ॥ अविक्षिदुवाच ॥ विरमास्मान्महाराज यदन्यत्तत्समादिश ॥ वैराग्येन मया त्यक्तः स्त्रीसंभोगस्त्वया तु सः ॥ राजो
वाच ॥ बहुभिर्युध्यमानास्य न दृष्टो वैरिभिर्जयः ॥ तत्रापि यदि वैराग्यं उपेषि तदपडितः ॥ किं वानो बहुनोक्ते ॥रामः॥
न ब्रह्मचर्यं परित्यज ॥ मातुस्त्वमिच्छया वक्त्रं पौत्रस्य मम दर्शय ॥ मार्कंडेय उ० ॥ यदा स बहुशस्तेन प्रोक्तः सुत्रेण पा ॥१५४॥
र्थिवः ॥ नान्यं प्रार्थयते किंचित्तदा पुत्रोब्रवीद्वचः ॥ दत्वा किमिच्छकं तुभ्यं प्राप्तोहं तात संकटं ॥ तत्करिष्यामि नि

154A

ह्यविज्ञो भयोदारपरिग्रहं॥ स्त्रियाः समसंविजितः पीडितो धरणीतले॥ स्त्री पतिर्भविता भूपः तातेतदतिदुष्करं॥
तथापि किं करोम्येष सत्यपाशवशंगतः॥ करिष्यामि यथा स्वल्वं भुज्यतां निजमासनं॥ इति श्रीमार्कंडेयपुराणे अ
विक्षिच्चरिते॥ मार्कंडेय उ०॥ कदाचिद्राजपुत्रोसौ मृगयामचरद्वने॥ मृगान्निघ्नन्वराहांश्च शार्दूलादींश्च दंष्ट्रिणः
शुश्राव सहसा शब्दं त्राहि त्राहीति योषितः॥ विक्रोशंत्याः सुबहुशो भयगद्गदमुख्यकैः॥ मा भैर्मा भैरिति वदन् रा
जपुत्रः सवेगतः॥ चोदयामास तुरगं यतः शब्दः समागतः॥ ततश्च सापि चुक्रोश कन्यका विपिने वने॥ गृहीता दनुपु
त्रेण दृढकेशेन मानिना॥ करंधमस्य भार्याहं मविज्ञाय स्वविक्षत॥ हरत्यनार्यो विपिने पृथिवी यस्य धर्मतः॥
यस्य सर्वे महीपालास्त्वरयन्न समरासने॥ चिंतयामास किमिदं मम भार्यात्र कावने॥ मायेयं रक्षसां नूनं दुष्टानां
काननौकसां॥ अथ वागत एवाहं सर्वं वेत्स्यामि कारणं॥ मार्कंडेय उ०॥ त्वरितः स ततो गत्वा ददर्शाति मनोरमां॥
कानने कन्यकामेकां सर्वालंकारभूषितां॥ गृहीतां दनुपुत्रेण दृढकेशेन दंडिना॥ त्राहि त्राहीति करुणं विक्रोशंती
पुनः पुनः॥ मा भैरिति च तामाह हा हतोसीति तं वदन्॥ महाराजनि धर्मज्ञे वितते नेत्र वने घने॥ शासतीमां महीं दुष्कृ
का ह्रियते करंधमे॥ यस्य प्रतापावनता मुवि सर्वे महीक्षितः॥ मार्कंडेय उ०॥ ततस्तमागतं दृष्ट्वा गृहीतवरकामु
कं॥ सा त्राहीत्याह तन्वंगी ह्रियाम्येषेति चासकृत्॥ राज्ञः करंधमस्याहं स्नुषा भार्याविक्षितः॥ हरत्यामेतेन दु
ष्टेनासनाथा नाथवद्वने॥ मार्कंडेय उ०॥ ततो विमर्शमापन्नं अविक्षित्स तयोदितं॥ कथमेषा हि भार्यास्तु जाता तस्य
मे कथं॥ अथवा मोचयाम्येनां ततो वेत्स्यामि पुनः॥ क्षत्रियैर्धार्यते शस्त्रमार्त्तानां त्राणकारणात्॥ ततः क्रुद्धोब्र
वीद्धीरो दानवां तं सुदुर्मतिं॥ जीवन्गच्छ विमुंचैनामन्यथा न भविष्यति॥ ततः स तां विहायोच्चैर्दंडमुत्क्षिप्य दानव

मा०दी

वः ॥ तमप्यधावत्सोप्येनं शरवर्षैरवाकिरत् ॥ सवार्य्यमाणो घैर्दानवोतिमदान्वितः ॥ राजपुत्राय चिक्षेप दंडं शंकुशता
मा॰पु॰ वृतं ॥ तमापतंतं चिच्छेद शरैरल्पप्रसुतस्ततः ॥ सोप्याग्नेयं गृहीत्वोच्चैरिषुमस्माज्जो व्यवस्थितः ॥ स जातः शरवर्षालितं चिक्षेप
॥१५५॥ ततोद्रुमं ॥ स तु तं तिलशश्चक्रे मल्लैः कर्म्मारमार्ज्जितैः ॥ ततः स चिक्षेप शिलां राजपुत्राय दानवः ॥ सापि मोघाय पा
तोर्व्यां छिन्ना तेनातिलाघवात् ॥ राजपुत्राय कुपितो यद्यच्चिक्षेप दानवः ॥ तत्तच्चिच्छेद बाणौघैर्भस्म स तु सलीलया ॥
ततो विच्छिन्नदंडो सौ निर्विलो विकलायुधः ॥ मुष्टिमुद्यम्य सक्रोधो राजपुत्रमधावत ॥ तस्यापतत एवासु करं धम
155 स्ततः शिरः ॥ छित्वा वै तस्य पत्रेणापातयामास वै भुवि ॥ तस्मिन्विनिहते दैवैर्दानवे दुष्टचेष्टिते ॥ करं धमस्ततः सर्वैः सा
धु साध्विति भाषितः ॥ वरं वृणीष्वेति तदा दैवैरुक्तो नृपात्मजः ॥ वव्रे पुत्रं महावीर्य्यं पितुः प्रियचिकीर्षया ॥ देवा ऊचुः
भविष्यति हि ते पुत्रश्चक्रवर्त्ती महाबलः ॥ अस्यामेव हि कन्यायां मोक्षिता यां त्वयानघ ॥ राजपुत्र उवाच ॥ पित्राहं सत्यपा
शेन बद्ध इच्छाम्यहं सुतं ॥ राजभिर्निर्ज्जितेन्यातो सक्ते मे दारसंग्रहः ॥ सा च मायावती त्यक्ता विशालनृपतेः सुता ॥ तयाच
मत्कृते त्यक्तो मायामुते नरसंगमः ॥ तत्कथं तामपाहाय विशालतनयामहं ॥ नृशंसा सा मा करिष्यामि अन्यनारीपरिग्रहं ॥
देवा ऊचुः ॥ इयमेव हि भार्य्या सा श्लाघ्यते ते त्वया यदा ॥ विशालस्य सुता सुभ्रूस्त्वत्कृते च श्रितातपः ॥ अस्यां सुतस्तवते
वीरः सप्तद्वीपप्रसाधिता ॥ यष्टा यज्ञसहस्रेण चक्रवर्त्ती सुतस्तव ॥ मार्कंडेय उवाच ॥ इत्युक्त्वा प्ययतादेवाः करंधमस्तं तदि
जा ॥ सा प्याह तां ततः पत्नीं कथ्यतां भीरु किंन्विदम् ॥ सा चास्मै कथयामास सक्ताहं भवता यदा ॥ त्यक्तवंधुजनारण्य
निर्वेदात्समुपागता ॥ अत्राहं तपसा वीर क्षीणप्रायं कलेवरं ॥ त्यक्तुकामा सि मध्ये स्वं देवदूतेन वारिता ॥ भविष्यति ॥राम॥
चपुत्रस्ते चक्रवर्त्ती महाबलः ॥ प्रीणयिष्यति यो देवान् नृशंसान् हनिष्यति ॥ इतिदेवाज्ञया तेन देवदूतेन वारिता ॥ नसे ॥१५५॥

ना है

155A

स्वक्तवती देहं त्वत्संगम मम मनोरथं ॥ परस्वस्थमहाभाग स्नातुं गंगाह्रदं गता ॥ अवतीर्णो विरूढास्मिन्नदृढ्नागेन केनचित ॥
ततो रसातलं नीता तेन तत्र च मे पुनः ॥ नागाः सह स्त्रशास्तस्सुन्नोग पत्न्यः कुमारकाः ॥ तुष्टुवुर्मां समभ्येत्य याम्यैष प्रज
यं सदा ॥ यया चिरेस विनयं नागानामंगनास्त्वया ॥ प्रसादं कुरु सर्वेषामस्माकं तनयस्त्वया ॥ अपराधमुपेतानां सनि
वार्य्यावधोन्मुखः ॥ अपराधं करिष्यंति त्वत्सुतस्यानिलाशनाः ॥ तन्निमित्तं निवार्यो सो प्रसादः क्रियतामिति ॥ त
थेति च मया प्रोक्ते देवैः पाताल भूतलेः ॥ भूषिताहं तया पुष्पगंधवासोभिरुत्तमैः ॥ समानीतात यालोकमिमं तेना
निलाशिना ॥ पुरा यया कांतिमती एवं वद्रूपशालिनी ॥ इति रूपवंतीं दृष्ट्वा सर्वालंकारभूषितां ॥ जग्राह हृष्ट के
शेयं हर्तुकामः सुदुर्मतिः ॥ मुञ्च हा हा हवल्लनाहं राजपुत्र विमोक्षिता ॥ तत्प्रसीद महाबाहो मां प्रति त्वत्त्वया मम ॥ भर
ल्लीके राजसुत्रो न्यो नास्ति सत्यं ब्रवीम्यहं ॥ इति श्रीमार्कंडेयपुराणे अविक्षितचरिते ॥ ११४ ॥ मार्कंडेय उ० ॥ इति तस्याव
चः श्रुत्वा स त्वापितत्वचश्च तत ॥ किमिच्छके प्रतिज्ञाते यदुक्तं तेन भूभृता ॥ प्रत्युवाच स तां कन्यां अविक्षिन्नृपतेः
सुतः ॥ सानुरागमनं स्कां तां त्यक्तभोगां च तत्कृते ॥ यदाहं त्यक्तवांस्तत्र त्वामराति पराजितः ॥ निहत्य शत्रून्संग्रामा
त्वं मयात्र करोमि किं ॥ कन्योवाच ॥ मम पाणिं गृहाण त्वं रमणीयेऽत्र कानने ॥ सकामायाः सकामात्र संगमो गुण
वान्न भवेत ॥ राजपुत्र उ० ॥ एवं भवतु भद्रं ते विधिरेवात्र कारणं ॥ अन्यथा कथमत्र त्वमहं चैव समागतः ॥ मार्कंडेय उ० ॥
एतस्मिन्नंतरे प्राप्तो गंधर्वस्तनयो मुने ॥ वराप्सरोभिः सहितो गंधर्वैरपरैर्वृतः ॥ गंधर्व उवाच ॥ राजपुत्र सुतेयं मे
भाविनी नाम भाविनी ॥ अतिशापादगस्त्यस्य विशालतनया भवत ॥ बालभावेन यागस्त्यः कोपितः क्रीडमानया ॥
ततस्तेन तदा शप्ता मामानसी त्वं भविष्यसि प्रसादे तः ॥ स चास्माभिर्बालेयमविवेकिनी ॥ तवापराधा विमृश्य प्रसादः

कि

चि शा त

क्रियतामिति॥ प्रसाद्यमानः सोऽस्माभिरिदं वचनमब्रवीत्॥ बालेति सत्वा शापोऽस्यो दत्तोऽस्या नान्यथेति न तत्॥ इति शा
॥मा० पु०॥ पादगस्त्यस्य भवने शुभा॥ जातेयमस्तु ना सुभ्रू भोविनी नाम नामतः॥ तदस्याहं कृते प्राप्तो ग्रहाणेमां नृपात्मज॥ म
॥१५६॥ मात्मजां सुतस्ते तु चक्रवर्ती भविष्यति॥ मार्कंडेय उवाच॥ तथेत्युक्त्वा स तं गत्वा सा पाणिं पार्थिवात्मजः॥ जग्राह
विधिवद्धोमं च क्रे तत्र चतुंबुरुः॥ प्रजगुर्देवगंधर्वा ननृतुश्चाप्सरोगणाः॥ पुष्पाणि ववृषुर्मेघा देववाद्यानि सस्व
156 नुः॥ विवाहो राजपुत्रस्य तया तत्र समोऽभवत्॥ समस्तवसुधात्राणकर्तृकारणभूतया॥ ततो गंधर्वलोकं ते सह ते
न महात्मना॥ गंधर्वेणाययुः सा च स च राजा सुतो मुने॥ भामिन्या मुमुचे सार्द्धमविक्षित्तनयनंदनः॥ सा च तेन समं त
त्र भोगसंपत्समन्विता॥ कदाचिदतिरम्येषु स नगरोपवने तया॥ विक्रीडति समं तन्व्या कदाचिद्दूरपर्वते॥ कदाचि
त्पुलिने रम्या हंससारसशोभिते॥ कदाचिन्मंदवनस्यांतः प्रासादे चातिशोभने॥ विहारदेशेष्वन्येषु रमणीयेषु हर्नि
शं॥ सरेमे सहितस्तन्व्या सा च तेन महात्मना॥ भक्ष्यानुलेपनं वस्त्रं स्रग्युष्यादिकमुत्तमं॥ उपजह्रुस्तयोस्तत्र मुदा गं
धर्वकिन्नराः॥ तदा रमयतस्तस्य भाविन्या सह सुभ्रूमे॥ गंधर्वलोके वीरस्य पुत्रं सा सुषुवे शुभं॥ तस्मिन् जाते म
हावीर्ये गंधर्वाणां महोत्सवः॥ बभूव मनुजव्याघ्रे तेन कायेन वेक्षतां॥ जगुः केचित्तथैवान्ये मृदंगपटहानकान्
अवादयंस्तथैवान्ये वेणुवीणादिकांस्तथा॥ ननृतुश्च तथा तत्र बहवोऽप्सरसां गणाः॥ पुष्पवृष्टिं मुचो मेघा जगर्जुः
मरुन्निस्वनाः॥ तथा कोलाहले तस्मिन्वर्त्तमाने च तुंबुरुः॥ नवेणसंसमेतोऽभ्येत्य जातकर्मकरोन्मुने॥ दिवाः शर्म
ययुः सर्वे तथा देवर्षयोऽमलाः॥ पातालात्पन्नगेंद्राः शेषवासुकितक्षकाः॥ अयान्त्यासुराणां च ये प्रधाना द्वि ॥राम॥
जोत्तम॥ यक्षाणां गुह्यकानां च वायवश्च तथाखिलाः॥ तदागते रशेषैस्तु देवदानवपन्नगैः॥ मुनिभिश्चाकुलमभूद्गं ॥१५६॥

156A

धर्म्माणां महत्सुरं ॥ ततः स तुम्बुरुः कृत्वा जातकर्मादिकाः क्रियाः ॥ चक्रे स्वस्त्ययनं तस्य बालस्य श्रुतिपूर्वकं ॥ चक्र
वर्त्ती महावीर्यो महाबलपराक्रमः ॥ महान्तं कालमीशित्वमशेषायाः क्षितेः कुरु ॥ इमे शक्रादयः सर्वे लोकपालास्तथर्षयः ॥
स्वस्ति कुर्वन्तु ते वीर वीर्यं चारिविनाशनं ॥ मरुत्त्वशिवा यास्तु पूर्वेण योरजः ॥ मरुतो विमलो क्षाणां वेमस्या यास्तु दा
क्षिणः ॥ पश्चिमं ते मरुद्दीर्घ्यमुत्तमं संप्रयच्छतु ॥ वलं यच्छतु चोत्कृष्टं मारुतश्चोत्तरं ततः ॥ इति स्वस्त्ययनस्यान्ते गुरुर्वाचाश
रीरिणी ॥ मरुत्त्वेति बहुशो यदिदं गुरुरब्रवीत् ॥ मरुत्त इति तेनायं भुवि ख्यातो भविष्यति ॥ भुवि चास्य महीपाला आया स्व
स्याज्ञामशेषतः ॥ एष सर्वक्षितीशानां वीरस्यास्य तिमर्द्दनि ॥ चक्रवर्त्ती महावीर्यः सप्तद्वीपवतीं महीं ॥ आक्रम्य पृथिवी
पालानयं भोक्ष्यत्यवारितः ॥ प्रधानः पृथिवीशानां नाम भविष्यत्येष यज्विनां ॥ आधिक्यं शौर्ये वीर्ये च भविष्यत्यस्य राजसु
मार्कंडेय उ० ॥ इत्याकर्ण्य वचः सर्वे केनाप्युक्तं दिवौकसः ॥ तुतुषुर्विप्रगंधर्व्वा संम्प्रमतातथापिता ॥ इति श्रीमार्कंडेय
पुराणे अविक्षिच्चरिते ॥ १२५ ॥ मार्कंडेय उ० ॥ ततः स राजपुत्रः स्वमादाय दयितं सुतं ॥ पत्न्या चानुगतो विप्र गंधर्वैराय
यौ पुरं ॥ स पितुर्भवनं प्राप्य ववन्दे पितुरादरात् ॥ चरणौ साच तन्वंगी ह्रीमती नयतेः सुता ॥ अथाह राजपुत्रो सौ गृ
हीत्वा बालकं सुतं ॥ धर्म्मासनगतं नम्य राज्ञामध्ये करंधमं ॥ मुखं यो त्रस्य पश्येत्तदुत्संगस्थस्य यन्मया ॥ किमिच्छकेप्र
तिज्ञातं तुभ्यं मातुः कृते पुरा ॥ इत्युक्त्वा पितुरुत्संगे तं कृत्वा तनयं ततः ॥ यथा वृत्तमशेषं स कथयामास तस्य तत् ॥ स परि
ष्वज्य तं पौत्रमानंदास्राविलेक्षणः ॥ स नाम्न्या[illegible]स्य यात्मानं प्रशशंस पुनः पुनः ॥ ततः [illegible]र्घ्यादिना सम्यक् गंधर्वान्समु
पागतान् ॥ संमानयामास मुदा विस्मृत्यान्यप्रयोजनः ॥ तत्पुरे च महानासीदानंदः पौरवेश्मसु ॥ अस्माकं संततिर्जाता ना
यस्येति मम मुने ॥ हृष्टपुष्टपुरे तस्मिन् गीतवाद्यरवाकुले ॥ विलासिन्योति चार्वंग्यो ननृतुर्लोकस्य सुत्तमं ॥ राजा च द्विजसु

स्त्रिभ्यो रत्नानि च वसूनि च॥ गोभूवस्त्राण्यलंकारानदद्धृष्टमानसः॥ ततः स बालो ववृधे शुक्लपक्षे यथा शशी।
॥स्कं० पु०॥ पितॄणां प्रीतिजनको जनस्य दृश्य सोऽभवत्॥ आचार्यो लासकाख्यस्य प्रागेवादान् जगृहे मुने॥ ततः शास्त्राण्यशेषाणि
॥१५७॥ धनुर्वेदं ततः परं॥ कृताभ्यासो यदासौ भूद् दृढः कार्मुककर्मणि॥ अन्येषु च तथा वीरः शास्त्रेषु विजितश्रमः॥ ततोऽस्त्रा
णि स जग्राह भार्गवाद्भूरिसंभवात्॥ विनयावनयो विप्रगुरोः प्रीतिपरायणः॥ गृहीतास्त्रः कृती वेदे धनुर्वेदस्य पार
157 गः॥ निष्णातः सर्वविद्यासु स बभूव ततो युवा॥ विशालोऽपि सुनावाप्तामुपलभ्यारिविक्रमिमां॥ हर्षनिर्भरचित्तोऽभूद्दौहि
त्रस्य च योग्यतां॥ अथ राजा सुतं तं तु दृष्ट्वा प्राप्तमनोरथः॥ यज्ञाननेकान्निष्पाद्य दत्त्वा दानानि चार्थिनां॥ कृत्वा ध
र्मक्रियायुक्तः स वलो धर्मतो महीं॥ परिपाल्यारिविजयी वनबुद्धिर्बभूव सः॥ स यियासुर्वनं पुत्रमविक्षितमभाष
त॥ पुत्र वृद्धोऽस्मि गच्छामि वनं राज्यं गृहाण मे॥ कृतकृत्योऽस्मि नास्त्यन्यत्किंचित्त्वय्यभिषेचनात्॥ सनिष्पन्नमिदं राज्यं
त्वं गृहाण मयार्पितं॥ इत्युक्तः पितरं प्राह सोऽविक्षिन्नृपनंदनः॥ अथ यावन्नतो भूत्वा पियासुस्तपसे वनं॥ नाहं ता
त करिष्यामि पृथिव्याः परिपालनं॥ नायेति ह्रीर्मे मनसो राज्येऽन्यं त्वं नियोजय॥ तातेन यो क्षितो बद्धो नाल्पवीर्योऽ
हं यतः॥ ततः कियत्पौरुषं मे पुरुषैः प्राप्यते महत्॥ योऽहं न पालनायालमात्मनोऽपि वसुंधरां॥ स कथं पालयिष्यामि रा
ज्यमन्यत्र निक्षिप॥ स स्त्रीसधर्मा पुरुषो यस्यान्येनापवृद्धता(?)॥ आत्मनो हाय भवता बंधनाद्धीन मोक्षितः॥ सोऽहं कथं
भविष्यामि स्त्रीसधर्मा महीपतिः॥ स्त्रियाः पुमान्न भवेन्मर्त्यो यः शूरः स महीपतिः॥ पितोवाच॥ न भिन्न एव पुत्रस्य
पिता पुत्रस्तथा पितुः॥ नान्येन मोक्षितो वीर यस्त्वं पित्रा विमोक्षितः॥ पुत्र उवाच॥ हृदयं नान्यथा नेतुं मया शक्यं नरे ॥राम॥
श्वर॥ हृदये मे रतीवात्र यदहं मोक्षितस्त्वया॥ पित्रोपात्तां श्रियं भुंक्ते पित्रा कृच्छ्रात्समुद्धृतः॥ विज्ञायते च यः पित्रा मा ॥१५७॥

157A

तरः सोऽस्तु नरः कुले ॥ स्वयमर्जितवित्तानां ख्यातिं स्वयमुपेयुषां ॥ स्वयं निस्तीर्णकृच्छ्राणां या गतिः सास्तु मे गतिः ॥
मार्कंडेय उ० ॥ इत्याह बहुशः पित्रा यदा प्रोक्तोऽप्यसौ मुनिः ॥ तदा तस्य सुतं राज्ये मनुत्तमकरोन्नृपः ॥ स पित्रा सम
नुज्ञातं राज्यं प्राप्य पितामहात् ॥ चकार सम्यक्सुहृदामानंदमुपपादयन् ॥ राजा करंधमश्चापि वीरामादाय तां
तदा ॥ वनं जगाम तपसे यतवाक्कायमानसः ॥ तत्र वर्षसहस्रं स तपस्तप्त्वा सुदुष्करं ॥ विहाय देहं नृपतिः शक्रस्या
य सलोकतां ॥ सास्य पत्नी तदा वीरा वर्षाणाम परं शतं ॥ तपश्चचार विप्रर्षे जटिला मलपंकिनी ॥ सालोक्यमिच्छु
ती भर्तुः स्वर्गस्थस्य महात्मनः ॥ फलमूलकृताहारा भार्गवाश्रमसंश्रया ॥ द्विजातिपत्नीमध्यस्था द्विजशुश्रूषणे
रता ॥ इति श्रीमार्कंडेयपुराणे अविक्षिच्चरिते समाप्तं ॥ १२६ ॥ क्रौष्टुकिरु० ॥ भगवन्विस्तरात्सर्वं ममैतत्कथितं त्वया ॥
करंधमस्य चरितमविक्षिच्चरितं च यत् ॥ आविक्षितस्य नृपतेः सुतस्य महात्मनः ॥ श्रोतुमिच्छामि चरितं श्रूयते
सोऽतिचेष्टितः ॥ चक्रवर्ती महाभागः शूरः कांतो महामतिः ॥ धर्मविद्धर्मकृच्चैव सम्यक्पालयिता भुवः ॥ मार्कंडे
य उ० ॥ स पित्रा समनुज्ञातं राज्यं प्राप्य पितामहात् ॥ धर्मतः पालयामास प्रजाः पुत्रानिवौरसान् ॥ इयाज बहुन्य
ज्ञान्यथावत्स्वाप्तदक्षिणान् ॥ ऋत्विक्पुरोहितादेशवश्यचित्तो महीपतिः ॥ तस्याप्रतिहतं चक्रमासीद्द्वीपेषु सप्त
सु ॥ गतयश्चाप्यविच्छिन्नाः खपातालजलादिषु ॥ ततः प्राप्य धनं विप्रा यथावत्स्वक्रियापराः ॥ अयजंत महाय
ज्ञैर्देवानिंद्रपुरोगमान् ॥ इतरे चत्रयो वर्णाः स्वस्वकर्मण्यतद्धिताः ॥ दुयात्तधनाश्चक्रुरिष्टापूर्तादिकाः क्रियाः
पाल्यमाना मही तेन मरुत्तेन महात्मना ॥ तेनातिशायिताः सर्वे केवलं न महीक्षितः ॥ यज्विनो देवराजोऽपि मतयज्ञो
तिशंकितः ॥ ऋत्विक्तस्य तु संवर्तो बभूवांगिरसः सुतः ॥ भ्राता बृहस्पतेर्विप्र महात्मा तपसां निधिः ॥ सोवलोमुंजाः

॥मा० पु०॥ वान्नामपर्वतः सुरसेविः ॥ पातितं तेन तत्र शृंगं कृते तस्य महीपतेः ॥ तेन तस्याखिलं यज्ञे हेमभांडादिकं द्विज ॥ प्रसादाश्च कृ
ताः ॥ सुभ्रास्तपसा सर्वे कांचनाः ॥ गाथाश्चाप्यत्र गायंति मरुत्तचरिताश्रयः ॥ स तस्येन षेयः सर्वे कुर्वतो ध्ययनं तथा ॥ म
॥१५५॥ रुत्तेन समो नाभूत् यजमानो महीतले ॥ सदः समस्तं यस्यासीत् प्रासादास्तस्य कंचनाः ॥ अमाद्यदिंद्रः सोमेन दक्षिणाभिर्द्वि
जातयः ॥ विप्राणां परिवेष्टारः शक्राद्यास्त्रिदशोत्तमाः ॥ यदा यज्ञे मरुत्तस्य तत्र ताः सर्वे महीपतेः ॥ सुवर्णमखिलं स्व
158 कं रत्नपूर्णगृहे द्विजैः ॥ प्रसादादि समस्तं च सौवर्णं तस्य यज्ञकृतौ ॥ त्रयो वर्णास्त्वलभ्यं तत तस्मात्किंचित्तदावसु ॥ तेन
सक्तेन शिष्टाये जनाः पूर्णमनोरथाः ॥ ते पि यज्ञान्यजंते चैदेशे देशे पृथक् पृथक् ॥ तस्यैवं कुर्वतो राज्यं सम्यक्पालयत
प्रजाः ॥ तपस्वी कश्चिदभ्येत्य तमाह मुनिसत्तम ॥ पितुर्मातवाहेदं दृष्ट्वा तापसमंडलं ॥ विषार्त्तमभूत् उरगैर्मेदोन्मत्ते
नरेश्वर ॥ पितामहस्ते स्वर्यातः सम्यक् संपाल्य मेदिनीं ॥ पितातवापिशक्तो पि हित्वा ग्रामं वने स्थितः ॥ सोहं पश्यामि
वैकल्यं त वराज्यं प्रशासतः ॥ पितामहस्य तेनाभूद्यत्स्वैषां च तेन्न पा ॥ नूनं प्रसक्तो भोगे पुत्रशक्तो वा जितेंद्रियः ॥ चा
रांधताय तस्ते यंदुष्टादुष्टान्नवेत्सि यत् ॥ पातालादभ्युपेते स्तु भुजंगैर्मदशालिभिः ॥ दष्टा मुनिसुताः सप्त दूषिताश्च जला
शयाः ॥ स्वेदमूत्र पुरीषेण दूषितं च मृतं हविः ॥ अपराधं समुद्दिश्य दत्तो नागा वलिश्चिरात ॥ एते समर्था मुनयो भस्मीक
र्तुं भुजंगमान् ॥ किं त्वेषां नाधिकारोत्र त्वमेवात्राधिकारवान् ॥ तावत्सुखं भूपतिजैर्भोगजं प्राप्यते नृप ॥ अभिषेक
जलं यावन्न मूर्द्ध्नि विनिपातितं ॥ कानि मित्राणि कः शत्रुर्मम शत्रोर्नु मयं बलं किं परं ॥ कोहं के मंत्रिणः पक्षे के वा भूप ॥राम:॥
तयो मम किं पतत् कोशो बलं किं वा को नुरक्तो जनो मम ॥ विरक्तो वा परैर्भिन्नः परैर्भिन्नः परेषामपि कीदृशः ॥ क सम्यग ॥१५५॥
त्र नगरे विषये वा जनो मम ॥ धर्मकर्माश्रयी मूढः को ऽसम्यग्धिवर्तते ॥ के दंड्याः परिपाल्याः के के चोपेक्ष्या नरा मया

158A

सामभेदकराश्चान्ये देशकालमवेक्षिता ॥ चरांश्च चारयेदन्ये भूपतिर्निभृतैश्चरैः ॥ सचिवादिषु सर्वेषु चरानन्द्या
न्महीपतिः ॥ इत्यादौ भूपतिर्निःसंकर्मण्यासक्तमानसः ॥ नयेद्दिनं तथा रात्रिं न तु भोगपरायणः ॥ राज्ञां शरीरग्रहणं न
भोगाय महीपते ॥ क्लेशाय महते पृथ्वीस्वधर्मपरिपालने ॥ सम्यक्पालयतो पृथ्वीं स्वधर्मे च महीपते ॥ इह क्लेशो म
हान्स्वर्गे परमं सुखमक्षयं ॥ तदिहत्वं महाभाग हित्वा भोगान्नराधिप ॥ पालनाय क्षितेः क्लेशमंगीकर्तुमिहार्हसि ॥ इति
वृद्ध मृषीणां यदासनं त्वयि शासति ॥ भुजंगहेतुकं भूपचाराधीनं हि वेत्सि तत ॥ बहुनात्र किमुक्तेन दुष्टदंडो निपात्यतां
शिष्टान्पालयराजंस्त्वं धर्मं षड्भागमाप्स्यसि ॥ अरक्षन्पापमखिलं दुष्टैरविनयात्कृतं ॥ समवाप्स्यस्यसंदिग्धं यदी
च्छसि कुरुष्व तत ॥ एतन्मे योक्तः सकलं यद्वाह पितामही ॥ कुरुष्व तं स्थिते यत्ते रोचते वसुधाधिप ॥ इति श्रीमार्कंडेय
पुराणे मरुत्तचरिते ॥ १२९ ॥ मार्कंडेय उवाच ॥ इति तापसवाक्यं स श्रुत्वा लज्जापरो नृपः ॥ धिग्मां चारो धमित्युक्त्वा निः
श्वस्य जगृहे धनुः ॥ ततः सत्वरितो गत्वा तमौर्वेश्याश्रमं प्रति ॥ ववंदे शिरसा वीरो मातरं पितुरासनः ॥ तापसांश्च यथा
न्यायं तैश्चाशीर्भिरभिष्टुतः ॥ दृष्ट्वा च तापसान्सर्वान्नागैर्दष्टान्मृतान्भुवि ॥ निनिंदात्मानमसकृत्सुरस्ते चामहीपतिः ॥
उवाच चैतदद्याहं महीयेम वमन्यतां ॥ यत्करोमि भुजंगानां दुष्टानां ब्राह्मणद्विषां ॥ तस्य स्यतु जगत्सर्वं सदेवासुरमानु
षं ॥ मार्कंडेय उ० ॥ इत्युक्त्वा जगृहे कोपादस्त्रं संवर्तकं नृपः ॥ नाशाय शेषनागानां पातालौकविचारिणां ॥ ततो ज्वा
लासहस्त्राणि नागलोकसमंततः ॥ महास्त्रतेजसा विप्र दह्यमानो निवारितः ॥ हाहा तातेति मातेति हाहा वत्सेति नामतः ॥ तस्मि
न्नस्त्रकृते रावाः पन्नगानाम याभवन् ॥ केचित्ज्वलन्दिःपुच्छाग्रैः फणैरन्ये भुजंगमाः ॥ गृहीतपुत्रदारेश्च त्यक्ताभरण
वाससः ॥ पातालमुत्सृज्य युयुः शरणं भामिनीं तदा ॥ मनुत्तमातरं पूर्वं यया दत्तं तदाभयं ॥ तामुपेत्योरगाः सर्वे सप्रणा

मेभयातुराः ॥ सगरूरमिदं प्रोचुः क्रियतां नः पुरोहितं ॥ प्रणम्याभ्यर्थितं पूर्वं यदस्माभी रसातले ॥ तस्य कालोयमायातस्त्रीहि
॥मा०पु०॥ वीरप्रजायिनि ॥ पुत्रो निवार्यतां राज्ञि प्राणैः संयोजयाशु नः ॥ दह्यते सकलो लोको नागानामस्त्रवह्निना ॥ एवं संदह्यमानाना
॥१५९॥ मस्माकं तनयेन ते ॥ त्वामृते शरणं नान्यत्कृपां कुरु यशस्विनि ॥ मार्कंडेय उ० ॥ इति श्रुत्वा वचस्तेषां सस्मृत्यादौ च भाषि
तं ॥ भर्तारमाह सा साध्वी ससंभ्रममिदं वचः ॥ पूर्वमेव यथाख्यातं पाताले यद्भुजंगमैः ॥ प्रोक्तमभ्यर्थिता पूर्वं ममासीच्च
159 नयं प्रति ॥ नहमेभ्यागता भीता दह्यंतस्तस्य तेजसा ॥ ममैते शरणं पूर्वं दत्तमेभ्यो मया ऽभयं ॥ ये मां शरणमापन्नास्ते
त्वां शरणमागताः ॥ अप्ययस्यधर्मो चरणायतोहं सकलं तव ॥ साहं निवारये पुत्रं मरुत्तं वचनात्तव ॥ मया चाभ्यर्थितो
वत्स्यं शममभ्युपयास्यति ॥ राजोवाच ॥ महापराधे नियतं मरुत्तः क्रोधमागतः ॥ दुर्निवर्त्यमहं मन्ये तस्य क्रोधं सुत
स्य च ॥ नागा ऊचुः ॥ शरणागतास्तेद्य वयं प्रसादः क्रियतां नृप ॥ क्षत्रस्यार्त्तपरित्राणनिमित्तं शस्त्रधारणं ॥ मार्कंडे
य उ० ॥ नागानां तद्वचः श्रुत्वा भीतानां शरणैषिणां ॥ तया चाभ्यर्थितः पत्न्या प्राहावीक्षिन्महायशाः ॥ गत्वा ब्रवीमि तं भ
द्रे तनयं त्वरया तव ॥ परित्राणाय नागानां नन्वस्याः शरणागताः ॥ नोपसंहरते शस्त्रं यदि मद्वचनान्नृपः ॥ तदास्त्रै
वीरयिष्यामि तस्यास्त्रं तनयस्य ते ॥ ततो गृहीत्वा स धनुरविक्षित्क्षत्रियोत्तमः ॥ भार्यया सहितः प्रायात्त्वरावान्भार्ग
वाश्रमं ॥ इति श्रीमार्कंडेयपुराणे मरुत्तचरिते ॥ १२६ ॥ मार्कंडेय उ० ॥ स तु तत्र सुतं दृष्ट्वा गृहीतवरकार्मुकं ॥ धनुःशास्त्र
वतस्योग्रज्वालाव्याप्तदिगंतरं ॥ उद्गिरंतं महाज्वालासंततिव्याप्तभूतलं ॥ पातालांतर्गतप्रांतमसह्यं घोरभीषणं ॥
सतं दृष्ट्वा महीपालं भ्रूकुटीकुटिलाननं ॥ मा क्रुधस्त्वं मरुत्तास्त्रमुपसंह्रियतामिति ॥ प्राह स सहसा चलु नवणी क्रम ॥राम:॥
मुदारधीः ॥ स निशम्य गुरोर्वाक्यं दृष्ट्वा तं चातुरं पुनः ॥ गृहीतकार्मुकं पित्रोः प्रणिपत्य स गौरवं ॥ प्रत्युवाचापराद्धं मे ॥१५९॥

दष्टःं पन्नगाधिपैः। शासतीमांमयिमहींपरिभूयबलंमम॥ सप्ताश्रममुपागम्यदष्टामुनिकुमारकाः॥ क्षीणा
माश्रमस्थानाममीशामवनीपते॥ मयिशासतिदुर्वृत्तैर्दूषितानिहवींषिच॥ जलशयास्तथायेतैः सर्वेएवहिदूषि
ताः॥ तदेतत्कारणंकिंचिन्नव्यक्तव्यंत्वयापितः॥ ननिवारयितव्योहंब्रह्मघ्नान्प्रतिपन्नगान्॥ अविक्षिदुवाच॥ यद्यै
भिर्निहताविप्रायास्यंतितिनरकंसुताः॥ मममेततक्रियतांवाक्यंचिरमास्त्रप्रयोगतः॥ मरुतउ०॥ अहमेवगमिष्या
मिनरकंयदिपापिनां॥ ननिग्रहेयतामेषांमानिवारयमामितः॥ अविक्षिदुवाच॥ मामेतेशरणंप्राप्ताःपन्नगा
ममगौरवात॥ उपसंहियतामस्त्रमलंकोपेनतेन्नृप॥ मरुतउवाच॥ नाहमेषांक्षमिष्यामिदुनामपराधिनां॥ स्व
धर्म्ममुल्लंघ्यकथंकरिष्यामिवचस्तव॥ दंडंपातयतेदंड्यंभूपःशिष्टांश्चपालयेन॥ पुण्यान्लोकनचाप्नोति
नरकांश्चाप्युपेक्षकः॥ मार्कंडेयउ०॥ एवंसबहुशःपित्रावार्यमाणोपितत्सुतः॥ नोपसंहरतेसोऽस्त्रंततोसौपुनर
ब्रवीत॥ हिंससेपन्नगानभीतममैतान्शरणागतान॥ वार्यमाणोपितस्मात्तेकरिष्यामिप्रतिक्रियां॥ मयाप्यस्त्राण्यवा
त्तानिनत्वमेकोस्त्रविद्भुवि॥ ममाग्रतस्तुदुर्वृत्तपौरुषंतुकियत्तव॥ ततःकार्मुकमारोप्यकोपतान्मविलोचनः॥ अ
विक्षिदस्त्रंजग्राहकालास्त्रंमुनिपुंगवः॥ ततोज्वालापरीवारमरिसद्यःभमुत्तमं॥ कालास्त्रंतन्महावीर्यंयोजयामा
सकार्मुकं॥ ततश्चक्षोभजगतीसंवर्त्तास्त्रप्रतापवान॥ साब्धिशैलाखिलाविप्रकालस्यास्त्रेसमुद्यते॥ नत्वहूधायका
लास्त्रंमयिमुंचतिकिंभवान॥ सद्धर्मचारिणिसुतेसदेवाज्ञाकरेतव॥ मयाकार्यमहाभागप्रजानांपरिपालनं॥ त
च्चेवंक्रियतेकस्मात्मद्विधायास्त्रमुद्यतं॥ अविक्षिदुवाच॥ शरणागतसंत्राणंकर्त्तुंव्यवसितावयं॥ तस्यव्याघातकर्त्ते
त्वंनमेजीवन्विमोक्ष्यसे॥ माचहत्वास्त्रवीर्येणजह्निदुष्टानिहोरगान॥ त्वांवाहत्वामहास्त्रेणरक्षिष्यामिमहोरगान॥

॥मा॰ पु॰॥ ॥१६७॥ 160

त्वां वा हत्वा महास्त्रेण रक्षिष्यामि महोरगान्॥ धिक् तस्य जीवितं पुंसः शरणार्थिनमागतं॥ यो नार्त्तमनुगृह्णाति वैरिपक्षमपि
स्फुटं॥ क्षत्रियोहमिमे भीताः शरणं मामुपागताः॥ अपकर्त्ता त्वमेवैषां कथं वध्यो न मे भवान्॥ मरुत्त उ॰॥ मित्रं वा बांधवो
वापि पिता वा यदि वा गुरुः॥ प्रजापालनविघ्नाय यो हंतव्यः स भूभृता॥ सोहं ते प्रहरिष्यामि न क्रोद्धव्यं त्वयापि तः॥ स्व
धर्मः परिपाल्यो मे न मे क्रोधस्तवोपरि॥ मार्कंडेय उ॰॥ ततस्तौ निश्चितौ दृष्ट्वा परस्परवधं प्रति॥ समुपेत्यांतरे तस्थुर्मु
नयो भार्गवादयः॥ ऊचुश्चैनं न मोक्तव्यं त्वयास्त्रं पितरं प्रति॥ त्वया च नायं हंतव्यः पुत्रः प्रख्यातवेष्टितः॥ मरुत्त उवाच
मया दुष्टानि हंतव्याः संतो रक्ष्या महीक्षिता॥ इमे च दुष्टाः भुजगाः कोपराधो मम द्विजाः॥ अविक्षिदुवाच॥ शरणागतसं
त्राणं मया कार्यमयं च मे॥ अपराधी सुतो विप्रा जीहंति शरणागतान्॥ ऋषय ऊचुः॥ इमे वदंति भुजगास्त्रासलोल
विलोचनाः॥ संजीवयामस्तान्विप्रान्येदष्टा दुष्टपन्नगैः॥ तदलं विग्रहेणाभो राजवर्यौ प्रसीदतां॥ उभावपि चि
निर्वहेर प्रतिज्ञौ धर्मकोविदौ॥ मार्कंडेय उ॰॥ ततो वीरा समभ्येत्य स्वपुत्रमेतदभाषत॥ मद्वाक्यादेषते पुत्रोहं त्वं नागा
नु रुतोद्यमः॥ तान्निष्पन्नं यदा विप्रास्ते जीविंति यथामृताः॥ संजीवंतस्ते भुजंगे ये युष्मच्छरणागताः॥ भाविन्युवाच॥
अहमभ्यर्थिता पूर्वमेभिः पातालसंश्रयैः॥ तन्निमित्तमयं भर्त्ता मया त्र विनियोजितः॥ तदेतदार्यै निर्वृत्तमुभयोरपि शोभनं॥
मम पुत्रस्य भर्तुश्च त्वत्सौत्रस्यात्मजस्य च॥ मार्कंडेय उ॰॥ ततः संजीवयामासुस्तान्विप्रांस्ते भुजंगमाः॥ दिव्यैरौषधजातैश्च
विषसंहरणेन च॥ पित्रा नेनाम चरणौ सततो जगती पतिः॥ मरुत्तं च पिता प्रीत्या परिष्वज्येदमब्रवीत॥ मानहाभव शत्रू
णां चिरं पालय मेदिनीं॥ पुत्रैः पौत्रैः प्रपौत्रैश्च मा चैतसंतु विद्विषः॥ ततो द्विजैरनुज्ञातौ वीरया च नरेश्वरौ॥ समारूढौ रथ ॥राम॥
साचा भामिनी स्वपुरं गताः॥ वीरा तु कृत्वा सुमहत्तपो धर्मभृतां वर॥ भर्त्तुः सलोकतां प्राप्ता महाभागा पतिव्रता॥ म ॥१६७॥

160A

रुत्तोपि चकारोर्व्या धर्मतः परिपालनं॥ विनिर्ज्जितारिषड्वर्गो भोगांश्च बुभुजे नृपः॥ तस्य पत्नी महाभागा वैदर्भी निलया
तया प्रभावती सुवीरस्य सौवीरस्याभवत्सुता॥ सुकेशी केतुवीर्यस्य मागधस्यात्मजाभवत्॥ सुता च सिंधुवीर्यस्य केकयी केक
यस्य च सैरंध्री च सिरंध्रस्य सिंधुभर्तुर्वपुष्मती॥ चेदिराजसुता चाभूद्भार्या तस्य सुशोभना॥ आसां पुत्रास्तस्य चासन्नृप भूतो
ष्टादश द्विज॥ तेषां प्रधानो ज्येष्ठश्च नरिष्यंतः सुतोभवत्॥ एवंवीर्यो मरुत्तोभून्महाराजो महाबलः॥ यस्याप्रतिहतं च
क्रमासीद्द्वीपेषु सप्तसु॥ यस्य तुल्यो परो यज्वा न भूतो न भविष्यति॥ सत्वविक्रमयुक्तस्य राजर्षेरमितौजसः॥ तस्यैत
च्चरितं श्रुत्वा मरुत्तस्य महात्मनः॥ जन्म चाग्र्यं द्विजश्रेष्ठ मुच्यते सर्वकिल्बिषैः॥ इति श्रीमार्कंडेयपुराणे मरुत्तच
रितेनाम॥ १२९॥ क्रौष्टुकिरुवाच॥ मरुत्तचरितं कृत्स्नं भगवान्कथितं त्वया॥ तत्संततिमशेषेण श्रोतुमिच्छा प्र
वर्तते॥ तत्संततौ ये क्षितिपा राज्याहो वीर्यशालिनः॥ तानहं श्रोतुमिच्छामि त्वया ख्यातान्महामुने॥ मार्कंडेय उ
नरिष्यंत इति ख्यातो मरुत्तस्याभवत्सुतः॥ अष्टादशानां पुत्राणां ज्येष्ठः श्रेष्ठः स एव च॥ वर्षाणां तु सहस्राणां स
प्ततिर्दश पंच च॥ बुभुजे पृथिवीं कृत्स्नां मरुत्तः क्षत्रियर्षभः॥ कृत्वा राज्यं स धर्मेण इष्ट्वा यज्ञाननुत्तमान्॥ मार्कं
डेय उ॥ मरुत्तश्च सुतं ज्येष्ठमभिषिच्य ययौ वनं॥ एकाग्रचित्तः सन्न्यस्तत्वा तत्र तपो महद्वं॥ आरुरोह दिवं वि
प्रयशसा व्याप्तरोदसी॥ नरिष्यंतः सुतस्तस्य चिंतयामास बुद्धिमान्॥ पितुर्वृत्तं समालोक्य प्रयात्येषां च भूभृतां॥
अत्र वंशे महात्मानो राजानो मम पूर्वजाः॥ यज्वानो धर्मतः पृथ्वीपालया सुरूर्ज्जिताः॥ दातारश्चातिवित्ता
नां संग्रामेष्वनिवर्त्तिनः॥ तेषां चिंचरितं शक्यमनुयातुं महात्मनां॥ किं तु तैर्यत्कृतं कर्म धर्मं चाहवशालिभिः॥
तदहं कर्त्तुमिच्छामि यन्नास्ति करोमि किं॥ धर्मतः पालयंत पृथ्वी को गुणोत्र महीयतेः॥ असम्यक्पालना सापी

मा

॥मार्क॰पु॰॥ नरेंद्रो नरकं व्रजेत् ॥ सन्निवृत्ते महायज्ञाः कर्त्तव्या एव भूभुजा ॥ राज्ञश्च चात्र किंचिन्न सीदन्नामीष्ववेगात्तिः
॥स्त॥ एतत्सर्वं य-
आभिज्ञास्यंत याल्ले ज्ञाको पश्चारिजनाश्रय ॥ कारयंति स्वधर्मांश्च संग्रामाद् पलायनं ॥ एतत्सर्वं य-
थासम्यक्कमत्पूर्वपुरुषैः कृतं ॥ पित्रा च मे मरुत्तेन तत्तथा तत्के न शक्यते ॥ नहहं किं करिष्यामि यत्तैः पूर्व
161 जैः कृतं ॥ ते यज्वनां वरा दान्ताः संग्रामाश्चानिवर्त्तिनः ॥ सहासमरसंमर्द्दे चापि सर्वादियो रुषाः ॥ कर्म्मणाहं यति
ष्यामि कस्मै तान तिसंधितुं ॥ अथवा तैः स्वयं यज्ञाः कृताः पूर्वजैनेश्वरैः ॥ अविक्रममन्दिनी न्येन कारितास्त्वकरोम्य
हं ॥ मार्कंडेय उ॰ ॥ इति संचिंत्य यज्ञं स चकार कं नरेश्वरः ॥ यादृशं न चकारान्यो वित्तोत्सर्गो यशोमितं ॥ द्विजानां जीव
नायालं दत्वा तु सुमहाधनं ॥ ततः शतगुणं तेषां विप्राणामददन्नृपः ॥ गावो वस्त्राण्यलंकारं धान्यागारादिकं तथा ॥
प्रत्येकमददत्तेषां सर्वे पृथ्वीनिवासिनां ॥ तस्तेन यदा यज्ञः प्रारब्धो भुभुजा पुनः ॥ प्रारब्धमुख्यमुख्याश्च ततो ना
लभते द्विजान् ॥ यान्यान् वृणोति स नृपो विप्रान् नार्त्विज्यकर्मणि ॥ ते चैनं मूचुर्यज्ञाय वयमस्तेन यदा यज्ञ प्रारब्धो
भुभुजा पुनः न्यत्र दीक्षिताः ॥ अन्यं वरय यद्धित्तं त्वया स्माकं विसर्जितं ॥ तस्यातो नास्ति यज्ञेषु यच्छात्तु नः पते थिन
मार्कंडेय उ॰ ॥ नोवाच कश्चिद्द्विजो विप्रान् यदा शशास क्षितीश्वरः ॥ वहिर्वेघां तथादानं सारातु सुपचक्रमे ॥ तथापि जग
हुर्नैव धनसंपूर्णमंदिराः ॥ द्विजाय दातुं स यो सो निर्विण्ण इदमब्रवीत् ॥ अहो तिशोभनं पृथ्व्यां यद् द्विजो नाधनः ॥
क्वचित् ॥ अशोभनं च यत्कोषो विफलाय ममयज्विनः ॥ नार्त्विज्यं कुरुते कश्चिद्यजमानो खिलो जनः ॥ द्विजानां दद ॥रामः॥
तां दानं न तदा संप्रतीच्छते ॥ मार्कंडेय उ॰ ॥ ततः कांश्चिद्द्विजान् भक्त्या प्रणिपत्य पुनः पुनः ॥ स यज्ञे कर्त्विजश्चक्रे ते
स्य चक्रुर्महामखं ॥ आश्चर्यभूतमिदं चासीत् यज्ञे तस्य महीपतेः ॥ स यज्ञो भूत्तदा तस्य यजमानो खिलो जनः ॥ द्विज ॥१६१॥

161A

न्मनामभर्त्तासीत्सादस्यस्तत्वकस्मुन॥ यजमानाद्विजाःकेचित् केचित्तेयाचयाचकाः॥ नरिष्यंतोयदायतिरि
याजसयदातदा॥ तत्प्रदत्तैर्धनैर्योगं चक्रुःपृथ्व्यामशेषतः॥ प्राच्यांकोयस्तुयज्ञानांनरिष्यंतोयज्ञन्॥ एवं
सराजाधर्मात्मानरिष्यंभवसुरा॥ मरुततनयोविप्र प्रख्यातवलपौरुषः॥ इतिश्रीमार्कंडेयपुराणेनरिष्यंतचरितं
नाम॥ १२१॥ मार्कंडेय उ०॥ नरिष्यंतस्यतनयोदृष्टारिदमनोदमः॥ सर्वलोकमनोहारितस्यवृत्तंमुनेरिव॥ वाभ्रव्याधि
द्रसेनायांसंजज्ञेतस्यभ्रमुजः॥ नववर्षाणिजठरेस्थित्वामातुर्महायशाः॥ यक्राह्यामासदमंमातरंजठरेस्थितः॥ द
मशीलश्चमत्विन्नायतश्चायंन्नृपात्मजः॥ ततस्त्रिकालविज्ञानसहितोस्यपुरोहितः॥ दमइत्यस्यकरोन्नामनरिष्यंतसुत
स्यतु॥ सदमोराजपुत्रस्तुधनुर्वेदंविशेषतः॥ जग्रहेनरनाथस्यसकाशाद्वृषपर्वणः॥ दुंदुभेर्दैत्यपुत्रस्यतपोवननि
वासिनः॥ सकाशात्तत्रजग्राहेकृत्स्नमस्त्रग्रामंचैततत्वतः॥ शुक्रात्सकाशाद्वेदांश्चवेदांगान्यखिलानिच॥ ततःसंष्टेणाद्रा
जर्षेर्जग्रहेयोगमात्मवान्॥ ततोम्ह्पंमहात्मानंगृहीतास्त्रंमहावलम्॥ स्वयंवरेकृताविप्रजग्रहेसुमनायतिं॥ स
तादशार्णाधिपतेर्वेलिनश्चारुकर्मणः॥ पश्यतांसर्वभूपानांयतदर्थमुपागताः॥ तस्यांचसानुरागोभून्मद्ररा
जस्यवैसुतः॥ सुमनायांमहाराजोमहावलपराक्रमः॥ तथाविदर्भाधिपतेःपुत्रसंक्रंदनस्यच॥ वपुष्मान् राज
राजश्चमहाधनुरुदारधीः॥ ततयातेहतंदृष्ट्वादृष्टारिदमनंदमं॥ मंत्रयामासुरन्योन्यंतत्रानंगविमोहिताः॥ ए
तामस्यवलात्कन्यांगृहीत्वारूपशालिनीं॥ गृहातव्रजामरएषपं अस्माकंगृहीष्यति॥ भर्तेवुद्धावराशेहास्वयंव
रविधानतः॥ तस्यकृत्यानोमविद्योभार्याधर्मोपपादिता॥ अयनोयेष्यतेकंचित्अस्माकंमंदिरेक्षणा॥ ततस्तस्य
मविद्योसायोदमंघातयिष्यति॥ मार्कंडेय उ०॥ इतितेनिश्चयंकृत्वात्रयःपार्थिवनंदनाः॥ जगृहुस्तांसुचार्वंगीदम

॥मा०पु०॥ स्यैवानुवर्त्तिनी॥ ततः केचिन्नृपास्तेषां येपतेपि चुक्रुशुः॥ चुक्रुशुश्चापरे भूपाः केचिन्मध्यस्थतां गताः॥ ततो दमस्तान्भू
पतीन्नवलोक्य समं ततः॥ अनाकुलमना वाक्यमिदमाह महामुने॥ दम उवाच॥ दशार्णपतिनाभूपा दत्ता धर्मे स्वयं
॥१६२॥ वरे॥ अधर्म्मो वाथवा धर्म्मो यदेमि गच्छते बलात्॥ यद्य धर्मो न मे काय्यम् — भार्या भविष्यति॥ धर्मो वा तद्दलं प्राणेर्यै
र सन्तते विलंघने॥ ततो दशार्णाधिपतिस्थानुक्रम्य नराधिपः॥ निःशब्दं कारयित्वा ततस्त्वरः सद्वा महामुने॥ दमेन
162 यदिदं प्रोक्तं धर्म्मा धर्म्माश्रितं नृपाः॥ तद्वदंघ्युयुया गो धर्मोमास्य चेन लुप्यते॥ मार्कंडेय उ०॥ ततः केचिन्महीपाला
लमरुत्तुर्वपुपाधिपं॥ परस्परानुरागेण गांधर्वो विहितो विधिः क्षत्रियाणां परमोयं न विरुद्धं हि जन्मना॥ दम मा
श्रित्य निष्पन्नः सचास्यादुहितुस्तव॥ इति धर्माद्दमस्यैषा दुहिता तव पार्थिव॥ यान्यथा वर्त्तते मोहात्कामाद्वा सः
प्रवर्त्तते॥ अथापरे तदा प्रोचुर्महात्मानो हि भूभृतः॥ यद्येषभूभृतो विप्र दशार्णाधिपतिर्वचः॥ मोहात्किमाह ध
र्मोयं गांधर्वः सक्रजन्मनः॥ न त्वेष राक्षसो नान्यो हि राक्षसः सम्यग्जीवितं॥ बलाद्दिमां यो हरति हत्वा तु परिपंथिनः
तस्यैवेयं सा राक्षसेन विवाहेनाव नो श्वराः॥ प्रधानेतर एवात्र विवाहद्वितये मतः॥ क्षत्रियाणामतो धर्म्ये महान्
रादिभिः कृतं॥ मार्कंडेय उ०॥ अथ प्रोचुः पुनर्भूपा ये पूर्वमुदितो नृपः॥ परस्परानुरागेण प्रीतिधर्म्मो[..]तेव
चः॥ सत्यं शास्त्रा राक्षसोपि क्षत्रियाणां परो विधिः॥ किं त्वसौ जनकस्वाम्य कुमार्यानुमते वरं॥ हित्वा तु पितृ
संबंधं बलेन ह्रियते तु या॥ सा राक्षसोपि क्षत्रियाणां परो विधिः॥ सराक्षसो विधिः प्रोक्तो नात्र भर्त्तुः करे स्थिता॥ प
श्यतां सर्वभूपानामनाथायां रतो दम॥ गांधर्वस्वेद निष्पन्नो विवाहो सराक्षसोऽत्र कः॥ विवाहिता या कन्या याक ॥राम॥
न्या — नैव विद्यते॥ कन्यायाश्च विवाहेन संबंधः पृथिवीश्वराः॥ इति षएवबलादेनां दमाद्दातुमुद्यताः॥ बलिन ॥१६२॥

162A

स्तेयदि ततः कुर्वे तु न तु साधुत्वात्॥ मार्कंडेय उ०॥ तच्छ्रुत्वा सो दमः कोपकषायीकृतलोचनः॥ अवरोपयामास धनुः
चचनं चेदमब्रवीत्॥ ममापि भार्या बलिभिः पश्यतो ह्रियते यदि। तत्कुलेन भुजाभ्यां वा को गुणः क्षत्रजन्मनः॥ धिक्
मास्त्राणि धिक् शौर्यं धिक् शरान् धिक् शरासनं॥ धिक् मम मे दं कुले जन्म मरुत्तस्य महात्मनः॥ यदि भार्यामिमे मूढाः समादा
य चलान्विताः॥ प्रयांति जीवतो धिक् त्वां मम मध्ये यमनुष्यतां॥ इत्युक्त्वा तान्महीपालान् महानंदमुखान्बली॥ अब्रवीत्सु
तदा सर्वान् माहारिदमनो दमः॥ एषा तिष्ठोभना बाला चार्वंगी मदिरेक्षणा॥ किं तस्य जन्मना भार्या न यस्येयं कुलोद्भ
वा॥ इति संचिंत्य नरपालास्तथा यतत संयुगे॥ याथानि र्जित्य मामेतां पत्नीं कुरुत मानिनः॥ इत्याभाष्य तथा वीरः शरव
र्षममुंचत॥ छादयन् पृथिवीपालान् तमसेव महीरुहान्॥ ते पि वीरा महीपालाः शरशक्त्यृष्टिमुद्गरान्॥ मुमुचुस्तस्य यु
क्तोऽश्व दमश्चिच्छेद लीलया॥ ते पि तस्मिन् हि तान् बाणांस्तेषां चासौ शरोत्करान्॥ चिच्छेद पृथिवीशानां नरिष्यंतात्मजो मुने॥ व
र्तमाने तदा युद्धे दमस्य क्षितिपालजैः॥ प्रविवेश महानंदः खड्गपाणिर्यतो दमः॥ तमायांतं दमो दृष्ट्वा खड्गपाणिं महाहवे
मुमोच शरवर्षाणि वर्षाणीव पुरंदरः॥ तदस्त्राणि ततस्तानि शरजालानि तत्क्षणात्॥ महानंदः प्रचिच्छेद खड्गेनान्यान
वंचकीयत॥ ततो रोषात्समारुह्य दमस्य रथकूबरं॥ महानंदो महावीर्यो दमेन युयुधे सह॥ बाहुभ्यां युध्यमानस्य म
हानंदस्य लाघवात्॥ दमो मुमोचा हृदये शरं कालानलप्रभं॥ तल्लग्नमात्रमनष्टं भिन्ने तेन ततो हृदि॥ दमं प्रति स चिक्षेप
महानंदो सिमुज्ज्वलं॥ पतंतं चैव मुक्त्वा मार्गणाच्चापि चिच्छेद तं दमः॥ शिरो वेतसपत्रेण महानंदस्य चाच्छिनत्॥ तस्मि
न्हते महानंदे प्राचुर्येण पराङ्मुखाः॥ वपुर्वुः पार्थिवास्तस्यां वपुष्मान्स नराधिपः॥ दमेन युयुधे चासौ बलगर्वमदा
न्वितः॥ दाक्षिणात्यमहीपाल तनयो रणगोचरः॥ युध्यमानस्य तस्योग्रं करवालं स वेलघु। चिच्छेद सारथेश्चैव शिरः संख्य

मा० पु० ॥ तयाध्वजं ॥ छिन्नखड्गो गदां सोथ जग्राह बहुकंटकां ॥ तामप्यस्य प्रचिच्छेद करस्थामेव सत्वरः ॥ यावदन्यत्समादत्ते वपुष्मा
न्प्रवरायुधं ॥ तावत्क्षुरेण तं विध्वा दमो भूमाव पातयत् ॥ स पातितस्ततो भूमौ विह्वलांगः स वेपथुः ॥ विनिश्चक्रमति येद्वाह्
॥ १६२ ॥ भ्रव क्षितिपालजः ॥ तमालोक्य ततो भूपमयुद्धमतिमात्मवान् ॥ विसृज्यादाय सुमनां सुमनाः प्रययौ दमः ॥ ततो दशार्णाधि
पतिः प्रीतिमानकरोत्तयोः ॥ दमस्य सुमनायाश्च विवाहं विधिपूर्वकं ॥ कृतदारो दमस्तत्र दशार्णाधिपुतेः पुरे ॥ स्थित्वा स्वा
163 श्च दासा कालं प्रययौ स भार्यो निजमंदिरं ॥ दशार्णाधिपतिश्चास्मै दत्वा नागांस्तुरंगमान् ॥ रथान्गाश्च खरोष्ट्रांश्च दासीदा
सांस्तथा बहून् ॥ वस्त्रालंकारचापादि वरोपस्करमासनम् ॥ अन्यैस्तैश्च तथा भांडैः परिपूर्णं व्यसर्जयत् ॥ इति श्री
मार्कंडेयपुराणे दमचरिते नाम ॥ १२१ ॥ मार्कंडेय उवाच ॥ सतालक्ष्यातथा पत्नी सुमनोस महामुने ॥ प्रणनाम पितुः पादौ
मातुश्च क्षितिपालजः ॥ सा च तौ श्वसुरौ सुभ्रूर्नेनाम सुमना तदा ॥ ताभ्यां समागतो विप्र आदिशीभिरनंदितो ॥ महाजनो
त्सवाजनेन नरिष्यंतस्य वै पुरे ॥ कृतदारे च संप्राप्ते दशार्णाधिपतेः पुरात् ॥ संबंधिनं दशार्णेशं जितांश्च पार्थिवीश्वरान् ॥
श्रुत्वा पुत्रेण मुमुदे नरिष्यंतो महीपतिः ॥ सापि रेमे सुमनया महाराजसुतो दमः ॥ वनोद्यानवरोद्देशप्रासादगिरिसानु
षु ॥ अथ कालेन महता रममाणा दमेन सा ॥ अवाप गर्भं सुमना दशार्णाधिपतेः सुता ॥ सापि राजा नरिष्यंतो भुक्त्वा भोगा
न्महीपतिः ॥ वयः परिणतिं प्राप्य दमं राज्येऽभिषिच्य च ॥ वनं जगामेंद्रसेना पत्नी चास्य यशस्विनी ॥ वानप्रस्थविधा
नेन स तत्र समतिष्ठत ॥ दाक्षिणात्यः स दुर्वृत्तः संक्रंदनसुतो वने ॥ वपुष्मान्स मृगान्हंतुं यायावस्यापदानुगः ॥ स तं दद्द
ष्ट्वा नरिष्यंतं तापसं मलपंकिनं ॥ इंद्रसेनां च तत्पत्नीं तपसा चातिदुर्बलां ॥ पप्रच्छ कस्त्वं भो विप्रः क्षत्रियो वा वनेचरः ॥ वा ॥ राम: ॥
नप्रस्थमनुप्राप्तो वैश्यो वा मम कथ्यतां ॥ ततो मौनव्रती भूपो नाहितस्योत्तरं ददौ ॥ इंद्रसेना च तत्सर्वमाचष्टास्मै यथातथं ॥ ॥ १६२ ॥

163A

मार्कंडेय उ० ॥ ज्ञात्वा तं तु नरिष्यंतं वपुष्मान् पितरं रिपोः ॥ आपोसीति वदन् कोपात् ज्ञासु परिगृह्य च ॥ हा हेति चेंद्रसेना
यां वदंत्यां वाष्पगद्गदं ॥ चकर्ष कोपात्खड्गं च वाक्यं चेदमुवाच ह ॥ निर्जितः समरे येन येन मे सुमना हृता ॥ दमस्य तस्य
पितरं हनिष्येहं क्षतां रमः ॥ येनाखिलमहीपालपुत्राः कन्यार्थमागताः ॥ अवधूता हनिष्येहं पितरं तस्य दुर्मतेः ॥ अवैर
घस्तु तेपुमदो यस्य दुरात्मनः ॥ सदमो धारयत्वेनं हन्मितस्य रिपोर्गुरुं ॥ मार्कंडेय उवाच ॥ इत्युक्त्वा सद्दुराचारो वपुष्मा
नवनीयतिं ॥ क्रंदंत्यामिंद्रसेनायां शिरश्चिच्छेद तस्य सः ॥ ततो धिग्धिग्मुनिजना अन्ये चैव नवासिनः ॥ तमूचुः स च तं
हत्वा जगाम स्वपुरं वनात् ॥ गते तस्मिन् विनिष्क्रम्य इंद्रसेना वपुष्मतो ॥ प्रेषयामास पुत्रस्य समीपं शूद्रतापसं ॥ ग
त्वैया आख्युमे पुत्रं दं ब्रूहि वचो मम ॥ आमिन्नोद्यसि मन्दत्वोरे ताते प्रोच्यते त्र किं ॥ तथा पिवाच्यः पुत्रो मे यद्ब्रवीष्यति दुः
खिता ॥ लंघनामीदृशीं प्राप्तो विलोक्य तां महीपते ॥ मन्दत्रोधिकृतो राज्ञे च तुर्णो परिपाल्यकः ॥ त्वमाश्रमालि किं युक्तं
तापसान्यन्नरक्षसि ॥ भर्त्ता मम नरिष्यंतस्तापसस्तयसि स्थितिः ॥ विलपंत्या यया नाथं तथा नाथे स्थिते त्वयि स्थिते भ ॥ आ
कृष्य केशेषु बलाद्दपराधं विनान्टप ॥ हतो वपुष्मता ख्यातमिति तेन्टपतिर्भवान् ॥ एवं स्थिते तत् क्रियतां यया धर्मो न लु
प्यते ॥ तथा चरं नवक्तव्यं माताहं तापसोयतः ॥ पिता वृद्धस्तपस्वी च नापराधेन दूषितः ॥ निहतो येन यत्तस्य कर्त्तव्यं त
द्विधीयतां ॥ संति ते मंत्रिणो वीर सर्वशास्त्रार्थवेदिनः ॥ ते समालोक्य यत्कार्यमेवं न्टते कुरुष्व तत् ॥ नास्माकमधिकारो
त्र तापसानां नराधिप ॥ कुरु चेति क्षितो शस्त्वमेभवं न्टपतिमाषितं ॥ विदूरथस्य जनको यवनेन यया हतः ॥ तदा जव
न्टपस्य कुलं तेन विनाशितं ॥ जंभस्यासुरराजस्य पिता दृष्टो भुजंगमैः ॥ ते न्याय्यखिल पातालवासिनः पन्नगा हताः ॥
पराशरेण तं शक्तिं तं रक्षसा हतं ॥ श्रुत्वा दग्धं तया कृत्स्नं राक्षसानां च तत्कुलं ॥ अन्यस्यापि स्वपक्षस्य लंघना क्रियते हि

स्य

मा०पु० या॥ तां नालं क्षत्रियः सोहं किंपुनः पितृघातनं॥ नायं पिता ते निहतो नास्मिन् शस्त्रं निपातितं॥ त्वामेवात्र हतं मन्ये त्वयि तस्मि
न्निपातितं॥ किंमे स्पृहा किं शरणं न्यस्तं येन वनौकसा॥ तवमम पस्य पुत्रस्य मा विभेतु वदि मे तु वा॥ तदेवं लंघनायुक्तं यदस्मिंस्त्व
२६५ समाचर॥ वपुष्मति महाराज सभ्यस्य ज्ञातिबांधवे॥ इति संदिश्य संदेशमिंद्रसेना विसृज्य तां॥ पतिदेहमुपाश्लिष्य विवेशा
164 ग्निं मनस्विनी॥ इतिश्रीमार्कंडेयपुराणे दमचरिते॥ १२१॥ मार्कंडेय उवाच॥ तापसेन समाख्याते दमस्तेनापि तुर्वधे॥ क्रोधेनातीव
ज्वालहविषेवाग्निरुद्धतः॥ स तु क्रोधाग्निना वीरो दह्यमानो महामुने॥ करं करेण निष्पिष्य वाक्यमेतदुवाच ह॥ अनाथवद्व
मे तातो मयि पुत्रे च जीवति॥ घातितः सुनृशंसेन परिभूय कुलं मम॥ नापवादो जनेतस्याप्यवक्तव्यात् क्षमाम्यहं॥ दुर्वृत्तस्या
स्तोशिष्टानां पालने धिकृता वयं॥ पित्रा तं घातितं चापि दृष्ट्वा जीवंति शत्रवः॥ तत्किं मे तेन बहुना तात तत्याति किं मम॥ प्रला
पेनात्र यत्कृत्यं तत्संदेतत्करोम्यहं॥ यद्यहं तस्य रक्तेन देहोत्थेन वपुष्मतः॥ न करोमि गुरोस्तृप्तिं तत्प्रविक्ष्ये हुताशनं॥ त
च्छोणितेनोदककर्म तस्य तातस्य चान्येन निपातितस्य॥ मांसेन सम्यक् द्विजभोजनेन नो चेत्प्रवेक्ष्यामि हुताशनं तत॥ सहा
यमस्यासुरदेवयक्षगंधर्वविद्याधरसिद्धसंघाः॥ कुर्वंति चेत्तानपि शस्त्रपूगैर्भस्मीकरोम्येष तु पासमेतः॥ निःस्मर
माधार्मिकमप्रशस्तं तं द्रक्षिताल्यं समरे निहत्य॥ भोक्ष्यत्तमोहं पृथिवीं च कृत्स्नां वह्निं प्रवेक्ष्याम्यनिहत्य तं वा॥ सुदुर्मतिं ता
पसहृद्भौनव्रतस्य संशांतवधेन दिग्धं॥ हं तात मद्याखिलबंधुमित्रं पदातिहस्त्यश्वरथैः समेतं॥ एकोहमादाय धनुः सखड्
गो रथी तयेवाखिलं समाजे॥ करोमि तत्तत्कदनं समस्ताः पश्यंतु मे देवगणाः समेताः॥ यो यः सहायो भविताद्य तस्य मयासि रा
मे तस्य रणाय भूपः॥ तस्येव निःशेषकुलक्षयाय समुद्यतोहं निजबाहुसैन्यः॥ यदि कुलिशधरोसौ संयुगे देवराजः॥ पितृ
पतिरथवोग्रं दंडमुद्यम्य कोयात॥ धनपतिवरुणार्को रक्षितुं तं पतंते निशितशरखरौघैर्घातयिष्ये तथापि॥ नियमितव १

मताम 164A

दुष्टेषः कानने स्खंडिलो कानिपतितफलभक्षः सर्वभूतेषु मैत्रः ॥ अज्ञं पतिमयि पुत्रे घातितो येन तातः पिशितरुधिरलुब्धा
स्तस्य वै संतु गृध्राः ॥ मार्कंडेय उ० ॥ इति प्रतिज्ञाय तदा वधं तस्य दुरात्मनः ॥ कोपामर्षविवृत्ताक्षः स्पृशन्भूमावस्यं पाणिना ॥ हा
हतोस्मीति पितरं ध्यात्वा देवं विनिश्चितं ॥ प्रोवाच मंत्रिणः सर्वानानिनाय पुरोहितं ॥ दम उवाच ॥ यदत्र कृत्यं तद्ब्रूत तातो मे
निःसृतालये ॥ श्रुतं भवद्भिर्यत्प्रोक्तं तेन मद्दमयषिणा ॥ रुदस्तपस्वी सन्नयो वानप्रस्थव्रते स्थितः ॥ मौनव्रतधरोऽशस्त्रो
मान्मात्रा येंद्रसेनया ॥ प्रोक्तः संदृश्यतातेन यायात स्थेव वपुष्मते ॥ तेनापि खड्गमारुह्य जटां सव्येन पाणिना ॥ कृत्वाज
घान हा हा ताता लोकनाथेत्युक्तवत ॥ माता पि संदिश्य मां धिकशब्दं च यज्जीवितं ॥ मंदभाग्यं हतश्चोकं प्रविष्टा हव्यवाहनं ॥ स
मालिंग्य नरिष्यंतं सा प्रयाता [illegible]लयं ॥ सोहमद्य करिष्यामि यन्मात्रा समुदाहृतं ॥ हस्त्यश्वरथपादातं सैन्यं च परिकल्प्यतां ॥
अनिर्यास्य पितुर्वैरं अहं त्वापि तद्घातकं ॥ अच्छत्वा तु वचो मातुर्जीवितुं किमहोत्सहे ॥ मार्कंडेय उ० ॥ मंत्रिणस्तद्वचः श्रु
त्वा हा हेत्युक्त्वा तया च तत ॥ कृतवंतो विमनसः सभृत्यबलवाहना हना ॥ निर्ययुः सर्व्वेरः पुरस्कृत्यदमं न्यपा ॥ गृहीत्वा
चाशिषो विप्रात्त्रिकालज्ञात्सुरोधसः ॥ अहिराडिव निःश्वस्य दमं प्रायाद्वपुष्मतीं ॥ सीमापालादिसामंतान्निहत्य
स्याद्विशित्वरम ॥ सक्रंदनसुतेनापि दमोज्ञातो वपुष्मता ॥ आयातः सपरीवारः सामात्यः सपरिच्छदः ॥ अकंपितेन
मनसा स्वसैन्यान्यादिदेश ह ॥ दूतं च प्रेषयामास निर्गम्यान्नगराद्बहिः ॥ त्वं शीघ्रतरमागच्छ नरिष्यंतः प्रतीक्षते ॥ सभा
र्यः स्तत्रवं धोत्वं समायाहि मम अंतिकम ॥ इति मद्वाहुनिर्मुक्ताः पौषा सिताः ॥ भित्त्वा शरीरं संग्रामे पास्यंति रुधिरं तव
श्रुत्वा तु दमस्तत्सर्वं दूतप्रोक्तं ययौ त्वरन ॥ स्मृत्वा प्रतिज्ञां पूर्वोक्तां निश्वसन्नुरगो यथा ॥ आहूतः समरे चैव वपुष्मां
स्तेन विकत्थिना ॥ ततो युद्धमतीवासीद्दमस्य च वपुष्मता ॥ रथो च रथिना सार्द्धं हस्तिना हयिना हयी ॥ अयसयुध्यंत विप्र

बोनामघ त्रिदशा

परी

तावाण्णाःपि

॥मा०पु०॥ थैसयुद्धस्तुमुलोभवत॥ यस्यतांसर्वदेवानांसिद्धगंधर्वरक्षसां॥ चकंपेवसुधात्रस्तान्युध्यमानेदमेयुधि॥ नराज्ञोनरथो
नाश्वस्तस्यबाणसहस्रशः॥ ततोदमेनयुयुधेसेनाध्यक्षोवपुष्मतः॥ हृदिविव्याधचदमःइषुणागाढमतिकं॥ तस्मि
॥१६५॥ न्निपतितेसैन्यंपलायनपरंत्वभूत्॥ सचापितंततःप्राहदमःशत्रुंदमस्तदा॥ कयासिदुष्टपितरंघातयित्वातपस्विनं
अमात्यंत्ववतपस्यंतंक्षत्रियोसिनिवर्त्यतां॥ ततोनिवर्त्यसदमंयोधयामाससानुजः॥ सयुक्तःसहसंबंधिवांधवैर्युयुधेर
नमो थी॥ ततःशरासनामुक्तबाणैर्व्यापदशोदिशः॥ दमंचसरथंचाशुबाणजालैरदर्शयत्॥ ततःपितृवधोत्थेनकोपेनसदम
165 स्तदा॥ विच्छेदतांश्शरांस्तेषांविव्याधान्येश्चतानपि॥ एकैनैकेनवाणेनसप्तसुत्रांस्तथानुजान्॥ संबंधिनांधवान्मित्रा
नानयद्यमसादनं॥ वपुष्मान्सरथीक्रोधान्निहतात्मजबांधवः॥ युयुधेचसतेनाजौशरैराशीविषोपमैः॥ चिच्छेदस
स्यताञ्छराणानस्त्वास्यचमहामुने॥ युयुधातेतिसंरब्धौपरस्परवधैषिणौ॥ परस्परशराघातविच्छिन्नधनुषौत्वरं
तौ॥ गृहीतखड्गावुत्तीर्यैचिक्रीडितोमहाबलौ॥ दमःक्षणान्तरंध्यात्वानिहतंपितरंवने॥ केशेष्वाकृष्यचाक्रम्यंमिपा
दंधरणीतले॥ शिरोधरायांपादेनमुज्ञमुद्यम्यचाब्रवीत्॥ पश्यंतुदेवताःसर्वेमानुषाःसिद्धपन्नगाः॥ पाद्यमाने
हितद्दयंमत्त्रवंधोर्वपुष्मतः॥ एवमुक्त्वाचसदमोहृदयंचविदारयन्॥ स्नातुकामश्चसमसुरैःक्षतजेननिवारितः॥ ततश्च
कारतातस्यरक्तेनैवोदकक्रियां॥ ब्राह्मणांश्चप्राप्यसपितुःपुनःप्रायात्स्वमंदिरं॥ वपुष्मतश्चमांसेनपिंडदानंचकारह॥
ब्राह्मणान्भोजयामासरक्षःकुलसमुद्भवान्॥ एवंविधाहिराजानोबभूवुःसूर्यवंशजाः॥ अन्येपिशुधियःशूराय ॥राम॥
ज्वानर्मशास्त्रकोविदाः॥ विद्वांतेपद्ममामासान्नसंख्यातुमिहोत्सहे॥ एतेषांचरितंश्रुत्वानरःपापैःप्रमुच्यते॥ पक्षिलाऊचुः ॥१३६॥
एवमुक्त्वाथमुनयोमार्कंडेयोमहामुनिः॥ विसृज्यक्रोष्टुकिंमुनिंचक्रेमाध्याह्निकींक्रियां॥ अस्माभिश्चश्रुतंतस्मा ॥१॥
तव

165A

॥मा० पु०॥ ॥१६८॥

नमः॥ ब्राह्मणचर्या॥ तामसं॥ रैवतं॥ चाक्षुषं॥ वैवस्वतं॥ सूर्यसवर्णिकं॥ देवीमाहात्म्यं॥ पिहस्तोत्रं॥ अ
ग्निस्तवः॥ राज्यवर्द्धनोपाख्यानं॥ वंशानुक्रमणं॥ नाभागाख्यानं॥ वत्सप्रीचरितं॥ खनित्रचरितं॥ क
रंधमचरितं॥ अविक्षिच्चरितं॥ मरुत्तचरितं॥ नरिष्यंतचरितं॥ दमचरितं चेति॥ शुभमस्तु॥ सर्वं जग
तां पुरहितनिरतानवंतु भूतगणाः॥ दोषाः प्रयांतु शांतिं च सर्वत्र सुखी भवतु लोकः॥ इति श्रीमा
र्कंडेयपुराणस्यानुक्रमणिका समाप्ता॥ यादृशं पुस्तकं दृष्ट्वा तादृशं लिखितं मया॥ यदि शुद्धमशु
द्धं वा मम दोषो न दीयते॥ १॥ श्रीसंवत॥ १८ ॥ ५४॥ मिति श्रावणमासे कृष्णपक्षे नवमी॥ ९॥ भौमवासरे
लिखितं श्रीकाश्यां शीतलाघट्टोपरि लिखितं चुडामणब्राह्मणगवड॥ नमः स्करोति॥ शुभमस्तु॥

॥रामः॥ ॥१६८॥